शाङ्करदर्शनमर्मप्रकाशः

Śānkaradarśana Marmaprakāśa



पण्डितप्रवर कृष्णजोयिस्

पण्डितप्रवरकृष्णजोयिस् प्रणीतः

शाङ्करदर्शनमर्मप्रकाशः

Śānkaradarśana Marmaprakāśa

of

Panditapravara Krishna Jois

Edited by

Dr. M.L. Narasimha Murthy

Dean, Darśana Faculty

RASHTRIYA SANSKRIT VIDYAPEETHA

TIRUPATI

1996 250=00

Rashtriya Sanskrit Vidyapeetha Series No. 63

Śānkaradarśana Marmaprakāśa

of

Panditapravara Krishna Jois

Copyright reserved ©

First Edition : 1996

Copies : 500

Published by
Prof. S.B. Raghunathacharya
Vice-Chancellor
Rashtriya Sanskrit Vidyapeetha
TIRUPATI - 517 502.

Price Rs. 250 - 00

Laser Typeset and Printed at
Sri Maruthy Laser Printers
174, Peters Road
MADRAS - 600 014
✆ : 8522656, 8524256

॥ श्री शृङ्गेरी श्रीजगद्गुरुमहासंस्थानम् ॥

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य पदवाक्यप्रमाणपारावारपारीण
यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गयोगानुष्ठाननिष्ठ
तपश्चक्रवर्त्यनाद्यविच्छिन्न श्रीशङ्कराचार्यगुरुपरम्पराप्राप्तषड्दर्शनस्थापनाचार्य
व्याख्यानसिंहासनाधीश्वर सकलनिगमागमसारहृदय सांख्यत्रयप्रतिपादक वैदिकमार्गप्रवर्तक
सर्वतन्त्रस्वतन्त्रादिराजधानी विद्यानगरमहाराजधानी कर्णाटकसिंहासनप्रतिष्ठापनाचार्य
श्रीमद्राजाधिराजगुरुभूमण्डलाचार्य ऋष्यश्रृङ्गपुरवराधीश्वर तुङ्गभद्रातीरवासि
श्रीमद्विद्याशङ्करपादपद्माराधक श्रीजगद्गुरु श्रीमदभिनवविद्यातीर्थस्वामिगुरुकरकमलसञ्जात

॥ श्री जगद्गुरु शृङ्गेरी श्रीमद्भारतीतीर्थमहास्वामिभिः ॥

अस्मदत्यन्तप्रियशिष्यपण्डितप्रवर श्री कृष्णजोयिसविषये नारायणस्मरणपूर्वकं विरचिता आशिषस्समुल्लसन्तु ।

इह खलु आस्तिकनस्तिकभेदेन द्वैविध्यमापन्नेषु दर्शनेषु आस्तिकदर्शनान्येव उपादेयानीति निश्चप्रचं लोकानाम् । तत्रापि दर्शनान्तरापेक्षया साक्षान्निःश्रेयसहेतुप्रतिपादकत्वेन सर्वातिशायिमहिमानमावहत् वेदान्तदर्शनमेव दर्शनीयतमं दर्शनमिति नाविदितं न्यायरत्नावल्यादिग्रन्थपरिशीलिनाम् । तत्र वेदान्ता नाम प्राधान्येन उपनिषद एव परिगृह्यन्ते । तत्रोक्तस्य विषयजातस्य प्रपञ्चनमेव ग्रन्थान्तरेषु परिदृश्यते । तत्रापि संदिग्धानामर्थानां न्यायपूर्वकं निर्णयेन वेदविरुद्धमतनिरासेन ज्ञानसाधनप्रतिपादनेन सगुणनिर्गुणोपास्तिफलप्रदर्शनेन च भगवता बादरायणेन प्रणीतानां ब्रह्मसूत्राणां शारीरकमीमांसापदाभिधेयानां अस्ति महद्वैशिष्टचम् । तेषां च ब्रह्मसूत्राणां श्रीमच्छंकरभगवत्पांदाचार्यैः प्रसन्नगम्भीरं भाष्यं प्रणीतं, यदवलोक्य भगवान् बादरायण एव नितरां प्रसन्नस्वान्तोऽभूदिति श्रीमच्छंकरदिग्विजयादितोऽवगम्यते । भगवत्पादेभ्यः प्रागपि उपवर्षादिभिराचार्यैः ब्रह्मसूत्रेषु वृत्तयो विरचिता इति प्रतीयते । परन्तु भगवत्पादीयं भाष्यमेव तास्सर्वा अप्यतिशेत इत्यत्र न कापि संशीतिः । भाष्यव्याख्यानरूपेण पञ्चपादिकाभामत्यादिग्रन्थाः प्रादुरभूवन्। वार्तिककाराः सुरेश्वराचार्याः संक्षेपशारीरककाराः सर्वज्ञात्ममुनयश्च भाष्यकृतामेव सरणिमनुसृत्य ग्रन्थानरीरचन् । सर्वेपीमे जीवब्रह्मणोः पारमार्थिकमभेदं परमसिद्धान्ततया स्वीकुर्वन्तोऽपि प्रक्रियाविषये क्वचित् भिद्यन्ते । त इमे भेदा व्यवहारसिद्धविषयेष्वनादरनिबन्धना इत्यतस्सिद्धान्तस्य बाधका न भवन्ति । तदेवमत्यन्तं विस्तृतं वेदान्तदर्शनं लोकान् परिचाययितुं **श्री शाङ्करदर्शनमर्मप्रकाशः** इत्यभिधानं ग्रन्थं भवन्तः अरीरचन्निति, स च ग्रन्थः अधुना प्रकाशपदवीं नीयत इति च विज्ञाय नितरां मोदामहे। प्राचीनसम्प्रदायानुसारेण वेदान्तशास्त्रं सम्यगधीत्य बहोःकालात् शिष्यानध्यापयन्तो भवन्तः एतादृश- ग्रन्थरचनेन वेदान्ततत्त्वजिज्ञासूनां महतीमुपकृतिमतन्वन् ।

श्रीशारदाचन्द्रमौलीश्वरयोरसीमया कृपया ग्रन्थोऽयं जिज्ञासुजनपाणिपल्लवालंकारो भूयादित्याशास्महे ।

शृंगगिरिः
भावसंवत्सरचैत्रशुक्लप्रतिपत् इन्दुवासरः
11.4.94

इति नारायणस्मरणम्

Prof. S.B. RAGUNATHACHARYA
Vice Chancellor

Rashtriya Sanskrit Vidyapeetha
(Deemed University)
Tirupati - 517 507.

प्रकाशकीयम्

वर्तामहे वयमानन्दानामुपरि यत् राष्ट्रियसंस्कृतविद्यापीठद्वारा पण्डितप्रकाण्डैः सुगृहीतनामधेयैः श्रीमद्भिः कृष्णजोयिस्महोदयैः शाङ्करप्रस्थानरहस्य-प्रकाशनैदम्पर्येण सन्दृब्धस्य **''शाङ्करदर्शनमर्मप्रकाश''** इति प्रबन्धस्य प्रकाशनावकाशः संवृत्त इति । नेदमपरोक्षं प्रेक्षावतां यत् चतुर्विधेषु पुरुषार्थेषु धर्मार्थकाममोक्षसमभिख्येषु मोक्ष एव परमः पुरुषार्थ इति । मोक्षश्च ''न स पुनरावर्तत'' इत्यादिवाक्यैः प्रत्यपादि । परं श्रेयसोऽस्य मोक्षाख्यस्य पुरुषार्थस्य संपादनाय किं वा साधनं फलेग्रहि भवेदिति विचिकित्सायां ज्ञानमेव तदिति प्रतिपादयन्ति तावदास्तिकदर्शनान्यैककण्ठचेन । परं तु ज्ञानं तत्कीदृशमित्यत्र विभिन्नानि मतानि दरीदृश्यन्ते । तत्रापि साक्षात् ज्ञानप्रतिपादकत्वात् औपनिषदं दर्शनं तावदितरदर्शनान्यतिशेते । तच्च दर्शनं द्वैताद्वैतविशिष्टाद्वैतभेदभिन्नं समिन्धे ।

तत्राद्वैतदर्शनप्रवर्तकाः अप्रतिमप्रतिभासनाथाः श्रीशंकरभगवत्पादा जीवब्रह्मैक्ये चोपनिषदां ताप्तर्यमिति प्रातिष्ठिपन् । दर्शनान्तरापेक्षया वेदान्तदर्शनस्य वैलक्षण्यप्रतिपादने श्रुतिरहस्यप्रकाशने गम्भीरर्थविवरणे च शंकराचार्याणां प्रतिभा निरतिशयेति निश्चप्रचं वचः । शाङ्करदर्शनस्य रहस्यप्रकाशने बद्धादरैः त्रय्यन्त-निष्णातैः पण्डितप्रवरैः कृष्णजोयिस्महोदयैः प्रणीतेऽस्मिन् ''शाङ्करदर्शनमर्मप्रकाशा''भिधे प्रबन्धे उपनिषत्प्रस्थानत आरभ्य संक्षेपशारीरकान्तं यावत् प्रसिद्धानां ग्रन्थानां परिशीलनपुरस्सरं शंकराचार्याणामभिप्रायप्रकाशनाय विविधमतवैलक्षण्यप्रकाशनाय च विहितो यत्नः पात्रं बोभवीति प्रमोदस्य विपश्चिदपश्चिमानामिति विश्वसिति नश्चेतः ।

ग्रन्थस्यास्य संपादनाय अस्मद्विद्यापीठीयाद्वैतवेदान्तविभागाध्यक्षः दर्शनसङ्कायप्रमुखश्च डा.एम्.एल्.एन्. मूर्तिः प्रचोदितः, येन चाधुनिकग्रन्थ-संपादनपद्धत्या संपादनमस्य सुष्ठु निर्वर्तितमिति नूनमभिनन्दामो वयम् । भगवतोऽनुग्रहेण इतः परमप्यनेन नैके ग्रन्थाः वेदान्तादिशास्त्रेष्वेतादृशाः प्रकाशपदवीं नेया इति आशास्महे ।

प्रसङ्गेऽस्मिन् बहुधा विद्यापीठमुपकृतवद्भ्यः सर्वेभ्यः कार्तज्ञ्यं विनिवेद्य, मन्यामहे प्रबन्धोऽसावलंभविष्णुः भारतीयतत्त्वशास्त्रपारदृश्वनां विद्वत्तल्लजानां प्रीतिमुपजनयितुमिति ।

मर्मप्रकाशो लसतादद्वैतक्षेत्रमण्डनः ।
नृसिंहद्वारको नूनं कृष्णजोयिष्प्रकल्पितः ॥

इत्थं विदुषामाश्रवः

युव-गुरुपूर्णिमा — **एस्.बि. रघुनाथाचार्यः**
१२ जुलै १९९५ — कुलपतिः

श्रीगणेशाय नमः

उपोद्धातः

विदितमेवैतत् समेषामास्तिकानां यत् परमार्थतत्त्वदर्शनायैव प्रवृत्तानि नैकविधानि दर्शनानि इति । तत्तत्वदर्शनं च संततं जन्ममरणप्रवाहरूपे प्रपञ्चे संसरतः जीवस्य स्वस्वरूपसच्चिदानन्दात्मतावाप्तिरूपमिति सर्वाः विद्या उद्घोषयन्ति । अज्ञानान्धकारात् लोकानुद्दिधीर्षया कृतावतारो भगवान् वासुदेवः शोकमोहाभिभूतचेतसं पार्थमुद्दिश्य 'अध्यात्मविद्या विद्यानाम्' इति अध्यात्मविद्या सकलविद्यावरिष्ठा इति प्रावोचत् ।

यद्यपि 'नदीनां सागरो गति'रितिवत् दर्शनानां सर्वेषाम् आत्मतत्त्वबोधनाय प्रयासः तथापि न सर्वेषां दर्शनानां साक्षात्तदर्थप्रतिपादकत्वं किं तु परंपरया इत्यतः साक्षात् आत्मतत्त्वप्रतिपादनात् वेदान्तदर्शनम् इतरदर्शनापेक्षया मूर्धन्यं स्थानमधिगच्छति । अधिकारिभेदेन नानाविधेषु श्रेयोमार्गेषु सत्सु औपनिषद्दर्शनमवलम्ब्य स्वस्वरूपाविर्भावाय प्रयतमानानां, संदिहानानां साधकानां पुरुषाणां संदेहाः भ्रमाः महर्षिव्यासप्रणीतशारीरकमीमांसानिर्धारितन्यायैः तथा सनातनधर्मप्रतिष्ठापनार्थमवतीर्णैः ज्ञाननिर्धूतकल्मषैः यतिधुरंधरैः अनितरसाधारणप्रतिभासंपन्नैः भाष्यप्रणेतृभिः भगवत्पादशंकराचार्यैः प्रदर्शितमार्गैरेव परिहर्तव्याः । उपनिषदां साररूपा भगवद्गीता । उपनिषदः, ब्रह्मसूत्राणि भगवद्गीतेत्येतत्त्रयं प्रस्थानत्रयात्मना प्रथितं प्रसन्नगंभीरपदावलिभिः व्याख्याय बौद्धादिनास्तिकानां, द्वैतानां चान्येषां मतानामवैदिकत्वं प्रदर्श्य सनातनस्य वैदिकसिद्धान्तस्य पुनरुद्धरणेन साधकान् जिज्ञासून् मुमुक्षूंश्च अन्वग्रहीषुः श्रीशंकरभगवत्पादाः ।

परमप्रेमास्पदेषु चतुर्षु पुरुषार्थेषु धर्मार्थकामानामाद्यानां त्रयाणां 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयत' इत्यादिना आगमापायितया अनित्यत्वं प्रदर्श्य 'न स पुनरावर्तते' 'अनावृत्तिः शब्दात्' इत्यादिश्रुतिसूत्रोक्तरीत्या परमपुरुषार्थस्य मोक्षस्य नित्यत्वं प्राचीकशन् तत्त्वदर्शिनः ।

स च मोक्षः 'विद्वान् नामरूपाद्विमुक्तः' इत्युक्तरीत्या नामरूपोपलक्षितसकलजीवभेदविनिर्मुक्तब्रह्मात्मैक्यरूप इति 'तत्त्वमसि' 'अहं ब्रह्मास्मि' इत्यादिना उपनिषद्रहस्येनावगम्यते । तदुपायत्वेन ब्रह्मात्मैक्यज्ञानमेकमेव श्रुतिस्मृतीतिहासपुराणेषु जोघुष्यते 'विद्यया च विमुच्यते' 'ज्ञानादेव तु कैवल्यम्' इत्यादिना । ईदृशस्य मोक्षसाधनस्य ज्ञानस्य प्राप्तये चित्तशुद्धिरावश्यकीति चित्तशुद्धिसंपादनाय विविदिषोत्पत्तये च फलापेक्षाराहित्येनानुष्ठितानि कर्माणि सहकारीणि इति च प्रतिपाद्यते । तथा च श्रुतिः - 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा अनाशकेन' इति । 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति च आत्मदर्शनोपायत्वेन अन्तरङ्गसाधनत्वेन श्रवणमनननिदिध्यासनानि विहितानि । श्रवणं च वेदान्तविचारात्मकम् । अत एव 'अथातो ब्रह्मजिज्ञासा' इति सूत्रार्थविवरणावसरे ब्रह्मज्ञानाय वेदान्तविचारः कर्तव्य इत्यर्थः अभ्यधायि । तथा च वेदान्तविचारः ब्रह्मज्ञानफलक इति पर्यवस्यति । तदनुरोधेन वेदान्तविचाराय प्रवृत्ता ज्ञानिनः तत्त्वदर्शिनः शास्त्रज्ञाः पण्डिताः स्वस्वानुभवं पुरस्कृत्य स्वस्वबुद्धिगोचरं वा तत्त्वं ग्रन्थरूपेण विलिख्य अज्ञानिजनोद्धरणाय तथा दर्शनस्यास्य प्रवृद्धये च कारणीभूताः अध्यात्मप्रपञ्चे राराजन्ते। 'लक्ष्यं त्वेकं, पन्थानो भिन्ना' इति रीत्या अत्रापि विचारे विभिन्नमार्गानुसारेण अनेकप्रस्थानानि समुद्भूतानि । परं तेषां सर्वेषामाधारः तु शांकरभाष्यमेव । प्रामाण्यं च तेषां शांकरभाष्यानुसारितया इति च ज्ञेयम् । अतः अद्वैतदर्शनजिज्ञासुभिः इयं परिपाटी ज्ञातव्या चेत् तदभिवृद्धिक्रमः भाष्यकाराशयश्च ज्ञातव्य एव । विषयेषु प्रस्थानभेदेन वैमत्ये सत्यपि तत्तद्विषये भाष्यकृतामाशयः निर्विचिकित्सः क इति जिज्ञासूनामुपकाराय यथाशक्ति विव्रियतेऽत्रोपोद्घाते, विस्तरस्तु ग्रन्थे एव द्रष्टव्यः।

मायास्वरूपम्

मूलप्रकृतिः सत्त्वरजस्तमोगुणात्मिका काचन जडशक्तिरस्वतन्त्रा, ईश्वराश्रिता तत्त्वान्यत्वाभ्यामनिर्वचनीया वैष्णवी माया । अव्याकृतनामरूपात्मिका बीजशक्तिरिति चेयमेव । स्वात्मभूतेवाविद्यापरिकल्पिता, अध्यासादिकार्यानुमेया, अध्यासकाल एव जागरादौ तत्त्वेन परिकल्पिता जीवैः । सा चैका ईश्वरस्य

जगत्सृष्टिस्थितिसंहारादिकर्तृत्वे साधनीभूता शक्तिः, तदभावे सृष्टेरेवासंभवात् । आवरणविक्षेपशक्तिमती च सा, जीवान् प्रत्यावरकत्वात् अविद्येति गीयते जीवदृष्ट्या इयमेव मूलाविद्या कारणाविद्येति पदाभिधेया । ईश्वरदृष्ट्या तु अतत्त्वेन गृहीता विचित्रसृष्टिहेतुः मायेति चाभिधीयते । वस्तुतो माया नाविद्यातो भिद्यते, यथा अन्तःकरणमेव वृत्तिभेदेन अहंकारः बुद्धिः मनः चित्तमिति भेदेन व्यवह्रियते तथा सृष्टिप्रकरणे मायाशक्तिरीश्वरदृष्ट्या, संसारिप्रकरणे जीवदृष्ट्या अविद्येति भेदेन व्यवह्रियते । वाचस्पत्यादिमत इव नेयमविद्या प्रतिजीवं भिद्यते, नापि प्रकटार्थकारमत इवांशभूता मायायाः अविद्या, न वा सिद्धान्तलेशसंग्रहानूदितरीत्या मायाऽविद्ययोः भेदः संमतो भाष्यकृतां वार्तिककृतां वा आचार्याणाम् । 'मायां तु प्रकृतिं विद्यात्' 'अजामेकां लोहितशुक्लकृष्णा' मित्यादिबहुश्रुत्यनुसारिसूत्रतद्-भाष्यादिविरोधात् ।

इयमविद्या चैतन्याश्रिता, तदधीनसत्तास्फूर्तिमत्वात् चैतन्यविषयिणी च, तत्रैव जीवानाम् 'अज्ञोऽस्मी' त्यावरणोपलंभात् । ज्ञाने सति मिथ्यात्वेन गृहीता सती मुक्तात्मदृष्ट्या विलीना भवति अध्यस्तत्वात्, न पुनः घृतजतुवदग्निसंपर्केण द्रवीभावं विनाशं गच्छति, अस्मदादीनां बद्धानामद्यापि प्रपंचोपलब्धेः । प्रलयेऽपि न निरन्वय- विनाशमुपयाति मूलशक्तिरिति भाष्यकृत्संमतोऽयं पक्षः । एतेन भावरूपा अविद्या न भाष्यसंमता, भ्रमसंस्कार एव, सैव प्रकृतिमायादिपदवाच्येति नागेशभट्टोक्तिः, ज्ञानाभाव एवाविद्या, तेन ज्ञानाभावेनैव अध्यास इति वदतां वादः निरस्तः भाष्यविरोधात् ।

अध्यासस्वरूपम्

संसारव्यवहारकारणमध्यासः, आत्मानात्मनोः चेतनाहंकारयोः प्राथमिकः परस्परं तादात्म्येनाध्यासः, तयोरविवेकेन जायतेऽहमिति । एवमिन्द्रियप्राणशरीरेषु च भवत्यध्यासः, ततो ममेत्यध्यासः ।

अध्यासं प्रति अन्वयव्यतिरेकाभ्यामधिष्ठानाविवेक एव कारणमन्तःकरण-प्रत्ययात्मकोऽहमज्ञ इति, स एव सुप्तिमूर्छादौ सूक्ष्मभूता सती अविद्याशक्तिरिति गीयते । साऽपि बुद्ध्यादिं प्रति यथा तथैवाध्यासं प्रति परिणामिकारणं दोषतया

निमित्तं च, इदं परिणामित्वं गीतायां सप्तमे, क्षेत्राध्याये त्रयोदशे च भाष्यकारैः विवेचितम् ।

एवं मायापरिणतान्तःकरणवृत्तिरहंकाराध्यासोऽविद्येति ज्ञानिनां व्यवहारः । उक्ताध्यासो विषयाध्यासो ज्ञानाध्यास इति पंचपादीविवरणाभ्यां विवृतः । यद्यपि अध्यासभाष्ये न तथा विभक्तः तथापि संसारमात्रस्याध्यासत्ववर्णनं बृहदारण्यकभाष्ये प्रस्थानत्रये च दृश्यत इति नैव भाष्यविरोधः प्रसज्यते ।

जीवस्वरूपम्

अहंकारेन्द्रियशरीरेषु अहमित्यभिमन्यमानः शरीरेन्द्रियान्तःकरणोपाधिकश्चेतनो जीवः, स एव कर्ता भोक्ता शरीरेन्द्रियपंजराध्यक्षः अन्तः-करणोपाधिपरिकल्पितपरिच्छेदवान् संसरति संसारकान्तारे यावन्मोक्षम् । बुद्धिसंबन्धस्य तदितरसूक्ष्मशरीरसंबन्धस्य यावन्मोक्षमनपायात् ।

स च जीवो बुद्ध्युपाध्यन्तर्भासमानः बुद्ध्यवच्छिन्नः घटाकाशवत् कल्पितांशः ब्रह्मणोंऽश इत्युच्यते; न वस्तुतः सूर्यप्रतिबिंबवत् प्रतिबिम्बभूतः बिम्बप्रतिबिम्बभावनियमस्य बिम्बे रूपवत्वस्य आत्मनोऽन्यस्यासंभवात् सूत्रभाष्ये वास्तवप्रतिबिम्बतानिराकरणाच्च । अतः अन्तःकरणे अविद्यायां वा प्रतिबिम्बो जीवः इति वादो विवरणप्रकटार्थविवरणादिसंमतोऽपि न सूत्रभाष्यसंमतोऽयुक्तश्चेति अन्तःकरणावच्छिन्नश्चेतनो जीव इत्येव युक्तम् । प्रतिबिम्बकल्पस्तु भवति प्रतिबिम्बवत् उपाधिधर्मकर्तृत्वादिसमुपलब्धेः । वार्तिकोक्त आभासवादः काल्पनिकप्रतिबिम्बतोररीकारेण, न प्रतिबिम्बताभावेन वार्तिक एव वास्तवप्रतिबिम्बता निराकृतेः ।

ईश्वरस्वरूपम्

मायाप्रतिबिम्बितश्चेतन इति वा, बिम्बभूतः चेतन ईश्वर इति वा न स्वीक्रियते, प्रतिबिम्बभावस्यैव भाष्यानभिमतत्वात् । अतो मायारूपशक्तिविशिष्टः कूटस्थचेतन ईश्वरः सकलजगत्कारणं च । स एव साक्षी, स चैकः, न प्रतिशरीरं साक्षी भिद्यते ''एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः

सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च'' इति श्रुतेः । भाष्यवार्तिकयोः साक्ष्येकत्ववर्णनाच्च । एतेन वेदान्तपरिभाषासिद्धान्तलेशसंग्रहादौ दर्शितः साक्षिभेदो न श्रुतिभाष्यानुगुण इति मन्तव्यम् । पृथिव्यादिनियामकः सूत्रात्मनोऽपि नियामकः व्यवस्थिततत्तत्कार्यप्रवर्तक इति तस्यैवान्तर्यामिता कथ्यते ।

माया पुनरुपाधिविशेषणमीश्वरे, न पुनः द्वारकारणं सहकारिकारणं वा । 'मायिनं तु महेश्वरम्' इति 'सर्वोपेता च तद्दर्शनात्' इति श्रुतिसूत्राभ्यां भगवद्गीतासु च मायाविशिष्टचेतनस्यैवेश्वरत्वाभिधानात् । उक्तविशिष्टचेतन एव जगत उपादानं निमित्तं च, न केवलं ब्रह्म, नापि माया, 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इति सूत्रे भाष्ये चैवं निर्णीतत्वात् । एतेन शुद्धं ब्रह्मोपादानमित्यादिपक्षः सिद्धान्तलशसंग्रहादौ दर्शित न भाष्यानुगुण इति ज्ञेयम् ।

संसारबन्धः अध्यासमूलकः

ईश्वराधीनो जीवः स्वकर्मानुसारेण जननमरणादिदुःखमनुभवति । स्वप्नजागरयोरहंममाध्याससत्वे सुखदुःखभोगस्य तदभावे सुषुप्त्यादावनुपलम्भात्, अहंममाध्यासमूलक एव संसारबन्धः । अत्र सिद्धान्ते संक्षेपेण अविद्या, तत्कार्यं च संसारः, भोग्य-भोगसाधन-भोगलोक-शरीर-तद्भोगादिः सर्वोऽपि ब्रह्माण्डान्तर्वर्ती संसार इति सर्वोऽप्यविद्याकल्पितो जीवस्य, अत एव मिथ्या, ज्ञाने सति निवर्तते।

शुद्धं ब्रह्म नोपास्यम्

यद्यपि विद्यारण्यमुनिभिः पञ्चदश्यामुपास्यं शुद्धं ब्रह्मापीत्युक्तम् । तथापि भाष्यकारमते स्वतः प्रकाशस्य शुद्धब्रह्मणः 'तदेव ब्रह्मं त्वं विद्धि नेदं यदिदमुपासते' इति वारं वारमुपास्यतानिराकरणात् तात्पर्यतः न शुद्धमुपास्यं भवति । अत एवोंकारालम्बनोपदेशो मध्यमाधिकारिणाम् ।

शुद्धब्रह्मणो न वृत्तिविषयत्वमिति वाचस्पत्यादिमतं भाष्याननुगुणम् । फलव्याप्यत्वनिराकरणेऽपि स्वप्रकाशस्य वृत्तिव्याप्यत्वरूपविषयत्वाङ्गीकारात् । अखण्डाकारवृत्तिप्रयुक्तावरणभङ्गार्हतामात्रेण वृत्तिविषयत्वे स्वीकृते स्वप्रकाशताभंगस्यानवसरात् ।

वाक्यादेव साक्षात्कारः

भाष्यकारमते साक्षात्कारहेतुः वेदान्तवाक्यमेवाखण्डार्थविषयकम् । श्रवणमनननिदिध्यासनसंस्कृतान्तःकरणं तु केवलं सहकारि, उपनिषदैकसमधिगम्यत्वस्यान्वयव्यतिरेकाभ्यां निर्णयेन वाक्यमेव तत्र कारणम् । 'यन्मनसा न मनुत' इति मनसः सामान्यतः साधनताविशेषनिराकृतेः ।

श्रवणाद्यपि न सर्वस्य नियतं कारणम्, अधिकारिभेदेन तत् कारणमिति तु भाष्याभिप्रायः, हिरण्यगर्भस्य विना श्रवणादि आत्मसाक्षात्कारवर्णनात् । नियमविधिरपि श्रवणेऽधिकारिभेदमालक्ष्यैव ।

साक्षात्कारोऽपि ब्रह्मणोऽत्र नित्यसिद्धापरोक्षस्य विषययोग्यतानुसारेणेति सर्वत्र तदनुसारेण प्रत्यक्षलक्षणं विवरणादिवर्णितमेव साधु । ब्रह्मणि आवरणभंगं विहाय प्रमाणवृत्त्यापि प्रकाशस्यान्यस्य वा आगन्तुकस्यातिशयस्य भाष्येऽनंगीकृतत्वात् । एतदवगाहनाय समन्वयाधिकरणभाष्यं माण्डूक्यस्यागम-प्रकरणभाष्यं चावलोकनीयं जिज्ञासुभिः ।

महावाक्यस्थले सर्वत्र, तथा प्रपंचेन सह ब्रह्मणः सामानधिकरण्यबोधनस्थले बाधायां सामानाधिकरण्यमेव भाष्यसंमतम्; न पुनरभेदे सामानाधिकरण्यम् । पञ्चपादीविवरणादिसाधितमपि भाष्याननुमतम् । पञ्चदश्यां च भाष्यटीकयोः वैलक्षण्यं प्रदर्शितम् । अत्रार्थे 'व्याप्तेश्च समञ्जसम्' 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इति सूत्रभाष्यं प्रमाणम् । जीवस्य औपाधिकजीवत्वापोहेन विना ब्रह्मैक्योपदेशासंभवात्, फलतः स्वरूपैक्यं बाधायां सामानाधिकरण्येऽपि सिद्ध्यति, इत्यतः पर्यायतापादकैक्यसामानाधिकरण्यापेक्षया वरमिदमिति प्रतिभाति ।

शास्त्रस्य प्रत्यक्षादिविरोधपरिहारः

भाष्यकाराः स्वस्वविषयप्रतिपादने सर्वाण्यपि चक्षुरादीनि प्रमाणानि इति प्रतिपदं बोधयन्ति 'गतिसामान्यात्' इत्यादिसूत्रभाष्येऽन्यत्र च । तथा च प्रत्यक्षादिवदिदमपि शास्त्रं प्रत्यक्षानुमानाद्यविषये धर्मब्रह्मादौ स्वस्वविषये प्रमाणमेव, कुतो विरोधः प्रमाणान्तरेण? विरोधपरिहारार्थं च ब्रह्मसिद्धिभामत्यादिटीकाकारैः

पूर्वापरप्रमाणयोः प्राबल्यदौर्बल्यादिविचारेण श्रुतिबलीयस्त्वसाधनप्रयाससमाश्रयणं नात्यन्तमावश्यकम् । विविधप्रतिवादिमुखपिधानार्थं, संभावितशंकासमाधानार्थमेव वा तदिति प्रतिभाति ।

शास्त्रस्य स्वतःप्रामाण्यम्, तत्र नानुमानादिमुखनिरीक्षणम् । भगवन्निःश्वसितप्रायस्य सर्वज्ञकर्तृकत्वात् नित्यनिर्दोषत्वात् प्रामाण्यम्; इदमपि व्यावहारिकम्, तत्त्वबोधोत्तरं 'वेदा अवेदा' इति श्रुत्युक्तरीत्या अप्रमाणीभवन्ति सर्वे मुक्तदृष्ट्या, बद्धदृष्ट्या प्रमाणमेव ते यावन्मोक्षम् ।

सृष्टिविचारः

व्यवहारभूमावविद्यादशायां सृष्टिरिति स्वीक्रियते । सा च सृष्टिः सकल-जीवीयकर्मानुसारेण जीवभोगार्थमिति स्थितैव । परं तु तत्त्वबोधनाय सृष्टिवर्णनं परतत्त्वबोधप्रकरणे सर्वत्रोपनिषदि मुमुक्षोः तत्त्वबोधोपायो भवतीति, न तत्र परमतात्पर्यं, सृष्टिज्ञानस्य स्वतन्त्रस्य कस्मिन्नपि पुरुषार्थेऽनुपयोगात् । पुरुषार्थोपयोगितया श्रुतिषु कुत्राप्यविहितत्वात् । तत्र परमतात्पर्याभावादेव सृष्टिः श्रुतिषु क्वचित् क्रमेण, क्वचित्, व्युत्क्रमेण, क्वचिदक्रमेण युगपदपि वर्णिता । श्रुतिक्रमेण सर्वत्र क्रमनिर्णयेऽपि सृष्टिज्ञानस्य नान्यत्फलमस्ति । अतः स्वतन्त्रमोक्षफलवद्ब्रह्मज्ञानांगतया सृष्टिज्ञानमुपयोगि भवेदिति तत्फलेनैव फलवत् परम्परया । अथवा निष्फलमेव स्वार्थे । सृष्टेः परमार्थदशायां मिथ्यात्वोक्त्या निराकरणात् मिथ्यासृष्टेः पुरुषार्थो न सुवचः ।

सृष्टिश्च वेदान्ते ब्रह्मणः स्वरूपेणाप्रच्युतस्यैव सतो विचित्रपरिणामः । स चायथार्थ इति सूत्रभाष्ये निर्णीतोऽर्थः । अयमेव पञ्चदशीभामत्यादिटीकासु विवर्त इति व्यवहृतः ।

दृष्टिसमसमया सृष्टिः, दृष्टिरेव सृष्टिरिति सिद्धान्तलेशसंग्रहे दर्शिता या सा द्विविधाऽपि नांगीक्रियते, भाष्ये कुत्राप्यनुक्तेः, सृष्टदृष्टिरित्येवैका व्यवहारभूमौ यथायथं स्वीकृता सूत्रे भाष्ये च । यथानुभवमापामरसाधारणी सृष्टदृष्टिरेव बहुसंमता अबाधिता, यावद्विद्योदयं भागिनी, दृष्टिसृष्ट्यंगीकारः परं परमहंसानां

जीवन्मुक्तानां जातुचिदुचितः । बद्धानां तु नोचितः, अन्यथा यावन्मोक्षं लिङ्गशरीरस्वीकृतिसूत्रं 'तदापीतेः संसारव्यपदेशात्' इतीदं बाधितमेव स्यात् ।

यच्च भामत्यादिटीकासु विवर्त इति व्यवह्रियते सोऽयं विवर्तवादः सूत्रभाष्यानारूढ इति विमर्शकतरुणानामुद्घोषोऽपघोष एव । यद्यपि विवर्त इति शब्दो नास्ति सूत्रे भाष्ये वा तथाप्यर्थतोऽस्त्येवेति विवर्तवादः सूत्रकारभाष्यकारसंमत एव ।

श्रुतिमूलकश्च 'विवर्तते' इति प्रयोगदर्शनात् । परिणामपर्यायतया विवर्तशब्दः परिणामवाच्येवेति यदि वादिनामाग्रहः अथापि न सिद्धान्तहानिः, स्वरूपेण स्थितस्यैव मूलस्यातात्त्विकान्यथाभावरूपः परिणामः स इति विवक्षितार्थे पर्यवसानात् । अर्थतः शब्दतश्च केचित् वैयाकरणशिरोमणिभर्तृहरिवाक्यपदीयमूल इति वदन्ति, तदपि वेदान्तिमतानुयायि, यतः श्रुतिपथेनैव शब्दब्रह्मविवर्तवादं साधयति तत् इत्यतः श्रुतिमूलोऽयं सूत्रं भाष्यं चानुमोदते ।

एवं सूत्रितो मिथ्याभूतविचित्रपरिणामरूपो विवर्तः पञ्चपाद्या, भामत्या, विवरणादिना च उत्तरोत्तरं वितानमासादित इति निर्णयः ।

अयमेव मायावाद इति अध्यासवाद इति अनिर्वचनीयवाद इति च भण्यते, नैषां फलतो भेदोऽस्ति । बौद्धसंमतमायावादात् शून्यपर्यवसितात् भिन्नो विलक्षणोऽयं वैदिकमायावादः, अतो नायं सुगतसमयमूलकः, अपि तु वेदमूलकः, प्रकृत्यादौ मायापदव्यवहारस्य श्रुतावेवादावुपलब्धेः ।

जीवन्मुक्तिः विदेहमुक्तिश्च

जीवत इहैव ब्रह्मात्मैक्यसाक्षात्कारेण समूलाविद्यानिवृत्तौ नित्यशुद्धबुद्ध मुक्तस्वरूपाखण्डसच्चिदानन्दस्वरूपेणैव स्वात्मना स्थितिरेव मुक्तिः । न सगुणेश्वरभावापत्तिर्मुक्तिः, यावत् सर्वमुक्ति ईश्वरभावापत्तिर्वा न भाष्यकृत्संमता 'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति' 'अत्रं ब्रह्म समश्नुते, इत्यादिना निर्गुणब्रह्मभावापत्तिमुक्तेरेव प्रतिपादितत्वात्, सर्वजन्तुमोक्षपर्यन्तकालनिरीक्षणस्य

कुत्राप्यनुक्तेश्च । सिद्धान्तलेशसंग्रहानूदिताऽपि सा प्रौढचैव । बद्धात्मदृष्टचैव सगुणेश्वरभावापत्तेरेवान्ते सिद्धान्तितत्वाच्च । मुक्तदृष्टचैव निर्गुणभावापत्तिः ।

एवं मुक्तस्य ज्ञानबलात् संचितागामिपुण्यपापयोः विनाशाश्लेषसंभवेऽपि प्रक्रान्तफलस्य ज्ञानदेहदायिनः प्रारब्धकर्मणो यावत्फलभोगपर्यन्तं ज्ञानमात्रेण निवृत्त्यसंभवेन स्थित्यंगीकारात् जीवन्मुक्तिः सूत्रभाष्यसंमता, श्रुतिसंमता, स्थितप्रज्ञलक्षणप्रतिपादनात् गीतासंमता च । तथात्वे सत्येव शिष्यस्य ज्ञानिगुरुलाभः, अन्यथा 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' इति श्रुतेरानर्थक्यं स्यात् । प्रारब्धकर्मणः सर्वथा भोगेन क्षये विद्यमानदेहपातात् विदेहमुक्तिरित्युच्यते, न तु मुक्तिवैविध्याशयेन, मुक्तेरेकरूपताया एव सूत्रभाष्ययोः वर्णितत्वात् जीवन्मुक्तिस्वीकृतिः, निवृत्ताखिलसंसारभ्रमस्यापि विदुषः मोहकार्यं कंचित्कालं प्रारब्धकर्मभोगपर्यन्त-मनुवर्तत एव, तस्यापि भोगेन निवृत्त्या विद्यमानदेहपातो भविष्यति तदेव विदेहमुक्तिरिति, तदुच्यते 'तस्य तावदेव चिर' मित्यादिछान्दोग्य श्रुत्या ।

सम्यज्ज्ञानस्य प्रवृत्तिनिवृत्तियुगलनिरोधकत्वं तन्मूलभूताज्ञाननिवर्तनेनैव सिद्धमिति यथेष्टाचरणमपि तस्याज्ञानाभावेनैव निराकृतं भवतीति चैतदुभयमपि भाष्यानुगुणमेव ।

इयमेव जीवन्मुक्तिः सद्योमुक्तिरिति भाष्यकाराभिमता, न पुनः ज्ञानोत्तरमेव देहपातरूपा सद्योमुक्तिः, तथांगीकारे जगति ज्ञानिगुरोरेव लोपप्रसंगः सूत्रविरोधश्च । यावत्प्रारब्धकर्मणां भोगयपर्यन्तं जीवन्मुक्तस्य स्थितप्रज्ञस्य इयमेव जीवन्मुक्तिः सद्योमुक्तिरिति भाष्यकारभिमता, न पुनः ज्ञानोत्तरमेव देहपातरूपा सद्योमुक्तिः, तथांगीकारे जगति ज्ञानिगुरोरेव लोपप्रसंगः सूत्रविराधक्ष । यावत्प्रारब्धकर्मणां भोगपर्यन्तं जीवन्मुक्तस्य सिथितप्रज्ञस्य श्रुत्यनुसारेण सूत्रकारैरपि स्वीकृतत्वात् । नापि भास्कराचार्याभिमता सद्योमुक्तिः समीचीना । तन्मते 'ये साक्षादेव ब्रह्मोपासते तेषां सद्योमुक्तिः, साऽपि देहपातोत्तरमेव, अर्चिरादिमार्गद्वारैव प्राप्या' इति । शंकरमते तु उक्तजीवन्मुक्तिपदार्थसद्योमुक्तिः श्रुतिसंमता मार्गनिरपेक्षा चेति । 'न तस्य प्राणा उत्क्रामन्ति' इति श्रुत्या ब्रह्मविद

उत्क्रान्तिप्रतिषेधादेव गतिप्रतिषेध अर्थात्प्राप्तः, उत्क्रान्तिरहितस्य गत्यनुपपत्तेः, गतिहेतुकर्मबीजाभावादपि गत्यसंभवः, तदभावे कुतो मार्गापेक्षा? एतेन संक्षेपशारीरकोक्तसद्योमुक्तिरपि व्याख्याता । तत्र हि ज्ञानोदयमात्रेण निरवशेषसकलद्वैतनिवृत्तिरिति उदीरिता । अविद्या तत्कार्यरूपद्वैतस्य सर्वथा निवृत्तिस्वीकारादेव जीवन्मुक्तिशास्त्रं केवलमर्थवादमात्रमिति प्रथममुक्तम् । ततः जीवन्मुक्तिशास्त्रं विद्वद्विषयमेव वा भवतु इति चोक्तम् ।

ज्ञानोत्तरमपि अविद्यालेशसंभवात् मुख्यत एव जीवन्मुक्तिशास्त्रं सार्थकम् । जीवन्मुक्तव्यवहारोपयोगिनोऽविद्यालेशस्य स्वरूपं तु अन्यादृशम् । लेश-गन्ध-छाया-संस्कारादिशब्दाः नाविद्यारूपार्थकाः, किं तु बाधिताविद्याप्रतीति-मात्रार्थकाः, अनुवृत्तिमात्रं प्रतिभासमात्रम् । एवं ब्रह्मसिद्धिकारानूदितमोक्षवादा अपि षट् नाद्रियन्ते श्रुतिविरुद्धत्वात् । जीवन्मुक्ते चैतन्यस्वरूपातिरिक्ताः सत्यकाम-सत्यसंकल्पादिगुणाः सर्वेश्वरत्वसर्ववशित्वादिगुणाश्च मायौपाधिका अवास्तवा इति विज्ञेयम् । 'जक्षन् क्रीडन् रममाण' इति मुक्तात्मनि श्रुता अपि जक्षणादयो न तात्पर्येण ग्रहीतुमुचिताः, सर्वेऽप्यमी सर्वेत्मभूतज्ञानिस्तुतय एव श्रुतिपरामृष्टाः, बद्धजीवदृष्ट्या व्यवहारमात्रे परिकल्पिताः । यदि परमार्थाः तर्हि जीवस्य शुद्धब्रह्म-भावापत्तिः न स्यादेव ।

इत्थम् ईशितृत्व-कारणत्व-साक्षित्व-प्रमातृत्वादिकमपि सर्वं परस्पर-सापेक्षत्वादौपाधिकं न वास्तवमिति निर्विशेषब्रह्मभूते मुक्तात्मनि ग्रहीतव्यम् । एतेन संक्षेपशारीरकानूदितमीश्वरत्ववास्तववादिमतमपि सिद्धान्ते निरस्तं भवति । परं तु व्यावहारिकसगुणेश्वरभावापत्तिरूपमोक्षाभासे केवलोपासनालभ्ये जगद्व्यापार-विनाकृते शोभतेतमाम् । तदपि ज्ञानोत्तरं बाध्यत इति न विस्मर्तव्यम् ।

यद्याप्यस्मिन् ग्रन्थे उपनिषत्प्रस्थानत आरभ्य संक्षेपशारीरकपर्यन्तं प्रधानग्रन्थानां विमर्शनं विहितं तथापि अत्र भगवद्गीताविषये न किमपि विमृष्टम् । प्रायशः जिज्ञासूनां कृते अयं लोप इत्येव भायात् तथापि ग्रन्थगौरवभिया एव भगवद्गीता न पृथग्विमृष्टा अत्रेति अभिप्रयन्ति ग्रन्थकाराः । अत्र च ग्रन्थे उपनिषत्सु कथमलङ्कारसंयोजनेन प्रतिपाद्यविषयस्य हृद्यता सुलभग्राह्यता चास्तीति, ब्रह्मसूत्रेषु

च सूत्रसंयोजनरीतिः, पूर्वपक्षसिद्धान्तसूत्राणां विशेषः तद्रहस्यं चेत्यादिकं सविवरणं सप्रमाणं च यद्विमृष्टं तद्बुधजनमनोहारीत्यत्र न कापि संशीतिः । ततः परं पंचपादिका, भामती, विवरणं, ब्रह्मसिद्धिः, सुरेश्वरवार्तिकं, नैष्कर्म्यसिद्धिः, संक्षेपशारीरकमिति च ग्रन्थाः विस्तृतरूपेण विमृष्टाः । तत्रापि गौडपादकारिकाविमर्शनावसरे विधुशेखरभट्टाचार्याणां मतस्य च खण्डनावसरे च ग्रन्थकाराणां विमर्शनचातुरी पाठकान् संमोहयतीति नातिशयोक्तिः । प्रायशः सर्वत्र प्रमेयविषयाः समानाः, केवलं प्रक्रियाभेदेन भिद्यन्त इति तत्सर्वं सूक्ष्मेक्षिकया परिशील्य सूत्रभाष्यकृतोः संमतिः कुत्रास्ति कुत्र च नास्तीति विस्पष्टं प्रकाशयामासुः ग्रन्थकाराः । तत्र तत्र सन्दिग्धस्थले स्वीयाशयोऽपि प्राकाशि । ग्रन्थस्यास्यावलोकनेन प्रमेयविचारेषु तथा प्रस्थानत्रयभाष्ये च ग्रन्थकृतामप्रतिहता गतिः भाष्यकृदाशयवर्णनचातुरी चानितरसाधारणा प्रतीयते । अत एव दिवंगतैः पण्डितराज वि. एस्. रामचन्द्रशास्त्रिभिः अयं ग्रन्थः अवलोकितः प्रशंसितः प्रकाशपदवीं प्राप्नोतु इत्याशासितश्च । ग्रन्थोऽयं सारस्वतसेवातत्पराणाम् उपयोगाय भवेत् इति विश्वस्यते ।

ग्रन्थकर्तृपरिचयः

अस्ति कर्णाटेषु चतुराम्नाथ पीठेष्वन्यतमत्वेन प्रथितं श्रृङ्गेरीक्षेत्रम् । तत्र 1-8-1912 तमे क्रैस्ताब्दे विद्याविनयसदाचारादिगुणगणालंकृतानां कोड्डूरु सुब्बाजोयिस् महोदयाना- मात्मजत्वेन के कृष्णणोयिस् महोदयाः प्रादुर्भूताः । माता च श्रीमती शेषम्मा ।

इमे श्रृङ्गेरीसद्विद्यासञ्जीवनीसंस्कृतपाठशालायां वेदाध्ययनेन साकं नाटकान्तसाहित्यविद्यामधिगत्य ततः मैसूरमहाराजसंस्कृतकलाशालायां न्याय-मीमांसाअलंकारशास्त्राण्यधीत्य ततः बेङ्गलूरशंकरमठीयगीर्वाणविद्याभिवर्धिनी-कलाशालायामद्वैतवेदान्तशास्त्रमधिगम्य विद्वत्परीक्षामुत्तीर्याचार्यतामवापुः ।

प्रखरप्रतिभावतां के. कृष्णजोयिस् महाभागानां पाण्डित्येनावर्जितमानसाः तदानीन्तन श्रृङ्गेरीपीठाधीश्वराः श्री श्री चन्द्रशेखरभारतीस्वामिचरणाः 1948 तमे वर्ष एव श्रृङ्गेरीपीठस्य 'आस्थानविद्वान्' पदे न्ययुञ्जत । 1959 तमे वत्सरे

बेङ्गलूरुशंकरमठीयगीर्वाण- विद्याभिवर्धिनीकलाशालायां वेदान्तप्राध्यापकपदं विभूषयन्तः परःशतान् विद्यार्थिनः अध्याप्य अध्यापनेन समं ग्रन्थतल्लजान् रचयन्तो विराजन्ते । एतेषामध्यापनकलाकौशलं छात्रेषुज्ञानसंक्रान्तिविधानं चानितरसाधारणम् । तच्छात्रेषु ग्रन्थस्यास्य संपादकोऽप्यन्यतमः ।

के. कृष्णजोयिस् महाभागाः गैर्वाण्यां कर्णाटभाषायां च अनेकानि ग्रन्थरत्नानि उपायनीकृतवन्तः । तेषु चेमे प्रधानाः-

1. शांकरदर्शनिमर्मप्रकाशः (संस्कृते)
2. शरन्नवरात्रचम्पूः (संस्कृते)
3. मूलाविद्याविमर्शः (संस्कृते)
4. मूलाविद्याभाष्यवार्तिकसंमता (संस्कृते)
5. विवेकचूडामणिः (कन्नडानुवादः)
6. दशश्लोकी (कन्नडानुवादः)
7. धर्मशास्त्रकरदीपिका (कन्नडे)

न केवलमध्यापने शास्त्रार्थेऽपि एते मूर्धन्यतमाः । बहुभिः मठाधीशैः 'पण्डितप्रवर' 'वेदान्तभूषण' इत्यादि बिरुदप्रदानेन इमे सभाजिताः । एवमेतेषां शास्त्रप्रौढिमानं ग्रन्थरचनापाटवं च दर्शं दर्शं 1989 तमे वत्सरे भारतशासनेन इमे विद्वद्धौरेयाः सादरं राष्ट्रपति- पुरस्कारेण संमानिताः ।

सुरसरस्वतीसमाराधनधृतैकव्रताः इमे स्वीये 83 तमे वयस्यपि विदुषः प्रौढग्रन्थानध्यापयन्तः विराजन्ते ।

कृतज्ञताविष्करणम्

प्रसन्नगंभीराशीर्वचनप्रदानेन ग्रन्थस्यास्य गरिम्णः कारणीभूतेभ्यः अनितरसाधारण- प्रतिभासंपन्नेभ्यः श्रृङ्गेरीशारदापीठाधीश्वरेभ्यः जगद्गुरु श्री श्री

भारतीतीर्थमहास्वामिचरणेभ्यः साज्जलिबन्धं सप्रश्रयं कार्तज्ञ्यपूर्वकं प्रणतिततयः समर्प्यन्ते ।

ग्रन्थस्यास्य मुद्रणायानुमतिं प्रदाय प्रकाशकीयप्रदानेन च अनुगृहीतवद्भ्यः प्राच्यप्रतीच्यविद्याधुरंधरेभ्यः विद्यापीठकुलपतिपदमधितिष्ठद्भ्यः प्रो. एस्.बि. रघुनाथाचार्यमहोदयेभ्यः स्वीयमाधमर्ण्यमाविष्करोमि ।

पस्तकस्यास्य प्रकाशने प्राक्तनप्रभारीकुलपतिमहोदयानां प्रो.आर्. महादेवशर्मणां साहाय्यमविस्मरणीयमित्यतस्तेभ्यः अधमर्णोऽयं जनः ।

पुस्तकस्यास्य प्रकाशनकर्मणि तदा तदा उपयुक्तसूचनादिना उपकृतवद्भ्यः साहित्यसंस्कृतिसङ्कायप्रमुखेभ्यः प्रवाचकेभ्यः मित्रवर्येभ्यः डा. लक्ष्मीनरसिंहभट्टमहोदयेभ्यः तथा आङ्ग्लवरिष्ठव्याख्यात्रीभ्यः श्रीमती. एम्. शारदामहाभागाभ्यश्च कार्तज्ञ्यं विनिवेदयामि ।

पुस्तकमिदं सुष्ठु मुद्राप्य दत्तवद्भ्यः मद्रास् मारुतिप्रिन्टर्स निर्वाहकेभ्यश्च कार्तज्ञ्यं प्रकटयामि ।

अन्ते च पुस्तकस्यास्य प्रकाशनकर्मणि प्रत्यक्षपरोक्षरूपेण साहाय्यमाचरितवद्भ्यः सर्वेभ्यः कृतज्ञतां निवेद्य अनवधानजनितदोषाः क्षन्तव्याः सूचनीयाश्चेति प्रार्थयते

विद्वदनुचरः

डा. एम्.एल्. नरसिंहमूर्तिः

विषयानुक्रमाणिका

पृष्ठसंख्या

	प्रकाशकीयम्	vi
	उपोद्घातः	viii
	विषयानुक्रमणिका	xxi
1.	मङ्गलाचरणम्	1
2.	वेदान्तशब्दार्थविचारः	2
3.	वेदान्तानां प्रादुर्भावः	2
4.	वेदस्य नित्यत्वविचारः	4
5.	प्राचीनाः वेदान्ताः अर्वाचीनाश्च	7
6.	प्राचीनवेदान्तानां पट्टिका	10
7.	अर्वाचीनवेदान्तानां पट्टिका	11
8.	वेदान्तानां प्रामाण्यम्	13
9.	वेदान्तानामप्रामाण्यनिरासः	15
10.	परब्रह्मणो वेदान्तैकसमाधिगम्यत्वम्	16
11.	उपनिषत्प्रस्थानम्	17
12.	उपनिषदां शैली	18
13.	उपनिषदां सूत्रतुल्यत्वं दुरधिगमत्वं च	19
14.	उपनिषदामुपदेशभङ्गिभेदः	20
15.	वेदान्ते तर्कस्य द्वितीयं स्थानम्	27
16.	श्रुत्यविरोधितर्कस्यैव ग्राह्यत्वम्	30
17.	अनुमानयुक्त्योर्वैलक्षण्यम्	32
18.	वेदान्तेषु भागद्वयम्	34
19.	बादरायणः, सूत्रप्रस्थानं च	36

20.	बादरायणो वेदव्यासादनन्यः	37
21.	गीताभारतसूत्रोदयकालविमर्शः	38
22.	सूत्रप्रस्थानात् प्रागुपनिषदां स्थितिः	44
23.	सूत्रप्रादुर्भावकालः	45
24.	ब्रह्मसूत्रस्वरूपं, तन्नामभेदश्च	46
25.	सूत्राणामधिकरणरूपत्वम्	47
26.	सूत्रसंनिवेशक्रमे अपरो विशेषः	53
27.	सूत्रप्रस्थानस्य वृत्तयः	62
28.	आदिमाध्यायार्थसंग्रहः	73
29.	द्वितीयाध्यायार्थसंग्रहः	73
30.	तृतीयाध्यायार्थसंग्रहः	75
31.	चतुर्थाध्यायार्थसंग्रहः	77
32.	माध्यस्थ्येन सूत्रपरामर्शेऽद्वैतसिद्धान्तानुगुण्यम्	81
33.	गौडपादाः तत्कारिका च	85
34.	गौडपादनामविचारः	87
35.	विधुशेखरभट्टाचार्याणां विमर्शः	89
36.	गौडपादेभ्योऽपि प्राग्विद्यमानमतभेदाः	101
37.	गौडपादीयप्रकरणसारः	103
38.	आगमप्रकरणसारः	103
39.	वैतथ्यप्रकरणसारः	106
40.	अद्वैतप्रकरणसारः	108
41.	अलातशान्तिप्रकरणसारः	113
42.	द्वैतिनां परस्परविरोधप्रदर्शनम्	114
43.	बीजाङ्कुरवदनादित्वशङ्कासमाधानम्	116

44.	बाह्यार्थप्रतिक्षेपिविज्ञानवादिमतम्	116
45.	सदृष्टान्तं परमार्थ दर्शनप्रपञ्चनम्	118
46.	संसारोत्पत्तिविनाशौ संवृतिमात्रसिद्धौ	119
47.	स्वप्रक्रियाप्रदर्शनम्	121
48.	मुमुक्षविज्ञेयानि	121
49.	श्रीसुरेश्वराचार्याः, तदीयवार्तिकादिग्रन्थाश्च	123
50.	वेदान्तप्रक्रियाविषये सुरेश्वरदर्शिता विशालदृष्टिः	130
51.	वार्तिकप्रस्थाने मुख्यविषयाः	133
52.	अज्ञाननिमित्तं साक्षित्वं, साक्षिस्वरूपं च	138
53.	साक्षी सौषुप्तानुभवसिद्धः	140
54.	रजतज्ञानस्य स्मृतित्वनिरासः	142
55.	अविद्याद्वयवादः तत्खण्डनं च	143
56.	वार्तिकमते वेदवाक्यप्रामाण्यम्	144
57.	इतिहासादिप्रामाण्यम्	145
58.	लोकवादवैलक्षण्यं महावाक्यस्य	146
59.	अवाच्यब्रह्मणो महावाक्यबोध्यत्वशङ्का, तन्निरासश्च	147
60.	मोक्षस्वरूपम्	148
61.	मोक्षसाधनविचारः	149
62.	निदिध्यासनस्वरूपम्	151
63.	वार्तिकमते आभासवादः	153
64.	नैष्कर्म्यसिद्धिः	154
65.	नैष्कर्म्यसिद्धिनामधेयार्थः	154
66.	ग्रन्थस्वरूपस्थितिः	155
67.	वार्तिक इवात्रापि मण्डनाचार्यमतवैमत्यम्	161

68.	नैष्कर्म्यसिद्धिटीका	163
69.	बृहदारण्यकवार्तिकटीका	163
70.	ब्रह्मसिद्धिः	165
71.	स्वग्रन्थरचनाप्रयोजनम्	166
72.	ग्रन्थकर्तुर्वैशिष्ट्यम्	167
73.	ब्रह्मवृत्त्यानन्दस्याभावरूपत्वमङ्गीकृत्यापि अद्वैताविघातः	168
74.	उक्तमतभेदानां खण्डनसंक्षेपः	168
75.	द्वितीयमतखण्डनभङ्गिसंक्षेपः	169
76.	तृतीयमतखण्डनभङ्गिसंक्षेपः	169
77.	चतुर्थमतखण्डनभङ्गिसंक्षेपः	170
78.	पञ्चममतखण्डनभङ्गिसंक्षेपः	170
79.	अविद्याविवेचनम्	171
80.	अविद्यानिवर्तनोपायाः	173
81.	ब्रह्मणः शब्दात्मत्वसमर्थनम्	173
82.	ब्रह्मणः परिणामित्वपरिणामिनित्यत्वयोः खण्डनम्	174
83.	प्रपञ्चप्रविलयमुखेन ब्रह्मनिरूपणे सप्तपक्षखण्डनम्	176
84.	मण्डनमिश्राणां भगवत्पादानां चाद्वैते मतभेदः	180
85.	भावाद्वैतवादः	181
86.	मोक्षविचारः	183
87.	परमसिद्धान्तः	185
88.	ज्ञानानन्तरं देहपातशङ्का समाधानं च	186
89.	पञ्चपादिका	190
90.	टीकायाः प्राचीनतमत्वे आद्यत्वे च प्रमाणम्	191
91.	वर्णकविभागः	192

92.	जीवस्वरूपं, जीवभेदश्च	195
93.	संसारमूलभावाविद्याविषयोपक्षेपः	195
94.	प्रकृतिपुरुषविभागहेतुरविद्या	196
95.	अध्यासलक्षणविवेचनम्	197
96.	रज्जुसर्पोदाहरणाशयः	200
97.	तर्कयुक्त्योरवैलक्षण्यम्	201
98.	विद्याया अविद्याग्रन्थ्यपनयनप्रकारः	202
99.	अखण्डार्थत्वविवेचनम्	202
100.	पञ्चपादिकाकृतविवर्तवादः	203
101.	शास्त्राप्रामाण्यशङ्का, तन्निरासश्च	203
102.	प्रतिपत्तिविधिनिरासः	204
103.	पञ्चपादिकाविवरणम्	206
104.	सूत्रावतरणम्	207
105.	भाष्योक्तस्याहंममाध्यासस्वरूपस्य विवेचनम्	209
106.	अध्यासस्य अनाद्यनिर्वचनीयभावरूपाविद्या उपादानम्	210
107.	अज्ञानस्य भावत्वे प्रमाणोपन्यासः	211
108.	अध्यासस्य लक्षणं प्रमाणं च	213
109.	बाधस्वरूपनिर्वचनम्	214
110.	अध्यासलक्षणसमन्वयः	214
111.	अनुभवस्वरूपे मतभेदनिरासः	216
112.	सुषुप्तानुभवतोऽप्यहंकारस्यानात्मत्वम्	217
113.	अहंकारस्योपादाननिमित्तादिवर्णनम्	218
114.	जीवस्वरूपम्	218
115.	अवच्छेदवादे दोषोद्भावनम्	219

116.	प्रमात्रादिव्यवस्था	219
117.	प्रतिकर्मव्यवस्था	220
118.	प्रत्यभिज्ञाविषयत्वेनात्मनः स्थायित्वसाधनम्	222
119.	ईश्वरस्वरूपं तल्लक्षणं च	224
120.	उपादानत्वपरीक्षणम्	225
121.	प्रपंचसृष्टेर्विवर्ततासमर्थनम्	227
122.	युक्त्यनुमानयोर्वैलक्षण्यम्	229
123.	भास्करीयमतखण्डनम्	230
124.	शास्त्रयोनित्वेन सर्ववित्वसमर्थनम्	230
125.	महावाक्यार्थविचारः	232
126.	वेदान्तवाक्यानां ब्रह्मबोधनप्रकारवैलक्षण्यम्	233
127.	भामतीप्रस्थानम् वाचस्पतिमिश्राश्च	235
128.	मिश्राणां ग्रन्थशैली तद्वैशिष्ट्यं च	236
129.	भामतीकृतकार्यकारणरूपाविद्याद्वयम्	238
130.	स्वयंज्योतिष्ट्वं शुद्धस्यैव नोपहितस्य	243
131.	जीवस्वरूपम्	243
132.	भेदाभेदवादिभास्करमतखण्डनम्	244
133.	भामतीपञ्चपादिकयोः मूलभाष्यव्याख्यानवैषम्यपरामर्शः	246
134.	अनिर्वचनीयतावादे वाचस्पत्याशयः	247
135.	संक्षेपशारीरकम् सर्वज्ञात्मुनयश्च	249
136.	तन्महिमा ग्रन्थशैलीतोऽर्थतश्च	250
137.	ग्रन्थे विषयविभागः	250
138.	प्रथमाध्यायविषयसंक्षेपः	253
139.	अध्यासस्य सकारणं निरूपणम्	253

140.	अध्यासे अन्योन्याध्यासे च प्रमाणम्	254
141.	प्रौढ्या सादृश्यादिसामग्रीवर्णनम्	254
142.	अनिर्वचनीयवस्तुसाधनम्	256
143.	शास्त्रस्य निवृत्तिशास्त्रत्वे प्रवृत्तिशास्त्रत्वे च मतभेदः	257
144.	पूर्वतन्त्रात् वैशिष्ट्यम्	258
145.	वाक्याप्रामाण्यशङ्का	259
146.	तदप्रामाण्यपरिहारः	260
147.	अखण्डवाक्यार्थप्रतिपादनक्रमः	264
148.	एकपदलक्षणयापि अखण्डबोधसमर्थनम्	266
149.	एकपदलक्षणयापि अखण्डबोधसमर्थनम्	267
150.	लक्षणां विनापि अखण्डार्थत्वम्	268
151.	शास्त्रप्रामाण्ये आक्षेपपरिहारौ	271
152.	ब्रह्मणो जगत्कारणत्वे मतभेदः	273
153.	लक्षणायाः विशेषविचारः	275
154.	वेदान्तानां कार्यपरत्वशङ्कानिरासः	277
155.	ज्ञाने विध्यसंभवनिरूपणम्	278
156.	द्वितीयाध्यायविषयसंक्षेपः	279
157.	शाक्यभिक्षुसिद्धान्तवत् साम्यापादनं तत्परिहारश्च	281
158.	तदनन्यत्वमिति सूत्रस्य मुन्याशयः	282
159.	वाचारम्भणवाक्यविचारः	283
160.	परिणामवादस्वरूपम्	284
161.	आरोपादिदृष्टिभेदवर्णनम्	285
162.	वेदान्तानां बाधकत्वम्	288
163.	बन्धमोक्षव्यवस्था	288

164. मायाया अविद्यात्वमनुमानगम्यत्वम् 292
165. एकजीववादे बन्धमोक्षव्यवस्था, शास्त्रप्रामाण्यं च 295
166. मुक्तौ को विशेषः 297
167. तृतीयाध्यायसंक्षेपः 297
168. जीवपदार्थशोधनप्रकारः 299
169. स्वप्नविचारप्रसङ्गेन मायाविचारः 302
170. एकदेशिपक्षनिरासः 304
171. अज्ञानमपि भावरूपं, न प्रागभावरूपम् 305
172. सुषुप्तिविचारः 305
173. आत्मनः साक्षित्वप्रमातृत्वविचारः 306
174. तत्पदलक्ष्यार्थनिरूपणम् 307
175. भेदाभेदविषये विचारः 309
176. तत्त्वमोर्वाच्यार्थशरीरप्रदर्शनम् 312
177. निर्गुणतत्त्वबोध एव पुरुषार्थलाभहेतुः 313
178. अन्तरङ्गबहिरङ्गसाधनानि 314
179. चतुर्थाध्यायसंक्षेपः 316
180. सद्यो मुक्तिः 317

ॐ परब्रह्मणे नमः

शाङ्करदर्शनमर्मप्रकाशः

हेरम्बं योगिवर्यस्य स्तम्भे दर्शितविग्रहम् ।
कंचिदेकं भजे विघ्नप्रशमार्थं महाद्भुतम् ॥ १ ॥

प्रस्थानत्रयभाष्यवाङ्मयमिदं श्रीशांकरं पश्यतां
गाम्भीर्यातिशयप्रसादगुरुतानैर्मल्यमुख्या गुणाः ।
तुङ्गायाः स्मरणं विदध्युरवशं गङ्गातटिन्या अपि
श्रीलोकोत्तरवाग्विभूतिमहितं तं शंकरं चिन्तये ॥ २ ॥

नास्तिक्यगाढतमसा जगतीतलेऽस्मि-
न्नन्धीकृते विमलतत्त्वमयं प्रदीपम् ।
आन्ध्यं न्यवारयदशेषजनस्य लोके
प्रज्वाल्य शंकरगुरुर्जयति प्रभावैः ॥ ३ ॥

गंगातीर्थमिव स्मर्तृवक्तृश्रोतृसुपावनम् ।
प्रत्यग्दृष्टिं सदा वन्दे चन्द्रशेखरभारतीम् ॥ ४ ॥

गुरुं च दक्षिणाम्नायपीठालंकरणं परम् ।
विद्यातपोनिधिं विद्यातीर्थाह्वयं गुरुं भजे ॥ ५ ॥

कराम्बुजप्रसूनं च विद्यातीर्थजगद्गुरोः ।
गुरुं च भारतीतीर्थं विद्यानिधिमहं भजे ॥ ६ ॥

विराजमानं श्रृङ्गेरीगुरुपीठे तपोनिधिम् ।
न्यायवेदान्तजलधेः पारगं गुरुमाश्रये ॥ ७ ॥

नवीनवेङ्कटेश्वरशास्त्रिनाम्नाविजृम्भितस्वप्रतिभाप्रभावम् ।
विद्यागुरुं तं मनसा स्मरामि यशः शरीरेण विराजमानम् ॥ ८ ॥

वेदानामन्तो निर्णयः परतत्त्वगोचरः यत्रास्ति सः वेदभागः वेदान्तः । ईश्वरसृष्टौ सर्वेषां वेदानां निःश्वसितवदप्रयत्नेन लीलान्यायेन युगपदाविर्भूतत्वात्[1] । वेदसृष्टिसमनन्तरमन्ते सृष्टिविषयीभूतो ग्रन्थभागः वेदान्त इति केषांचन कथनमसंगतमेव । ईश्वरसृष्टत्वात् वेदाः पौरुषेयाः इत्याशंकायाम् आस्तिकशिरोमणिः जैमिनिः ''आख्याः प्रवचनात्''[2] इति अपौरुषेयत्वं सिद्धान्तयामास । तदनुरोधेन वेदान्तानामुपनिषदाह्वयानामपि अपौरुषेयत्वं सिद्धम् ।

उपनिषत्पदेन ब्रह्मविद्यापदेन तथा परविद्याशब्देनापि वेद्याक्षरविषयं विज्ञानमभिधीयते । 'अथ परा यया तदक्षरमधिगम्यत'[3] इति श्रुतेः । अत्र च भाष्यम् - 'वेद्याक्षरविषयं हि विज्ञानमिह पराविद्येति प्राधान्येन विवक्षितं नोपनिषच्छब्दराशिः'[4] इति । तैत्तिरीये च - ब्रह्मविद्यार्थोपनिषदारभ्यते, उपनिषदिति विद्योच्यते, तच्छीलिनां गर्भजन्मजरादिनिशातनात् तदवसादनाद्वा ब्रह्मणो वोपनिगमयितृत्वात् उपनिषण्णं वाऽस्यां परं श्रेय इति तदर्थत्वात् ग्रन्थोऽप्युपनिषत्[5] इति भाष्यत उपनिषत्पदं ब्रह्नविद्यायां मुख्यार्थकमिति ज्ञायते । तद्बोधकत्वेन तादर्थ्यात् ग्रन्थे उपनिषच्छब्दप्रयोगः ब्रह्मविद्याशब्दप्रयोगो वा 'आयुर्वै घृतं,' 'लाङ्गलं जीवनम्' इतिवत् गौणः । वार्तिके च-

उपेत्य वा निषण्णं वा तच्छ्रेय आत्यन्तिकं यतः ।
तस्मादुपनिषज्ज्ञेया ग्रन्थस्तु स्यात्तदर्थतः ॥[6]

वेदान्तानां प्रादुर्भावः - यथा वेदानां प्रादुर्भावः तथा वेदान्तानामपि[7] । भगवतो महामायाविनः सर्वज्ञात् सर्वशक्तेः स्वमायावशादुपनिषदाह्वया वेदान्ताः ऋग्वेदादिवेदाश्च पुरुषनिःश्वासवदनायासेनाप्रयत्नेन लीलान्यायेन बहिः प्रादुर्भूताः इति भगवतो बादरायणमुनेः भगवत्पादानां च निर्णयः । तथा हि 'शास्त्रयोनित्वात्'[8] 'महतः ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत् सर्वार्थावद्योतिनः

---

1. अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेद...(बृ 2-4-10).
2. जै.सू. 1-1-30.
3. मु 1-1-5.
4. मु.शां.भा. 1-1-5.
5. तै.शां.भा. आरंभे ।
6. तै.वा. शिक्षा 36
7. वेदान्तानामपि वेदाबाहचत्वादित्यतो हेतोः ।
8. ब्र.सू. 1-1-3.

सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म । न हीदृशस्य शास्त्रस्यर्ग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः संभवोऽस्ति'[1] इति सूत्रं भाष्यं च । अत्र न हीत्यादिभाष्येण ब्रह्मव्यतिरिक्तस्य वेदरचनाकर्तृत्वसंभावनाऽपि निराकृता । अतोऽपि जीवकोटिनिविष्टचतुर्मुखादिसर्वज्ञकल्पर्षिप्रभृतिनिर्मितत्वं वेदानां सुनिराकृतं भवति । ऋषयोऽपि मन्त्रद्रष्टार एव न तु कर्तारः । तथा वेदाः सर्वेऽपि यथापूर्वं परमात्मनः सकाशात् प्रतिसर्गं सृष्टा इति श्रुत्यन्तरादपि विज्ञायते - ''छन्दांसि जज्ञिरे तस्मात्, यजुस्तस्मादजायत''[2] इति । यद्यपि 'अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेद' इति श्रुत्यन्तरेऽग्न्यादिदेवतासृष्टत्वं वेदानां गम्यते, तथापि पूर्वोक्तसूत्रन्यायेन अग्न्यादिदेवतात्मकात् परमेश्वरादेवाष्टमूर्तेः सकाशादुत्पत्तिरविरोधेन निर्णेया । अन्यथा सूत्रश्रुतिविरोधो दुष्परिहरः । यथा 'आकाशाद्वायुः, वायोरग्निः' इत्यादावाकाशभावापन्नब्रह्मण एव वायुः संभूत इत्यादिरीत्या व्याख्यातं सूत्रे तद्भाष्ये च, तद्वत् प्रकृतेऽपि ।

एते वेदाः यथापूर्वकल्पमानुपूर्वीविशेषविशिष्टरचनाविशेषवन्त एव प्रतिकल्पं प्रादुर्भवन्ति । इत्थं तत्प्रादुर्भावश्च - ''यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै''[3] इति श्रुत्या ईश्वरेण प्रथमसृष्टस्य प्रजापतेर्ब्रह्मणो हृदि प्रथममित्यवगम्यते । अनन्तरं तु ऋषिभिर्दृष्टाः स्वहृदि साक्षात् प्रकाशिता इति, यथाहुः भाष्यकाराः - ''शौनकादयश्च मधुच्छन्दप्रभृतिभिर्ऋषिभिर्दाशतय्यो दृष्टा इति स्मरन्ति''[4] इति । दशमण्डलयुता ऋच ऋषिदृष्टाः न तु विरचिता इत्यर्थः । ''यज्ञेन वाचः पदवीयमायन्तामन्वविन्दन् ऋषिषु प्रविष्टाम्''[5] इति स्थितामेव वाचमनुविन्ना[6]मिति दर्शयति श्रुतिः । यज्ञेन पूर्वसुकृतेन वाचः वेदस्य पदवीयं लाभयोग्यतां प्राप्ताः सन्तो याज्ञिकाः, ताम् ऋषिषु स्थिताम् अन्वविन्दन् लब्धवन्त इत्यर्थः । स्मृतिरपि-

युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा ॥[7]

1. सू.भा. 1.1.3
2. ऋ.सं. 10-90-9
3. श्वेता 6-18
4. सू.भा. 1-3-30
5. ऋ.सं. 10-71-3
6. अनुविन्नामुपलब्धामित्यर्थः
7. म.भा. 12-203-17 ॥

अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥[1]

इति 'उत्सर्गोऽप्ययं वाचः संप्रदायप्रवर्तनात्मको द्रष्टव्यः । अनादिनिधनायाः अन्यादृशस्योत्सर्गस्यासंभवात्' ।[2] इति वदन्तो भाष्यकाराः वेदमयवाचो नित्यतां गुरुशिष्यपरंपराध्ययनसंप्रदायमात्रलब्धतां च स्वीचक्रुः । 'अत एव च नित्यत्व'[3] मिति सूत्रे नियताकृतेर्देवादेर्जगतो वेदशब्दप्रभवत्वाद् वेदशब्दे नित्यत्वमपि प्रत्येतव्यमिति व्याख्यातनित्यत्वं पुनः अवान्तरप्रलयेऽपि स्थायित्वम-व्यक्तरूपेणेति वक्तव्यम् । वेदभाष्यकारैस्तु नित्यत्वमन्यथा व्याख्यातम् ।

अत्र जैमिनिपक्षानुसारेण काचन शंका समुन्मिषति । सा चेत्थम् - महर्षिर्जैमिनिः पूर्वमीमांसाशास्त्रे वेदापौरुषेयत्वाधिकरणे[4] काठकं, कौथुमं, तैत्तिरीयकमित्यादिसमाख्याः तत्तद्वेदविषया लोके दृष्टाः । तेन प्रोक्तमित्यर्थे तद्धित-प्रत्ययश्च । तथा सति व्यासेन वैय्यासिकं भारतमित्यादाविव पौरुषेयत्वं प्रतीयत इति; तथा वेदवाक्यं पौरुषेयं वाक्यत्वात् कालिदासादिवाक्यवत्, इति पूर्वपक्षमुद्भाव्य सिद्धान्तमाह - अध्ययनसंप्रदायप्रवर्तकत्वेन समाख्योपपद्यते । कालिदासादिग्रन्थेषु तत्तत्सर्गावसाने कर्तार उपलभ्यन्ते तथा वेदस्यापि पौरुषेयत्वे कर्ता उपलभ्येत, न चोपलभ्यते । अतो वाक्यत्वहेतुः प्रतिकूलतर्कपराहतः । तस्मादपौरुषेयो वेद इति। तथा च जैमिनिमतानुसारेण न्यायमालाविस्तरोक्तापौरुषेयत्वं पुरुषकृतिसामान्या-विषयत्वं नित्यत्वमिति प्रतीयते । तथा पूर्वं शब्दनित्यताधिकरणे वर्णनित्यतासाधनात् वर्णात्मकपदसन्दर्भविशेषत्वाद्वेदस्य नित्यत्वं तेनापि सिद्धम् । तदुक्तम् :-

विध्यादिरूपो यः शब्दः सोऽनित्योऽथाविनश्वरः ।
अनित्यो वर्णरूपत्वाद्वर्णे जन्मोपलम्भनात् ॥[5] इति ।

''अबाधितप्रत्यभिज्ञा बलाद्वर्णस्य नित्यता । उच्चारणप्रयत्नेन व्यज्यतेऽसौ न जन्यते ॥''[6] इति वर्णनित्यतासाधनेन वेदस्य नित्यत्वं साधितम् । भाष्यकारैश्च उपवर्षमतानुसारेण वर्णनित्यत्वं विस्तरेण साधितं सूत्र भाष्ये । ''अत एव च

1. म.भा. 12-224-55 ॥
2. सू.भा. 1-3-28
3. ब्र.सू. 1-3-29
4. जै.सू. 1-1-27
5. न्या.मा.वि. 1-1-50
6. Ibid 1-1-51

नित्यत्व''[1] मिति बादरायणोऽपि । तथा च पुरुषकृतिसामान्याभावादकृतकत्वमत एव च ध्वंसाप्रतियोगित्वं नित्यत्वमिति । तर्हि शास्त्रयोनित्वाधिकरण ईश्वरीय-कृतिविषयत्वोक्तिः नित्यत्वविरोधिनी भवतीति शङ्कायाः परिहारस्तु भामत्यां वाचस्पतिमिश्रैरित्थं प्रादर्शि । ''येऽपि तावद्वर्णानां नित्यत्वमास्थिषत तैरपि पदवाक्यादीनामभ्युपेयम् । आनुपूर्वीभेदवन्तो हि वर्णाः पदम् । पदानि चानुपूर्वीभदेवन्ति वाक्यम् । व्यक्तिधर्मश्चानुपूर्वी न वर्णधर्मः । वर्णानां नित्यानां विभूनां च कालतो देशतो वा पौर्वापर्यायोगात् । व्यक्तिश्चानित्येति कथं तदुपगृहीतानां वर्णानां नित्यानामपि पदता नित्या । पदानित्यतया च वाक्यादीनामप्यनित्यता व्याख्याता । तस्मान्नृत्तानुकरणवत्पदाद्यनुकरणम् । यथा हि यादृशं गात्रचलनादि नर्तकः करोति, तादृशमेव शिक्ष्यमाणानुकरोति नर्तकी न तु तदेव व्यनक्ति । एवं यादृशीमानुपूर्वीं वैदिकानां वर्णपदादीनां करोत्यध्यापयिता तादृशीमेवानुकरोति माणवकः न तु तामेवोच्चारयति, आचार्यव्यक्तिभ्यो माणवकव्यक्तीनामन्यत्वात् । तस्मात् नित्यानित्यवर्णवादिनां न लौकिकवैदिकपदवाक्यादिपौरुषेयत्वे विवादः, केवलं वेदवाक्येषु पुरुषस्वातन्त्र्यास्वातन्त्र्ये विप्रतिपत्तिः । यथाहुः 'यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता' इति । तत्र सृष्टिप्रलयमनिच्छन्तो जैमिनीया वेदाध्ययनं प्रत्यस्मादृशगुरुशिष्यपरम्परामविच्छिन्नामिच्छन्तो वेदमनादिमाचक्षते । वैय्यासिकं तु मतमनुवर्तमानाः श्रुतिस्मृतीतिहासादिसिद्धसृष्टिप्रलयानुसारेणानाद्यविद्योपधानलब्ध-सर्वशक्तिज्ञानस्यापि परमात्मनो नित्यस्य वेदानां योनेरपि न तेषु स्वातन्त्र्यम् । पूर्वपूर्वसर्गानुसारेण तादृशतादृशनुपूर्वीविरचनात् । तथाहि, यागादि-ब्रह्महत्यादयोऽर्थानर्थहेतवो ब्रह्मविवर्ता अपि न सर्गान्तरेऽपि विपरीयन्ते । न हि जातु क्वचित्सर्गे ब्रह्महत्याऽर्थहेतुरनर्थहेतुश्चाश्वमेधो भवति; अग्निर्वा क्लेदयति, आपो वा दहन्ति, तद्वत् । यथाऽत्र सर्गे नियतानुपूर्व्यं वेदाध्ययनमभ्युदयनिःश्रेयसहेतुरन्यथा वाग्वज्रतयाऽनर्थहेतुः, एवं सर्गान्तरेष्वपि इति । तदनुरोधात्सर्वज्ञोऽपि सर्वशक्तिरपि पूर्वपूर्वसर्गानुसारेण वेदान् विरचयन्नस्वतन्त्रः । पुरुषास्वातान्त्र्यमात्रं चापौरुषेयत्वं रोचयन्ते जैमिनीया अपि । तच्चास्माकमपि समानमन्यत्राभिनिवेशात् । न चैकस्य प्रतिभानेऽनाश्वास इति युक्तम् । नहि बहूनामप्यज्ञानां विज्ञानां चाशय-दोषवतां प्रतिभाने युक्त आश्वासः । तत्त्वज्ञानवतश्चापास्तसमस्तदोषस्यैकस्यापि

1. ब्र.सू. 1-3-29

प्रतिभाने युक्त आश्वासः । सर्गादिभुवां प्रजापतिदेवर्षीणां धर्मज्ञानवैराग्यैश्वर्य-संपन्नानामुपपद्यते तत्स्वरूपावधारणम् । तत्प्रत्ययेन चार्वाचीनानामपि तत्र संप्रत्यय इत्युपपन्नं ब्रह्मणः शास्त्रयोनित्वं शास्त्रस्यापौरुषेयत्वं प्रामाण्यं च"[1] इति ।

अनेन जैमिनिनोक्तवर्णनित्यत्वेन वेदनित्यत्वम् । तथा कर्तृस्मरणाभावेन च तन्नित्यत्वम्, उत्पत्तिप्रध्वंसराहित्यरूपमिति निर्णीतमपि भामतीनिर्णयदृष्ट्या तन्न सेद्धुमर्हति । अपौरुषेयत्वं पुरुषास्वातन्त्र्यमात्रं न पुनः पुरुषकृत्यविषयत्वम् । जीवपुरुषकृतिविषयत्वाभावेऽपि वेदस्य श्रुतिनिरूपितसर्वज्ञेश्वराह्वयपरमपुरुषकृति-विषयत्वस्यान्यथाकरणायोगात्, ईश्वरस्यापि आनुपूर्वीव्यत्यासकरणे तदर्थान्यथाकरणे चास्वातन्त्र्यात् पुरुषास्वातन्त्र्यरूपमपौरुषेयत्वं जैमिनिबादरायणयोरभिमतमिति ज्ञायते । अतः पूर्वोक्तमेव नित्यत्वमवान्तरप्रलयेऽपि स्थायित्वमव्यक्तरूपेणेति वा सायणभाष्योक्तरीत्या वा व्यवहारदशायामाकाशादिवन्नित्यत्वं निर्णेतव्यं भवति ।

प्रागुक्तदिशा पूर्वोत्तरमीमांसयोः परस्परविरोधे प्रतिभातेऽपि भ्रम-प्रमादादिदोषसंभावनापरिहरणोद्देशः प्रामाण्यसाधकस्तु मुख्यो जैमिनि-बादरायणयोरिति तदर्थं पूर्वोक्तं नित्यत्वमीश्वरकर्तृकत्वं चेति सर्वमनवद्यम् ।

सृष्टिसमनन्तरमेव सकलमानवाभ्युदयनिःश्रेयसहेतुभूतधर्मबोधकवेदरूप-शास्त्रस्याविलम्बमाविर्भावस्य सर्वैरास्तिकैर्वक्तव्यत्वात्; अन्यथा यथापूर्वं कल्पितसृष्टौ मानवानां वर्णाश्रमव्यवस्थाबोधकग्रन्थाभावेन व्यवस्थिताचरणं न स्यात् । यावद्ग्रन्थोदयं धर्माचरणमपि दूरीभवेत्, पाशवीवृत्तिश्च समापतेत् । तादृशजनानामन्ते नरकतिर्यगादिहीनगतिश्च स्यात् । अतः सर्गसमनन्तरमेव भगवता ब्रह्मादिमहर्ष्यन्ते सुकृतिलोके यथापूर्वकल्पं शब्दानुपूर्वीतोऽर्थतश्च न्यूनातिरेकविरहितस्यैव तस्य प्रादुर्भावो हृदयदेशे स्फुरणात्मक आसीदित्युन्नीयते ।

---

1. भामती 1-1-3

प्राचीनाः वेदान्ताः अर्वाचीनाश्च

अनादिसिद्धसांप्रदायिका ईशाद्या ईशनिर्मिता उपनिषदाह्वया वेदान्ताः प्राचीनाः । कुतः? श्रीशंकराचार्यभर्तृप्रपञ्चश्रीविद्यारण्यमुनिश्रीशङ्करानन्द श्री सायणभाष्यकारादिभिः श्रीरामानुजाचार्यान्तैराचार्यैरुदाहृतत्वात् एव । अपि च भगवत्पादेभ्योऽपि प्राचीनैर्गुरुवरेण्यैर्व्याख्यातत्वाच्च । ये पुनस्तच्छायया स्वस्वाभिमतविष्ण्वादिदेवताप्राशस्त्यनिर्वहणार्थं स्वस्वसिद्धान्तप्रकाशनैकप्रवणैः कैश्चिदाचार्यैः स्वबुद्ध्या परिकल्पिता प्रकाशीभवन्ति, तथा प्राचीनाचार्यैर्व्याख्येयतया वोदाहरणतया वा न स्वीकृताः, ते सर्वेऽपि अर्वाचीना भवितुमर्हन्ति । यथा श्रीमदप्पय्यदीक्षितैः श्रीमध्वतन्त्रमुखमर्दनाख्ये स्वकीये ग्रन्थे नाम्ना सङ्ख्याताः सर्वेऽर्वाचीनाः । तत्र हि "सोऽप्यन्येषामसम्प्रतिपन्नेषु स्वमात्रकल्पितेष्वर्थेषु तत्र च चतुरकमठ ... पर्वादिवचनानि इति चात्यन्तमप्रसिद्धानामेव साक्षितयोपन्यासः"[1] इति दर्शितम् । एतत्पट्टिका तु अग्रे व्यक्तीभविष्यति । किं च चरणव्यूहे ऋग्वेदादिवेदतच्छाखानां परिगणनात् तदनन्तःपातिनोऽध्ययनसंप्रदायगन्धमप्यनाघ्रातवन्तो वेदान्ताः प्रसिद्धाष्टोत्तरशतोपनिषत्पुस्तके प्रकटिता नवीना अर्वाचीना वा भवन्ति । पुरुषकर्तृका अपि सन्तु नाम यदि स्मृतिवत् मूलप्रमाणानुरोधिनो भवन्ति; यदि विरोधिनस्तैः कः पुरुषार्थः सेत्स्यतीति तेषां विरुद्धस्मृतिवत् जैमिन्यादिमतेनाप्रामाण्यमेव । उपनिषदिति कथ्यमाना यदि ब्रह्मविद्यां साक्षान्मोक्षदायिनीं परंपरया वा तद्दायिनीं सगुणेश्वरोपासनां बोधयन्ति, ताः प्राचीना वा अपरे वा भवन्तु ता अपि प्रमाणान्येव नान्यादृशाः इत्यस्माकं निर्णयः।

चरणव्यूहे दर्शितवेदतच्छाखागणनप्रकारः वेदान्तानां प्राचीनतासाधनेऽपरं प्रमाणम् । तत्र हि

ऋचां दशसहस्राणि ऋचां पञ्चशतानि च ।
ऋचामशीतिः पादश्च तत्पारायणमुच्यते ॥[2]

इति ऋग्वेदस्य मानमुक्तम् । अस्य शाखाश्च शाकलबाष्कलाश्वलायनशाङ्खायनमाण्डूका इति पञ्च । एवमैतरेयिकौशीतकिशैशिरिपैङ्गीत्यादयोऽपि । विष्णुपुराणे च

1. म.त.मु.म. P.6   2. चरणव्यूह P. 1 (10,580)

मुद्गलो गोकुलो वात्स्यः शैशिरः शिशिरस्तथा ।
पञ्चैते शाकलाः शिष्याः शाखाभेदप्रवर्तकाः[1] ॥ इति ।

महाभाष्ये तु एकविंशतिधा बह्वृचा इति स्थितम् । एवमेकशतमध्वर्युशाखा इति महाभाष्ये पतञ्जलिराह । यजुर्वेदस्य षडशीतिर्भेदा इति चरणव्यूहे । यथा-

अष्टादशसहस्राणि मन्त्रब्राह्मणयोः सह ।
यजूंषि यत्र पठ्यन्ते स यजुर्वेद उच्यते ॥ इति ।

शाखाभेदेषु केषुचिदुत्सन्नेषु प्रकृतोपलब्धनामानि

चरकाः	वारवन्तीयाः
आह्वरकाः	श्वेताः
कठाः	श्वेततराः
प्राच्यकठाः	औपमन्यवाः
कापिष्ठलकठाः	पाताण्डिनेयाः
चारणीयाः	मैत्रायणीयाः

इति । तत्र मैत्रायणीयाः मानववाराहदुण्डुभच्छागलेयहारिद्रवीयश्यामायनीयाश्चेति षट् । चरकविशेषाणां तैत्तिरीयाणाम् औखीयाः खाण्डिकीयाश्चेति द्वौ भेदौ । तयोः खाण्डिकीयाः पञ्च, आपस्तम्बी, बोधायनी, सत्याषाढी, हिरण्यकेशी, शाठ्यायनी चेति । एतदध्ययनस्थिता भेदाः कृष्ण - यजुःशब्देन कथ्यन्ते । एवं शुक्लयजुर्वेदस्य पञ्चदशभेदा : । यथा

काण्वा :	शाफेयाः	आवटिकाः	औधेयाः
माध्यंदिनाः	तापनीयाः	परमावटिकाः	वैधेयाः
जाबालाः	कपोलाः	पाराशरीयाः	गालवाः
बुधेयाः	पौण्ड्रवत्साः	वैनेयाः	

इति सर्वे चैते वाजसनेयिन इति कथ्यन्ते ।

1. विष्णु पुराणम् 3-4-22

चरणव्यूहे चैतद्वेदपरिमाणमुक्तम्

द्वे सहस्रे शतन्यूने मन्त्रा वाजसनेयके ।
तावन्मानेन सङ्ख्यातं वालखिल्यं सशुक्रियम् ॥

ब्राह्मणं तु समाख्यातं प्रोक्तमानाच्चतुर्गुणम् । इति

वाजसनेयिनां ब्राह्मणं शतपथसंज्ञकम् । एवं सामवेदस्य सहस्रं शाखा आसन् । बह्व्यः उच्छिन्नाः । कतिचिदेवावशिष्टाः ।यथा

राणायनीयाः	लाङ्गलिकाः	कौथुमविशेषाः षट्	
शाट्यमुग्राः	शार्दूलाः	आसुरायणाः	वैनधृताः
कापोलाः	कौथुमाः	वातायनाः	प्राचीनयोग्याः
महाकापोलाः		प्राञ्जलयः	नैगेयाः इति ।

अष्टौ सामसहस्राणि सामानि च चतुर्दश ।
ऊह्यानि सरहस्यानीत्येतत्सामगणः स्मृतः । इति तन्मानमुक्तम् ।

आथर्वणस्य नवभेदा भवन्ति -

पैप्पलादः	तोत्तयनः	कुनखी
शौनकीयः	जायलः	देवदर्शी
दामोदः	ब्रह्मपलाशः	चारणविद्यः । इति ।

द्वादशानि सहस्राणि मन्त्राणां त्रिशतानि च ।
गोपथं ब्राह्मणं वेदेऽथर्वणे शतपाठकम् । इति तन्मानम् ।

इत्थं परिगणितवेदचतुष्टयान्तर्वर्तिनो वेदान्ताः सर्वज्ञेश्वरप्रणीतत्वात् सनातना अध्ययनसंप्रदायसिद्धा मूलप्रमाणानि । तद्भिन्नास्तदनुयायिनः तच्छायारूपाश्च वेदान्ता अष्टोत्तरशतोपनिषद्ग्रन्थवर्तिन अर्वाचीना प्राचीनैः सह प्रकाशिताः । ते संप्रदायविद्भिः शोधनीया भवन्ति ।

तत्र प्राचीनवेदान्तानां पट्टिका

१. ईशावास्यम्
२. केनोपनिषत्
३. कठोपनिषत्
४. प्रश्नोपनिषत्
५. मुण्डकोपनिषत्
६. माण्डूक्योपनिषत्
७. ऐतरेयोपनिषत्
८. तैत्तिरीयोनिषत्
९. छान्दोग्योनिषत्
१०. बृहदारण्यकोपनिषत् (काण्वमाध्यन्दिने)
११. कौषीतक्युपनिषत्
१२. श्वेताश्वतरोपनिषत्
१३. नृसिंहपूर्वतापिन्युपनिषत्
१४. नृसिंहोत्तरतापिन्युपनिषत्
१५. जाबालोपनिषत्
१६. मैत्रायण्युपनिषत्
१७. तैत्तिरीयनारायणीयोपनिषत् (खिलकाण्डम्)
१८. आरुणिकोपनिषत्
१९. परमहंसोपनिषत्
२०. मैत्रेय्युपनिषत्
२१. सन्यासोपनिषत्
२२. मैत्रायणशाखोपनिषत्
२३. बाष्कलशाखोपनिषत्
२४. संवर्तश्रुत्युपनिषत्
२५. आरुणिश्रुत्युपनिषत्
२६. भाल्लविशाखोपनिषत्
२७. जाबालश्रुत्युपनिषत्
२८. ताण्ड्यशाखोपनिषत्
२९. क्षुरिकोपनिषत्
३०. गर्भोपनिषत्
३१. ब्रह्मबिन्दूपनिषत्

तत्र आरुण्याद्या ब्रह्मबिन्दुपर्यन्ताः सायणभाष्ये भाष्यकारैस्तत्र तत्र विवक्षितांशे प्रमाणीकृताः । इतरे श्रीशंकराचार्यविद्यारण्यमुनिसायणाचार्यादिभिः व्याख्याताः ।

केवलमध्वमुनिमात्रस्वीकृताः स्वसिद्धान्तानुगुणतया कल्पिताः मध्वतन्त्रमुखमर्दने दीक्षितैः संकलिताः ।

अर्वाचीनवेदान्तानां पट्टिका

१. चतुरः
२. कमठः
३. माठरः
४. कौठव्यः
५. कौण्डिन्यः
६. माण्डव्यः
७. मार्कण्डेयः
८. मौद्गल्यः
९. पौष्यायणः
१०. पौत्रायणः
११. सौत्रायणः
१२. सौकरायणः
१३. पाराशर्यायणः
१४. माध्यंदिनायनः
१५. काषारवः
१६. कौषारवः
१७. कौषायणः
१८. बृहदुद्दालकः
१९. काषायणः
२०. औद्दालकायनः
२१. कौशिकः
२२. सौपर्णः
२३. शाण्डिल्यः
२४. वत्सः
२५. गौपवनः
२६. भाल्लवेयः
२७. अग्निवेश्यः
२८. चतुर्वेदशिखा
२९. परमश्रुतिः
३०. चतुर्वेदसंहिता
३१. इन्द्रद्युम्नः । इति ।

तत्र प्राचीनवेदान्तेषु ऐतरेयं, तैत्तिरीयं, छान्दोग्यम् आथर्वणं च चतुर्वेदविद्यान्तर्भूतम् । अन्यत्तु कौषीतक्यादि चतुर्वेदाङ्गशाखास्वन्तर्हितम् । तत्र कौषीतकी ऋक्शाखान्तःपातिनी । मैत्रायणीयं यजुःशाखान्तर्भूतं तथा कठोपनिषच्च। केनोपनिषत् सामवेदीयतलवकारशाखीया । नृसिंहोत्तरतापनीयमाथर्वणम् । तदुक्तं विद्यारण्यमुनिभिः

ऐतरेये तैत्तिरीये छान्दोग्येऽथर्वणे च यत् ।
तत्त्वं चतुर्वेदविद्याप्रकाशे तत्समीरितम् ॥ १ ॥

अनुभूतिप्रकाशेऽथ कौषीतक्यादिनामसु ।
चतुर्वेदाङ्गशाखासु यत्तत्त्वं तदुदीर्यते ॥ २ ॥

ऋग्वेदस्थितशाखा या कौषीतक्यभिधाङ्किता ।
मैत्रायणीयनाम्नी या शाखा सा याजुषी मता ॥ ३ ॥

तस्यां शाकायन्यमुनिर्बोधयामास भूपतिम् ।
शाखा तलवकाराणां सामवेदगतास्ति या ॥ ४ ॥

विद्योक्ता तत्र संक्षेपात्तां विस्पष्टमिह ब्रुवे ।[1] इति ।

इत्थं स्थिते केचन वेदान्त इति वा, उपनिषदिति वा, प्राचीनैर्व्यवहृता अपि वेदभागाः कर्मकाण्डमध्यभागिनः क्वचित् क्वचित् ऋग्वेदादौ समुपलभ्यन्ते । यदि तेऽपि मुमुक्षुलोकोपयोगिब्रह्मविद्याप्रकाशकाः, तर्हि वेदान्ता इति संज्ञयाऽभिधातुमर्हा एव भवन्ति,

1. यथा - ऋग्वेदे नासदासीयसूक्तम् ।
   ''नासदासीन्नोसदासीत्तदानीम् ......''[2] इत्यादि ।

2. तत्रैव दुर्गासूक्तम्
   ''अहं रुद्रेभिर्वसुभिश्चरामि ....''[3] इत्यादि
   ब्रह्मवादिनीसूक्तम् इति च प्रथितम् ।

3. पुरुषसूक्तम् - ''सहस्रशीर्षा पुरुष''[4] इत्यादि ।

4. वामदेवीयं सूक्तम् - ''अस्य वामस्य...''[5] इत्यादि ।

5. शतरुद्रीयम् - ''नमस्तेरुद्रमन्यव ....''[6] इत्यादि ।

6. ऋग्वेदे रुद्रसूक्तम् ''कद्रुद्राय प्रचेतसे'' इत्यादि ।[7] ।

तदुक्तं श्रीकण्ठभाष्ये 'ब्रह्मलिङ्गभिधायिनो वेदान्तरूपाः कर्मकाण्डमध्यपातिनः पुरुषसूक्तशतरुद्रीयप्रभृतयो मन्त्रब्राह्मणभागा'[8] इति ।

---

1. अनुभूतिप्रकाशः, 8-1,2,3..
2. ऋ.सं. 10-129-1
3. Ibid 10-125-1
4. Ibid 10-90-1 तै.आ. 3-12-1
5. Ibid 1-164-1
6. तै.सं. 4-5-1-1
7. ऋ.सं. 1-43-1
8. P120.

वेदान्तानां प्रामाण्यम्

सर्वज्ञनित्यनिर्दोषेश्वरसृष्टिविषयस्य वेदमात्रस्य प्रामाण्यमिव तदन्तर्भूत-वेदान्तानामपि प्रामाण्यम् । न चेश्वरसिद्धौ तत्कृतत्वेन प्रामाण्यसिद्धिः, तत्सिद्धावीश्वरसिद्धिरिति परस्पराश्रयदोषशङ्काया अवसरः । ईश्वररूपधर्मिग्राहकवेद-प्रमाणादेव स्वतःप्रमाणीभूतादीश्वरस्य वेदकर्तृत्वस्यापि सिद्धेः उभयसिद्धिर्युगपदेव । न हि वेदप्रामाण्यसाधनेऽनुमानादिपरमुखनिरीक्षणं क्रियते स्वतः प्रामाण्यवादिभिः। तथा च य एव वेद ईश्वरं बोधयति स्वतःप्रमाणीभूतः सन् स एव तत्स्रष्टृत्वं च बोधयति । यथा कालिदासादिकृतः शाकुन्तलादिग्रन्थः स्वकर्तारं वाच्यवृत्त्या बोधयति[1] ।

अत्र भगवत्पादाः- ''अस्य निःश्वसितमेतद्यदृग्वेदो .... निःश्वसितानि''[2] इति मन्त्रस्य भाष्ये 'नियतरचनावतो विद्यमानस्यैव वेदस्याभिव्यक्तिः पुरुषनिः-श्वासवत्, न च पुरुषबुद्धियत्नपूर्वकः । अतः प्रमाणं निरपेक्ष एव स्वार्थे । तस्माद्यत्तेनोक्तं तत्तथैव प्रतिपत्तव्यमात्मनः श्रेय इच्छद्भिर्ज्ञानं कर्म वेति' । अथ वा सर्वस्य द्वैतजातस्य अविद्याविषयत्वमुक्तम् । ''ब्रह्म तं परादात् .... इदं सर्वं यदयमात्मे''ति । तेन वेदस्य अप्रामाण्यमाशङ्क्येत । तदाशङ्कानिवृत्त्यर्थमिदमुक्तम् 'पुरुषनिःश्वासवदप्रयत्नोत्थितत्वात् प्रमाणं वेदः, न यथान्यो ग्रन्थः[3] इति प्रकारान्तरेण मन्त्रब्राह्मणात्मकवेदमात्रस्य पुरुषबुद्धिपूर्वकनिर्मितिं विना विद्यामानस्यैवाभिव्यक्तिस्वीकारेण स्वार्थे निरपेक्षं प्रामाण्यं साधयित्वापि द्वैतमात्रस्य अविद्याविषयत्वादप्रामाण्यवद्वेदस्यापि तदाशङ्क्य उक्तरीत्या निराचक्रुः, पौरुषेयग्रन्थवैलक्षण्यं चान्ते दर्शयामासुः । एवं स्थितेऽन्यत्र[4] च वेदस्य ज्ञापकत्वेनैव प्रामाण्यं न कारकत्वेनेति साधयामासुः । यथा 'श्रुतेर्ज्ञापकत्वान्न शास्त्रं पदार्थानन्यथा कर्तुं प्रवृत्तम् । किं तर्हि? यथाभूतानामज्ञातानां ज्ञापने । किं चातः? शृण्वतो यद्भवति, यथाभूतमूर्तामूर्तादिपदार्थधर्मा लोके प्रसिद्धास्तददृष्टान्तोपादानेन तदविरोध्येव वस्त्वन्तरं ज्ञापयितुं प्रवृत्तं शास्त्रम् । न लौकिकवस्तुविरोधज्ञापनाय

1. यथा वा सूतसंहिता, महाभारतं, श्रीमद्रामायणं च ।
2. बृ. 2-4-10
3. Ibid
4. Ibid 2-1-20

लौकिकमेव दृष्टान्तमुपादत्ते । उपादेयमानोऽपि दृष्टान्तोऽनर्थकः स्यात् दार्ष्टान्तिकासङ्गतेः । न ह्यग्निः शीतः, आदित्यो न तपतीति वा दृष्टान्तशतेनापि प्रतिपादयितुं शक्यम् प्रमाणान्तरेणान्यथाऽधिगतत्वाद्वस्तुन इति । किं चापौरुषेयत्वेऽपि वेदस्य लौकिकपदार्थविरुद्धस्वार्थप्रमापकत्वमिति तु न स्वीक्रियते। न च प्रमाणं प्रमाणान्तरेण विरुध्यते । प्रमाणान्तराविषयमेव हि प्रमाणान्तरं ज्ञापयति[1] इति वदन्तोऽमुमेवार्थं पुष्कलयन्ति, यतः प्रमाणस्य प्रमाणान्तरविरोधो नास्ति । तत्र च प्रतिप्रमाणं प्रमाणान्तरानधिगतप्रतिनियतविषयज्ञापकत्वं च हेतूकुर्वन्ति ।

सूत्रभाष्ये च 'महच्च प्रामाण्यकारणमेतत् यद्वेदान्तवाक्यानां चेतनकारणत्वे समानगतित्वं चक्षुरादीनामिव रूपादिषु'[2] इति । अन्यत्र च 'वेदस्य हि निरपेक्षं स्वार्थे प्रामाण्यं रवेरिव रूपविषये । पुरुषवचसां तु मूलान्तरापेक्षं वक्तृस्मृतिव्यवहितं'[3] चेति ।

एतद्भाष्यावलोकनेनेदमवगम्यते, यथा चक्षुरादिप्रमाणं मानान्तरानधिगत-रूपरसादिनियतविषयं ग्राहयत्प्रमाणं तद्वत्प्रत्यक्षागृहीतं तदविरुद्धं च अहंप्रत्ययस्यापि साक्षिणं ब्रह्मपदाभिधेयं मुख्यं प्रत्यगात्मानं ग्राहयत् वेदान्तरूपं प्रमाणं प्रमाणान्तरानधिगताविरुद्धार्थबोधकत्वरूपप्रामाण्यलक्षणालीढं सत् स्वतः प्रमाणीभवति । नास्य प्रामाण्यसाधनाय अनुमानादिप्रमाणान्तरमाकाङ्क्ष्यते । न हि स्वतः प्रामाण्यवादिनां मते सापेक्षता प्रमाणस्यास्ति । प्रमेयं तु सापेक्षम्, 'मानाधीना मेयसिद्धि'रिति न्यायात् ।

किं च अप्राप्ते शास्त्रमर्थवदिति भट्टाचार्याः । तथा च अनुवादकांशे शास्त्रं नार्थवत् 'अग्निर्हिमस्य भेषजम्' इतिवत् । शास्त्रतात्पर्यमपि मानान्तरानधिगतांश एव । अत्र प्रमाणसामान्यलक्षणं तु जैमिनिना सूचितम्, 'औत्पत्तिकस्तु.... अर्थे अनुपलब्धे तत्प्रमाणम् बादरायणस्यानपेक्षत्वात्'[4] इति । अत्र बादरायणमुनिनाम-संकीर्तनेन जैमिनिः स्वाचार्यसंमतिं प्रामाणिकीं सूचयन् वेदस्य

1. बृ.भा. 2-1-20
2. सू.भा. 1.1.10
3. Ibid 2-1-1
4. जै.सू. 1-1-5

विशेषतोऽनुपलब्धेऽर्थे प्रमाणत्वं बोधयन् सामान्यतोऽपि प्रमाणलक्षणं सूचयति । तथा 'अनपेक्षत्वात्' इत्यनेन स्वतःप्रामाण्यमाविष्करोति ।

वेदान्तानामप्रामाण्यनिरासः

क्रियास्पर्शं विना केवलवस्तुस्वरूपान्वाख्यानपरत्वे 'सत्यं ज्ञानम्' इत्यादिवेदान्तवाक्यानामप्रामाण्यम् । 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते'[1] इति जैमिनिना 'वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति', 'सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्व' मित्यादीनामर्थवादानां स्वार्थपरत्वे क्रियापरत्वाभावेऽप्रामाण्यमाशङ्कितम्, तद्वत् सत्यं ज्ञानम् इत्यादीनां स्वात्मस्वरूपमात्रपरत्वादप्रामाण्यम् । किं च दर्शपूर्णमासादिवाक्यानां पुरुषप्रवृत्तिविज्ञानोत्पादकत्वात् प्रामाण्यम्; आत्मविज्ञानवाक्येषु तन्नास्तीति चाप्रामाण्यमिति शङ्का ।

समाधानं च श्रीभगवत्पादकृतमेवानुसंधेयम् । यथा 'न वाक्यस्य वस्त्वन्वाख्यानं क्रियान्वाख्यानं वा प्रामाण्याप्रामाण्यकारणम् । किं तर्हि? निश्चितफलवद्विज्ञानोत्पादकत्वम् । तद्यत्रास्ति तत् प्रमाणं वाक्यम् । यत्र नास्ति तदप्रमाणम् । आत्मस्वरूपान्वाख्यानपरेषु वाक्येषु फलवन्निश्चितं च विज्ञानमुत्पद्यते चेत् कथमप्रामाण्यम्? "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इत्याद्युपनिषद्वाक्यशतेषु अविद्याशोकमोहभयादिसंसृतिबीजदोषनिवृत्तिरूपफलवद्विज्ञानं हि श्रुतम् । न तथा प्रागुक्तार्थवादवाक्येषु विद्यत इति वैषम्यम् । अत एव क्रियापरत्वाभावेऽप्रामाण्यमापादितम्, तदिदमत्रापादयितुं न शक्यम् । अन्यथा दर्शपूर्णमासादिविधिवाक्येष्वपि तत्प्रसङ्गेन विश्रम्भस्यानवकाशः इति'[2] ।

न चाम्नायस्य क्रियार्थत्वादित्यादिसूत्रविरोधः शङ्क्यः । आनर्थक्यं प्रयोजनशून्यत्वं तेनाप्रामाण्यं च गुणवादानुवादरूपार्थवादानां क्रियार्थराहित्येन प्रागुदाहृतसदृशानामेव । न पुनर्भूतार्थवादानां देवताविग्रहादिप्रतिपादकानां ब्रह्मवाक्यानां वा । जैमिनिमतं चेदमेव यत् क्रियार्थपरत्वं विना यस्य

1. जै.सू. 1-2-1 2. बृ.भा. 1-4-7

वेदवाक्यस्यानर्थक्यं, तत्प्रयुक्तमप्रामाण्यं च दुष्परिहरम्; तस्यैवार्थवादादेः कथंचिद्विध्येकवाक्यतया स्तुतिपरत्वमङ्गीकृत्य क्रियापरत्वं परंपरया चाभिप्रेतम् । अन्यथा 'अनुपलब्धेऽर्थे तत्प्रमाणम् बादरायणस्यानपेक्षत्वा'[1] दिति सूत्रविरोधः । प्रामाण्येऽनपेक्षत्वमिवार्थस्यानुपलब्धिं प्रमाणान्तरानधिगतिरूपं हेतूकरोति 'अनुपलब्ध' इत्यंशेन जैमिनिः । तथा च प्रपूर्वदर्शितमनधिगताबाधितार्थफलवद्विज्ञानोत्पादकत्वमेव पर्यवसितं भवति । अन्यत्र च सूत्रभाष्ये भगवत्पादाः - 'यद्यप्यन्यत्र वेदवाक्यानां विधिसंस्पर्शमन्तरेण प्रमाणं न दृष्टम्; तथापि आत्मविज्ञानस्य फलपर्यन्तत्वान्न तद्विषयस्य शास्त्रस्य प्रामाण्यं प्रत्याख्यातुं शक्यम्। न चानुमानगम्यं शास्त्रप्रामाण्यं येनान्यत्र दृष्टं निदर्शनमपेक्षेत'[2] इति ।

किं चेत्यादिना पुरुषप्रवृत्तिविज्ञानोत्पादकत्वं दर्शादिवाक्ये प्रामाण्यसाधकं यद्वर्णितं तन्मन्दम् । प्रामाण्यकारणस्य सर्वत्र यथोक्तस्यैव संभवेऽस्याप्रयोजकत्वात्। तथा च सर्वत्र प्रवृत्तिबीजनिरोधफलवद्विज्ञानोत्पादकत्वमात्मप्रतिपादकवाक्यानामलंकार एव, नाप्रामाण्यकारणम् ।

परब्रह्मणो वेदान्तैकसमधिगम्यत्वम्

वेदेतरशास्त्रतः तदितरप्रमाणतो वा अहमिति प्रत्ययतो वा परं ब्रह्म नाधिगम्यते । तदुक्तं भाष्यकारैः-

'योऽसौ उपनिषत्स्वेवाधिगतः पुरुषोऽसंसारी ब्रह्म उत्पाद्यादिचतुर्विधद्रव्यविलक्षणः स्वप्रकरणस्थोऽनन्यशेषो नासौ नास्ति नाधिगम्यत इति वा शक्यं वदितुम्, 'स एष नेति नेत्यात्मा' इत्यात्मशब्दात्, आत्मनश्च प्रत्याख्यातुमशक्यत्वात् । न ह्यहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थः सम एकः कूटस्थनित्यः पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्वस्यात्मा । अतः स न केनचित्प्रत्याख्यातुं शक्यः । आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः'[3] इति । अतो वेदान्तैकसमधिगम्यत्वं ब्रह्मणः ।

---

1. जै.सू. 1-1-5
2. सू.भा. 1-1-4
3. Ibid

शास्त्रैकसमधिगम्यत्वं च प्रत्यगात्मनः विजातीयम् । यथा नित्यसिद्धोऽपि प्रमाणेनाप्रकाश्योऽपि स्वयंप्रकाशः सः स्वात्मन्यारोपितानात्माहंकारादि-धर्माध्यासनिवृत्तियोग्यत्वमात्रेण[1] शास्त्रप्रमाणगम्य इति चोच्यते, न तु घटादिवद् धर्मादिवद्वा इदंतया शास्त्रबोधितत्वेन । अत्र च भाष्यम् 'न शास्त्रमिदंतया विषयभूतं ब्रह्म प्रतिपिपादयिषति; किं तर्हि? प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति । तथा च शास्त्रम् - ''यस्यामतं तस्य मतं मतं यस्य न वेद सः'' ''न दृष्टेः द्रष्टारं पश्येः'' इत्यादि[2] । एवं यथा श्रुतिप्रमाणं प्रत्यगभिन्न-ब्रह्मणोऽविषयत्वमेव प्रतिपादितम् ।

उपनिषत्प्रस्थानम्

उपनिषत्प्रस्थानं नाम वेदान्तः । प्रागवधृतप्रामाण्यवान् वेदान्त एव प्रस्थानत्रयमध्ये मूर्धन्यं प्रस्थानम् । प्रस्थानं नाम प्रस्थीयतेऽनेनेति प्रस्थानं मार्गः।[3] मुमुक्षोः किल संसाराध्वनः पारं परमं विष्णुपदं प्रस्थितस्य तज्ज्ञानोपदेशको मार्गः वेदान्तः प्रस्थानपदेनाभिधीयते । एवमेव सूत्रप्रस्थानं, गीताप्रस्थानमिति द्वयमप्यन्यत्प्रस्थानशब्देन भण्यते । सूत्रकारैः भाष्यकारैर्वा न कुत्रापि प्रस्थानशब्देन यद्यपि व्यवहृतम् अथापि वेदान्तशास्त्रनिबन्धकारैः तच्छब्देन व्यवहृतम् । ''तं त्वौपनिषदं पुरुषं पृच्छामि''[4] इति श्रुत्यनुसारेण परमपुरुषस्य परमात्मन उपनिषदेकसमधिगम्यत्वमुक्तमिति प्रस्थानत्रये प्रथमं मुख्यं चेदमेव उपनिषत्प्रस्थानम्। एतन्मूलकत्वेनैव ब्रह्मसूत्रप्रस्थानस्य गीताप्रस्थानस्य च प्रामाण्यं, वेदमूलकस्मृतिवत् । यतः सूत्रकारोऽपि न्यायेन वेदान्तार्थनिर्णये प्रवृत्तः श्रुतिमेव प्रमाणीकरोति प्रथमम्- 'श्रुतेः' 'शब्दात्' 'आमनन्ति' 'अधीयते' 'शास्ति' इति । ततः 'स्मृतेश्च' 'स्मरन्ति च' 'अपि च स्मर्यते' इति स्मृतिम् । सूत्रस्य तर्करूपत्वात् वेदान्तप्रमाणानुग्राहकत्वाच्च अङ्गत्वमेव । अतः प्रधानप्रस्थानोपकारकं

---

1. वृत्तिप्रयुक्तावरणभंगयोग्यत्वेनेत्यर्थः
2. सू.भा 1-1-4
3. प्रतिष्ठन्ते परम्परया व्यवहरन्ति येन मार्गेण तत्प्रस्थानम् - लोचने अभिनवगुप्तपादाः।
4. बृ. 3-9-26

सूत्रमपि प्रस्थानशब्देन भण्यते । भाष्यकाराश्च 'वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम्'[1] इति वदन्तः इममाशयमभिव्यञ्जयन्ति ।

भगवता बादरायणेन संग्रथितत्वात् उपनिषदपेक्षया प्रामाण्यांशे द्वितीयस्थानभागित्वात् स्मृतिस्थानीयमुपनिषत्समं द्वितीयं प्रस्थानं गीताप्रस्थानमेव।

उपनिषदां शैली

उपनिषदां शैली क्वचित् काव्यशैलीवत् ललितोचितसंनिवेशचारुतरा प्रसादगुणगुम्फिता, यथा कठोपनिषत्, तैत्तिरीयोपनिषत्, मुण्डकोपनिषत्, छान्दोग्ये षष्ठसप्ताष्टमाध्यायाः तथा बृहदारण्यके मैत्रेयीयाज्ञवल्क्ययोः जनकयाज्ञवल्क्ययोश्च संवादरूपो भागः ।

क्वचित् नालिकेरपाकवत् दुर्बोधार्था । यथा ईशोपनिषदि, "अनेजदेकं मनसो जवीयो"[2], "तदेजति तन्नैजति....'[3] "विद्यां चाविद्यां च ..."[4], "संभूतिं च विनाशं च...."[5] इत्यादयो मन्त्राः, एवं केनोपनिषदि "श्रोत्रस्य श्रोत्रं मनसो मनो यत्..."[6] "नाहं मन्ये सुवेदेति..."[7] "यस्यामतं तस्य मतं..."[8] इत्यादयो मन्त्राः, प्रश्नोपनिषदि च "आदित्यो ह वै प्राण...."[9] "विश्वरूपं हरिणं जातवेदसं"[10] "पञ्चपादं पितरं द्वादशाकृतिं...."[11] इत्यादिमन्त्राः, माण्डूक्ये "जागरितस्थानो बहिष्प्रज्ञः...."[12] "स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग...."[13] "नान्तः प्रज्ञं न बहिष्प्रज्ञं..."[14] इत्यादिमन्त्राश्च दुरवगाह्यार्थाः । छान्दोग्योपनिषत् प्रायेण आपञ्चप्रपाठकं, तथैव बृहदारण्यककौषीतकीश्वेताश्वतरनृसिंहपूर्वोत्तरतापिन्युपनिषदः दुरधिगमार्थाः । पठने सुलभास्तु ईशकेनकठतैत्तिरीयमुण्डकश्वेताश्वतरोपनिषदः । अन्यास्तूपनिषदः अध्ययनं विना न सुपाठाः ।

---

1. सू.भा. 1-1-2
2. ईशा. 4
3. Ibid 5
4. Ibid 11
5. Ibid 14
6. केनो 1-2
7. Ibid 2-2
8. Ibid 2-3
9. प्रश्नो 1-5
10. Ibid 1-8
11. Ibid 1-11
12. मां 3
13. Ibid 4
14. Ibid 7

उपनिषदां सूत्रतुल्यत्वं दुरधिगमत्वं च

यद्यपि ब्रह्मसूत्राणामेव सूत्रशब्देन व्यवहारः तथापि उपनिषदः सूत्रवत् संक्षिप्ताक्षराः सारवत्यो विश्वतोमुख्य अस्तोभा अनवद्याश्च भवन्ति । न केवलं सूत्रतुल्याः, अपि तु क्वचित् क्वचित् सूत्रविवरणवत् व्याख्यारूपाश्च दृश्यन्ते, यथा "ब्रह्मविदाप्नोति परम् । तदेषाभ्युक्ता । सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् सह । ब्रह्मणा विपश्चितेति"[1] इति । अत्र भाष्यकाराः- 'ब्रह्मविदाप्नोति परम्' इति वाक्यं सूत्रभूतं सर्वस्य वल्ल्यर्थस्य । 'तदेषाभ्युक्ते'ति तस्मिन्नेव ब्राह्मणवाक्योक्तेऽर्थे एषा ऋक् अभ्युक्ता आम्नाता इति । किं च उपनिषदः मन्त्रब्राह्मणात्मिकाश्च दृश्यन्ते । तत्र मन्त्रः सूत्रवत् संक्षिप्तस्वरूपः । ब्राह्मणभागस्तु तदुक्तार्थं प्रपञ्चयन् व्याख्यारूपः । यथा तैत्तिरीये एव 'तदप्येष श्लोको भवति'[2] इत्याम्रेडितो ब्राह्मणेन विस्तरेणोक्तेऽर्थे श्लोको मन्त्रः संक्षेपेण बोधको भवति । यथा - आनन्दवल्ल्याम् 'तदप्येष श्लोको भवति, अन्नाद्वै प्रजाः प्रजायन्त'[3] इत्यादि । द्वितीयानुवाके 'तदप्येष श्लोको भवति प्राणं देवा अनुप्राणन्ति'[4] इत्यादि । एवं पञ्चकोशविवरणस्थले उत्तरत्र मन्त्राः श्लोकशब्देन प्रदर्शिताः । एवमेव आनन्दवल्ली परिसमाप्ता मन्त्रब्राह्मणरूपेण ।

प्रश्नमुण्डकोपनिषदौ तु सुप्रसिद्धे मन्त्रब्राह्मणरूपेण । तत्र मुण्डकं मन्त्ररूपम् । प्रश्नस्तु ब्राह्मणरूपः इति ज्ञायते[5] । बृहदारण्यकं तु केवलं मन्त्ररूपमित्यवगम्यते । अत एव शुक्लयजुःशाखेत्युच्यते । भाष्यकारैः बृहदारण्यकान्ते 'तानीमानि शुक्लानि ब्राह्मणेनाव्यामिश्राणि'[6] इति व्याख्यातम् । तत्र 'तानि इमानि' इति यजूंषि उच्यन्ते । कृष्णयजुर्वेदस्तु ब्राह्मणमिश्रमन्त्रात्मकः । अत एव तैत्तिरीयोपनिषत् तथा दृश्यते ।

इत्थं शुक्लकृष्णयजुर्भेदे प्रदर्शितेऽपि बृहदारण्यके क्वचित्क्वचित् मन्त्रब्राह्मणात्मकत्वमपि सूत्रव्याख्यानरूपेण दृश्यत एव; यथा बृहदारण्यके

1. तै.उ. 2-1
2. Ibid
3. Ibid 2-2
4. Ibid 2-3
5. मन्त्रोक्तार्थस्य विस्तरानुवादीदं ब्राह्मणमारभ्यते इति
6. बृ.भा..6-5-1

चतुर्थब्राह्मणे - ''तदेतदृचाऽभ्युक्तम्, एष नित्यो महिमा ब्राह्मणस्य'', ''न वर्धते कर्मणा नो कनीयान्, तस्यैव स्यात्पदवित्तं विदित्वा, न लिप्यते कर्मणा पापलेपकेन'' इति। अत्र भाष्यम् - 'तदेतद्वस्तु ब्राह्मणेनोक्तं ऋचा मन्त्रेण अभ्युक्तं प्रकाशितं भवति'[1] इति। अन्यत्र च ''तदप्येष श्लोको भवति। तदेव सक्तः सह कर्मणेति''[2] इति। ''तदप्येष श्लोको भवति। यदा सर्वे प्रमुच्यन्ते''[3] इत्यादि। अत्रापि भाष्यम् - 'अत्रापि मोक्षो मोक्षसाधनं च ब्राह्मणेनोक्तं तस्यैव द्रढीकरणाय मन्त्र उदाह्रियते श्लोकशब्दवाच्य'' इति। 'तदेते श्लोका भवन्ति'[4] इति मन्त्रब्राह्मणोक्ते आत्मकामस्य ब्रह्मविदो मोक्ष इत्यस्मिन्नर्थे विस्तरप्रतिपादका एते श्लोका भवन्ति ''अणुः पन्था वितत'' इत्यादिना चतुर्दशमन्त्रा इति। तथापि बाहुल्येन ब्राह्मणामिश्रितत्वात् शुक्लयजुःशब्देन व्यवहारः। एवमेव सर्वा उपनिषदः सूत्रव्याख्यानरूपाः द्रष्टव्याः। अत एव उपनिषद्वृत्तेः भाष्यत्वेनापि व्यवहारः। सूत्रात्मकत्वाभावे उपनिषद्भाष्यमिति व्यवहारो न स्यात्। किं च -

सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुकारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥

इत्येतद्भाष्यलक्षणं संगच्छत एव सूत्रभाष्यवत् उपनिषद इव गीताया अपि अल्पाक्षरत्वात् सूत्रात्मकत्वम्।

उपनिषदामुपदेशभङ्गिभेदः

प्रसिद्धा उपनिषदः प्रायेणाख्यायिकात्मिकाः दृश्यन्ते। आख्यायिकारूपेण बोधनोद्देशस्तु सुकुमारमतीनामप्यतिदुर्विज्ञेयतत्त्वाधिगमसौलभ्यकल्पनमेव। अत एव भाष्यकाराः, 'यदस्ति तद्विज्ञातं प्रमाणैः, यन्नास्ति तदविज्ञातं शशविषाणकल्पमसद्दृष्टम्, तथेदं ब्रह्माविज्ञातत्वादसदेवेति मन्दबुद्धीनां व्यामोहो मा भूदिति आख्यायिकारभ्यत'[5] इत्याहुः। आख्यायिकायाः प्रयोजनान्तरमुक्तं छान्दोग्ये चतुर्थे 'विद्यादानग्रहणविधिप्रदर्शनार्था च' इति। श्रद्धान्नदानानुद्धतत्वादीनां च विद्याप्राप्तिसाधनत्वं प्रदर्श्यत आख्यायिकया - 'जानश्रुतिरिह पौत्रायण'[6] इत्यादिना। क्वचिदाख्यायिका परविद्यास्तुत्यर्था। यथा

1. बृ 4-4-23
2. Ibid 4-4-6
3. Ibid 4-4-7
4. Ibid 4-4-8
5. द्र. केनो. शां भाष्यम्
6. द्रछां.शां भाष्यम्

छान्दोग्ये सप्तमे पीठिकायां भाष्यकाराः - 'कथं नारदो देवर्षिः कृतकर्तव्यः सर्वविद्योऽपि सन् अनात्मज्ञत्वाच्छुशोच इव? किमु वक्तव्यम् अन्योऽल्पविज्जन्तुर-कृतपुण्यातिशयोऽकृतार्थ इति' इति । अथवा, 'नान्यदात्मज्ञानान्निरतिशयश्रेयः-साधनमस्तीति प्रदर्शनार्थं सनत्कुमारनारदाख्यायिका आरभ्यत' इति । क्वचिद्विद्यासंप्रदानन्यायप्रदर्शनार्था आख्यायिका । यथा 'प्राचीनशाल औपमन्यव' इत्यादिरूपा । तत्रैव तृतीयखण्डे 'वैराग्यहेतोः मुमुक्षूणां संसारगतयो वक्तव्या इत्याख्यायिका आरभ्यत' इति । एवं स्थितेऽपि सुखावबोधार्थमाख्यायिका-शैलीमुपनिषदनुरुणद्धि इत्यत्र भाष्यकाराणामधिकं तात्पर्यम् । एवं सुखावबोधनाय काव्यशैलीमप्यनुकरोति ।

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति ॥[1]

इत्यत्र जीवपरमेश्वरबोधने रूपकातिशयोक्तिरूपालंकारमर्यादया सुपर्णतादात्म्याध्यवसायेन श्रुतिः प्रवृत्ता । उपमेययोः जीवपरमेश्वरयोः सुपर्णपदेन निगीर्याध्यवसानात्साध्यवसानलक्षणया ग्रहणम् । पिप्पलपदेनापि तथैव कर्मफलस्य, समानवृक्षपदेन शरीरस्य तदाश्रयस्य च ग्रहणम् ।

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥[2]

वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥[3]

सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः ।
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥[4]

इत्येतन्मन्त्रत्रये एकस्यैवात्मनः समस्तभूतान्तरात्मनः प्रतिदेहमुपाधिभेदेन बहुविधत्वे स्वरूपतोऽविकृतत्वे च प्रकाशरूपाग्नेः, एवं वायोः दृष्टान्ततया ग्रहणम् । एकस्य सर्वात्मत्वेऽपि संसारदुःखित्वस्यासम्बन्धप्रदर्शनाय सूर्यस्य

1. मुं. 3-1-1
2. कठो 5-9
3. Ibid 5-10
4. Ibid 5-11

दृष्टान्ततयोपादानम् । पूर्ववदियं श्रुतिः उपमालंकारघटितमर्यादया दुर्विज्ञेयार्थबोधार्थं प्रववृते ।

"पुरमेकादशद्वारमजस्यावक्रचेतसः"...... ।[1]

"ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः" ..... ।[2]

"अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः" ।[3]

"यथोर्णनाभिः सृजते गृह्णते च"........... ।[4] इत्यादावक्षरस्य भूतयोनित्वसाधने ऊर्णनाभिपृथिवीपुरुषानुपमानतया गृह्णन्ती प्रवृत्ता ।

"प्लवा ह्येतेऽदृढा यज्ञरूपाः"[5] इत्यादिमन्त्रः व्याजस्तुति-व्याजनिन्दान्यतरमर्यादया ज्ञानं प्रस्तौति ।

"सप्त प्राणाः प्रभवन्ति तस्मात् सप्तार्चिषः समिधः सप्तहोमाः । सप्त इमे लोकाः येषु चरन्ति गुहाशया निहिताः सप्त सप्त" ....[6] इत्यत्र रूपकातिशयोक्तिविधयाऽर्चिष्पदेन स्वविषयावद्योतनानि समित्पदेन समिन्धनसादृश्यात्सप्तविषयाः, लोकपदेन इन्द्रियस्थानानि साध्यवसानलक्षणया गृह्यन्ते ।

एवं माण्डूक्ये "सप्ताङ्ग एकोनविंशतिमुखः ...."[7] इति पादद्वयेऽपि ज्ञानकर्मोभयेन्द्रियाणि, प्राणादिपञ्चकं, मनोबुद्ध्यहंकारचित्तानि एकोनविंशतिमुखपदेन गृह्यन्ते । छान्दोग्ये च "यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति[8] ...., स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपाश्रयते....."[9]

"इमाः सोम्य नद्यः पुरस्तात् प्राच्यः स्यन्दन्ते ...."[10]

"न्यग्रोधफलमत आहर ....."[11]

---

1. कठो 5-1
2. Ibid 6-1
3. Ibid 4-8
4. मुं. 1-1-7
5. Ibid 1-2-7
6. Ibid 2-1-8
7. मां 3-4
8. छां 6-9-1
9. Ibid 6-8-2
10. Ibid 6-10-1
11. छां 6-12-1

"लवणमेतदुदकेऽवधाय .....।"[1] इत्येते मन्त्राः उपमालङ्कारविधया बोधयन्ति। यथा "सति संपद्य न विदुः, सति संपद्यामह"[2] इत्यत्र मधुत्वेन एकतां गताः विविधपुष्परसा उपमानत्वेन गृहीताः। जीवानां जाग्रत्स्वप्नयोः परिभ्रमणेन श्रान्तानां विश्रान्तिस्थानं परमात्मा सुषुप्तस्थ इत्यत्र शकुनिदृष्टान्त उपात्तः। तत्र शकुनेः विश्रान्तिस्थानं बन्धनमायतनमुपमानतया गृहीतम्। सुषुप्ते सदात्मना एकीभूतस्यापि जीवस्य तस्मादुत्थाय 'सत आगतोऽस्मि' इत्यविज्ञाने नदीदृष्टान्तः। समुद्रात्मना एकीभूता गङ्गादिनद्यः 'अहमस्मि गङ्गा' 'अहमस्मि यमुना' इति न विदुः इति दृष्टान्तार्थः। सूक्ष्मात्सद्ब्रह्मणोऽत्यन्तं स्थूलं पृथिव्यादि कथं जातमिति बोधयितुं न्यग्रोधदृष्टान्तः। तत्र विस्तृतवटजन्महेतुभूतं सूक्ष्मतमवटबीजमुपमानीकृतम्। एवं यदि जगतो मूलं सत् कस्मान्नोपलभ्यत इत्यत्र लवणदृष्टान्तः। तत्रोदकविलीनं लवणं यथा चक्षुषा न गृह्यते, रसनया तु गृह्यते, तद्वत् सद्ब्रह्मापि प्रत्यक्षतोऽगृहीतमपि संस्कृतबुद्ध्या गृह्यत इति बोधितम्।

एवं "यथा सोम्य पुरुषं गन्धारेभ्य"[3] इत्यादिमन्त्रः सद्ब्रह्मण उपलब्धौ को वा उपाय इत्यत्र तस्करबद्धपिनद्धाक्षस्य अरण्ये विसर्जितस्य ग्रामान्तरात् अकस्माल्लब्धकारुणिकपुरुषोपदेशेन गन्धारदेशगमनं यथा, तथैव बद्धपुरुषस्य भवबन्धविमोचने आचार्योपदेशः प्रथमोपदेश इति बोधितम्।

बृहदारण्यकेऽपि शाकल्यप्रश्ने परिसमाप्ते अन्ते -

यथा वृक्षो वनस्पतिः तथैव पुरुषोऽमृषा।
तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः॥

त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः।
तस्मात्तदातृण्णात्पैति रसो वृक्षादिवाहतात्॥

मांसान्यस्य शकराणि कीनाटं स्नाव तत्स्थिरम्।
अस्थीन्यन्तरतो दारूणि मज्जा मज्जोपमाकृता॥

---

1. छां 6-13-1 2. Ibid 6-9-2 3. Ibid 6-14-1

यद्वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः ।
मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥

रेतस इति मा वोचथ जीवतस्तत्प्रजायते ।
धानारुह इव वै वृक्षोऽञ्जसा प्रेत्य संभवः ॥[1] इति श्रूयते ।

अत्र शरीरस्य वृक्षसाम्यं बाहुल्येनोपपाद्य वृक्षस्य बीजमिव सर्वस्यैव जगतो मूलप्रश्नः कृतोऽन्ते कस्मान्मूलात्प्ररोहतीति । अतोऽत्र उपमालंकाररूपकाव्यमर्यादया प्रश्नव्याजेन शरीरतन्मूलवर्णने प्रवृत्ता । इतः प्राक् मधुब्राह्मणे-

पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः ।
पुरः स पक्षी भूत्वा पुरः पुरुष आविशत् ॥[2] इति श्रूयते ।

अत्र रूपकरूपकातिशयोक्तिविधयाऽलंकारविधया पुर इति शब्देन शरीरं, पक्षिशब्देन लिङ्गशरीरं विवक्षित्वा परमात्मनः सर्वशरीरप्रवेशं तदेकत्वं च बोधयति। 'पुरश्चक्र' इत्यादिमन्त्रः संक्षेपत आत्मैकत्वमाचष्ट इति भाष्यकृदाशयः ।

"इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश"[3] इत्यत्र 'युक्तहरि'शब्देन रथयोजितवाजिनां मुखतः प्रतीतावपि लक्षणया साध्यवसानया इन्द्रियाणि बोधयति श्रुतिः । तत्रैव चतुर्थे "तद्यथा तृणजलूका तृणस्यान्तं गत्वान्यमाक्रममाक्रम्य आत्मानमुपसंहरति"[4] इत्यादिना जीवस्य देहान्तरं प्रति गमने, भावनया भाविदेहं गृहीत्वैव प्राक्तनं देहमुपसंहरतीति विषये तृणजलूकामुपमानीकृत्य बोधयितुं प्रवृत्ता । एवमुत्तरत्र "तद्यथा अहिनिर्ल्वयिनी वल्मीके मृता प्रत्यस्ता शयीत । एवमेवेदं शरीरं शेत"[5] इति मन्त्रः मुक्तात्मविषये वल्मीके सर्पपरित्यक्तनिर्मोकमुपमानीकृत्य देहे सर्वात्मना निरभिमानतां बोधयति । एवमेव सर्वासूपनिषत्सु काव्यमर्यादया तत्त्वबोधनभङ्गिरूहनीया । अन्याऽपि भङ्गिर्वादजल्पवितण्डकथारूपेणापि बोधनविषयिणी दृश्यते ।[6]

---

1. बृ. 3-9
2. बृ. 2-5-18 पुरःशब्देन पक्षिशब्देन च परमात्मानं प्रविष्टजीवात्मानं चाह ।
3. Ibid 2-5-19
4. Ibid 4-4-3
5. Ibid. 4-4-7
6. केन-मुण्डक-छान्दोग्य-बृहदारण्यकेषु ।

अन्यत्र च प्रायेणोपक्रमे एकत्वप्रतिज्ञां, तत्समर्थनदृष्टान्तहेतूपन्यासौ ब्रह्मविकारांशादिरूपेण जगतो दर्शनं पुनरेकत्वोपसंहारं च पश्यामः । अतः प्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपपञ्चावयवन्यायवाक्यप्रयोगरूपपरार्थानुमानशैलीं तत्त्वबुभुत्सुं प्रति श्रुतिरनुरुन्धे । तद्यथा मुण्डके "कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति"[1] इति प्रतिज्ञा । यथा च

यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति ।
यथा सतः पुरुषात्केशलोमानि तथाक्षरात्सम्भवतीह विश्वम् ।[2]

"यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः ।
तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति ॥[3]

इति हेतुः । "पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम् । एतद्यो वेद....."[4], "ब्रह्मैवेदममृतं पुरस्ता"[5] दित्यादिषु च उपसंहारः कृतः ।

छान्दोग्ये षष्ठे च -

"येनाश्रुतं श्रुतं भवति, अमतं मतमविज्ञातं विज्ञात"[6] मिति प्रतिज्ञा ।

"यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्"[7] इत्यादिदृष्टान्तः । "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्"[8] इत्यप्येका प्रतिज्ञा । तत्समर्थनाय "तदैक्षत बहु स्यां प्रजायेयेति"[9] इत्यादिवाक्यं भूतोत्पत्तिपरं प्रवृत्तम् । "स य एषोऽणिमैतदात्म्यमिदं सर्वं"[10] मित्युपसंहारः । तथा बृहदारण्यके द्वितीये चतुर्थब्राह्मणे मैत्रेयीयाज्ञवल्क्यसंवादे आत्मनः सर्वात्मना प्रियत्वं "न वाऽरे पत्युःकामाय...." इत्यादिना "आत्मनस्तु कामाय सर्वं प्रियं भवति"[11] इत्यन्तं मुख्यवृत्त्या प्रदर्श्य, तस्यैव दर्शनार्हत्वं श्रवणमननादियोग्यत्वं च "आत्मा वाऽरे द्रष्टव्यः"[12] इत्यादिना उपदिश्य श्रवणादिसाध्यज्ञानं ब्रह्मैकत्वविषयमेव सम्यग्ज्ञानमिति प्रतिपादयन् मैत्रेयीं प्रति याज्ञवल्क्यः प्रतिजानीते "आत्मनो वाऽरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं

1. मुं. 1-1-3
2. Ibid 1-1-7
3. Ibid 2-1-1
4 Ibid2-1-10
5. Ibid 2-2-12
6. छां 6-1-3
7. Ibid 6-1-4
8. Ibid 6-2-1
9. Ibid 6-2-3
10. Ibid 6-8-7
11. बृ. 2-4-5, 4-5-6
12. Ibid

सर्वं विदितम्''[1] इति । कथमन्यस्मिन्विदितेऽन्यद्विदितं भवतीति शङ्कावारणाय[2] ''इदं सर्वं यदयमात्मा''[3] इति प्रवृत्तम् । इदं च हेतुवाक्यं हेत्वर्थसमर्थनाय[4] च स्थितिकाले आत्मव्यतिरेकेणाग्रहणात् ''आत्मैवेदं सर्वं'' [5] मित्यस्मिन्नंशे ''स यथा दुन्दुभेर्हन्यमानस्य न बाह्यान् शब्दान् शक्नुयाद् ग्रहणाय ...''[6] इत्यादिना दुन्दुभिशङ्खवीणाशब्ददृष्टान्ताः दर्शिताः । दृष्टान्तार्थस्तु यत्स्वरूपव्यतिरेकेणाग्रहणं यस्य, तस्य तदात्मत्वमेव इति । दुन्दुभिशब्द-सामान्यव्यतिरेकेण तद्विशेषाणामग्रहणेन तेषां तदात्मत्वमेवेति दृष्टोऽर्थः ।

''स यथाऽऽर्द्रैधाग्नेरभ्याहितात्''[7] इत्यादिमन्त्रः उत्पत्तिकाले प्रागुत्पत्तेर्ब्रह्मैवेति बोधनाय अग्निविस्फुलिङ्गदृष्टान्तं दर्शयति । इदमपि अव्यतिरेकसाधनाय । एवं प्रलयकाले जगतः प्रज्ञानव्यतिरेकेणाभावात् ब्रह्मत्वमिति प्रदर्शनाय दृष्टान्तं दर्शयति श्रुतिः

''स यथा सर्वासामपां समुद्र एकायन''[8] मित्यादिना ।

एवमत्र भाष्यकाराः ''तत्र इदं सर्वं यदयमात्मेति प्रतिज्ञातम् । तत्र हेतुरभिहितः आत्मसामान्यत्वमात्मजत्वमात्मप्रलयत्वं च । तस्मादुत्पत्तिस्थिति-प्रलयकालेषु प्रज्ञानव्यतिरेकेणाभावात् 'प्रज्ञानं ब्रह्मैव' 'आत्मैवेदं सर्वं' मिति प्रतिज्ञातं यत् तत्तर्कतः साधितम्''[9] इति ।

एवं तृतीये गार्गीप्रश्ने यत्कार्यं परिच्छिन्नं स्थूलं कारणेनापरिच्छिन्नेन सूक्ष्मेण व्याप्तमिति दृष्टम् । अस्मिन्नंशे दृष्टान्तवाक्यमिदं प्रवृत्तम् ''याज्ञवलक्येति होवाच । यदिदं सर्वमप्स्वोतं च प्रोतं च कस्मिन्नु खल्वाप ओताश्च प्रोताश्च''[10] इत्यादिना यदिदं सर्वं पार्थिवत्वं धातुजातम्, अप्सु उदके, ओतं च प्रोतं च यथा पृथिव्यद्भिरिति दृष्टान्तः; तथा पूर्वं पूर्वमुत्तरेणोत्तरेण व्यापिना भवितव्यमित्येष आसर्वान्तरादात्मनः प्रश्नार्थः । तत्रैव 'इदं तावदनुमानमुपन्यस्त' मिति भाष्याशयः

1. बृ- 2-4-5, 4-5-6
2. प्रतिज्ञाविषयसमर्थनायेत्यर्थः ।
3. बृ. 2-4-6, 4-5-7,
4. ब्रह्मव्यतिरेकेणान्यस्यासत्वं हेत्वर्थः,
5. छां. 7-25-2
6. बृ. 2-4-7, 4-5-8
7. Ibid 2-4-10, 4-5-11
8. Ibid 2-4-11, 4-5-12
9. बृ.भा.2-4-11
10. बृ. 3-6-1

।वादकथारूपमित्यत्र भाष्यकाराः[1] ''अपि च तद्विद्यसंयोगः, तैः सह वादकरणं विद्याप्राप्त्युपायो न्यायविद्यायां दृष्टः । तच्च अस्मिन्नध्याये प्राबल्येन प्रदर्श्यते । प्रत्यक्षा च विद्वत्संयोगे प्रज्ञावृद्धिः''[2] इत्याहुः । एवं जल्पकथारूपेणापि ज्ञानवतामश्वलादीनां जयादिविवक्षया प्रश्नदर्शनादुत्तरत्र निग्रहोद्भवनाच्च भवत्येषा जल्पकथा । सापि कदाचिन्महाजनपरिगृहीता तत्त्वनिर्णयं फलति, इति विलोकने जल्पकथाऽपि अत्र वर्तत इति वार्तिकटीकाकाराः । शाकल्यप्रश्नान्ते भाष्यकाराः ''अतो ब्रह्मिष्ठत्वात् धृता गावो याज्ञवल्क्येन जिता ब्राह्मणाः''[3] इति वदन्तः टीकोक्ताशयमपि प्रकाशयन्ति । 'तत्त्वबुभुत्सोः कथा वाद' इति यः प्रथमः स एव प्राधान्येन प्रदर्श्यत इति प्रागुक्तभाष्यपीठिकयाऽवगम्यत इति दिक् ।

वेदान्ते तर्कस्य द्वितीयं स्थानम्

उपनिषदाख्यवेदान्तप्रमाणं सर्वेषामपि प्रथमं प्रमाणं तत्त्वविषये । अस्यानुग्राहकस्तु तर्कः द्वितीयं प्रमाणम् । तथाहि, इतरशास्त्रेषु गौतमीयादिषु तर्कस्यैव प्रथमस्थानम् । यथा ईश्वरेऽतीन्द्रिये प्रथममनुमानमेव स्वीकृतम् । ततोऽपि सिद्धे तस्मिन् ''धाता यथा पूर्वमकल्पयत्''[4] इति तादृशसर्वज्ञेश्वरोक्तत्वात् वेदोऽपि तत्र प्रमाणम् इति वर्णयन्ति । वेदप्रामाण्यं चेत्थमनुमानेनैव साधितम् ''मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्''[5] इति । अत्र वात्स्यायनभाष्यम् ''दृष्टार्थेन आप्तोपदेशेन आयुर्वेदेन अदृष्टार्थो वेदभागोऽनुमातव्यः प्रमाणमिति । आप्तप्रामाण्यस्य हेतोः समानत्वात् अस्य चैकादशो 'ग्रामकामो यजते'त्येवमादिः दृष्टार्थः तेनानुमातव्य'' मिति । वेदप्रामाण्यसाधनेऽनुमानमेव आप्तप्रामाण्ये शरणीकृतम् गौतमेन । कणादेन तु मुनिना शब्दप्रमाण-मनुमानेऽन्तरभावि । यत्र कुत्रापि प्रमाणोपन्यासे प्रथमं सूत्रकारैरनुमानमेव प्रमाणी-क्रियतेऽग्रस्थानतया, ततोऽपि शब्दप्रमाणमुदाह्रियते यथा, ''इच्छाद्वेषप्रयत्न-सुखदुःखज्ञानान्यात्मनो लिङ्गम्''[6] इति । ''श्रुतिप्रामाण्याच्च''[7] इति मानुषशरीरस्य पार्थिवत्वसाधने प्रथममनुमानमनन्तरं श्रुतिश्च प्रमाणीकृता ।

---

1. याज्ञवल्क्यीये काण्डे उपपत्तिप्रधाने बृहदारण्यके तृतीये ।
2. बृ.भा. 3-1-1
3. Ibid 3-9-28
4. महाना 6-3, ऋ.सं. 10-190-3 तै.आ. 10-1-14
5. गौ.सू. 2-1-68
6. Ibid 1-1-10
7. Ibid 3-1-29

तथा कणादेनापि 'तद्वचनादाम्नायस्य प्रामाण्यम्' इति वदता, तद्वचनात् तेनेश्वरेण प्रणयनात् आम्नायस्य वेदस्य प्रामाण्यमिति वदता स्वोक्तधर्मविषये वेदस्य प्रामाण्यमुक्तमपि आत्मविषये देहादिव्यतिरिक्तत्वे प्रथममनुमानमेव शरणीकृतम् । यथा तदीयप्रशस्तपादभाष्ये "आत्मत्वाभिसम्बन्धादात्मा । तस्य सौक्ष्म्यादप्रत्यक्षत्वे सति करणैः शब्दाद्युपलब्ध्यनुमितैः श्रोत्रादिभिः समधिगमः क्रियते, वास्यादीनां करणानां कर्तृप्रयोज्यत्वदर्शनात्, शब्दादिषु प्रसिद्धया च प्रसाधकोऽनुमीयते । न शरीरेन्द्रियमनसामज्ञत्वात् । न शरीरस्य चैतन्यं घटवद्भूतकार्यत्वात् मृते चासम्भवात् । नेन्द्रियाणां करणत्वात्, उपहतेषु विषयासान्निध्ये चानुस्मृतिदर्शनात्। नापि मनसः, करणान्तरानपेक्षित्वे युगपदालोचनस्मृतिप्रसङ्गात्, स्वयं करणभावाच्च। परिशेषादात्मकार्यत्वात् तेनात्मा समधिगम्यते । शरीरसमवायिनीभ्यां च हिताहितप्राप्तिपरिहारयोग्याभ्यां प्रवृत्तिनिवृत्तिभ्यां रथकर्मणा सारथिवत् प्रयत्नवान् विग्रहस्य अधिष्ठाताऽनुमीयते प्राणादिभिश्चेति" । तत्र वैशेषिकसूत्रं च "प्रवृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टे परत्र लिङ्गम्"[1] "प्राणापाननिमेषोन्मेष जीवनमनोगती इन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेष- प्रयत्नाश्च आत्मनो लिङ्गानि"[2] "आत्मेन्द्रियार्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत्"[3] "व्यवस्थातो नाना शास्त्रसामर्थ्याच्च"[4] इति । एवमेव सांख्ये योगे च शास्त्रे तर्क एव प्रथममादृतः ।

वेदान्तशास्त्रे तु उपनिषद एव प्रथमस्थानमर्हन्ति, तर्कस्तु तदनुग्राहकत्वात् द्वितीयस्थानमर्हति इत्यत्र "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य"[5] इति श्रुतिरेव प्रमाणम् । 'मन्तव्य' इति आगमाच्छ्रुतस्यात्मनो मनने 'श्रोतव्य' इति प्रथममुक्त्वाऽनन्तरमेव 'मन्तव्य' इति मननविधानात् । केवलतर्केण आगमं विना प्रप्रथमं प्रत्यगात्मनोऽधिगन्तुमशक्यत्वाच्च । अत एव लक्षणेन ब्रह्मस्वरूपं "जन्माद्यस्य यत"[6] इति लक्षयित्वा, तत्र प्रमाणजिज्ञासायां "शास्त्रयोनित्वात्"[7] इति तृतीयं सूत्रमवतारयामास भगवान् बादरायणः । शास्त्रयोनित्वसूत्रेण शास्त्रप्रमाणकत्वनिर्धारोऽपि "तं त्वौपनिषदं पुरुषं पृच्छामि"[8] इति श्रुतिरेव प्रमाणम् ।

---

1. वै.सू. 3-1-135
2. Ibid 3-2-139
3. Ibid 3-2-20
4. Ibid 3-2-21
5. बृ. 2-4-5, 4-5-6
6. ब्र.सू. 1-1-2
7. Ibid 1-1-3
8. बृ - 3-9-26

श्रुतिसमधिगते प्रत्यगात्मनि तर्कस्य किं प्रयोजनमिति तु न शङ्क्यम् । प्रत्यगितरस्मात् देहेन्द्रियादेर्व्यावृत्तिबुद्धिः फलम् । तथा जगत्कारणवर्णनेऽपि ब्रह्मणो जगत्कारणत्वे तैत्तिरीयादिश्रुतिसिद्धेऽपि जन्मादिसूत्रन्यायेनान्वयव्यतिरेकरूपेण वर्णितलक्षणमुखेनानुमानेन, यदृच्छास्वभावप्रकृतिपरमाणुसंसारिशून्येभ्यो व्यावृत्तिसिद्धिः । तथा भाष्यकाराश्चेममाशयं व्यञ्जयन्ति "न यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वा, अन्यतः प्रधानादचेतनादणुभ्योऽभावात्संसारिणो वा उत्पत्त्यादि संभावयितुं शक्यम् । न च स्वभावतः विशिष्टदेशकालनिमित्तानामिहोपादानात्"[1] इति ।

नैष्कर्म्यसिद्धौ च सुरेश्वराचार्याः लौकिकप्रमेयवैलक्षण्यादात्मनो नेहानधिगताधिगमः प्रमाणफलम्;

अविद्यानाशमात्रं तु फलमित्युपचर्यते ।
नाज्ञातज्ञापनं न्याय्यमवगत्येकरूपतः ।[2] इत्याहुः ।

सर्वस्यैवानुमानव्यापारस्य फलमियदेव यद्विवेकग्रहणं तदुच्यते,

बुद्धेरनात्मधर्मत्वमनुमानात्प्रसिद्ध्यति ।
आत्मनोऽप्यद्वितीयत्वमात्मत्वादेव सिद्ध्यति ॥[3]

ऋते ज्ञानं न सन्त्यर्था अस्ति ज्ञानमृतेऽपि तान् ।
एवं धियो हिरुग्ज्योतिर्विविच्यादनुमानतः ॥[4] इति ।

अत्र अनुमानप्रमाणस्य धीभ्यो ज्योतीरूपस्यात्मनः पृथक्तया विवेक एव फलमिति स्पष्टमेवोक्तम् ।

मीमांसाऽपि तर्क एव । पूजितविचारवचनो हि मीमांसाशब्दः । अयुक्तिप्रतिषेधेन युक्त्यभ्यनुज्ञानं तर्कः । न्यायवार्तिकटीकायां वाचस्पतिमिश्रैरुक्तम्;

मीमांसासंज्ञकस्तर्कः सर्वो वेदसमुद्भवः ।
सोऽतो वेदो रुमाप्राप्तकाष्ठादिलवणात्मवत् ॥ इति ।

अत्र प्रमाणेतिकर्तव्यतात्वेन च प्रमाणाद्वेदात् तर्कस्याभेद उक्तः 'सोऽतो वेद' इति ।

1. सू.भा. 1-1-2
2. नै. सि. 2-105
3. Ibid 2-96
4. Ibid 2-97

श्रुत्यविरोधितर्कस्यैव ग्राह्यत्वम्

भाष्यकाराः "वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयत"[1] इत्युपोद्धात एव अविरोधितर्कस्वीकारमेवाहुः । के ते तर्काः? प्रशासितुरीश्वरस्य साधनावसरे दर्शितान्यनुमानानि - "एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः"[2] इत्यादिब्राह्मणम् । तत्रैव भाष्यकाराः - "अनेकविशेषणप्रतिषेधप्रयासादस्तित्वं तावदुपगमितमक्षरस्य श्रुत्या। तथापि लोकबुद्धिमपेक्ष्य आशङ्क्यते यतः अतोऽस्तित्वायानुमानं प्रमाणमुपन्यस्यति - 'एतस्य वाऽक्षरस्येति' । सूर्याचन्द्रमसौ अहोरात्रयोर्लोकप्रदीपौ तादर्थ्येन प्रशासित्रा ताभ्यां निर्वर्त्यमानलोकप्रयोजनविज्ञानवता निर्मितौ च स्याताम्, साधारणसर्वप्राणिप्रकाशोपकारकत्वात् लौकिकप्रदीपवत् । तस्माद्येन विधृतावीश्वरौ स्वतन्त्रौ सन्तौ निर्मितौ तिष्ठतः, नियतदेशकालनिमित्तोदयास्तमयवृद्धिक्षयाभ्यां वर्तेते तदस्ति"[3] इत्येवमाद्यनुमानप्रयोगा भाष्योक्तरीत्याऽत्र ब्राह्मणे ऊह्याः ।

अत्र षडनुमानानि दर्शितानि । तथा "यो वा एतदक्षरं गार्गि अविदित्वाऽस्मिंल्लोके जुहोति"[4] इत्यादिब्राह्मणम् । अत्र मोक्षहेतुज्ञानविषयत्वेन बन्धहेत्वज्ञानविषयत्वेन च अक्षरास्तित्वं साधितम् । तदिदं भाष्ये दर्शितम् एवम् - "याज्ञवल्क्य किं ज्योतिरयं पुरुष"[5] इति प्रश्ने, "आदित्यज्योतिस्सम्राडिति होवाच । आदित्येनैवायं ज्योतिषास्ते पल्येते कर्म कुरुते विपल्येति"[6] इति प्रतिवचनम् । अत्र भाष्यम् - "श्रुतिः स्वयमेवाख्यायिकाव्याजेनानुमानमार्गमुपन्यस्यास्मान्बोधयति पुरुषमतिमनुसरन्ती"[7] इति । अयमादित्येनैव स्वावयवसंघातव्यतिरिक्तेन चक्षुषोऽनुग्राहकेन ज्योतिषा प्राकृतः पुरुष आस्ते पल्येते इत्यादि सर्वं भाष्यत एवानुमानमूह्यम् ।

एवं सर्वत्र श्रुतिषु साक्षिभूतस्यात्मनो जागराद्यवस्थासु अनुवृत्तत्वेन व्यावृत्तावस्थाभ्यो भेदो मणिगणेभ्यः सूत्रस्येव 'यदनुवृत्तं तद्व्यावृत्ताद्भिद्यत' इति न्यायेन प्रदर्श्यते प्रायेण माण्डूक्यबृहदारण्यकछान्दोग्यादिषु । तथा च आत्मैकत्वस्य

---

1. सू.भा. 1-1-1
2. बृ. 3-8-9
3. बृ.भा. 3-8-9
4. बृ. 3-8-10
5. Ibid 4-3-2
6. Ibid
7. बृ.भा. 4-3-2

श्रुतितात्पर्यविषयीभूतस्य साधकानि अनुमानान्तराणि ईदृशान्येव तर्कशब्देन ग्राह्याणि । तथा भामतीकाराः - ''वेदान्तमीमांसा तावत् तर्क एव । तविरोधिनश्च येऽन्येऽपि तर्का अध्वरमीमांसायां न्याये च वेदप्रत्यक्षादिप्रमाण्य-परिशोधनादिषूक्ता''[1] इति अविरोधितर्कान् ग्राह्यान् दर्शयन्ति ।

अनुमानमर्थापत्तिश्चेत्येतद्द्वयं तर्कशब्देनान्यैर्गृहीतम् । तदेतत् मीमांसारूपमेव । उपकरणीभूततर्कास्तु श्रुतिलिङ्गादयः श्रुत्यर्थपाठादयश्च इति चान्यत्र । अन्यच्च तर्कलक्षणं गौतमोक्तम् यथा ''अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितः तत्त्वज्ञानार्थमूहस्तर्कः''[2] इत्युक्तलक्षणस्तर्कोऽपि प्रमाणानुग्राहकतया स्वीकृतः, न साक्षात्प्रमाणम् । अस्य सूत्रस्यार्थः न्यायमञ्जर्यां जयन्तभट्टेन विवृतः यथा, ''अविज्ञाततत्त्वे सामान्यतो ज्ञाते धर्मिणि[3] अर्थे एकपक्षानुकूलकारणदर्शनात्[4] तस्मिन् संभावनाप्रत्ययः भवितव्यताभासः तदितरपक्षशैथिल्यापादने तद्ग्राहकप्रमाणमनुगृह्य तत्सुखं प्रवर्तयन् तत्त्वज्ञानार्थमूहस्तर्क इति । यथा बाह्यकेलिप्रदेशादौ ऊर्ध्वत्वविशिष्टधर्मिदर्शनात् पुरुषेणानेन भवितव्यमिति प्रत्ययः । कारणोपपत्तित इति विशेषणेन अविज्ञाततत्त्वार्थे जायमानबुभुत्साविमर्शयोस्तर्कत्वं नास्तीति तन्निरासः । तत्त्वज्ञानार्थमिति विशेषणेन तर्कस्य साक्षात्प्रमाणत्वं निरस्यति, परंतु तर्कोऽयं प्रमाणानुग्राहकः, विशेषपरिशोधनद्वारेण तदनुग्रहं विदधत् तत्त्वज्ञानाय कल्पते । लोकेऽपि तर्क इति संभावनात्मकत्वेन प्रसिद्धः । संशयनिर्णयान्तरालवर्ती कश्चित्प्रत्ययः । यथा स्थाणुर्वा पुरुषो वेति प्रतीतिरेका । पुरुष एवायमित्यन्या । पुरुषेणानेन भवितव्यमिति मध्यवर्तिनी तृतीया संभावनाप्रतीतिः स्वहृदयसाक्षिका । अयं च ऊह इत्यभिधीयते । न तेन अनुमानाख्यतर्कस्य ग्रहणम् । ऊहस्य प्रमाणानुग्राहकत्वात् । एतादृशतर्कश्च अर्थं साधयितुं वादे प्रयुज्यते हृदयशुद्धिप्रदर्शनार्थम्''[5] इति ।

मीमांसकोक्त ऊहशब्दोऽनुमानफले प्रयुक्तः । स च युक्त्या प्रयोगनिरूपणम् 'ऊह' इति । न्यायविशेषात्मकस्तु ऊहो नानुमानादर्थान्तरम् । न्यायफले प्रयोगे

1. भामती 1-1-1
2. गौ.सू. 1-1-40
3. अविज्ञातविशेष इति यावत्
4. संशयज्ञानोल्लिख्यमानपक्षद्वयान्यतरपक्षोत्थापनानुकूलकारणावलोकनात् ।.
5. न्या. मं. 1-1-40

ऊहशब्दप्रयोगः न्याये च जैमिनिमतानुसारिभिः औपचारिकतया प्रयुक्त इति[1] विचारितम् ।

अनुमानयुक्त्योर्वैलक्षण्यम्;

न हि युक्तिरेवानुमानम् । व्याप्त्याभासोऽनुपपत्त्याभासोऽथोदाहरणमात्र-दर्शनं चेति त्रयं संभावनाबुद्धिजनकत्वेन युक्तिरित्युच्यते । अव्यभिचरितव्याप्तिकमर्थनिश्चायकमनुमानम् । अयं तु प्रमाणभूतस्तर्कः । अतो वैशेषिकादिप्रयोगाणां सत्यप्यनुमानदोषे श्रुतिसिद्धब्रह्मणि संभावनाबुद्धिहेतुत्वेनास्मदुक्तयुक्तित्वमविरुद्धम् । अतः संभावनाबुद्धिहेतुत्वेन आगमोपकारिणीमस्मदुक्तां युक्तिमेव अज्ञानात् वैशेषिकादयोऽनुमानं मन्यन्ते इति श्रीविद्यारण्यैः प्रतिपादितम् ।[2]

सिद्धान्तबिन्दौ श्रीमधुसूदनसरस्वतीभिस्तु ''व्याप्यारोपेण व्यापक-प्रसञ्जनात्मकोऽपि तर्कः, स च भ्रमप्रमाविलक्षणः इच्छाधीनत्वात्, एवं च मनननिदिध्यासनसहितश्रवणाह्वयवेदान्तवाक्यविचारोऽपि तर्करूप एव श्रोतव्यवाक्यविहितः, चतुर्विधान्वयव्यतिरेकादितर्कविशेषो वेदान्ताहतः । दृग्दृश्यान्वयव्यतिरेकः, साक्षिसाक्ष्यान्वयव्यतिरेकः, आगमापायितदवध्यन्वयव्यतिरेकः, दुःखिपरमप्रेमास्पदान्वयव्यतिरेकः, तथा अनुवृत्तव्यावृत्तान्वयव्यतिरेकः, एवं सर्वेऽपि चतुर्लक्षणीमीमांसाप्रतिपादिता वेदान्तानुकूलास्तर्का उपलक्षणतया ग्राह्याः । तत्र चत्वारः अग्रे दर्शयिष्यमाणसूत्रप्रस्थाने समन्वयाविरोधसाधनफलाध्याया''[3] इति।

बिन्दुटीकायां ब्रह्मानन्दसरस्वत्य एवं विशदीकुर्वन्ति - तत्र श्रवणं नाम 'तत्त्वमस्यादिवाक्यं यदि ब्रह्मात्मैक्यपरं न स्यात् तदोपक्रमोपसंहारादिकमद्वैतब्रह्मबोधकं न स्यात्' इति तर्करूपम् । तस्य प्रमाणीभूतवाक्यतात्पर्यविषयकत्वेन प्राधान्यात् । ब्रह्मात्मैक्यसिद्ध्यनुकूलतर्कादयोऽपि श्रवणेऽन्तर्भवन्ति, वाक्यजन्यज्ञानस्य परोक्षनिश्चयत्वसंपादकस्तर्कः । निदिध्यासनमपरोक्षनिश्चयत्वसंपादकस्तर्कः, तत्त्वमस्यादिवाक्यजं ज्ञानं यदि परोक्षं स्यात् तर्हि आत्मविषयकं न स्यादित्यादिरूपः इति ।

---

1. न्या. मं. 1-1-40   2. विवरणप्रमेयसंग्रहे   3. सि.बिं. P.167-168

श्रुतिविरुद्धानां तु तर्काणां ''तर्काऽप्रतिष्ठानात्''[1] इति सूत्रकारैरेव निरासः कृतः । स्मृतिकाराश्च-अचिन्त्याः खलु ये भावाः न तांस्तर्केण योजयेत् । प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणम् ।

इति विरोधितर्कान्निराकुर्वन्ति । भाष्यकाराश्च ''लौकिकानामपि मणिमन्त्रौषधिप्रभतीनां देशकालनिमित्तवैचित्र्यवशात् शक्तयो विरुद्धानेककार्यविषया दृश्यन्ते । ता अपि तावत् नोपदेशमन्तरेण केवलेन तर्केणावगन्तुं शक्यन्तेऽस्य वस्तुन एतावत्य एतावत्सहाया एतद्विषया एतत्प्रयोजनाश्च शक्तय इति । किमुताचिन्त्यस्वभावस्य ब्रह्मणो रूपं विना शब्देन न निरूप्येत''[2] इति केवलतर्कं लौकिकवस्तुष्वपि निराचक्रुः ।

तथाच अव्याकृतसूत्रात्मेश्वरदेवतास्वर्गनरकादिषु धर्माधर्मयोर्योगवैभवे च तर्का आभासी भवन्ति । अत एवं एतादृशविषयेऽप्रतिष्ठितत्त्वमेव बादरायणादयो मन्यन्ते । श्रुतिश्च ''नैषा तर्केण मतिरापनेया''[3] इति, भगवानपि गीतायां ''अव्यक्तोऽयमचिन्त्योऽयम्''[4] इति, केवलतर्कागम्यत्वमाह ।

वेदान्तानामर्थनिर्णये उपकारकाणि पदवाक्यप्रमाणानि, आचार्यैरेवेदमभिहितं तैत्तिरीय भाष्यस्यादौ-

यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः ।
व्याख्याताः सर्ववेदान्तास्तान्नित्यं प्रणतोऽस्म्यहम् ॥ इति ॥

अनेनावगम्यते भगवत्पादेभ्योऽपि प्राचीनगुरुभिः पदवाक्यप्रमाणानि वेदान्तव्याख्याने समादृतानि इति । तत्र पदं नाम व्याकरणशास्त्रं पाणिनीयम् । वाक्यं च मीमांसा । प्रमाणं नाम न्यायशास्त्रम् । एवमुक्तेऽपि शिक्षानिरुक्तेऽपि अङ्गे ग्राह्ये । अत एव तैत्तिरीयस्यादौ - ''शीक्षां व्याख्यास्याम''[5] इति शिक्षावल्ल्यारम्भे वर्णस्वरमात्रादीनामुपनिषदध्ययनोपयोगिनां शिक्षावश्यकीत्युक्तम् । भाष्यकारैश्च ''अर्थज्ञानप्रधानत्वादुपनिषदो ग्रन्थपाठे यत्नोपरमो मा भूदिति शीक्षाध्यायः आरभ्यत''[6] इत्यवतारितम् । तथा च मुमुक्षूणां

1. ब्र.सू. 2-1-11
2. सू.भा. 2-1-27
3. कठो 2-9
4. भ.गी. 2-25
5. तै. 1-1
6. तै.शां.भा. 1-1

विपश्चितामर्थज्ञानप्रधानत्वेऽपि स्वरवर्णादिकोच्चारलक्षणशिक्षा वेदान्ताध्ययने आवश्यकीति श्रुत्या भाष्यकारैश्च प्रबोधः कृतः । अन्यथा

'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥

इति दोषश्रवणात् केवलोपनिषत्पाठकर्तुरपि शिक्षाननुसरणे दोषसंभवेन विद्याप्रतिपत्तेरपि प्रतिबन्धापत्तिरिति ।

एवं निरुक्तमपि यास्कीयं वेदान्तव्याख्याने आवश्यकम् । स्वीकृतं चाङ्गतया भाष्यकारैः । यथा "यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्त"[1] इति वाक्ये वैश्वानरशब्दः यास्कानुसारेणेत्थं व्याख्यातः; "विश्वश्चायं नरश्चेति, विश्वेषां वाऽयं नरः, विश्वे वा नरा अस्येति विश्वानरः परमात्मा सर्वात्मत्वात् । विश्वानर एव वैश्वानरः । अग्निशब्दोऽपि अग्रणीत्वादियोगाश्रयणेन परमात्मविषय एव भविष्यति"[2] इति । "यस्मिन्पञ्च पञ्चजना..."[3] इत्यत्र पञ्चजनशब्दस्य व्याख्याने निरुक्तसहायः स्वीकृतः 'गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके चत्वारो वर्णा निषादः पञ्चम इति औपमन्यव' इति कैश्चित्तु... इत्यादिना । 'क्वचित् यत्पाञ्चजन्यया विशेति प्रजापरः प्रयोगः पञ्चजनशब्दस्य दृश्यते' इति वदन्तो भाष्यकारा निरुक्तमनुसरन्ति । सा चेयं ऋक् निरुक्तेऽप्युद्धृता निर्वचनार्थम् । तथापि पदवाक्यप्रमाणानि प्राधान्येन पुरस्कृतानि ।

वेदान्तेषु भागद्वयम्

उपनिषदाख्या वेदान्ताः सगुणं निर्गुणं च तत्र तत्र प्रतिपादयन्तो विभक्ततया ग्राह्याः । तत्र सगुणब्रह्मवादिनो भागा ईश्वरोपासनार्थं प्रवृत्ताः । तत्फलं च क्रममुक्तिः । निर्गुणब्रह्मवादिनस्तु ब्रह्मज्ञानपराः, तत्फलं तु सद्योमुक्तिः । ज्ञानसमनन्तरमेव जीवत एव मुक्तिः । एवं विभक्तवेदान्तानाम् उपासनाकाण्ड इति ज्ञानकाण्ड इति च निबन्धकारैर्व्यवहारः कृतः । अद्वैतसिद्धान्तेऽस्मिन् असङ्कीर्णमिदं विभागद्वयं स्वीकृतम् । यतो हि भाष्यकारा इत्थं बोधयन्ति "द्विरूपं हि ब्रह्म अवगम्यते, नामरूपविकारभेदोपाधिविशिष्टं तद्विपरीतं च सर्वोपाधिविवर्जितम् ।

1. सू.भा. 1-2-24 2. सू.भा. 1-2-28 3. बृ. 4-4-17

'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' इति चैवं सहस्रशो विद्याऽविद्याविषयभेदेन ब्रह्मणो द्विरूपतां दर्शयन्ति वाक्यानि । तत्र अविद्यावस्थायां उपास्योपासकादिलक्षणः सर्वो व्यवहारः । तत्र कानिचिद्ब्रह्मण उपासनान्यभ्युदयार्थानि । कानिचित् क्रममुक्त्यर्थानि । कानिचित् कर्मसमृद्ध्यर्थानि। सद्योमुक्तिकारणमप्यात्मज्ञानं उपाधिविशेषद्वारेणोपदिश्यमानमपि अविवक्षितोपाधिसंबन्धविशेषं परापरविषयत्वेन संदिह्यमानं वाक्यगतिपर्यालोचनया निर्णेतव्यं भवति । एवमेकमपि ब्रह्मापेक्षितोपाधिसंबन्धं निरस्तोपाधिसंबन्धं चोपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषु उपदिश्यत''[1] इति । एतदवलोकने काण्डभेदः पूर्वोक्तो भाष्यसम्मत इत्यवगम्यते । अन्यत्र च ''उपासनाविधिप्रधानानि हि तानि। तेष्वसति विरोधे यथाश्रुतमाश्रयितव्यम्''[2] इति वदन्तः साकारनिराकार-वादिवेदान्तविभाग उक्तरीत्या उपनिषत्सु द्रष्टव्यः इति बोधयन्ति ।

---

1. सू.भा. 1-1-11
2. सू.भा. 3-2-14

बादरायणः, सूत्रप्रस्थानं च

अयं महामुनिरेक एव द्वैपायन इति कृष्णद्वैपायन इति, बादरायण इति, व्यास इति, वेदव्यास इति, पाराशरिरिति च जेगीयते महाभारते पुराणेषु च । भारते -

व्यस्तवेदतया व्यास इति लोके श्रुतो मुनिः ।
अयं साक्षान्महायोगी व्यासः सर्वज्ञ ईश्वरः ॥

विव्यास वेदान् यस्माच्च तस्माद् व्यास इति स्मृतः ।
द्वीपे न्यस्त स्वयं बालस्तस्माद्वैपायनोऽभवत् ॥[1] इति

वेदविभजनेन व्यास इति, पराशरात् योजनगन्धायाम् उत्पन्नमात्रस्य बालस्य द्वीपे न्यस्तत्वात्, तद्द्वारा द्वीपायनत्वलंभनात् द्वैपायन इति, कृष्णवर्णत्वात् कृष्ण इति, बदरीवनसमाश्रयणात् बादरायण इति, पराशरपुत्रत्वात् पाराशरिरिति सप्रवृत्तिनिमित्तं विविधैर्नामभिरभिगीतः । एवमेव अपान्तरतपा इति नाम्नाऽपि भारते प्रसिद्धः यथा,

अपान्तरतपा नाम वेदाचार्यः स उच्यते ।
प्राचीनगर्भं तमृषिं प्रवदन्तीह केचन ॥
तत्राप्यनेकधा भेदात् वेदव्यासेति संज्ञितः ।
कृष्णे युगे च संप्राप्ते कृष्णवर्णो भविष्यसि ॥
धर्माणां विविधानां च कर्ता ज्ञानाकरस्तथा ।[2] इति ।

भगवत्पादाश्च वर्णयन्ति सूत्रभाष्ये ''अपान्तरतमा नाम वेदाचार्यः पुराणर्षिः विष्णुनियोगात् कलिद्वापरयोः सन्धौ संबभूव''[3] इति; अन्यत्र सूत्रभाष्यान्ते ''भगवान् बादरायण आचार्यः पठति''[4] इति । एतं च महामुनिं 'पदवाक्यप्रमणज्ञेन आचार्येण' इति ईक्षत्यधिकरणारम्भे सगौरवं स्मरन्ति । तथा च अयं मुनिः कलिद्वापरसन्धिकाले संबभूवेति निर्णयः । अपि च जन्मान्तरे अपान्तरतमनाम्ना प्रसिद्धः सन् ब्रह्मविदपि उत्तमप्रारब्धकर्मशेषवशात् परमेश्वरेण स्वाधिकारे

1. म.भा. 1-57-73
2. Ibid 12-337-44, 45
3. सू.भा. 3-3-32
4. Ibid 4-4-22

नियुक्तोऽप्सरसां कुले संभूताया रद्रिकायाः पुत्र्यां योजनगन्धापरनामधेयायां सत्यवत्यां पराशरात् किल संबभूव । अत एवायं मुनिः आधिकारिकपुरुषेषु ब्रह्मविद्वरिष्ठेषु भृगुवसिष्ठादिषु परिगणितः श्रीशंकरभगवत्पादैः - ''एवमपान्तरतम-प्रभृतयोऽपि ईश्वराः परमेश्वरेण तेषु तेष्वधिकारेषु नियुक्ताः सन्तः सत्यपि सम्यग्दर्शने कैवल्यहेतावक्षीणकर्माणो यावदधिकारमवतिष्ठन्ते; तदवसाने चापवृज्यन्त इत्यविरुद्धम्''[1] इति । किं चायं मुनिः न जातिस्मरः । यतो भाष्यकारास्तद्वैलक्षण्यमुपवर्णयन्ति - ''सकृत्प्रवृत्तमेव हि ते फलदानाय कर्माशयमतिवाहयन्तः स्वातन्त्र्येणैव गृहादिव गृहान्तरमन्यमन्यं देहं संचरन्तः स्वाधिकारनिर्वर्तनाय अपरिमुषितस्मृतय एव देहेन्द्रियप्रकृतिवशित्वात् निर्माय देहान् युगपत् क्रमेण वाऽधितिष्ठन्ति । न चैते जातिस्मरा इत्युच्यन्ते । 'त एवैत' इति स्मृतिप्रसिद्धेः । यथा हि सुलभा नाम ब्रह्मवादिनी जनकेन विवदितुकामा व्युदस्य स्वदेहं जानकं देहमाविश्य व्युद्य तेन पश्चात् स्वमेव देहमाविवेशेति स्मर्यते''[2] इति । तथा चायमपि मुनिः उत्पन्नब्रह्मविज्ञानः सन्नपि उत्तमं प्रारब्धकर्माशयं फलदानाय प्रवृत्तमेवातिवाहयन् गृहाद् गृहान्तरमिव देहेन्द्रियप्रकृतिस्वातन्त्र्यात् स्वाधिकारभूतपाण्डवकुलानुग्रहवेदविभागकरणवेदान्तार्थविनिर्णयोपयोगिन्यायसूत्र-सूत्रणवेदोपबृंहणकारणीभूतपुराणेतिहासादिरचनप्रमुखमहोपकृतिनिर्वर्तनाय निर्माय देहमधितिष्ठतीति निश्चिनुमः ।

बादरायणो वेदव्यासादनन्यः

आधुनिकाः केचन विमर्शकाः परं बादरायणं वेदव्यासादन्यमेव मन्यन्ते । कुतः ? ब्रह्मसूत्रेषु ''तदुपर्यपि बादरायणः संभवात्''[3] ''भावं तु बादरायणोऽस्ति हि''[4] ''पुरुषार्थोऽतः शब्दादिति बादरायण''[5] इत्यादिषु सूत्रकारः स्वसिद्धान्तप्रकाशनाय बादरायण इति नाम्ना अन्यमेव मुनिं जैमिनिबादरिकाशकृत्स्नादिवत् प्रमाणयन् आत्मनो व्यतिरिक्त एव बादरायण इति सूचयति । अन्यथा तदुपर्यपि अहमित्येव निर्दिदिक्षेत् । न ह्यात्मानं स्वनाम्ना निर्देष्टुं कोऽपि समुत्सहत इति ।

1. सू.भा. 3-3-32
2. Ibid
3. ब्र.सू. 1-3-26
4. Ibid 1-3-33
5. Ibid 3-4-1

तदिदमसमीचीनम् । लोके स्वयमेव वक्ता स्वाशयं विशेषतः प्रकाशयितुं स्वनाम्नैव स्वभिप्रायेण आत्मानं संकीर्तयति । यथा 'रामोऽस्मि सर्वं सहे' 'रामस्य गात्रमसि दुर्भरगर्भखिन्नसीताविवासनपटोः करुणा कुतस्ते' तथा 'रामो द्विर्नाभिभाषत' इत्येवमादिप्रयोगेषु साभिप्रायं रामशब्दं प्रयुञ्जानः स्वयं राम एव वक्ता परिदृश्यते । तद्वत् सूत्रकार एव स्वनाम्ना बादरायण इत्यनेन उपनिषदां परमतात्पर्यविदहमिति साभिप्रायेण अविचलितं सिद्धान्तं प्रकाशयितुमात्मानं संकीर्तयति । सूत्रकाराशयमजानाना उदाहृतप्रयोगप्राचुर्यं चापश्यन्तः आधुनिकविमर्शकाः बादरायणादन्य एव व्यास इति व्यामुह्यन्तीत्याश्चर्यमिदम् । भगवत्पादाशयस्तु व्यक्त एव तदनन्य इति ।

गीताभारतसूत्रोदयकालविमर्शः

अन्ये पुनः गीतायाम् ''ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः''[1] इति दर्शितब्रह्मसूत्रपदेन प्रसिद्धब्रह्मसूत्रमिति भ्राम्यन्तो ब्रह्मसूत्रनिर्माणानन्तरं भारतनिर्माणं चक्र इति वदन्ति । तदपि मन्दम् । गीतायाः भगवदुक्तार्थानुवादिन्याः व्यासेन श्लोकरूपेण निबद्धमात्रत्वात् स्वकीयब्रह्मसूत्रपदैस्तद्गीतमिति नार्थो वक्तुमुचितः । कुत इति चेत्, ब्रह्मसूत्रनिर्माणानन्तरमेव वेदव्यासोक्तब्रह्मसूत्रपदानि परामृशन् भगवान् वासुदेवोऽर्जुनं प्रत्युपदिदेशेति वक्तव्यमापतेत् । तदनौचित्यं तु पूर्वव्याख्याने दुष्परिहरम् । अतो ब्रह्मसूत्रपदेन ब्रह्मबोधक-संक्षिप्तपदैरौपनिषदैस्तत्रत्ययुक्तियुक्तैर्हेतुमद्भिर्गीतमिति श्रीभगवत्पादकृतार्थ एव साधुः । अतः सूत्रभारतयोः पौर्वापर्यनिर्णये नेदं पुष्कलं कारणम् । पौर्वापर्यनिर्णये नास्माकं निर्भरश्च । तथा गीता सूत्रयोरपि । किंच 'स्मृतेः' 'स्मरन्ति च' इत्यादिस्थले भाष्यकाराणां व्यासस्मृतेः, व्यासदयश्च स्मरन्ति, इति तदीयस्मृतेरेव सौत्रार्थनिर्णये प्रमाणीकरणं व्यासादन्यं बादरायणं सूत्रकर्तारं गमयतीति केषांचन आक्षेपोऽपि आभास एव । श्रुतिवत् तन्मूलकस्मृतेरपि प्रमाणीकरणे सूत्रकृतां न स्वोक्तत्वेन, किं तु वेदमूलकत्वेनैव तत्समानर्थकस्मृतिमात्रस्य स्वकृतस्य अन्यकृतस्य वा प्रामाण्येनोदाहरणं संगच्छत एव । अतः सूत्रार्थनिर्णये स्वकृतस्मृत्युदाहरणं बादरायणस्य व्यासाद्भेदे न प्रमाणीभवति ।

---

1. भ.गी. 13-4

केचन कर्मकाण्डदेवताकाण्डब्रह्मकाण्डत्रयं जैमिनिनैव कृतमिति मन्यन्ते । तत्र आद्यद्वये पूर्वमीमांसेति, देवताकाण्ड इति च सूत्ररूपत्वेन प्रसिद्धिरस्ति, इष्यते च । परंतु ब्रह्मसूत्रत्वेन प्रसिद्धब्रह्मकाण्डस्तु जैमिनिकृत इति क्वचिदेव नैष्कर्म्यसिद्धावुल्लिखित इति, 'पण्डितरत्नं लक्ष्मीपुरं श्रीनिवासाचार्याः उदाजह्रुः'। यथा-

नैष्कर्म्यसिद्धौ नवतितमश्लोकस्थभारती ॥
जैमिनिस्सामगाचार्यस्सामवेदप्रवर्तकः ।
व्यासशिष्य इति स्पष्टं श्रूयते भारतादिषु ॥
कर्मकाण्डे सामवेदविचारः प्रायशस्ततः ।
छान्दोग्योपनिषत्सामशाखीयेति च विश्रुता ॥
प्रायस्तदीयवाक्यानि सूत्राणां विषया इति ।
सूत्रभाष्यसमध्येतृविदुषामतिरोहितम् ॥
जैमिनीयं ब्रह्मसूत्रमावापोद्वापतः पुनः ।
पर्यकार्षीद्व्यास इति संदर्भेणोहितुं क्षमम् ॥[1] इति ।

एतेन जैमिनिकृतं ब्रह्मसूत्रमावापोद्वापाभ्यां व्यासेन परिष्कृतमिति विज्ञायते । अथापि, श्रीशंकराचार्यभास्कराचार्यादिभिरनेकैराचार्यैर्वेदव्यासकृतमेव ब्रह्मसूत्रमिति स्वीकृतम् । एवं बहुसंमतत्वात् इदं बादरायणीयमित्येव सिद्धान्तः । श्रीनिवासाचार्याश्च उत्तरत्र अन्यदेकं समाधानमाहुः -

अनेकेषां मतं ब्रह्मसूत्रेषूदाहृतं ततः ।
ब्रह्म सूत्राण्यप्यनेकानि आसन्निति च कल्प्यते ॥
एवं प्रकल्पने प्रायो भाति सर्वं सुसङ्गतम् ॥[2] इति ।

ब्रह्मसूत्राभिधप्रस्थानस्य उत्पत्तिः तद्बीजं च प्रथमं विमर्शनीयम् । अत्र आक्षेपाङ्कुरः कश्चन समुल्लसति । न खलु वेदान्ता अविनिश्चितार्थाः कदापि केषांचिदपीति वक्तुं सुशकम् । सूत्रोत्पत्तेः प्राक् प्राचीना ब्रह्मविदो जनकयाज्ञवल्क्यादयो वेदान्तार्थविज्ञानशून्याः किमासन्? वेदव्यासश्च किं तथैव आसीदविदितवेदान्तार्थः? तथा सति तन्निर्णयं विना भृगुवरुणरैक्वजनकया-

1. मा.श्लो. वा. p.573 2. Ibid P.574

ज्ञवल्क्यादीनां ज्ञानमेव नासीदिति वक्तव्यतामापतति । अतः अनादिभूत-वेदवेदान्तार्थनिर्णयः केषांचित् पुरुषधौरेयाणां प्रागुदाहृतानां वामदेववसिष्ठपराशरशुकगौडपादादीनां च आसीदेवेति स्वीकर्तव्यम् । किं च ते विचारशास्त्रमन्तराऽपि तपःप्रभावात्, देवताराधनाद्वा, ईश्वरप्रसादाद्वा, लब्धतत्त्वविज्ञाना भवन्तीति वक्तव्यम् । अतो वामदेवादिवत् ये स्वयं प्रबुद्धाः ते विचारशास्त्रानपेक्षिण एव सुनिश्चितवेदान्तार्था इति विचारशास्त्ररूपसूत्रप्रस्थानस्योदये न किंचिद्बीजं पश्याम इति ।

अत्र समाधानम् - न हि विदितवेदार्थं प्रति या काचन मीमांसा प्रस्तूयते । आह च जयन्तभट्टः[1] श्लोकवार्तिकोदाहरणेन, ''नहि विदितवेदार्थं प्रति मीमांसा प्रस्तूयत'' इति । तदुक्तं श्लोकवार्तिके 'नान्यतो वेदविद्भ्यश्च सूत्रवृत्तिक्रियेष्यत' इति । तथा च मन्दमध्यमानां वेदार्थविषये धर्मे ब्रह्मणि वा संशयानानां विभ्रमाणां वा संशयभ्रमनिरासार्थं मीमांसेति[2] पूर्वमीमांसाशास्त्रवत् इदमपि शास्त्रं बादरायणेन विरचितमिति इदमेव ब्रह्मसूत्रोदये बीजम् । श्रीशांकरभाष्यावतरणिकावलोकने आस्तिकनास्तिकवादिविप्रतिपत्तिभिरात्मनि संशयानानामर्थनिर्णयाय वेदान्तवाक्यमीमांसारूपमिदं प्रस्थानमवततारेति गम्यते । तद्यथा ''यदि तर्हि लोके ब्रह्मात्मत्वेन प्रसिद्धमस्ति ततो ज्ञातमेवेत्यजिज्ञास्यत्वं पुनरापन्नमिति चेन्न, तद्विशेषं प्रति विप्रतिपत्तेः । देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता जना लोकायतिकाश्च प्रतिपन्नाः । इन्द्रियाण्येवात्मेत्यपरे । मन इत्यन्ये । विज्ञानमात्रं क्षणिकमित्येके । शून्यमित्यपरे । अस्ति देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेत्यपरे । भोक्तैव केवलं न कर्तेत्येके । अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित् । आत्मा स भोक्तुरित्यपरे । एवं बहवो विप्रतिपन्ना युक्तिवाक्यतदाभाससमाश्रयाः सन्तः । तत्राविचार्य यत्किंचित्-प्रतिपद्यमानो निःश्रेयसात्प्रतिहन्येत, अनर्थं चेयात् । तस्माद्ब्रह्मजिज्ञासोपन्यास-मुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयत''[3] इति

1. न्यायमञ्जर्याम्
2. पूजितविचारवचनो मीमांसाशब्दः
3. सू.भा. 1-1-1

किं चैवं संशयोऽनादिप्रवाहरूपे संसारे मन्दमध्यमानां साहजिक इति तत्परिच्छेदार्थमीदृशं विचारशास्त्रमावश्यकम् । श्वेताश्वतरोपनिषदि विचारारम्भे जगत्कारणप्रश्ने 'किं कारणं ब्रह्म' इत्यारभ्य ब्रह्मकारणवादप्रतिपक्षभूतानि कालादीनि विचाराङ्गत्वेनोपक्षिप्तानि । यथा 'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्य' इति । एवमेव माण्डूक्यप्रकरणेऽपि वादिविप्रतिपत्तिः प्रदर्शिता । तथाहि

अस्ति नास्त्यस्ति नास्तीति नास्ति नास्तीति वा पुनः ।
चलस्थिरोभयोभावैरावृणोत्येव बालिशः ॥

कोटचश्चतस्र एतासु ग्रहैर्यासां सदावृतः ।
भगवानाभिरस्पृष्टो येन दृष्टः स सर्वदृक् ॥[1] इति ॥

अपि च

प्राणादिभिरनन्तैश्च भावैरेतैर्विकल्पितः ।
मायैषा तस्य देवस्य यया संमोहितः स्वयम् ॥
प्राण इति प्राणविदो भूतानीति च तद्विदः
गुणा इति गुणविदस्तत्त्वनीति च तद्विदः ॥
पादा इति पादविदो विषया इति तद्विदः ।
लोका इति लोकविदो देवा इति च तद्विदः ॥[2] इति ।

एवम् उत्तराः कारिकाः[3] अपि विप्रतिपत्तिपराः । अपरं च कारणम् । तदात्वे निरीश्वरसांख्यमतं तर्कप्रधानं केवलतर्कबलादेवाभ्यूहितप्रधानतत्त्वं जगत्कारणमिति वदत् स्वसिद्धान्तानुगुण्येनैव वेदान्तानपि योजयत् सत् कपिलादिमहामुनिपरिगृहीतं च सत् परां प्रथामवाप । कपिलगौरवात् तदनुयायिमन्दमध्यमशिष्यकोटिवृन्दान्यपि तन्मतमेव साध्विति परिभ्राम्यन्ति स्म । प्रकृतिपुरुषविवेकमात्रेण मुक्तिरिति भ्रान्त्या गतानुगतिकन्यायेन गच्छतां परमपुरुषार्थात्परिभ्रंशो मा भूदिति परमकरुणया श्रुत्यर्थविनिर्णयाय न्यायपरं सूत्रात्मकं शास्त्रमिदमारचयामास भगवान् बादरायणः । इममाशयं भगवत्पादा एव प्रकटीकचक्रुर्भाष्ये । यथा ''सांख्यादयस्तु परिनिष्ठितं

1. गौ.का. 4-83,84
2. Ibid 2-20,21,22
3. Ibid 2-23, 24, 25, 26, 27, 28, इत्येताः कारिकाः ।

वस्तु प्रमाणान्तरगम्यमेवेति मन्यमानाः प्रधानादीनि कारणान्तराण्यनुमिमानाः तत्परतयैव वेदान्तवाक्यानि योजयन्ति । सर्वेष्वेव वेदान्तवाक्येषु सृष्टिविषयेषु अनुमानेनैव कार्येण कारणं लिलक्षयिषितम् । प्रधानपुरुषसंयोगा नित्यानुमेया इति सांख्या मन्यन्ते । एवमन्येऽपि तार्किका वाक्याभासयुक्त्याभासावष्टम्भाः पूर्व पक्षवादिन इह्योत्तिष्ठन्ते । तत्र पदवाक्यप्रमाणज्ञेनाचार्येण वेदान्तवाक्यानां ब्रह्मा-वगतिपरत्वप्रदर्शनाय वाक्याभासयुक्त्याभासप्रतिपत्तयः पूर्वपक्षीकृत्य निराक्रियन्त''[1] इति । अन्यत्र च ''ईक्षतेर्नाशब्दम्'' इत्यारभ्य प्रधानकारणवादः सूत्रैरेव पुनः पुनराशङ्क्य निराकृतः । तस्य हि पक्षस्य उपोद्बलकानि लिङ्गाभासानि वेदान्तेष्वापातेन मन्दमतीन् प्रतिभान्तीति स च कार्यकारणानन्यत्वा-भ्युपगमात्प्रत्यासन्नो वेदान्तवादस्य । देवलप्रभृतिभिश्च कैश्चित् सूत्रकारैः स्वग्रन्थेषु चाश्रितः । तेन तत्प्रतिषेधेऽतीवयत्नः कृतः । नाण्वादिकारणवादप्रतिषेधे । तेऽपि तु ब्रह्मकारणवादपक्षस्य प्रतिपक्षत्वात् प्रतिषेद्धव्याः । तेषामुपोद्बलकं वैदिकं किंचित् प्रतिभायादिति । अतः प्रधानमल्लनिबर्हणन्यायेनातिदिशति 'एतेन सर्वे व्याख्याता व्याख्याता''[2] इति ।

सांख्यशास्त्रमिदं महर्षिकापिलप्रणीतम् । तस्य प्रवर्तकः स एव । भिन्नात्मवादी, प्रधानकारणवादी, वैदिकविरुद्धदर्शनप्रवर्तकश्चायम् । न तु ''ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत्''[3] इति प्रसिद्धः कपिलः । अयमन्यो वासुदेवनामा तदवतारः सगरपुत्राणां प्रतप्ता रामायणप्रसिद्धः। अतोऽन्येन कपिलाचार्येण विरचितं शास्त्रं सूत्रकारदृष्टिपथमयासीदित्युन्नीयते । परं तु भगवत्पादानां नोपलब्धम् । यतः सांख्यमतनिराकरणावसरे भाष्यकारैः ईशकृष्णकारिकावचनमेव उदाह्रियते । यथा ''पञ्चविंशतिसंख्यया तत्त्वानि सांख्यैः संख्यायन्ते,

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः[4] ॥ इति

---

1. सू.भा. 1-1-5
2. ब्र.सू. 1-4-28
3. श्वेता 5-2
4. सां. का. 3

एवं हि तन्त्रान्तरीया आचक्षते 'सामान्या करणवृत्तिः प्राणाद्या वायवः पञ्च''[1] इति । न कुत्रापि कापिलं साक्षाद्वचनम् ।

यद्यपि षडध्यायात्मकं सूत्ररूपं कपिलमुनिकृतमिति संमुद्रितमुपलभ्यते अथापि न तत् प्रामाणिकम् । यदि इदमेव स्यात् गौतमकणादसूत्रोदाहरणवत् तदेव भगवत्पादैरुदाह्रियेत । नोदाहृतं च भाष्ये । न वा वाचस्पतिमिश्रैः । अप्रसिद्धसदसत्ख्यातिः सांख्यसंमतेति अद्यतनकपिलसूत्रेषु दृश्यते । वस्तुतः तन्मते अविवेकातिरिक्तं ख्यात्यन्तरं नास्ति । प्रकृतिपुरुषाविवेको नाम विवेकाग्रहणमेव, अख्यातिवादिप्राभाकरमत इव । अत एव श्रीविद्यारण्यमुनिभिः अनिर्वचनीयख्यातेः सांख्यैरनंगीकारात् ख्यात्यन्तराणां च निरस्तत्वात्[2] इति वदद्भिरयमाशयः आविष्कृतः ।

किं चोपलभ्यमानसूत्रेषु अविवेकनिमित्तो वा पञ्चशिख इति कपिलादर्वाचीनानां प्राकृताचार्याणां नामानि दृश्यन्ते । वाचस्पतिमिश्राश्च न सांख्यसूत्राणि तद्भाष्यं वा व्याचक्रुः । अपि तु पञ्चशिखवार्षगण्यादीनामेव लेखांस्तत्र निर्दिशन्ति । न पुनः क्वचिदपि कापिलं सूत्रम् । तथा च भगवत्पाददृष्टिपथं गतं ईशकृष्णकारिकारूपमेव सांख्यतन्त्रम् । परं तु इदं वक्तुं शक्यं, कपिलमुनिना साक्षादुपदिष्टमेव आसुरये । तेनोपदिष्टपञ्चशिखेन षष्टितन्त्राभिधं विस्तृतं तन्त्रं बहुधाकृतम् । तदपि अतिविस्तृतत्वेन दुर्ग्रहमिति कारिकारूपेण ईशकृष्णेन संक्षिप्तम् । तदेव भगवत्पादादीनां सांख्यविषयोदाहरणे प्रमाणग्रन्थतया प्रथितम् । नान्यदुपलभ्यते । उक्तं च ईशकृष्णेन -

पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम् ।
स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम् ॥

एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय तेन बहुधा कृतं तन्त्रम् ॥

शिष्य परम्परयागतमीश्वरकृष्णेन चैतदार्याभिः ।
संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥

---

1. सू.भा. 2-4-9 (सां.का. 29.)
2. विवरणप्रमेयसङ्ग्रहे

सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।
आख्यायिकाविरहिताः परवादविवर्जिताश्चापि ॥[1] इति ।

तथा च प्रसिद्धप्राचुर्यवत् सांख्यशास्त्रस्य प्राधान्येन निराकरणार्थं तद्द्वारा श्रेयोमार्गस्य सत्यस्य प्रदर्शनार्थं ब्रह्मसूत्रप्रस्थानं बादरायणेन मुनिना समवतीर्णम् ।

सूत्रप्रस्थानात्प्राक् उपनिषदां स्थितिः

ईशादिषूपनिषत्सु प्रायेण छान्दोग्यबृहदारण्यकोपनिषदोरनेकत्र मन्दमध्यमानां मुमुक्षूणां संशयः संभावित इति संशयितानि वाक्यानि गृहीत्वा सूत्रकृदेव न्यायेन निरणैषीत् । यतः तत्सूचकान्येव पदानि ''आकाशस्तल्लिङ्गात्''[2] ''अत एव प्राणः''[3] ''वैश्वानरः साधारणशब्दविशेषात्''[4] इत्येवंरूपेण न्याये प्रयुङ्क्ते । इतरासूपनिषत्सु कठप्रश्नमुण्डकतैत्तिरीयऐतरेयकौषीतकीत्याद्यासु क्वचित्क्वचित् विषयवाक्यानि निर्णेतुं प्रायतत सूत्रकारः ''आनन्द-मयोऽभ्यासात्''[5] ''अत्ता चराचरग्रहणात्''[6] ''प्राणस्तथानुगमात्''[7] ''गुहां प्रविष्टौ''[8] इत्यादिसूत्रेषु । ईशकेनोपनिषदौ तु नैवोदाहरणत्वेन विचार्यत्वेन गृहीते सूत्रकारेण ।

एवमेव उपनिषदामर्थकरणे ब्रह्मज्ञानिव्यतिरिक्तानां तात्पर्यनिर्णयकरणे च असामर्थ्यं व्यामोहो वा भवति इति अधुनातनानामप्यविप्रतिपन्नः । यतः ''संभूतिं च विनाशं च यस्तद्वेदोभयं सह । विनाशेन मृत्युं तीर्त्वा संभूत्याऽमृतमश्नुते''[9] ''विद्यां चाविद्यां च''[10] ''अन्धं तमः प्रविशन्ति''[11] इत्यादौ विद्याविद्या-संभूतिविनाशादिपदानाम् अर्थकरणे वा केचन वृत्तिकाराः भग्नाः । तथैव केनोपनिषदि ''अन्यदेव तद्विदितात्''[12], ''नाहंमन्ये सुवेदेति नोनवेदेति वेद च''[13], ''यस्यामतं तस्य मतम्''[14] इत्यादिमन्त्राणामापाततो विरुद्धार्थत्वेन भासमानानां व्युत्पन्नानामपि व्यामोहोऽवार्य एवेति तदर्थकरणे बहुवो भग्नाः 'केचिद्भग्नाः सुद्ध्युपास्यप्रयोगे' इत्यादिवत् । एवमेव कठादिषूपनिषत्सु

1. सां.का. 69,70,71,72
2. ब्र.सू. 1-1-22
3. Ibid 1-1-23
4. Ibid 1-2-24
5. Ibid 1-1-12
6. Ibid 1-2-9
7. Ibid 1-1-28
8. Ibid 1-2-11
9. ईशा. 14
10. Ibid 11
11. Ibid 9
12. केनो 1-4
13. Ibid 2-2
14. Ibid 2-3

बहून्युदाहरणानि अब्रह्मविद्भिरितरशास्त्रविद्भिरपि सुदुर्लभार्थनिर्णयानि सन्ति । अतः केषांचिदेव व्यासपराशरादीनां सुविनिश्चितार्था अपि अन्येषामविनिश्चितार्था अप्रतिपन्नार्था वा प्रागुक्तदिशा कपिलादिमुनिभिः कृतविभिन्नार्थाः स्वाभ्यूहितार्थानुसारेण कृतव्याख्याना अभवन्निति उपनिषदां स्थितिरुन्नीयते ।

किं च वेदान्तेषु संशयानानां प्रागुक्तदिशा तेषां कृते मुनिना न्यायपरसूत्रनिर्माणमिति खलूक्तम् । तत्रेदं चिन्त्यते, कथं पुनः संशयो भगवदुदीरितवेदवाक्येषु सर्वज्ञनिर्मितेषु? अत्रोच्यते, प्रायः महामेधाविनां वचनानि लोकेऽपि प्रसन्नगम्भीराणि । अत एव दुर्भेद्यार्थानि लोकसामान्यस्य । किं च अल्पाल्पाक्षराणि नैकार्थपराणि विनिश्चितैकार्थान्यपि परस्परविरुद्धार्थानीव आपाततो भान्ति । यथा काव्यानि नैषधकिरातार्जुनीयादीनि व्याख्यानसापेक्षाणि । यथा वा महाभारते "अहं वेद्मि शुको वेत्ति सञ्जयो वेत्ति वा न वा"[1] इति भणितिदिशा ग्रन्थिवद्दुर्भेद्यानि परः सहस्राणि पद्यानि । यथा च भागवते । तद्वत् वेदवाक्यानि कानिचित् सूत्रप्रायाणि कानिचित् भाष्यप्रायाण्यपि भाषायां विरलप्राचुर्यवत् पदनिबद्धानि सन्ति । साङ्गवेदाध्ययनं कृतवतामपि कलिकल्मषमलीमसचेतसां सर्वथा दुर्ग्रहाणीति वक्तुं सुशकमेव । तन्निर्णयाय पूर्वमीमांसावदियमपि मीमांसा प्रवृत्ता । अतः खलु वेदवाक्यानि सगुणं ब्रह्म उत निर्गुणं, जीवभिन्नमथ तदभिन्नं, जगत्सत्यमुत मिथ्या, मोक्षसाधनं किं कर्म उत ज्ञानम् उत तत्समुच्चयः आहोस्वित् ध्यानमित्येवमादिरूपेण संशयं जनयन्ति इति हेतोः सूत्रप्रस्थानमावश्यकम् ।

सूत्रपादुर्भावकालः

जैमिनिसूत्रप्रादुर्भावसमनन्तरकालिको बादरायणसूत्रप्रादुर्भावः । जैमिनेर्बादरायणशिष्यत्वेन भारतेतिहासादौ प्रसिद्धेः, गुरुशिष्ययोः समानकालिकत्वमिति न विप्रतिपन्नम् । सुमन्तुजैमिनिवैशम्पायनपैलाश्वत्वा-रोऽन्तेवासिनः । आश्वलायनगृह्यसूत्रे च 'सुमन्तुजैमिनिवैशम्पायनपैलसूत्रभाष्य-भारतमहाभारतधर्माचार्या' इति सशिष्यो बादरायणोऽनुस्मर्यते । 'सूत्राचार्यपदाभ्यां सूत्रादिप्रवर्तकाचार्यत्वमस्यैव मुनेरिति विज्ञायते । परं तु सूत्रादिवत् बादरायणीयं

---

1. म.भा. 1.APP. 1-39A. 16 Pr.

भाष्यं किमिति गवेषणीयम् । तदन्यदेव स्यात्, अस्माकं तु अनुपलब्धम् । यद्यपि योगभाष्यकर्ता व्यासदेव इति प्रसिद्धयोगभाष्येण वक्तुं शक्यम्; अथापि वेदविरुद्धांशे पातञ्जलयोगसूत्रं "एतेन योगः प्रत्युक्तः"[1] इति प्रत्याचक्षाणो बादरायणः कथमयं व्यासदेवो भविष्यति । कथं वा तदीयसूत्रस्य भाष्यमारचयितुं कामयेत्? अतो बादरायणादन्य एव व्यासदेव इति अस्माकमाशयः । सर्वथा जैमिनिसूत्रनिर्मिति-समनन्तरमेव कलिद्वापरसन्धिकाले समवतीर्णेन सूत्रेण भवितव्यम् । तत्र तत्र जैमिनिमतं च क्वचित् खण्डयति, क्वचिदनुमोदते, यथा "साक्षादप्यविरोधं जैमिनिः"[2] "मध्वादिष्वसम्भवादनधिकारं जैमिनिः"[3] "शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः"[4]. "परं जैमिनिर्मुख्यत्वात्"[5] "ब्राह्मेण जैमिनि-रुपन्यासादिभ्यः"[6] "भावं जैमिनिर्विकल्पामननात्"[7] "परामर्शं जैमिनिरचोदना चापवदति हि"[8] इत्येवमादिबहुसूत्राणि सन्ति । अनेन जैमिनिसूत्रोत्पत्त्यनन्तरमेव इमानि कृतानि इति निर्णयः । क्वचित् दृष्टान्तत्वेनापि तदुक्तमिति तदीयन्यायानु-वादकसूत्राणि गृह्णन् जैमिनिसूत्रानन्तर्यं स्वकीयस्य व्यञ्जयति । किं च न्याय-वैशेषिकादिमतखण्डनेनापि तदीयसूत्रानन्तरमेव अस्य सूत्रस्य प्रादुर्भाव इति सुवचः।

ब्रह्मसूत्रस्वरूपम् तन्नामभेदश्च

अस्यैव सूत्रजालस्य चतुरध्यायरूपत्वं निर्णीतम् । एकैकाध्यायस्य समाप्तिसूचनाय पदाभ्यासः उपनिषदीव वर्णित इति तन्निर्णये हेतुः । वस्तुतः सूत्रकारैरध्याय इति नाम्ना संकीर्त्य तत्संख्याः न दर्शिताः । अतः उपनिषच्छायया अध्यायविभागोऽवगन्तव्यः । यथा छान्दोग्ये षष्ठे "तद्धास्य विजज्ञाविति विजज्ञाविति"[9]. सप्तमे चान्ते "तं स्कन्द इत्याचक्षते तं स्कन्द इत्याचक्षत"[10] इति द्विरभ्यासः श्रुतः । तद्वदत्रापि सूत्रे "एतेन सर्वे व्याख्याता व्याख्याता"[11] इति प्रथमाध्यायपरिसमाप्तिसूचकः । स च पदाभ्यासः । तथा "वैशेष्यात्तु तद्वादस्तद्वादः"[12] इति द्वितीयस्य "एवं मुक्तिफलानियमस्तदव-स्थावधृतेस्तदवस्थावधृतेः"[13] इति तृतीयस्य; "अनावृत्तिः शब्दादनावृत्तिः

1. ब्र.सू. 2-1-3
2. Ibid 1-2-28
   इदमनुमोदकं सूत्रम् ।
3. Ibid 1-3-31
4. Ibid 3-4-2
5. Ibid 4-3-12
   इदं त्रयं खण्डनार्थम् ।
6. Ibid 4-4-5
7. Ibid 4-4-11
8. Ibid 3-4-18
9. छा 6-16-3
10. Ibid 7-26-2
11. ब्र.सू. 1-4-28
12. Ibid 2-4-22
13. Ibid 3-4-52

शब्दात्''[1] इति चतुर्थस्य समाप्तिसूचकः । अयमेव ग्रन्थसमाप्तिसूचकः, सूत्राभ्यासरूपत्वात् । तदुक्तं भाष्यकारैः, ''व्याख्याता व्याख्याता इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति''[2] इति । तथा ''सूत्राभ्यासः शास्त्रसमाप्तिं द्योतयति''[3] इति ।

सूत्राणामधिकरणरूपत्वम्

एवं ब्रह्मसूत्रस्याधिकरणस्वरूपत्वमपि, अधिकरणमिति पदेन सूत्रकारैर्व्यवहारो न कृतः । अथापि प्राचीनैर्वृत्तिकारैस्तत्तद्विषयसमर्थनसूत्रेषु अधिकरणपदेन व्यवहारः कृतः । यथाहुर्भगवत्पादाः वृत्तिकारमतानुवादस्थले ''अपर आह - द्वासुपर्णेति नेयं ऋगस्याधिकरणस्य सिद्धान्तं भजते नाप्यस्याधिकरणस्य पूर्वपक्षं भजत''[4] इति । एवं तृतीयाध्याये ''अत्र केचित् द्वेऽधिकरणे कल्पयन्ति''[5] इति वृत्तिकारमतानुवादे । तथा अन्ते च ''सूत्राणि तु एकाधिकरणत्वेनास्माभिर्नीतानि''[6] इति वदन्तोऽधिकरणपदेनापि व्याजह्रुः । तथा च प्राचीनवृत्तिकारादिग्रन्थानुरोधेन अधिकरणशब्देन व्यवहरणं संगतमेव । अधिकरणलक्षणं तु,

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरः ।
प्रयोजनं संगतिश्च शास्त्रेऽधिकरणं विदुः ॥ इति ।

एवं च विषयसंशयपूर्वपक्षोत्तरपक्षप्रयोजनसंगतिसमुदायस्य साक्षाद्बोधनाद्वा सूचनाद्वा सूत्राणामधिकरणात्मकत्वम् । तत्र एकदेशबोधनेऽपि अन्येषामाक्षेपतो लाभात् अधिकरणावयवाः सर्वेऽपि संपाद्याः भवन्ति । यथा ''ईक्षतेर्नाशब्दम्''[7] ''आनन्दमयोऽभ्यासात्''[8] इत्यादौ । अत्र आनन्दमय इति वृत्तिकारपक्षे विषयनिर्देशः । प्रकृतसंशयविशेष्यमेव विषय इति कथ्यते । अयमेव पक्षनिर्देशश्च । सन्दिग्धसाध्यवान् हि पक्ष इति प्राचीनतार्किकमते । पक्षनिर्देशेनैवाधिकरणांग-संशयोऽपि सूचितो भवति । तं विना विचारविषयत्वासंभवात् । ''तत्तु समन्वयात्''[9] इति तत्पदं प्रक्रान्तब्रह्मपरामर्शि मण्डूकप्लुतिन्यायेनानुवर्तते । अनुवृत्तपदेन योजनात्

1. ब्र.सू. 4-4-22
2. सू.भा. 1-4-28
3. Ibid 4-4-22
4. सू.भा. 1-2-12
5. Ibid 3-2-21
6. Ibid
7. ब्र.सू 1-1-5
8. Ibid 1-1-12
9. Ibid 1-1-4

आनन्दमयो ब्रह्मेति सिद्धान्तपक्षो लभ्यते। सिद्धान्तपक्ष एवोत्तरपक्षः। निरस्यकोटिः पूर्वपक्षः। "नेतरोऽनुपत्तेः"[1] इति सूत्रे इतरपदेन निरस्यपक्षो जीव इति पूर्वपक्षः साक्षाद् बोधितः। "कामाच्च नानुमानापेक्षा"[2] इत्यत्रानुमानपदेन सांख्याभिमतप्रधानस्य पूर्वपक्षत्वेन ग्रहणम्। प्रयोजनसंगती तु बुद्ध्या तत्र तत्र ऊह्नीये भवतः। 'यदनन्तरं यन्निरूप्यं तत्संगतमेव भवति' इति न्यायेन सूत्रकारैर्निरूपणीयत्वेन निर्देशान्यथानुपपत्त्या संगतत्वमपि सूचितमेव। नासंगतं प्रयुञ्जीतेति सूत्रकृत् संगतमेव प्रयुङ्क्त इति विश्वसिमः। सिद्धान्तनिर्णयस्य सप्रयोजनत्वैकान्त्यात् प्रेक्षावत्कर्तृकनिर्जयस्य काकदन्तपरीक्षाविषयरूपत्वेन प्रयोजननिर्णयकरणादेव तत् तत्र ऊह्यं भवति। सूत्रे एकमेव पदं विषयवाक्यसूचकं भवति। आनन्दमयपदघटितत्वेन आनन्दमयवाक्यस्य वृत्तिकृतां मते ग्रहणम्। तथा भाष्यकृतां च।

एवमेव "अन्तस्तद्धर्मोपदेशात्"[3] "आकाशस्तल्लिङ्गात्"[4] "अत एव प्राण"[5] इत्यादिषु अधिकरणस्वरूपं तत्र तत्रोन्नेयं यथा शांकरभाष्यम्। यद्यपि तत्तदाचार्यैर्वल्लभरामानुजमध्वाचार्यादिभिः स्वमनीषिकया कृताधिकरण-विभागोऽन्यान्य इव दृश्यते; तथापि तत्तद्विचारविषयारम्भसमाप्तिविभागेनैव अधिकरणविभागो विज्ञेयो भवति। वयमत्र शांकरभाष्यानुसारेणैकस्मिन् द्वयोस्त्रिषु चतुर्षु वा तदधिकेषु वा सूत्रेषु अधिकरणविभागमङ्गीकृत्य सूत्रस्वरूपं प्रदर्शयितुमुत्सुकाः। अधिकरणविभागे आचार्यवैमत्यात् सूत्रविभागे च न्यूनाधिकसंख्यावैषम्यात्। सर्वाचार्याणामैकमत्यमत्र दुःसम्पाद्यमिति तत्प्रदर्शने ताटस्थ्यमेवावलम्बितम्। अस्य च शास्त्रस्य, ब्रह्ममीमांसा, शारीरकमीमांसा, उत्तरमीमांसेति च नामभेदः प्रसिद्धोऽस्ति। यथा भाष्यकाराः "तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः"[6] इति शारीरकमीमांसापदेनेदं शास्त्रमाजुहुवुः।

तत्र ब्रह्ममीमांसेति ब्रह्मविचारप्रवणत्वात् धर्ममीमांसेतिवत् प्राधान्येन। जैमिनिमीमांसादृष्ट्या उत्तरकालीनत्वात् उत्तरमीमांसेति पूर्वमीमांसावद्व्यवहारः। न

---

1. ब्र.सू 1-1-16
2. Ibid 1-1-18
3. Ibid 1-1-20
4. Ibid 1-1-22
5. Ibid 1-1-23
6. सू.भा. 1-1-1 (अध्यासभाष्ये)

तु एकेन मुमुक्षुणा जिज्ञासुना धर्मजिज्ञासोत्तरं ब्रह्मजिज्ञासा कर्तव्येति जिज्ञासागतपौर्वापर्यदृष्ट्या व्यवहारः । धर्मजिज्ञासायाः प्रागपि अधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः । ब्रह्मचर्यादिव सन्यस्यतः पुरुषस्य पूर्वं धर्ममीमांसां विनाऽपि केवलं ब्रह्मजिज्ञासायाः संभवात् । आश्रमसमुच्चयस्थले ब्रह्मचर्यादिक्रमेण सन्यस्यतोऽपि यद्यपि तयोर्जिज्ञासयोः पौर्वापर्यं वक्तुं सुशकम्; अथापि आश्रमविकल्पस्थले तथा वक्तुमशक्यतया जिज्ञासा पौर्वापर्यावलम्बनेन पूर्वोत्तरमीमांसेति नामकरणं निष्प्रमाणकं भवति । यद्यपि पूर्वकाण्डोत्तरकाण्डविचारप्रधानत्वात् तादृशकाण्डपौर्वापर्यानुरोधेन तथा नामकरणं सुवचम्; तथापि विचारे तदपि न समीचीनं भवति । कर्मकाण्डोत्तरमेव ज्ञानकाण्ड इति अध्ययनसंप्रदाये नोपलभ्यते । कर्मकाण्डस्य मध्येऽपि ज्ञानकाण्डस्योपलब्धेः। यथाकथंचित् प्रायिकव्यवहारेऽपि तत्साङ्गत्यं सुलभम् । परं तु शारीरकमीमांसेति नाम कथमुचितमस्य शास्त्रस्येति विचारणीयम् । तथाहि, शारीरको हि जीवः । शरीरे भवः शारीरः । शारीर एव शारीरकः, इति व्युत्पत्तेः । "शारीरश्चोभयेऽपि हि"[1] "अनुपपत्तेस्तु न शारीरः"[2] इत्यादौ ब्रह्मसूत्रे शरीरमात्राभिमानितया तत्रैव विद्यमानो जीवः निरस्यते परमेश्वरवाक्येषु । एवं सूत्रकाररीत्या शारीरकमीमांसेति जीवविचार इत्यर्थः स्यात् । तर्हि ब्रह्मजिज्ञासेति सूत्रमनुपपन्नं भवेत्, ब्रह्मणः शारीराद् भिन्नत्वात् । अन्यथा ब्रह्मवाक्येषु तन्निराकरणं सूत्रे न संगच्छेत । तथा शारीरकजिज्ञासेत्येव प्रतिज्ञायेत । यदि जीवस्यैव प्रतिज्ञाता जिज्ञासा स्यात् न तथा प्रतिज्ञाता भगवताचार्येणेति जीवब्रह्मणोः भेदवादपक्षे शङ्का समुन्मिषति ।

तत्परिहारस्तु अद्वैतसिद्धान्त एव सुलभः । आत्मा हि ब्रह्म । "अयमात्मा ब्रह्म सर्वानुभूः"[3] इति श्रुतेः । जीवस्य स्वरूपतो ब्रह्माभिन्नत्वात् ब्रह्मजिज्ञासैव वस्तुतः शारीरकजिज्ञासा । शारीर एव प्रसिद्धेऽहमिति विविधविप्रतिपत्तेः प्रागेव यथाभाष्यं दर्शितत्वात् । क्वचिदेव तैत्तिरीयश्रुतौ आनन्दमयपर्याये वृत्तिकारमते ब्रह्मणोऽपि शारीरपदार्थत्वमुपवर्णितमगत्या गौण्या च; यथा शारीरत्वमपि आनन्दमयस्य, अन्नमयादिशरीरपरम्परया प्रदर्श्यमानत्वात् । न पुनः साक्षादेव शारीरत्वं संसारिवत् । जीवब्रह्मणोरात्यन्तिकभेदवादिमते शारीरपदस्यैव ब्रह्मपरतया

---

1. ब्र.सू. 1-2-20 2. Ibid 1-2-3 3. बृ. 2-5-19

अर्थो वर्णनीयः। ब्रह्मजिज्ञासासूत्रानुसारेण शारीरकमीमांसेति समानार्थकत्वेन कल्पनीया; तदा सूत्रकारप्रसिद्धशारीरपदार्थस्वारस्यभङ्गः। तदपेक्षया स्वरूपतो मुख्याभेदमुपनिषत्सूत्रसंमतं स्वीकृत्य ब्रह्मजिज्ञासाया आत्मजिज्ञासैक्याभिप्रायेण प्रतिज्ञोपपत्तिः शारीरकमीमांसेति च नामोपपत्तिः सुलभेति तथैव स्वीकर्तव्यं भगवत्पादमतेन।

अभेदपक्षे जीवनिराकरणस्य आशयान्तरमाहुः भाष्यकाराः "यत्त्विदं परमेश्वरवाक्ये जीवमाशङ्क्य प्रतिषेधति सूत्रकारः 'नासम्भवात्' इत्यादिना तत्रायमभिप्रायः। नित्यशुद्धबुद्धमुक्तस्वभावे कूटस्थनित्ये एकस्मिन्नसङ्गे परमात्मनि तद्विपरीतं जैवं रूपं व्योम्नीव तलमलादि परिकल्पितम्। तदात्मैकत्वप्रतिपादनपरैर्वाक्यैः न्यायोपेतैः द्वैतवादप्रतिषेधैश्चापनेष्यामीति परमात्मनो जीवादन्यत्वं द्रढयति। जीवस्य तु न परस्मादन्यत्वं प्रतिपिपादयिषति, किं त्वनुवदत्येवाविद्याकल्पितं लोकप्रसिद्धं जीवभेदम्। एवं हि स्वाभाविक - कर्तृत्वभोक्तृत्वानुवादेन प्रवृत्ताः कर्मविधयो न विरुध्यन्त इति मन्यते। प्रतिपाद्यं तु शास्त्रार्थमात्मैकत्वमेव दर्शयति शास्त्रदृष्टचेत्यादि"[1] इति।

ब्रह्ममीमांसेति नामधेयमपि प्रत्यगभिन्नब्रह्मप्राधान्येन धर्ममीमांसावत् उपपद्यते। एवं वाक्यमीमांसेत्यपि गीयते यथा भाष्ये "तस्माद् ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा प्रस्तूयत"[2] इति जिज्ञासासूत्रभाष्यान्ते व्यवहृता। परंतु वाक्यमिति सामान्यतः पूर्वोत्तरमीमांसा शास्त्रद्वयस्य बोधकमिति "यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः"[3] इत्यादौ, तथा "पदवाक्यप्रमाणज्ञेनाचार्येण"[4] इत्यादौ च भगवत्पादैः कृतप्रयोगेणावगम्यते। वाक्यम् मीमांसा इति व्याख्यातृभिरर्थो दर्शितः। न्यायमञ्जर्यां च जयन्तभट्टेन प्रमाणप्रकरणे "पृथक् प्रस्थाना हि इमाः विद्याः। सा च वाक्यार्थविद्या न प्रमाणविद्या"[5] इति। तदुक्तरीत्या वाक्यार्थविद्या भवति सा। वाक्योक्तार्थनिर्णयपरत्वात्। इत्थं स्थिते केवलं वाक्यमीमांसेत्युक्तिस्थले पूर्वोत्तरयोस्सामान्यतो ग्रहणम्। वेदान्तवाक्यमीमांसेति तु विशेषतः। केवलं

---

1. सू.भा. 1-3-19
2. Ibid 1-1-1
3. तै.भा. आरम्भे
4. सू.भा. 1-1-5
5. न्या.मं. P.4 वाक्यार्थविद्या नाम मीमांसेति यावत्।

वाक्यमिति प्रयोगस्तु भीमो भीमसेन इतिवत् एकदेशव्यवहारमात्रेण साधीयान् । एवं वेदान्तमीमांसाशास्त्रमित्यपि गीयते । यथा "वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रम्"[1] इति ।

पूर्वमीमांसा शास्त्रात् अस्य पृथक्शास्त्रत्वविषये भाष्यकारैरेव कृता चर्चा कृतनिर्णया च । नास्माभिः पिष्टपेषणं कार्यम् । जिज्ञास्यभेदात् फलभेदादधिकारिभेदादारम्भभेदात् इत्यादिहेतुभिः पार्थक्यं यथाभाष्यमुन्नेयम् । एतद्विषये अनन्तकृष्णशास्त्रिभिः श्रीभाष्यसमालोचनाख्ये ग्रन्थे विस्तरेण सुविचारितम्[2] । तत एव सर्वमवगन्तुं शक्यमिति ताटस्थ्यमवलम्बितमस्माभिः ।

सूत्रसन्निवेशक्रमः अस्य ब्रह्मसूत्रस्य न पाणिनियोगसूत्रादिवत् केवलप्रमेय-निरूपणपरत्वम् । किंतु पक्षप्रतिपक्षपरिग्रहरूपेण वादकथारूपत्वात् तत्त्वबु-भुत्सुबोधनाय परार्थानुमानरूपत्वम् । तत्त्वबुभुत्सोर्हि कथा वादः । गौतमसूत्रमत्र - "प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पंचावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वाद"[3] इति । वात्स्यायनभाष्यमत्र - "एकाधिकरणस्थौ विरुद्धौ धर्मौ पक्षप्रतिपक्षौ, प्रत्यनीकभावात् अस्त्यात्मा नास्त्यात्मेति । नानाधिकरणौ विरुद्धौ धर्मौ न प्रतिपक्षौ यथा नित्य आत्मा, अनित्या बुद्धिरिति परिग्रहः अभ्युपगमावस्था; सोऽयं पक्षप्रतिपक्षपरिग्रहो वादः । तस्य विशेषणं प्रमाणतर्कसाधनोपालम्भ इति । प्रमाणैस्तर्केण च साधनम्, उपालम्भश्च अस्मिन् क्रियत इति । साधनम् स्थापना; उपालम्भः प्रतिषेधः । यथा आनन्दमयो ब्रह्मेति साधनम्; नेतर इति प्रतिषेधः । तौ साधनोपालम्भौ उभयोरपि पक्षयोः व्यतिषिक्तौ अनुबद्धौ च । यावदेको निवृत्त एकतरो व्यवस्थित इति । निवृत्तस्य उपालम्भः, व्यवस्थितस्य साधनमिति । जल्पे निग्रहस्थानविनियोगत्वात् एतत्प्रतिषेधः । प्रतिषेधे कस्यचिदभ्यनुज्ञानार्थं सिद्धान्ताविरुद्ध इति वचनम् । सिद्धान्तमभ्युपेत्य तद्विरोधो विरुद्ध इति हेत्वाभासस्य निग्रहस्थानस्य अभ्यनुज्ञावादे पंचावयवोपपन्न इति । हीनमन्यतमेनापि अवयवेन न्यूनम्, हेतूदाहरणादिकमधिकमिति चैतयोरभ्यनुज्ञानार्थमिति । अवयवेषु प्रमाणतर्कान्तर्भावे पृथक् प्रमाणतर्कग्रहणं साधनोपालम्भव्यतिषङ्गज्ञापनार्थम् । अन्यथा उभावपि पक्षौ स्थापनाहेतुना प्रवृत्तौ

1. सू.भा. 1-1-1 2. P. 13 तः 25 पर्यन्तम् 3. गौ.सू. 1-2-1

वाद इति स्यात् । अन्तरेणाप्यवयवसम्बन्धं प्रमाणानि अर्थं साधयन्ति इति दृष्टम्। तेनापि कल्पेन साधनोपालम्भौ भवत इति ज्ञापयति । छलजातिनिग्रहस्थान-साधनोपालम्भो जल्प इति वचनात् विनिग्रहो जल्प इति मा विज्ञायि । प्रमाणतर्कसाधनोपालम्भो वाद एवेति मा विज्ञायीति एवमर्थं पृथक् प्रमाणतर्क ग्रहणम्''[1] इति ।

तथा च उक्तलक्षण एव वादः । एवं न्यायभाष्योक्तरीत्या निष्कृष्टलक्षणासु कथासु तत्त्वबुभुत्सोः कथा वाद इति दर्शितलक्षणवादकथारूपत्वाद् ब्रह्मसूत्राणां जैमिनिसूत्रवन्न्यायरूपत्वम् । अत एव वैयासिकन्यायमालेति श्लोकरूपेण संगृहीतग्रन्थस्य जैमिनिन्यायमालेतिवत् न्यायपदघटितत्वेन नामकरणं संगच्छते, एतत्सूत्रमूलकत्वात् तद्ग्रन्थस्य । यद्यपि ब्रह्मसूत्रेषु पंचावयवानामपि प्रयोगो न दृश्यते प्रतिज्ञाहेतूदाहरणानां वा, उदाहरणोपनयनिगमनानां वा त्रयाणां द्वयोर्वा एकस्य वा प्रयोगो दृश्यते; तथापि आवश्यकावयवानामूहः क्वचित् सुशकः । सूचनात् सूत्रमिति सूत्राणामनुक्तिन्यूनता न दोषाय, अपि त्वलंकारायैव । यथा ''शास्त्रयोनित्वात्''[2] इति हेतुमात्रम्, अथापि सर्वज्ञं ब्रह्मेति जगत्कारणत्वप्रदर्शनेन यदुपक्षिप्तं तदेव प्रतिज्ञावाक्यं भवति । अत्र चार्थिकप्रतिज्ञायाः कण्ठोक्तं हेतुवाक्यम् । भाष्यकाराश्च ''जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तम् । तदेव द्रढयन्नाह शास्त्रयोनित्वात्''[3] इति । अत्र उदाहरणवाक्यं चाभ्यूह्यम् । दर्शितं च भाष्ये ''यद्यद्विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषात् संभवति यथा व्याकरणादि पाणिन्यादेर्ज्ञेयैकदेशार्थमपि स ततोऽप्यधिकतरविज्ञान इति प्रसिद्धं लोके''[4] इति । किमु इत्यादिना सर्वज्ञत्वं सर्वशक्तिमत्वं चेति अवशिष्टावयवौ दर्शितौ । ''तत्तु समन्वयात्''[5] ''आनन्दमयोऽभ्यासात्''[6] ''आकाशस्तल्लिङ्गात्''[7] इत्यादौ तदिति पूर्वानुवृत्तसाध्यपरामर्शिपदपूरणेन प्रतिज्ञावाक्यपरिपूरणम् । हेतुस्तु वर्तत एव । उदाहरणं स्वयमूह्यमीदृशस्थले । अवयवेषु नाग्रहः यदाहुः सिद्धिकारास्तथैव।

तत्र पञ्चतयं केचिद् द्वयमन्ये वयं त्रयम् ।
उदाहरणपर्यन्तं यद्वोदाहरणादिकम् ।

---

1. वा.भा. 1-2-1
2. ब्र.सू. 1-1-3
3. सू.भा. 1-1-3
4. Ibid
5. ब्र.सू 1-1-4
6. Ibid 1-1-12
7. Ibid 1-1-22

इति मीमांसकाः । वेदान्तसिद्धान्तेऽपि अवयवत्रयमेव आदितो अन्ततो वेति मीमांसकवत् इति परिभाषाकाराशयः । परंतु भाष्यकाराः क्वचित्क्वचित् पञ्चावयवानपि प्रदर्शयन्ति सूत्रार्थवर्णनसमये । यथा पूर्वप्रदर्शितशास्त्रयोनित्वाधिकरणे तथापि अवयवेषु नाग्रह इत्यस्य तत्तन्मतभेदेन तार्किकमीमांसकबौद्धादीनां पञ्चत्रिद्व्यवयववादित्वात् तान् प्रति यथोचितमवयवाः प्रयोक्तव्याः । बौद्धास्तु उदाहरणोपनयरूपावयवद्वयवादिनः । "यावद्विकारं तु विभागो लोकवत्"[1] "चमसवदविशेषात्"[2] "दृश्यते तु"[3] "न तु दृष्टान्तभावात्"[4] "भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्"[5] "लोकवत्तु लीलाकैवल्यम्"[6] "तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्"[7] "अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत्"[8] इत्यादिसूत्रेषु प्रतिज्ञादित्रयम् उदाहरणादित्रयं वा तत्र तत्र परिदृश्यते । तथा ऊह्यम्।

सूत्रसंनिवेशक्रमे अपरो विशेषः

सूत्राणां क्वचित्पूर्वपक्षेणारम्भः, क्वचित्सिद्धान्तेनारम्भः । आद्ये, अनन्तरं सिद्धान्तः । द्वितीये, सिद्धान्तोपक्षेपानन्तरं पूर्वपक्षः तत्खण्डनं पुनः सिद्धान्तकरणं च । इदं च स्थूणानिखननन्यायेन । क्वचित्सिद्धान्त एवारभ्यते, पूर्ववक्षस्तु सूच्यते । एवं सूत्रसंनिवेशो दृश्यते । यथा "स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्"[9] "न विलक्षणत्वादस्य तथात्वं च शब्दात्"[10] "अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्"[11] इति । द्वितीयस्योदाहरणं तु "तदुपर्यपि बादरायणः संभवात्"[12] इत्यारभ्य "समाननामरूपत्वाच्च"[13] इत्येतत्पर्यन्तं[14] सिद्धान्तेनारम्भः । मध्ये पूर्वपक्षकरणं तन्निरासश्च । अनन्तरं तु "मध्वादिष्वसंभवादनधिकारं जैमिनिः"[15] "ज्योतिषि भावाच्च"[16] इति, पुनः सिद्धान्तकरणं "भावं तु बादरायणोऽस्ति हि"[17] इति । तृतीयस्य यथा "तत्तु

---

1. ब्र.सू. 2-3-7
2. Ibid 1-4-8
3. Ibid 2-1-6
4. Ibid 2-1-9
5. Ibid 2-1-13
6. Ibid 2-1-33
7. Ibid 2-3-29
8. Ibid 2-3-48
9. Ibid 2-1-1
10. Ibid 2-1-4
11. Ibid 2-1-5
12. Ibid 1-3-26
13. Ibid 1-3-30
14. 'तदुपर्यपि बादरायणः' इत्यारभ्य 'समानना-मरूपत्वाच्चेतिपर्यन्तं पंचसूत्राणि।
15. ब्र.सू. 1-3-31
16. Ibid 1-3-32
17. Ibid 1-3-33

समन्वयात्''[1] इति । अत्र उत्सूत्रः पूर्वपक्षः । स च 'तु' शब्देन प्रतिषेधार्थकेन निरस्यतया सूच्यते । आहुश्च भाष्यकाराः 'तु शब्दः पूर्वपक्षव्यावृत्त्यर्थः' इति । क्वचित्पूर्वपक्षः कण्ठत एव निगद्यते । यथा ''आनन्दमयोऽभ्यासात्''[2] इत्यारभ्य ततः परं त्रीणि[3] सूत्राणि ''नेतरोऽनुपपत्तेः''[4] ''कामाच्च नानुमानापेक्षा''[5] इति । अत्र वृत्तिकारमतरीत्या भाष्यकारमतरीत्या च सिद्धान्तेनारभ्य पूर्वपक्षः तन्निराकरणं च कृतम् । एवमेवानेकत्र अन्यथाऽन्यथा पूर्वोत्तरपक्षविन्यासः पौर्वापर्यक्रमनियमं विनैव ग्रथितो दृश्यते । एवमेवारम्भः कर्तव्य इति न नियमः । तद्यथा भगवत्पादा एवमभिप्रयन्ति ''कोचित्पुनः पूर्वाणि पूर्वपक्षसूत्राणि भवन्ति उत्तराणि सिद्धान्तसूत्राणीति व्यवस्थामनुरुद्ध्यमानाः परविषयाः गतिश्रुतीः प्रतिष्ठापयन्ति तदनुपपन्नम्''[6] इति । अत्र केषांचन वृत्तिकाराणां पक्षे प्रथमतः पूर्वपक्षसूत्रं ततः सिद्धान्तसूत्रमिति स्वमनीषिकाकल्पिता व्यवस्था । सा च खण्डिता भाष्यकारैः । कुतः? तथाऽङ्गीकारे सिद्धान्ताभिमतश्रौतार्थस्य सूत्रकाराशयस्य च विरोधापत्तिः । यथा प्रागुक्तदेवताधिकरणसूत्रे देवतानामधिकारचिन्तायां बादरायणपक्षस्यादौ, अनन्तरं जैमिनिपक्षस्य अनधिकार इत्यस्य सूत्रणात् पूर्वोत्तरपक्षयोः वैपरीत्यापत्तिः । अतः तादृशव्यवस्थां विहाय सूत्राणां पूर्वोत्तर पक्षात्मकत्वं चिन्तनीयं वेदार्थनिर्णये जागरूकैः । अतः खलु भाष्यकारा इत्थं वदन्ति ''वेदान्तवाक्यकुसुमग्रथनार्थत्वात्सूत्राणाम्''[7] इति । अत उक्तव्यवस्थां विनैव तत्तत्सूत्राणां पूर्वोत्तरपक्षत्वनिर्णयाय सूत्रदर्शितयुक्तिनिचयस्य बलाबल-परीक्षाहेतुतदाभासत्वपरीक्षा च भगवत्पाददर्शितरीत्या आलोचनीयेति । ''कार्यं बादरिरस्य गत्युपपत्तेः''[8] ''विशेषितत्वाच्च''[9] ''सामीप्यात्तु तद्व्यपदेशः''[10] ''कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्''[11] ''स्मृतेश्च''[12] इत्यन्तानि सूत्राणि सिद्धान्तपराणि । ''स एनान् ब्रह्म गमयति''[13] इति श्रुतेः सगुणब्रह्मण एव उपासकगम्यत्वं साधयन्ति सतर्कश्रुतिस्मृतिप्रमाणैः । ''परं जैमिनिर्मुख्यत्वात्''[14]

1. ब्र.सू. 1-1-4
2. Ibid 1-1-12
3. 'विकारशब्दान्नेति चेन्न' इत्यारभ्य 'मान्त्रवर्णिकमेव च गीयत' इति पर्यन्तंत्रीणि सूत्राणि
4. ब्र.सू. 1-1-16
5 Ibid 1-1-18
6. सू.भा. 4-3-14
7. सू.भा. 1-1-2
8. ब्र.सू. 4-3-7
9. 4-3-8
10. 4-3-9
11. 4-3-10
12. 4-3-11
13. छां. 4-15-5
14. ब्र.सू. 4-3-12

''दर्शनाच्च''[1] ''न च कार्ये प्रतिपत्त्यभिसन्धिः''[2] इत्यादीनि अन्तिमसूत्राणि निरस्यपूर्वपक्षसूत्राणि। यथाहुरत्र भाष्यकाराः ''तावेतौ द्वौ पक्षौ आचार्येण सूत्रितौ गत्युपपत्त्यादिभिरेको मुख्यत्वादिभिरपरः । तत्र गत्युपपत्त्यादयः प्रभवन्ति मुख्यत्वादीनाभासयितुम्। न तु मुख्यत्वादयो गत्युपपत्त्यादीन् इत्याद्य एव सिद्धान्तो व्याख्यातः । द्वितीयस्तु पूर्वपक्ष''[3] इति । किं च क्वचित्सिद्धान्तोपक्रमेण ततः पूर्वपक्षप्रदर्शनेऽयमाशयो वार्तिके दर्शितः ।

सिद्धान्तोपक्रमः पूर्वं पूर्वपक्षः प्रदर्श्यते ।
सम्मङ्निर्ज्ञातसिद्धान्तो यतो वेति बलाबलम् ॥[4]

इति उत्तरार्धोक्त एवाशयः । आदावेव जिज्ञासुः समधिगतसिद्धान्तः सन् पूर्वोत्तरपक्षयोर्बलमाकलयितुमलमिति तेनादौ सिद्धान्तवचनमविरुद्धमिति । तत्र सिद्धान्तसूचकाः, तु, वा, अपि वा, न, न वा इत्यादयः शब्दाः । परं तु तेऽपि समीचीनयुक्तिभिरेव तं सूचयन्ति । यथा ''तत्तु समन्वयात्''[5] ''ईक्षतेर्नाशब्दम्''[6] ''नेतरोऽनुपपत्तेः''[7] ''विधिर्वा धारणवत्''[8] ''न वा प्रकरणभेदात्परोवरीयस्त्वादिवत्''[9] इति । एवं 'स्यात्'शब्दोऽपि क्वचित् । यथा ''भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्''[10] ''अन्वयादिति चेत् स्यादवधारणात्''[11] इत्यादिसूत्राणि । पाणिनिसूत्रेषु 'वा'शब्दः प्रायेण विकल्पवाची । जैमिनिबादरायणसूत्रेषु 'वा' शब्दः अवधारणार्थकः । स च अन्ययोगव्यवच्छेदेन सिद्धान्तद्योतकः । यथा - ''अपि वा कर्तृसामान्यात्प्रमाणमनुमानं स्यात्''[12] ''शास्त्रस्था वा तन्निमित्तत्वात्''[13] ''औत्पत्तिकस्तु''[14] इति । तु शब्दः पक्षान्तरव्यावृत्त्यर्थः, अर्थात् सिद्धान्तस्थापकः । एवं 'न' शब्दोऽपि ।

पुनश्चायं विशेषः, यथा न्यायवैशेषिकतन्त्रयोर्जैमिनितन्त्रे च उद्देशो, लक्षणं, परीक्षा, चेति । तथात्राप्येतत्त्रयम् । यथा न्याये आदिमसूत्रे ''प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्त.........[15] इत्यत्र प्रमाणप्रमेयादिषोडशपदार्थसंकीर्तनं तत्तन्नाम्ना

---

1. ब्र.सू. 3-2-21
2. Ibid 4-3-12
3. सू.भा. 4-3-7
4. तै.वा. 1-4-757
5. ब्र.सू. 1-1-4
6. Ibid 1-1-5
7. Ibid 1-1-16
8. Ibid 3-4-20
9. Ibid 3-3-7
10. Ibid 2-1-13
11. Ibid 3-3-17
12. जै.सू. 1-3-2
13. Ibid 1-3-9
14. Ibid 1-1-5
15. गौ.सू. 1-1-1

कृतम् । एवं लक्षणं परीक्षा च दर्शिता । वैशेषिकतन्त्रे च "धर्मविशेष- प्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निः-श्रेयसम्"[1] इति । यथा च "अथातो धर्मजिज्ञासे"[2] ति उद्देशः, तथा "अथातो ब्रह्मजिज्ञासा"[3] इति । धर्मवदस्मिन् शास्त्रे ब्रह्म प्राधान्येन मुमुक्षुविज्ञेयत्वेन विषयः प्रमेयम् । तल्लक्षणं "चोदनालक्षणोऽर्थो धर्म"[4] इति यथा, तथा "जन्माद्यस्य यतः"[5] इति अत्रापि कथ्यते । अथ च 'मानाधीना मेयसिद्धिरिति' नयेन औत्पत्तिकसूत्रे 'अर्थेऽनुपलब्धे तत्प्रमाणमिति' लक्षिते धर्मे वेदप्रमाणोपन्यासो यथा, तथा जन्मादिसूत्रेण लक्षिते "शास्त्रयोनित्वात्"[6] इति शास्त्रप्रमाणोपन्यासः । तद्व्यवस्थापनं च समन्वयसूत्रे । ततोऽपि विप्रतिपन्नवेदान्तविचारेण प्रमाणैरेव श्रुत्यादिभिर्लक्षितस्य परीक्षा "ईक्षतेर्नाशब्दम्"[7] इत्यादिना यावत्प्रथमाध्याय-परिसमाप्तिपर्यन्तम् । स्वपक्षस्थापनस्य परपक्षप्रत्याख्यानादभ्यर्हितत्वेन प्रथमाध्याय एव ब्रह्मैव जगदुत्पत्तिस्थितिभङ्गकारणं वेदान्तप्रतिपाद्यमिति स्वपक्षस्थापनं कृतम् । अनन्तरं तु द्वितीये स्मृत्यादिविरोधपरिहारेण स्वतन्त्रतर्कप्रधानसांख्यन्यायादि-दर्शनविरोधपरिहारेण, बौद्धजैनरूपनास्तिकदर्शनविरोधपरिहारेण, पाशुपत-भागवतादिपक्षाणां क्वचिदंशे विरोधपरिहारेण, वियदादिसृष्टिविषये विरोधपरिहारेण च स्वपक्षदाढर्च्यसंपादनं कृतम् । तृतीये मोक्षसाधनविचारः । चतुर्थे तत्फलविचार इति प्राधान्येन समन्वयाध्यायः, अविरोधाध्यायः, साधनाध्यायः, तथा फलाध्याय इति चत्वारोऽध्यायाः क्रमेण व्यपदिश्यन्ते । ब्रह्मतत्प्रमाणतज्ज्ञानसाधन-फलादिविचारोऽपि परीक्षैव । एवं च इतरन्यायादितन्त्रवत् अस्मिन्नपि तन्त्रे ब्रह्मसूत्रे उद्देशलक्षणपरीक्षात्मकत्वं द्रष्टव्यम् ।

अपरोऽपि सूत्रसन्निवेशेऽयं विशेषः, यथा सूत्राणामेकाधिक-सूत्रैर्निर्मिताधिकरणविभागे गुणप्रधानभावेन निवेशः । यथा ईक्षतेर्नाशब्दमिति प्रथमं सिद्धान्तसाधकं सूत्रं प्रधानम् । अपरसूत्राणि गुणसूत्राणि । तत्र च प्रधानसूत्रसाधितसिद्धान्तोपरि संभावितक्षुद्रशङ्कानिवारणार्थमुपर्यागतसूत्राणि सन्ति, तान्येव गुणसूत्राणि यथा तत्रैव "गौणश्चेन्नात्मशब्दात्"[8] "तन्निष्ठस्य

1. वै.सू. 1-1-4
2. जै.सू 1-1-1
3. ब्र.सू. 1-1-1
4. जै.सू. 1-1-2
5. ब्र.सू. 1-1-2
6. Ibid 1-1-3
7. ब्र.सू 1-1-5
8. Ibid 1-1-6

मोक्षोपदेशात्''[1] इति सूत्रद्वयम् । ''हेयत्वावचनाच्च''[2] ''स्वाप्ययात्''[3] इति सूत्रद्वयं तु एकस्मिन् साध्ये साधनीये प्रधानसूत्रोक्तहेतुतुल्यहेतूपन्यासात् इदमपि प्रधानसूत्रमिव प्रधानमित्येव वक्तव्यम् । यथा पर्वतो वन्हिमान् धूमात्, तथा आलोकात् इति प्रयोगे धूमालोकयोः समप्रधानयोरेव हेत्वोर्निर्देशः, तथा अत्रापि वर्तत इति । तथापि अभ्युच्चयमात्रेण इतरहेतूपन्यास इत्याशयेन वा, गुणसूत्रप्रायपाठपठितत्वाद्वा उपरितनसूत्राणां गुणसूत्रत्वव्यपदेशः । एवं व्यपदेशश्च व्याख्यातृणामेव, न सूत्रकाराणाम् । एवमेवेतराधिकरणेषु द्वित्रिचतुस्संख्याद्यात्मकेषु सूत्रेषु प्रधानसूत्राणि गुणसूत्राणि चोहनीयानि ।

किं च द्वितीयाध्यायतृतीयपादे परं प्रथमं पूर्वपक्षसूत्रम् अनन्तरं एकदेशिसिद्धान्तसूत्रं ततः परमसिद्धान्तसूत्रं चेति निवेशो दृश्यते । यथा ''न वियदश्रुतेः''[4] ''अस्ति तु''[5] एतत्सूत्रद्वयं पूर्वपक्षात्मकम् । ''गौण्यसम्भवात्''[6] इति तृतीयं सूत्रं एकदेशिसिद्धान्तपरम् । तथा चतुर्थं पञ्चमं[7] सूत्रद्वयमपि तदनुगुणम् । परमसिद्धान्तसूत्रं तु ''प्रतिज्ञाऽहानिरव्यतिरेकाच्छब्देभ्य''[8] इति । एवमेव आपादपरिसमाप्ति द्रष्टव्यम् । सूत्रेषु अधिकहेतूनामधिकोदाहरणानां वा प्रदर्शनं न अधिकाह्वयनिग्रहस्थान मर्हति । उक्तं हि न्यायमञ्जर्याम्-

''एकेनैव हेतुना दृष्टान्तेन वा प्रतिपादितेऽर्थे हेत्वन्तरं दृष्टान्तान्तरं वा प्रयुञ्जानस्य अधिकं नाम निग्रहस्थानं भवति । एतच्च वादे तावत् वीतरागकथात्मके वस्तुनि निर्णयफले नेष्यत एव । जल्पेऽपि नियमाद्युपगमनेन वदतो वादिन इदं निग्रहस्थानम् । यो हि न मया साधनं अधिकाभिधेयं उदाहरणं वेति नियमस्योद्-ग्राहयति स एव तथा निगृह्यते नान्य इति । एतच्च कीर्तिनाऽपि एवं कथितं, प्रपञ्चकथायां न दोष इति''[9] इति । एवमुक्तदिशा ब्रह्मसूत्रेष्वपि तत्र तत्र अनेकहेतूदाहरणदानं न दोषाय । इदं च ईक्षत्यधिकरणानन्दमयाद्यधिकरणेषु द्रष्टव्यम्।

---

1. ब्र.सू.1-1-7
2. Ibid 1-1-8
3. Ibid 1-1-9
4. Ibid 2-3-1
5. Ibid 2-3-2
6. Ibid 2-3-3
7. 'शब्दाच्च', 'स्याच्चैकस्य ब्रह्मशब्दवत्' इति सूत्रद्वयम् ।
8. ब्र.सू. 2-3-6
9. P 200

सूत्रप्रस्थानस्य निर्मातुर्भगवतो मुनेः न्यायप्रदर्शनामात्रे स्वातन्त्र्यम् । न पुनः श्रुत्यर्थस्यापि स्वैरं वैपरीत्यकरणे । सर्वस्यापि ब्रह्मसूत्रस्य श्रुतिमततर्कप्रदर्शनपरत्वात्। निर्णीतश्रुत्यनुसारेणैव संदिग्धस्थले न्यायेनापि अर्थनिर्णयकरणात् 'दर्शनात्' 'श्रुतेश्च' 'आमननात्' इत्येवं स्वोक्तन्यायव्यतिरिक्तनिश्चितश्रुतिः उक्तशब्दैः विवक्ष्यते । इदं तु भाष्यत एव सुबोधम् । श्रुत्युपजीव्यत्वादपि सूत्रस्य न स्वातन्त्र्यं श्रुत्यर्थपरित्यागे विरुद्धार्थकरणे वा इतरशास्त्रवत् । वदन्ति च भाष्यकाराः ''यद्यपीदं वेदान्तवाक्यानामैदंपर्यं निरूपयितुं शास्त्रं प्रवृत्तम् । न तर्कशास्त्रवत् केवलाभिर्युक्तिभिः कंचित्सिद्धान्तं साधयितुं दूषयितुं वा प्रवृत्तम्''[1] इति । अन्यत्र च ''वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम्''[2] इति । अतः सूत्रकारस्य न्यायप्रदर्शनमात्रे स्वातन्त्र्यम् ।

ब्रह्मसूत्रेषु विविधमतप्रकाशनाय पूर्वाचार्यनामोदाहरणम् यथा

''साक्षादप्यविरोधं जैमिनिः''[3]

''अभिव्यक्तेरित्याश्मरथ्यः''[4]

''अनुस्मृतेर्बादरिः''[5]

''मध्वादिष्वसंभवादनधिकारं जैमिनिः''[6]

''भावं तु बादरायणोऽस्ति हि''[7]

''अन्यार्थं तु जैमिनिः''[8]

''प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः''[9]

''उत्क्रमिष्यत एवं भावादित्यौडुलोमिः''[10]

''अवस्थितेरिति काशकृत्स्नः''[11]

''चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः''[12]

---

1. सू.भा. 2-2-1
2. Ibid 1-1-2
3. ब्र.सू. 1-2-28
4. Ibid 1-2-29
5. Ibid 1-2-30 वैश्वानराधिकरणे
6. Ibid 1-3-31
7. Ibid 1-3-33 देवताधिकरणे
8. Ibid 1-4-18 जगद्वाचित्वाधिकरणे
9. Ibid 1-4-20
10. Ibid 1-4-21
11. Ibid 1-4-22 वाक्यान्वयाधिकरणे
12. Ibid 3-1-9

''सुकृतदुष्कृत एवेति तु बादरिः''[1]

''धर्मं जैमिनिरत एव''[2]

''शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः''[3]

''परामर्शं जैमिनिरचोदना चापवदति हि''[4]

''स्वामिनः फलश्रुतेरित्यात्रेयः''[5]

''कार्यं बादरिरस्य गत्युपपत्तेः''[6]

''परं जैमिनिर्मुख्यत्वात्''[7]

''ब्राह्मेण च जैमिनिरुपन्यासादिभ्यः''[8]

''चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः''[9]

इत्येवं दर्शितसूत्रेषु भिन्नभिन्नविषयेषु आत्रेय आश्मरथ्यबादरिऔडुलोमि-काशकृत्स्नजैमिनिकार्ष्णाजिनिनामान आचार्याः बादरायणेन, स्मृताः । यथा पूर्वमीमांसासूत्रेषु आत्रेयबादरायणऐतिषायनकामकायनलाबुकायनबादरि-कार्ष्णाजिनयः स्मृताः । एतन्मतान्तरप्रदर्शनं जिज्ञासुजनबुद्धिविकासार्थमेव । न केवलं मतान्तरखण्डनार्थमेव तदनुस्मरणं सर्वत्र । किंतु अनुमोदनार्थमपि । यथाहुः भाष्यकाराः ''परं जैमिनिरिति तु पक्षान्तरप्रतिभानमात्रप्रदर्शनं प्रज्ञाविकासनायैवेति द्रष्टव्यम्''[10] इति । वीतरागकथायां खण्डनमात्रोद्देशाभावेन स्वमतपरिशुद्धये नान्तरीयकतया खण्डनीयविमतपक्षप्रदर्शनमिति द्रष्टव्यम् ।

सूत्रेषु मत भेदेन पाठभेदसद्भावेऽपि परमप्राचीन श्रीशंकरभगवत्पादा-भिमतपाठ एव अधिकरणविभागे च स्वीकारार्हः । एषु सूत्रेषु मत भेदेन पाठभेदः एकस्य सूत्रस्य द्विधाकरणं सूत्रद्वयस्य च एकीकरणम् अतिरिक्तसूत्रग्रहणं, गृहीतसूत्रवर्जनं सूत्रपौर्वापर्यविपर्ययश्चेत्यादयो दृश्यन्ते । तेन तत्तन्मते सूत्रसमष्टि-

---

1. ब्र.सू. 3-1-11
2. Ibid 3-2-40
3. Ibid 3-4-2
4. Ibid 3-4-18
5. Ibid 3-4-44
6. Ibid 4-3-7
7. Ibid 4-3-12
8. Ibid 4-4-5
9. Ibid 4-4-6
10. सू.भा. 4-3-14

संख्याभेदोऽजायत। तथा अधिकरणसमष्टिसंख्याभेदश्च। इदं सर्वं विस्तरेण विवेचितं बादरायणव्याससंमतब्रह्मसूत्रभाष्यनिर्णये श्रीचिद्घनानन्दपुरीविरचिते।

शांकरमते	सूत्राणि	555	अधिकरणानि	191
भास्करमते	सूत्राणि	541	अधिकरणानि	189
रामानुजमते	सूत्राणि	545	अधिकरणानि	157
निम्बार्कमते	सूत्राणि	549	अधिकरणानि	135
मध्वमते	सूत्राणि	564	अधिकरणानि	223
श्रीकण्ठमते	सूत्राणि	545	अधिकरणानि	181
श्रीपतिमते	सूत्राणि	544	अधिकरणानि	174
वल्लभमते	सूत्राणि	554	अधिकरणानि	160
विज्ञानभिक्षुमते	सूत्राणि	555		
बलदेवमते	सूत्राणि	558		

एवं सूत्राधिकरणसंख्याभेदे जाग्रत्यपि प्राचीनमतेन श्रीशांकरमतेन सूत्राधिकरणसंख्याविभागः पुरस्क्रियते अद्वैतवेदान्तशास्त्रनिबन्धानां प्रकरणान्तानां शांकरभाष्यानुगामित्वात्।

किं च सर्वत्र सूत्रेषु श्रुतिविवक्षितार्थतात्पर्यं जानतां तथा परमतप्रतिक्षेपकसूत्रेषु तत्तद्युक्तिविभागं तत्ततो जानतां तथा सूत्रगृहीतसिद्धान्तपक्ष-प्रारम्भाक्षेपसमाधानपुनःस्थापनादिकं विविक्ततया जानतामेव तत्रापि ब्रह्मविदामेवाचार्याणां सूत्रविभागाधिकरणविभागकरणकौशलं नान्येषाम्। अत एव केवलसगुणोपासकानां प्रपञ्चसत्यत्वमपरित्यक्तवतामसत्येऽपि सत्यबुद्धिमेव कुर्वतां, श्रौतमपि भगवत्पादसिद्धान्तं दूरीकुर्वतामथवा अङ्गीकर्तुमनिच्छतां च आचार्याणां ब्रह्मसूत्रेषु स्वस्वाभिमतसिद्धान्तानुगुण्येन श्रौतार्थं साधयितुं प्रवृत्तानां क्वचित्क्वचित् स्वीयकौशलेन सूत्रभेदकरणसूत्रद्वयैक्यकरणादिदोषवशात् यथास्थितसूत्र-संख्याभेदोऽधिकरणसंख्याभेदश्च न्यूनातिरोकितां संप्राप्तो भूयान् विराजते। अतो मध्यस्थैः परीक्षकैः कः साधुः? को वाऽसाधुः? इति तत्त्वतः श्रुत्यर्थनिर्णयाय अपक्षपातं सूत्रेषु विवेचनीयम्। तत्तन्मतेषु शैववैष्णवादिषु स्वस्वाचार्यगौरवातिशयेन स्वीकृतेषु अभिमतश्रुत्यर्थनिर्णयाय प्रवृत्तसूत्रैः निर्गुणब्रह्मज्ञानस्य मोक्षसाधनस्य

अलाभेन अनिर्मोक्षप्रसङ्गोऽवारणीयो भवति, अनर्थप्राप्तिश्च । इत्थं हि वदन्ति भाष्यकाराः - "एवं बहवो विप्रतिपन्ना युक्तिवाक्यतदाभाससमाश्रयाः सन्तः, तत्राविचार्य यत्किंचित्प्रतिपद्यमानो निःश्रेयसात् प्रतिहन्येत, अनर्थं चेयात्"[1] इति । कुत्राप्याग्रहोऽभिनिवेशोऽसमीचीन इति आचार्यगौडपादाः प्रतिबोधयन्ति मुमुक्षूनस्मान् । यथा

यं भावं दर्शयेद्यस्य तं भावं स तु पश्यति ।
तं चावति स भूत्वाऽसौ तद्ग्रहः समुपैति तम् ॥[2] इति ।

भाष्यमत्र "किं बहुना; प्राणादीनामन्यतममुक्तमनुक्तं वाऽन्यं भावं पदार्थं दर्शयेद्यस्य आचार्योऽन्यो वा आप्तः इदमेव तत्त्वमिति, स तं भावं आत्मभूतं पश्यति 'अयमहमिति' वा 'ममेति' वा । तं च द्रष्टारं स भावोऽवति यो दर्शितो भावोऽसौ भूत्वा रक्षति स्वेन आत्मना सर्वतो निरुणद्धि । तस्मिन् ग्रहः तद्ग्रहः तदभिनिवेशः । इदमेवं तत्त्वमिति सः तं ग्रहीतारमुपैति तस्य आत्मभावं निगच्छति"[3] इति ।

अयमत्र भाष्याशयः, प्राणादिस्थित्यन्ताः कार्यकारणरूपाः परीक्षकपरिकल्पिता अन्ये च ये सर्वप्राणिपरिकल्पिताः भेदाः ते सर्वेऽपि वस्तुतः तच्छून्ये परमात्मनि रज्जुपरिकल्पितभुजङ्गवत् आत्मस्वरूपानिश्चयहेतोरविद्याया विभवेन कल्पिता एव । एवं कल्पितमेव भावं पदार्थं यस्य कस्यचन साधकस्य आचार्य इदमेव तत्त्वमिति दर्शयेत्, सविशेषः साकारः विष्णुर्वा शिवो वा शक्तिर्वा इत्येवंरूपेण तत्तदुपासनापरिनिष्ठितो दर्शयेत्, तमेव श्रद्धया साधकः शिष्योऽपि स्वात्मभूतं भेदेन वाऽभेदेन यथोपदेशं गृह्णाति; एवं साधकगृहीतो भावोऽतत्त्वभूतोऽपि भावनयाऽभिनिवेशेन च गृहीतः सन् तं साधकं उपदिष्टतत्त्वाभासं विहाय अन्यतत्त्वग्रहणार्थं जिगमिषुमपि सर्वतो निरुणद्धि । तत्र हि अतत्त्वे तत्त्वाभिनिवेशोऽविद्यारूपो भूतावेश इव प्रविष्टो मोक्षकांक्षिणमपि मोक्षमार्गात् तत्त्वज्ञानात् भ्रंशयति । अतोऽपि निर्विकल्पके प्रतीचि सर्वसाक्षिभूतेऽद्वितीये एव तत्त्वे ये परिनिष्ठिताः लब्धसाक्षात्कारा आचार्या वेदार्थं

1. सू.भा. 1-1-1 2. गौ.का. 2-29 3. शां.भा.

तत्त्वातत्त्वविभजनेन वेदव्यासादयो जानन्ति, तदुक्तार्थ एव निश्चितः श्रुत्यर्थः । तं गृहीतवतामेव वेदान्तव्याख्यानकौशलं नान्येषामिति प्रागुक्तदिशा माध्यस्थ्येन परीक्षकैः सूत्रार्थोऽपक्षपातं श्री शंकराचार्यभाष्यदर्शितरूप एव अविशङ्कं ग्राह्यः । तदनुगुणतया च सूत्रतदधिकरणसंख्याविभागोऽपि ग्रहीतुमुचित इति आस्माकीनोऽयमाशयः । भगवत्पादा अत्राहुः गौडपादकारिका भाष्ये मनुस्मृतिप्रमाणेन-

''एतैरेषोऽपृथग्भावैः पृथगेवेति लक्षितः ।
एवं यो वेद तत्त्वेन कल्पयेत् सोऽविशङ्कितः ॥ इति ।

एवमात्मव्यतिरेकेणासत्त्वं रज्जुसर्पवदात्मनि कल्पितानामात्मानं च केवलं निर्विकल्पं यो वेद तत्त्वेन श्रुतितो युक्तितश्च सोऽविशङ्कितो वेदार्थं विभागतः कल्पयेत् कल्पयतीत्यर्थः । इदमेवं परं वाक्यमदोऽन्यपरमिति ।

न ह्यनध्यात्मविद्वेदान् ज्ञातुं शक्नोति तत्त्वतः ।
न ह्यनध्यात्मवित् कश्चित् क्रियाफलमुपाशनुते ॥''[1]

इति मानवं वचनम् इति ।

सूत्रप्रस्थानस्य वृत्तयः

तत्र सूत्रस्य वृत्तिसापेक्षत्वं निरूप्यते । आदौ वेदान्ता[2] एव केवला आसन् । ततो मन्दमध्यमानामवबोधाय आस्तिकनास्तिकविप्रतिपत्तिनिरासाय च व्यारव्याकरणाय औपयिकन्याया अपेक्षिता इति तदर्थं भगवता बादरायणेन परमकारुणिकेन शारीरकमीमांसाशास्त्राभिधानं सूत्रप्रस्थानमाविष्कृतम् । इदमपि ब्रह्मसूत्रं वेदान्तानामर्थनिर्णयाय प्रवृत्तमपि वृत्तिसापेक्षमेव मन्दमध्यमदृशाम् । यथा पाणिनिपतञ्जलिजैमिनिसूत्राणि वृत्तिसापेक्षाणि तथैवेदम् । सूत्रणात् सूत्रमाहुः । तल्लक्षणं तु प्रागुक्तमेव 'अल्पाक्षर' मित्यादिना । अल्पाक्षरत्वादेव अस्य वृत्तिसापेक्षता । वृत्तिलक्षणं तु राजशेखरेण काव्यमीमांसायाम् ''सूत्राणां सकलसारविवरणं वृत्तिः''[3] इत्युक्तम् । सूत्रवृत्तिविवेचनं पद्धतिः, आक्षिप्य भाषणाद्

1. गौ.का.शां.भा. 2-30 2. उपनिषदः 3. का.मी. 2

भाष्यम् इत्यादिना सलक्षणं शास्त्रभेदाः पद्धतिभाष्य-समीक्षाटीकापञ्जिकाकारिकावार्तिकाणि इति उक्तसूत्रवृत्तिभ्यां सह दर्शिताः ।

एवमुक्तलक्षणेन सूत्राणां सकलार्थसारविवरणप्रवणा वृत्तिरिति सर्वसाधारणोऽर्थः । तत्र श्रीशंकरभगवत्पादेभ्यः प्राक् बोधायन - उपवर्ष-भर्तृप्रपञ्च-ब्रह्मनन्दि-टङ्क - गृहदेव - भारुचि-कपर्दि - भर्तृहरि-सुन्दरपाण्ड्य-द्रविडाचार्य-ब्रह्मदत्तनामधेयानां वेदान्ताचार्याणां बहूनां वृत्तिभाष्यप्रभृतय आसन्नित्यवगम्यते वेदान्तादिप्राचीनदर्शनशास्त्रावलोकने । परं तु तेषां नैवोपलम्भोऽद्येति चिद्घनानन्दपुरीस्वामिभिः 'व्याससंमतब्रह्मसूत्रभाष्यनिर्णयाख्ये ग्रन्थेऽभिहितम्[1] । तत्र शाबरभाष्यशांकरभाष्याद्यवलोकने उपवर्षाचार्यप्रणीता काचित् वृत्तिः पूर्वमासीदिति विज्ञायते । यथा "एक आत्मनः शरीरे भावात्"[2] इत्यत्र भाष्यम् "इह देहव्यतिरिक्तस्य आत्मनः सद्भावः समर्थ्यते बन्धमोक्षाधिकारसिद्धये"[3] इत्यादिना, अन्ते च "अत एवाचार्येण शबरस्वामिना प्रमाणलक्षणे निर्णीतम् । अत एव भगवता उपवर्षेण प्रथमे तन्त्रे आत्मास्तित्वा-भिधानप्रसक्तौ शारीरके वक्ष्याम इति उद्धारः कृत"[4] इति । एवं देवताधिकरणे च "वर्णा एव तु शब्द इति भगवानुपवर्ष"[5] इति । शाबरभाष्ये च स्फोटवादे "अथ गौरिति कः शब्दः? गकारौकारविसर्जनीया इति भगवानुपवर्ष"[6] इति । भास्करभाष्ये च अत एवोपवर्षाचार्येणोक्तं प्रथमे पादे, आत्मवादं तु शारीरके वक्ष्याम इति । एतदवलोकने शबरस्वामिभगवत्पादभास्कराचार्याणां तदीयवृत्तिश्चक्षुर्गोचरीबभूवेति विज्ञायते; परं तु श्रीभाष्यतत्त्वटीकायां श्रीवेदान्ताचार्यप्रणीतायां जिज्ञासाधिकरणे स्फोटवादे 'अत्र शाबरं, गौरित्यत्र कः शब्दः? गकारौकारविसर्जनीया' इति भगवानुपवर्ष इति । 'वृत्तिकारस्य बोधायनस्यैव हि उपवर्ष इति स्यान्नामेति' वाक्यं दृश्यते । बोधाययनस्यैव उपवर्ष इति नामेति संभावनामात्रेण प्रयुक्तम् । न तन्निर्धारणायालम् । अत एव स्यादिति प्रयोगः । यतः कुमारिलभट्टानन्दगिरिप्रमुखा अनेके पण्डितोत्तंसा वृत्तिकारमिममुपवर्ष इति नाम्नैव व्यवजह्रुः, न बोधायनपदेन कुत्रचिदपि ।

---

1. P.69
2. ब्र.सू.3-3-53
3. सू.भा. Ibid
4. अपकर्षस्य निवृत्तिः उद्धारः ।
5. सू.भा. 1-3-28
6. शां.भा. 1-1-5

'प्रपञ्चहृदये' परं, भगवता उपवर्षेण बोधायनीया कृतकोटिनामिका वृत्तिः संक्षिप्तेति उपवर्णितम् । यथा 'तस्य विंशत्यध्यायनिबद्धस्य मीमांसाशास्त्रस्य कृतकोटिनामधेयं भाष्यं बोधायनेन प्रणीत'मिति ।

पण्डितरत्नं श्रीनिवासाचार्याः इत्थमभिप्रयन्ति[1] । "अपि च सौगतसिद्धान्तप्रवचनरूपेषु क्रि.श. द्वितीयशतके प्रवृत्तेषु मणिमेखलाप्रभृतिषु द्राविडभाषाप्रबन्धेषु 'कृतकोटि' पदनिर्देशोऽस्ति... बोधायनो भगवान् वृत्तिकृदिति परैरप्यङ्गीकृतमिति युक्तं वक्तुम् । 'उपवर्षो हलभूतिः कृतकोटिरयाचितः' इति निघण्टुः, त्रिकाण्डशेषे केशवनिघण्टौ च दृश्यते । तथा च बहोः कालात् उपवर्षकृतकोटयोरैक्ये, कृतकोटिबोधायनयोरैक्ये च व्यवहारमवलोक्यैव भगवान् रामानुजाचार्यः श्रीमान् निगमान्ताचार्यश्च पूर्वोक्तरीत्या प्रतिपादयामासतुः"[2] इति । अथापि प्रागुक्तरीत्या आनन्दगिर्यादिबहुमतेन बोधायनादन्य एवायमाचार्य उपवर्ष इति वयं प्रतीमः । किंच तन्त्रवार्तिके "उपवर्षो महाभाष्यकर्तेत्यपि दृश्यते; न सा प्रसिद्धिर्बोधायनस्येत्यन्येषां विमर्शः"[3] इति । यदि बोधायन एव उपवर्षः स्यात् तदा तदीयवृत्तेः श्रीरामानुजभाष्याधारतया विशिष्टाद्वैतसंप्रदायप्रकाशकत्वेनाभिमतायाः, श्रीशंकराचार्यैः भेदाभेदाद्यंशे विशिष्टाद्वैतांशे वा भर्तृप्रपंचादिमतखण्डनवत् श्रुतिसूत्रविरोधप्रकाशनेन खण्डनं कृतं स्यात् । न कुत्रापि कृतं दृश्यते । अतोऽन्य एव सः[4] । आस्तां कर्तृविचारः । प्रकृतोपवर्षाचार्यकृता वृत्तिः प्राचीनेति तु सर्वसंमता । तेषु 'भगवान्' इति श्रीशंकराचार्यैः गौरवप्रदर्शनं प्रामाणिकतां व्यञ्जयति । तदीया वृत्तिः अद्वैतसिद्धान्तप्रकाशिका श्रुतिसूत्रसंमतेति वयमनेन संभावयामः । परंतु सा न प्रत्यक्षा अद्य नः ।

एवं भर्तृप्रपञ्चवृत्तिरपि प्राचीना । सापि भाष्योदाहृतवृत्तिभागं वार्तिकानूदितवृत्तिभागं च तत्र तत्र स्थितं विहाय नान्या प्रत्यक्षत उपलभ्यते । अतस्तद्ग्रन्थपरामर्शे कुण्ठितगतयो वयम् । श्रुतिसूत्रविरुद्धा वृत्तिः तत्र तत्र तत्कर्तृनामधेयोल्लेखं विनैव सूत्रभाष्ये शांकरेऽनूद्य खण्डिता दृश्यते । यथा "तत्तु

1. दर्शनोदये ।
2. P.151
3. 2-1-12
4. बोधायनस्य उपवर्षस्य चाभिन्नत्वे संभावनामात्रं नोपयोगि अपि च तयोर्भिन्नत्वे एव भाष्यकारादीनां तात्पर्यमित्यर्थः

समन्वयात्''[1] इति सूत्रे ''अत्रापरे प्रत्यवतिष्ठन्ते..... तस्मात्प्रतिपत्तिविधि-विषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यम्''[2] इति ग्रन्थेन उपासनाक्रिया-शेषतयाऽलौकिकं परिनिष्ठितमपि ब्रह्म वेदान्तेभ्यः प्रतिपाद्यत इति स्वाशय-प्रकाशिनीवृत्तिरनूद्य खण्डिता । एवम् 'आनन्दमयाधिकरणे',[3] 'तदनन्यत्वाधिकरणे',[4] 'कार्याधिकरणे',[5] 'उभयलिङ्गाधिकरणे',[6] अन्यत्र च अंशतोऽनूद्य खण्डिता । अत्रानूदिता वृत्तिः भर्तृप्रपञ्चस्येत्युन्नीयते विषयसाम्ये एव । विषयभेदे तु अनूदिता वृत्तिः भिन्नभिन्नेति निर्णयः । यथा न्यायनिर्णये ''अनेकान्तवादमुत्थापयति 'नन्विति''[7] इति । एतादृशानेकान्तवादो वार्तिके भर्तृप्रपञ्चमतत्वेनाभिहितः । स्वान्तेवासिसुरेश्वराचार्यवार्तिकस्य भगवत्पादीय-बृहदारण्यकभाष्येण सह समानविषयत्वेन सेयं वृत्तिरत्रापि भर्तृप्रपञ्चस्येति निर्णयः ।

विषयविमर्शदृष्टयो महात्मनो हि प्रतिवादिनां नामोल्लेखं प्रायेण न कुर्वन्ति । सूत्रकाराश्च क्वचिन्नामोल्लेखं कृतवन्तोऽपि न सर्वत्र कुर्वन्ति । तदपि जिज्ञासूनां विप्रतिपत्तिप्रदर्शनार्थं वा तन्निरासमुखेन स्वमतपरिशुद्ध्यर्थं वा कुर्वन्ति । अत्र वृत्तौ भेदाभेदवादेन, ब्रह्मणोऽष्टावस्थावर्णनेन, विज्ञानात्मनो विकारत्ववर्णनेन, मोक्षेऽन्तरालावस्थावर्णनेन, ज्ञानकर्मसमुच्चयवादेनेत्येवमादिना विरुद्धवादेन श्रुतिसूत्रतात्पर्यार्थो विहन्यत इति दृष्ट्या सिद्धान्तस्थापनाय भाष्यमेकमावश्यकमासीत् । तदा खलु भगवत्पादीयभाष्यस्य प्रादुर्भावः । आक्षिप्य भाषणाद् भाष्यमिति लक्षणेन आक्षेपसमाधानात्मको ग्रन्थः भाष्यमिति राजशेखरमतेन । अपरं चैतल्लक्षणमभियुक्ता अभिदधते-

सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुकारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥ इति ॥

एतदेव निर्दुष्टं लक्षणम् । पूर्वोक्तलक्षणस्य आक्षेपसमाधानात्मकेषु ब्रह्मसूत्रादिषु अतिव्याप्तेः । यद्यपि भाष्यलक्षणयुतावृत्तिरपि प्राचीनानां भाष्यमिति

1. ब्र.सू. 1-1-4
2. सू.भा. Ibid
3. ब्र.सू. 1-1-12
4. Ibid 2-1-14
5. Ibid 4-3-7
6. Ibid 3-2-1
7. P. 374

वक्तुमुचिता यथा आनन्दमयाधिकरणदर्शिता वृत्तिः भाष्यवदेव भासते; अथापि वृत्तिरिति व्यवहृता निबन्धकारैः । तथा बृहदारण्यकभाष्यं शांकरमपि वृत्तिरिति सुरेश्वराचार्यैर्वार्तिके व्यवहृता । तथा च राजशेखरोक्तलक्षणानि वृत्तिभाष्यादीनां प्रायिकाण्येवेति नः प्रतिभाति । प्रकृतशांकरभाष्यानूदितवृत्तिग्रन्थांशाः केचन खण्डनार्थाः श्रुतिसूत्रविरोधिनः । केचन अनुमोदनार्थाः पूर्वपक्षनिरासमात्रप्रवणा नात्यन्तं तिरस्कृताः । तत्र सूत्रभाष्ये यथा खण्डनार्थाः, आनन्दमयाधिकरणे आनन्दमयपदस्य तैत्तिरीयकोक्तस्य ब्रह्मतासाधको ग्रन्थः वृत्तिग्रन्थः । स प्रदर्शितः ''तैत्तिरीयकेऽन्नमयम्, ... इत्यारभ्य तस्मादानन्दमयः परमात्मेति स्थितम्''[1] इत्यन्तः । इदं त्विह वक्तव्यमित्यादिना तत्खण्डनपुरस्सरं सूत्राणां पुच्छवाक्यनिर्दिष्ट-ब्रह्मपरत्वोपपादकत्वेन भाष्यकारैः व्याख्यातत्वात् । एवं समन्वयाधिकरणे प्रागुदाहृतो ग्रन्थो वृत्तिकृताम् । तदुपरि भाष्यकारैः विस्तरेण 'अत्राभिधीयते' इत्यादिना खण्डितत्वात् ।

समन्वयाधिकरणे च, शास्त्रं नामैतेषां मते जैमिनिशबरस्वामिमतानुसारेण प्रवृत्तिनिवृत्त्यन्यतरबोधकं कृतकमकृतकं वा वाक्यम्[2] ''आम्नायस्य क्रियार्थत्वा''[3] दिति सूत्राच्च । तथा च अपौरुषेयवेदरूपत्वात् वेदान्तानामपि प्रवृत्तिबोधकत्वं वक्तव्यम् । न केवलं सिद्धब्रह्मपरत्वम्, आनर्थक्यप्रसंगात् । अतो वेदान्तेषु ब्रह्म उपासनाकार्यशेषतया बोध्यते । अलौकिकमपि यूपाहवनीयादिवत् यत्किंचित्क्रियाशेषत्वेन बोध्यते । उपासनारूपमेव ज्ञानं मुमुक्षुं प्रति विधित्सितम् । केवले सिद्धे प्राभाकरमतवत् शक्तिग्रहानभ्युपगमात् । उपासनेन च तादृशेन शास्त्रदृष्टोऽदृष्टो मोक्षः सिद्ध्यति । पूर्वोत्तरशास्त्रयोः जिज्ञास्यवैलक्षण्यमपि नास्ति । यागदानहोमादिधर्मवत् उपासनाक्रियायाः शेषत्वेन परंपरया ब्रह्मणोऽभिधानात् । श्रुतब्रह्मणो यथापूर्वं संसारोपलब्धेः श्रवणोत्तरं मनननिदिध्यासनयोः प्रत्येकं विधानात्, तदन्यथानुपपत्त्या च प्रतिपत्ति-क्रियाशेषत्वेनैव ब्रह्म सर्वत्र वेदान्तेषु बोध्यत इति ।

आनन्दमयाधिकरणे च, तत्र हि तैत्तिरीयवाक्ये ''तस्माद्वा एतस्माद्वि-ज्ञानमयात् । अन्योन्तर आत्माऽनन्दमयः''[4] इति श्रुतः आनन्दमयो ब्रह्मैव ।

---

1. सू.भा. 1-1-12
2. वेदः तदनुसारिस्मृतिपुराणादिकं च ।
3. जै.सू. 1-2-1
4. तै.उ. 2-5

आनन्दशब्दस्य अभ्यासात् । तत्परस्य आनन्दपदस्य असकृदावृत्तिश्रवणात् । न जीवः, तं प्रत्यपि हेतुतया व्यपदेशात् । मयट्प्रत्ययस्य प्राचुर्यार्थकतया आनन्दप्रचुरं ब्रह्म नित्यानन्दमयं भवितुमर्हति । "यतो वा इमानि भूतानि"[1] इत्यादिमन्त्रवर्णोक्तमेव ब्राह्मणेऽपि ग्राह्यतया गीयते । 'सोऽकामयते'ति कामयितृत्वश्रुतेरचेतनं प्रधानमपि नानन्दमयः । आनन्दमये प्रतिबुद्धस्य जीवस्य ज्ञानिनोऽपि आनन्दमययोगशासनाच्च आनन्दमयो ब्रह्मैव न जीव इति ।

इदं सूत्रानुगुणमपि श्रुतिविरुद्धत्वात् श्रुतेरेव सूत्रापेक्षया प्राबल्यात्, गुणे त्वन्यायकल्पनेति न्यायेन च गौण्या सूत्रव्याख्यानेन तन्मतं दूरीकृतम् । अतः खण्डनार्था वृत्तिरत्रानूदिता । सा च विस्तरेण भाष्यत एवावगन्तव्या ।

प्राणाधिकरणे च, "प्राणस्य प्राणं"[2] "प्राणबन्धनं हि सोम्य मन"[3] इति च वृत्तिकारस्वीकृतमुदाहरणं शब्दभेदात्प्रकरणाच्च संशयानुपपत्तेर्विषयवाक्यं न संभवतीति भाष्यतः खण्डितम् । सापि वृत्तिरत्र सूत्राननुगुणेति प्रदर्शनार्था ।

दहराधिकरणेऽपि, 'केचित्तु परमात्मविवक्षायां "एतं त्वेव त"[4] इति जीवाकर्षणमन्याय्यं मन्यमानाः एतमेव वाक्योपक्रमसूचितमपहत-पाप्मत्वादिगुणकमात्मानं "ते भूयोऽनुव्याख्यास्यामि"[5] इति कल्पयन्ति । तेषामेतमिति सन्निहितावलम्बिनी सर्वनामश्रुतिः विप्रकृष्येत; भूयःश्रुतिश्च विरुध्येत' इत्यादिना भाष्येण केषांचिद्वृत्तिकाराणां मतं खण्डितम् । छान्दोग्यप्रजापतिवाक्ये हि वृत्तिकारकृतार्थो विरुध्यत इति भगवत्पादाशयः ।

तत्रैव "अपरे तु वादिनः पारमार्थिकमेव जैवं रूपमिति मन्यन्ते; अस्मदीयाश्च केचित् ...."[6] इति । अत्र अनूदितभाष्येण जीवरूपं पारमार्थिकमिति वादिनां वृत्तिकाराणामन्येषामपि अस्मदीयानामेव वृत्तयः श्रुतिसूत्रविरोधिन्य आसन्नित्यनुमीयते । तथा प्रागुक्तानन्दमयाधिकरणवृत्तिकाराः अन्य एवेति गम्यते । तथाहि, 'भेदव्यपदेशाच्चे'ति सूत्रे वृत्तिकारव्याख्यावसरे

1. तै.उ. 3-1
2. बृ. 4-4-18
3. छां. 6-8-2
4. Ibid 8-9-3
5. Ibid
6. सू.भा. 1-1-19

जीवपरमात्मनोर्भेद औपाधिक इति जीवस्वरूपमप्यपारमार्थिकमिति दर्शयामासुः, यथा ''प्रतिषिध्यत एव तु परमार्थतः सर्वज्ञात् परमेश्वरादन्यो द्रष्टा श्रोता वा 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिना । परमेश्वरस्तु अविद्याकल्पिताच्छारीरात् कर्तुर्भोक्तुर्विज्ञानात्माख्यात् अन्यः । यथा मायाविनश्चर्मखड्गधरात् सूत्रेणाकाशमधिरोहत स एव मायावी परमार्थरूपो भूमिष्ठो अन्य''[1] इति ।

भाष्यकारैः बृहदारण्यके प्रथमाध्याये चतुर्थब्राह्मणे भाष्ये केचन वृत्तिकाराः स्मृता दृश्यन्ते । ते पुनः भर्तृप्रपञ्चाभिधाना वृत्तिकाराः भाष्यकाराश्चेति भगवत्पादेभ्यः प्राचीना इति च तर्कयामः । यतो बृहदारण्यकवार्तिके तदीयनामैव उल्लिखितमस्ति, यथा-

भर्तृप्रपञ्चभाष्यस्य प्रचारोऽयं प्रदर्शितः ।
श्रुत्यक्षरानुसारेण तथाऽनुभववर्त्मना ॥
ब्रह्मेति ब्रह्मशब्देन द्वैतैकत्वात्मकं किल ।
भण्यते न परं ब्रह्म तस्य विद्यऽनपेक्षतः ॥[2] इति ।

अत्र वार्तिके पूर्वोक्तश्लोकत आरभ्य 'गृहस्थो भार्यां विन्देत' इत्येततपर्यन्तश्लोकाः पूर्वपक्षरूपाः । दर्शितवार्तिकश्लोकानां मूलभाष्यमिदम् ''ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेत्'' इत्यादिमन्त्रभाष्यम् यथा - 'ब्रह्म अपरं सर्वभावस्य साध्यत्वोपपत्तेः । न हि परस्य ब्रह्मणः सर्वभावापत्तिर्विज्ञानसाध्या । विज्ञानसाध्यां च सर्वभावापत्तिमाह 'तस्मात्तत्सर्वमभवदि'ति । तस्माद् ब्रह्म वा इदमग्र आसीदित्यपरं ब्रह्म भवितुमर्हति । मनुष्याधिकाराद्वा तद्भावी ब्राह्मणः स्यात् । सर्वं भविष्यन्तो मनुष्या मन्यन्त इति हि मनुष्याः प्रकृताः इत्यादिना .... इति व्याचक्षत' इत्यन्तम् । एवं प्रागपि-

भर्तृ प्रपञ्चप्रस्थानमेवमेतद्यथोदितम् ।
इतोऽन्यत्रापि तद्भाष्यं गमयेदेवमेव तु ॥
ब्रह्मभाविरवं श्रुत्वा ये तु व्याचक्षतेऽन्यथा ।
तानुद्दिश्य विचारोऽयं प्रारब्धो गुरुभिः स्फुटः ॥[3]

इति वार्तिकेणापि तदिदं मतं भर्तृप्रपञ्चप्रस्थानमिति कण्ठत एवोक्तम् ।

---

1. सू.भा. 1-1-17 2. बृ.वा 1-4-1188, 1189 3. Ibid 1-4-1164, 1165

अन्यत्र च सूत्रभाष्ये "अन्ये तु वर्णयन्ति, द्विविधं हि शरीरं स्थूलं सूक्ष्मं च । स्थूलं यदिदमुपलभ्यते । सूक्ष्मं यदुत्तरत्र वक्ष्यते 'तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्'[1] इति । तच्चोभयमपि शरीरमविशेषात् पूर्वत्र रथत्वेन संकीर्तितम् । इह तु सूक्ष्ममव्यक्तशब्देन परिगृह्यते । सूक्ष्मस्याव्यक्त-शब्दार्हत्वात् । तदधीनत्वाच्च बन्धमोक्षव्यहारस्य जीवात्तस्य परत्वम् । यथा अर्थाधीनत्वात् इन्द्रियव्यापारस्येन्द्रियेभ्यः परत्वमर्थानामितिपर्यन्तं वृत्तिकारमते सूत्रव्याख्यानम् । परमत्र सूत्रानुगुणमपि पूर्वपक्षनिरासकमपि पूर्वापरश्रुति-वाक्यैकवाक्यतया विवक्षितार्थाप्रतिपत्तेर्विरुद्धमिदमिति भाष्यकारैः तिरस्कृतम् । सूत्रानुगुण्येन तु ईषदनुमोदितं च 'सर्वथा तु आनुमानिकनिराकरणोपपत्तेः तथा नामास्तु, न नः किंचिच्छिद्यते"[2] इति वदद्भिः । तथा चेयं वृत्तिरीषदनुमोदनार्था ।

एवं ज्योतिश्चरणाधिकरणे "अपर आह साक्षादेव गायत्रीशब्देन ब्रह्म प्रतिपाद्यते ... सर्वथाऽप्यस्ति पूर्वस्मिन्वाक्ये प्रकृतं ब्रह्म"[3] इति । अत्रापि अपर आह यथा लोके इत्यारभ्य अतः परमेव ब्रह्म ज्योतिःशब्दमिति सिद्धमित्यन्तं व्याख्यानं न खण्डितं; अपि तु स्वीकृतम् । प्रतर्दनाधिकरणे च "अथवा नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्"[4] इत्यस्यायमर्थोऽन्य इत्यारभ्य तस्माद् ब्रह्मवाक्यमेतदित्यन्तं व्याख्यानमङ्गीकृतम् । गुहाधिकरणे "अपर आह"[5] इत्यादि आ अन्तं व्याख्यानमपि सर्वथा स्वीकृतम् । अदृश्यत्वाधिकरणे "अन्ये पुनर्मन्यन्त"[6] इत्यादि आ अन्तं व्याख्यानमपि स्वीकृतम् । ईक्षतिकर्माधिकरणे "अपर आह"[7] इत्यादिश्रुतिगतजीवघनव्याख्यानमपि स्वीकृतम् ।

तदनन्यत्वाधिकरणे "ननु अनेकात्मकं ब्रह्म, यथा वृक्षोऽनेकशाखः, एवमनेकशक्तिप्रवृत्तियुक्तं ब्रह्म । अत एकत्वं नानात्वं चोभयमपि सत्यमेव । यथा वृक्ष इत्येकत्वं शाखा इति नानात्वम् । यथा च समुद्रात्मनैकत्वं फेनतरङ्गाद्यात्मना नानात्वम् । यथा च मृदात्मनैकत्वं घटशरावाद्यात्मना नानात्वम् । तत्रैकत्वांशेन

1. सू.भा. 1-4-3
2. Ibid
3. Ibid 1-1-25
4. Ibid 1-1-31
5. Ibid 1-2-12
6. Ibid 1-2-23
7. सू.भा. 1-3-13

ज्ञानान्मोक्षव्यवहारः सेत्स्यति । नानात्वांशेन तु कर्मकाण्डाश्रयौ लौकिकवैदिकव्यवहारौ सेत्स्यत इति । एवं च मृदादिदृष्टान्ता अनुरूपा भविष्यन्तीति''[1] इति च ।

अयमनेकान्तवाद इति प्राग् व्याख्यानतोऽभिहितः । भाष्यकारैः 'नैवं स्यादि' त्यादिना खण्डितश्च । अत्रानूदितवृत्तिकारादन्य एव आनन्दमयाधिकरणोदाहृत-वृत्तिकारः । यतो 'भेदव्यपदेशाच्चे'ति सूत्रे वृत्तिकारेण दर्शितदिशा जीवपरमात्मभेदः काल्पनिक एव स्वीकृतः । तस्य च निमित्तमविद्यैव । अत्र तु अनेकान्तवाद-स्वीकर्तृमते संसारकारणीभूताऽविद्या काचिदपि न स्वीकृता । इदमप्यत्रैव भाष्ये स्पष्टम् । यथा ''न चास्मिन्दर्शने ज्ञानान्मोक्ष उपपद्यते । सम्यग्ज्ञानापनोद्यस्य कस्यचिन्मिथ्याज्ञानस्य संसारकारणत्वेन अनभ्युपगमात्''[2] इति ।

कृतात्ययाधिकरणे ''केचित्तावदाहुः - स्वर्गार्थस्य कर्मणो भुक्तफलस्यावशेषः कश्चिदनुशयो नाम भाण्डानुसारिस्नेहवत् । यथा स्नेहभाण्डं रिच्यमानं न सर्वात्मना रिच्यते; भाण्डानुसार्येव कश्चित्स्नेहशेषोऽवतिष्ठते, तथाऽनुशयोऽपि, इत्यारभ्य एवमनुशयमात्रपरिग्रहो न चन्द्रमण्डलेऽवस्थातुं शक्नोति''[3] इत्यन्तो भागः वृत्तिकाररीत्या व्याख्यातः खण्डनार्थोऽनूदितः । खण्डनं तु भाष्यतोऽवगन्तव्यम् ।

उभयलिङ्गाधिकरणे ''अत्र केचित् द्वे अधिकरणे कल्पयन्ति । प्रथमं तावत् किं प्रत्यस्तमिताशेषप्रपञ्चमेकाकारं ब्रह्म; अत प्रपञ्चवत् अनेकाकारोपेतमिति । द्वितीयं तु, स्थिते प्रत्यस्तमितप्रपञ्चत्वे किं सल्लक्षणं ब्रह्म, अत बोधलक्षणं, उतोभयलक्षणमिति । यदप्याहुराकारवादिन्योऽपि श्रुतयः प्रपञ्चप्रविलयमुखेन अनाकारप्रतिपत्त्यर्था एव, न पृथगर्था इति । ननु द्वैतप्रपञ्चप्रविलयो नियोगविषयो भविष्यति । अप्रविलापिते हि द्वैतप्रपञ्चे ब्रह्मतत्त्वावबोधो न भवति । अतो ब्रह्मतत्त्वावबोधप्रत्यनीकभूतो द्वैतप्रपञ्चः प्रविलाप्यः । यथा स्वर्गकामस्य यागोऽनुष्ठातव्य उपदिश्यते । एवमपवर्गकामस्य प्रपञ्चप्रविलयः । यथा च तमसि व्यवस्थितं घटादितत्त्वमवबुभुत्समानेन तत्प्रत्यनीकभूतं तमः प्रविलाप्यते । एवं

1. सू.भा. 2-1-14 2. Ibid 3. Ibid 3-1-8

ब्रह्मतत्त्वमवबुभुत्समानेन तत्प्रत्यनीकभूतः प्रपञ्चः प्रविलापयितव्यः । ब्रह्मस्वभावो हि प्रपञ्चः । न प्रपञ्चस्वभावं ब्रह्म । तेन नामरूपप्रपञ्चप्रविलापनेन ब्रह्मतत्त्वावबोधो भवतीति"[1] । एतदन्ते भागे प्रपञ्चप्रविलयवादिवृत्तिकारपक्षः खण्डितः । सोऽयं समन्वयाधिकरणगतप्रतिपत्तिविधिवादिवृत्तिकारपक्षादपि विसदृशः । यतः प्रतिपत्त्याख्योपासनाविधानं समन्वयाधिकरणे स्वीकृतम् । अत्र तु प्रपञ्चप्रविलयद्वारा सर्वासामपि साकारश्रुतीनां निराकारप्रतिपत्त्यर्थत्वात् उपासने कुत्रापि तात्पर्यमत्र नाङ्गीकृतमिति भेदस्य स्फुटत्वात् ।

कार्याधिकरणे प्रथमं सूत्रे बादरिपक्षः अनन्तरं जैमिनिपक्षश्च दर्शितौ । गतिश्रुतयः सगुणब्रह्मविषया इति प्रथमः । परब्रह्मविषयास्ता इति द्वितीयः । एवं पक्षद्वये जाग्रति, आद्यः सिद्धान्त इति द्वितीयः पूर्वपक्ष इति च भगवत्पादैर्व्याख्यातम् । अथ च वृत्तिकारपक्ष इत्थं प्रादर्शि । यथा "केचित्पुनः पूर्वाणि पूर्वपक्षसूत्राणि भवन्ति, उत्तराणि सिद्धान्तसूत्राणीति एतां व्यवस्थामनुरुद्ध्यमानाः परविषया एव गतिश्रुतीः प्रतिष्ठापयन्ति"[2] इति । तदनुपपन्नमित्यादिना खण्डितम् । अत्र च मते सर्वगतस्यापि ब्रह्मणः गन्तव्यता सर्वशक्त्युपेतत्त्वात् संभविष्यतीति । तथा तस्य अनेकशक्तित्वं जगदुत्पत्तिस्थितिप्रलयहेतुत्वश्रुतेः सिद्धमिति च प्रतिपाद्यते । ब्रह्मणो जीवस्य अवयवत्वपक्षे, विकारपक्षे च अनन्यत्वात् विकारविकारिणोः अवयवावयविनोश्च गन्तृगन्तव्यभावोपपत्तिश्च समर्थ्यते । सृष्ट्यादिश्रुतीनां तत्परत्वं च स्वीक्रियते । एतत्सर्वं भाष्ये विवेचनावसरे दर्शितम् । एतद्वृत्तिकारः भेदाभेदवादी[3] भर्तृप्रपञ्चः स्यादिति तर्कयामः ।

भर्तृप्रपञ्चप्रस्थानस्थं ब्रह्मणोऽष्टावस्थाः, जीवस्य विकारत्वं, कार्यकारणयोर्भेदाभेदौ, ज्ञानकर्मसमुच्चयवादः, अन्तरालावस्था इत्याद्यनूद्य चिन्तितं बृहदारण्यकभाष्ये; तथा वार्तिके च । एतत्पुनरग्रे दर्शयिष्यामः ।

भाष्यदर्शितप्राचीनप्रस्थानेषु विचारार्थं स्वीकृतेषु विविधमतानि समासन्निति जानीमः । यथा-

1. सू.भा. 3-2-21 2. Ibid 4-3-14 3. प्रागुक्तानेकान्तवादीत्यर्थः

1. कर्ममात्रस्य मोक्षसाधनत्वं समस्तवेदार्थ इति ।
2. वेदान्ता आत्मादिस्वरूपप्रकाशनद्वारा कर्मसम्बन्धिन एवेति ।
3. काम्यप्रतिषिद्धवर्जनात् ज्ञानाभावेऽपि मोक्षः स्वरूपावस्थानलक्षणः सिद्ध्यतीति ।
4. ज्ञानकर्मसमुच्चयवादः ।
5. ज्ञानोपासनयोरैक्ये सति प्रतिपत्त्याह्वयोपासनाविधिशेषत्वं ब्रह्मण इति वादः ।
6. ज्ञानेऽपि विध्यङ्गीकारः इति वादः ।
7. ज्ञानाभ्यासरूपः प्रसंख्यानवादः ।
8. प्रपञ्चप्रविलयवादः ।
9. कामविलयवादः ।
10. अवस्थात्रयवासनानिरोधवादः ।
11. विज्ञानस्मृतिसन्ततिविधिवादः ।
12. चित्तवृत्तिनिरोधविधिवादः ।
13. भागवतमतं पाञ्चरात्रोक्तमद्वैतपरम् इति ।
14. सेश्वरवादः ।
15. निरीश्वरवादः ।

इत्यादयः । एतत्सर्वं प्रस्थानत्रये तत्र तत्र विवेचितम् । तदपि संक्षेपेण अग्रे प्रदर्शयिष्यामः । —

प्रकृते तु सिंहावलोकितन्यायेन सूत्राणां वृत्तिभाष्यादिसोपक्षत्वं प्रदर्शयामः । यथा तत्र प्रथमं वृत्त्याद्याविर्भावात्प्राक् सूत्रार्थो मध्यमानां स्थूलदृष्ट्या समष्ट्या व्यष्ट्या वा कीदृशो जायते स्मेति ताटस्थ्येन चिन्तयामः । एतच्चिन्तनस्यायमेव लाभो यद्वृत्त्याद्यावश्यकत्वप्रदर्शनम् ।

वृत्तिप्रादुर्भावात्प्राक् यथाश्रुतसूत्रार्थलाभः प्राधान्येन कः इति चेत् समष्ट्या यथाश्रुतः प्रमेयभागो मुख्यः सूत्रमात्रावलोकने लभ्यतेऽयम् ।

आदिमाध्यायार्थसंग्रहः

कस्माच्चिदावश्यकादनन्तरं ब्रह्मजिज्ञासा कर्तव्या; यतो जगतो जन्मादि तद्ब्रह्मेति, शास्त्रयोनित्वात्तदप्यस्ति, समन्वयात् सर्वत्र श्रुतिषु समनुगमात् तत्सिद्ध्यति, जगत्कारणं ब्रह्मैव ईक्षितृत्वात्, नापरमशब्दत्वात्, आत्मशब्दादपि तदेव, सर्वत्र गतिसामान्यात् तदेव प्रतिपाद्यं शास्त्रे । आनन्दमय - अन्तस्थ- आकाश-प्राणादिशब्दाः ब्रह्मपराः । न जीवो नान्यद्वा सन्दिग्धवाक्येषु[1] । जगत्कारणं ब्रह्म प्रकृतिः निमित्तं च, प्रतिज्ञादृष्टान्तानुपरोधात् । अव्यक्त-अजा-पञ्चजनशब्दा यत्किंचिदानुमानिकपरा न भवन्ति इति ।

द्वितीयाध्यायार्थसंग्रहः

इतरस्मृत्यनवकाशदोषप्रसङ्गेऽन्यस्मृतेरपि तत्प्रसङ्ग इति स्मृतिविरोधः प्रतिबन्द्या उत्तरितः । ब्रह्मविलक्षणस्यापि जगतोऽचेतनस्य चेतनं ब्रह्म प्रकृतिर्भवति, विजातीयादपि विजातीयमुत्पद्यमानं दृश्यते लोके । प्रलयकालेऽपि कार्येणाविभक्तमपि कारणं ब्रह्म कार्यदोषेणासंसृष्टमित्यत्र दृष्टान्तभावात् तेनासंसृष्टं भवितुमर्हति । ब्रह्मकार्यं न सदिति आपादनानर्हं, सदात्मना सर्वस्मिन्नपि कालेऽवरस्य सत्वात् । शुष्कतर्कस्याप्रतिष्ठानात् यथाशब्दमेव ब्रह्मावगन्तव्यम् । तर्केणानुमितेऽप्यनिर्मोक्षप्रसङ्गः । इतरापादिता दोषाः स्वपक्षेऽपि स्युः । युक्तिविरुद्धत्वात्, शिष्टापरिगृहीतत्वाच्च इतरशास्त्रोक्तार्थस्यात्यन्तमनपेक्षा । लोकवच्च भोक्तृभोग्यरूपविभागोपपत्तिः ब्रह्मकारणवादे; अतोऽविभागशङ्कायाः नावसरः । कारणानन्यत्वं च कार्यस्य, कारणसत्वे एव कार्योपलब्धेः । कार्यस्य सत्त्वाच्च, आरम्भणशब्दादिभ्यश्च । जीवादधिकं ब्रह्म स्वीक्रियते, जीवाद्भेदेन निर्देशात् । हिताकरणादिदोषप्रसक्तिर्नास्ति । तथाऽश्मादिवत् क्षीरवत्, देवादिवच्च जगत्परिणामे तन्निर्माणे वा स्वतः समर्थं भवति ब्रह्म । शब्दमूलत्वाद् ब्रह्मणो निरवयवत्व शब्दविरोधोऽन्यो वा दोषस्तत्र न प्रसञ्जनीयः । आत्मनि विचित्रसृष्टिवत्

1. श्रुतिवाक्येष्वित्यर्थः ।

परब्रह्मण्यपि विचित्रसृष्टिरुपपद्यते । ब्रह्म करणरहितमपि सर्वशक्तियुक्तमिति श्रुत्युदीरितत्वात् जगत्कारणं भवति । तथा ब्रह्मणः स्वप्रयोजनाभावेऽपि सर्जनं लोकवल्लीलामात्रम् । धर्मादिसापेक्षत्वात् विचित्रसृष्टिकर्तृब्रह्मणो वैषम्यनैर्घृण्यदोष-प्रसक्तिरपि न संभवति । संसारस्यानादित्वात् कर्मादिसंभवेन तदपेक्षं सत् सृष्टिकर्तृ भवति ब्रह्मेति युक्तमेव ।

विचित्ररचनारूपसृष्ट्यनुपपत्तेः प्रवृत्त्यनुपपत्तेश्च जगत्कारणमानुमानिकं[1] न । सर्वत्र चेतनाधिष्ठितमेवाचेतनं प्रवर्तते इति वक्तव्यम् । पयोऽम्बुदृष्टान्तोऽपि न प्रतिकूलः, तत्रापि चेतनानुमानात् । तृणादिरपि धेन्वादिरूपचेतनोपयुक्त एव क्षीरीभवति । एवं पङ्गुदृष्टान्तोऽपि न प्रतिकूलः, स्वयमप्रवर्तमानोऽपि पङ्गुः अन्धं पुरुषं वागादिभिः प्रवर्तयति । नैवमुदासीनः पुरुषः सर्वथा व्यापारशून्यः प्रधानं प्रवर्तयेत् । अयस्कान्तदृष्टान्तोऽपि नानुकूलः सांख्यानाम् । प्रवृत्तिनित्यत्व-प्रसङ्गात् । अतश्च प्रधानं स्वतन्त्रं न कारणम् । परस्परविरोधाच्चासमञ्जसं सांख्यदर्शनम् ।

नापि परमाणवो जगत्कारणम् । सृष्ट्युपयोगिभूताद्यकर्माभावात् । रूपादिमत्वाच्च परमाणुस्वरूपं विपर्ययमापद्यते । शिष्टापरिग्रहाच्चात्यन्तमनपेक्षा परमाणुकारणवादस्य । समुदायानुपपत्त्यादिभिर्दोषैः सर्वास्तित्ववादिमतमपि अनुपपन्नम् । क्षणिकात्मवादोऽपि न समीचीनः, अनुस्मृतेः स्थिरात्म-धिकत्वात् । एवमसदपि शून्यं न जगत्कारणम्, असतः कार्योत्पत्तेर्न दृष्टत्वात् । नापि बाह्यप्रपञ्चस्य सर्वथा अभावः, ज्ञानव्यतिरेकेणोपलब्धेः । स्वप्नजागरितयोः वैधर्म्याच्च न स्वाप्नप्रत्ययतुल्यत्वं जाग्रत्प्रत्ययस्य । अतोऽपि बाह्यार्थसद्भावः । सर्वथाऽनुपपत्तेश्च नासद्वादः समीचीनः । नाप्यनेकान्तवादः, एकस्मिन् विरुद्धानां युगपदसंभवात् । आत्मनश्च सर्वात्मना शरीरादौ व्यापित्वासंभवाच्च । पशुपतेः जगत्कारणत्वासंभवः सम्बन्धानुपपत्त्यधिष्ठानानुपपत्त्यादिदोषेभ्यः ।

वियदप्युत्पद्यते प्रतिज्ञोपपत्तेः । यावद्विकारजातं विभक्तं दृश्यते लोके तद्वत् वियदपि विकार एव । एवं वायुरपि । सतो ब्रह्मणः उत्पत्तिस्तु नोपपद्यते कुतश्चित् । पृथिव्यप्तेजसां च यथाक्रममुत्पत्तिः । उत्पत्तिविपरीतक्रमेण लयः ।

1. प्रधानमिति यावत् ।

आत्मनि जातादिव्यवहारस्तु भाक्तः शरीरोपाधिकः । स्वरूपतोऽप्यात्मा नोत्पद्यते नित्यत्वात्, श्रुतिभ्यश्च स्वरूपतः तदुत्पत्त्यनुक्तेः । सोऽप्यात्मा ज्ञस्वरूपः । सोऽपि च विभुः । अणुत्वव्यपदेशस्तु तद्गुणसारत्वमात्रेण प्राज्ञवत् । यावदात्मनः संसारित्वं तावत् व्यक्ताव्यक्तरूपेण बुद्धिसंबन्धोऽस्त्येव । एवमुक्त आत्मा कर्ता शास्त्रार्थवत्वात् विहारोपदेशादिहेतुभ्यश्च । यथा च तक्षा तथाऽयमात्मा कर्ताऽकर्ता च । परमेश्वराधीनश्चायमात्मा । ईशस्यांशः, नानात्वेनान्यथा च व्यपदेशात् । परमात्मा च जीवात्मवन्न भवति, प्रकाशादिवत् । जीवस्य च अनुज्ञापरिहारौ देहसंबन्धात् । सन्तत्यभावादव्यतिकरः, असांकर्यम् । सोऽपि च जीवः आभास एव न परमार्थः । प्राणा उत्पद्यन्ते । तेऽप्यणवः । श्रेष्ठश्च प्राणोऽणुः । स च प्राणः बाह्यवाय्वपेक्षया विजातीयः । स च पञ्चवृत्तिः । इन्द्रियाणि च प्राणादतिरिक्तानि । एवं कार्यकारणसंघातादुक्तादतिरिक्तो जीव इति गम्यते । अस्य जीवस्य नामरूपव्याकरणं न संभवति । तत्तु त्रिवृत्कुर्वतः परमेश्वरस्यैव ।

तृतीयाध्यायार्थसंग्रहः

स च जीवो देहान्तरप्रतिपत्तौ देहबीजभूतसूक्ष्मैः संपरिष्वक्तो गच्छति । कर्मवशाच्चन्द्रमण्डलमारूढः कृतसुकृतस्यात्ययेऽनुशयवानवशिष्टोत्तरकर्मा यथेतमनेवं च पुनरागच्छति । इष्टादिकारिभिन्नास्तु पापिनः संयमने यमालये दुष्कृतानुरूपा यामीर्यातना अनुभूय पुनरेवेमं लोकं प्रत्यवरोहन्ति । इष्टादिकारिणः चन्द्रलोकादवरोहणे प्रथममाकाशं प्राप्य तेन मिलिताः तस्तदृशीभूय एवमेवक्रमेण वायौ धूमे अभ्रे मेघे च मिलिताः सन्तः तत्सदृशा भवन्ति । प्रवर्षणानन्तरं पृथिव्यां व्रीहियवादिस्थावरशरीरेषु अन्याधिष्ठितेषु संश्लिष्टाः सन्तः अतिचिरेण पुरुषे संसृष्टाः ततो रेतोद्वारा स्त्रीषु संसृष्टाः भवन्ति । ततस्तत्तत्कर्मानुसारेण विशिष्टमानुषादिजातिं प्रतिपद्यन्ते । एवमेव जीवस्य संसारगीतप्रभेदश्चिन्तितः ।

स्वप्नावस्था तु न पारमार्थिकी, तत्रत्यरथादिसृष्टिः जीवकर्तृकापि प्राज्ञाधिष्ठातृकापि मायामयी, जागरितनिष्ठदेशकालादिसंपत्त्या उचितया अनभिव्यक्तस्वरूपत्वात् । शुभाशुभसूचिकापि सा न परमार्था । नेयं सृष्टिः सांकल्पिकी, जीवस्य ज्ञानैश्वर्यादेः देहयोगात् तिरोहितत्वात् । परमात्माभिध्यानाद्धि कस्यचित् सिद्धस्य आविर्भवति । अज्ञानं हि बन्धकम् । तज्ज्ञाने मोक्षश्च ।

स्वप्नवृत्त्यभावश्च सुषुप्तिः । सुषुप्तिस्थानं तु जीवस्य, नाड्यः, पुरीतत्, आत्मा च । तत्र परमात्मा मुख्यस्थानम् । अन्यद् द्वारमात्रम् । एवं स्वरूपात्मनि स्थितो जीवः स्वीयकर्मानुसारेण पुनः प्रतिबुद्ध्यते । नेश्वरः, न मुक्तो वा । मूर्छावस्था च मुग्धे जीवे सुषुप्तस्यार्धसंपत्तिः । एवं जागराद्यवस्थासु अव्यवस्थितासु व्यवस्थित आत्मा नित्यः सिद्ध्यति । न स्थानतोऽपि परब्रह्मण उभयलिङ्गं वास्तवम् । सविशेषनिर्विशेषबोधिनीषु श्रुतिषु निर्विशेषं निराकारमेव ब्रह्म विज्ञेयम्; तत्प्राधान्यात् । अन्यासां चावैयर्थ्यं प्रकाशवत् । इदं बोधरूपं सन्मात्ररूपं च ब्रह्म । तत्प्रतिबिम्बश्च जलसूर्यकादिवत् द्रष्टव्यः । वस्तुतः प्रतिबिम्बभावासंभवात्, औपाधिकधर्ममात्रेण प्रतिबिम्बकल्पं भवति । तदपि ब्रह्म निर्विशेषमस्ति । मूर्तामूर्तरूपप्रतिषेधेऽपि तदप्रतिषेधात् पुनस्तदुक्तेश्च, एवमपि ब्रह्म सर्वैर्न गृह्यते । तद्धि अव्यक्तम्; संराधनकाले योगिनः पश्यन्ति अतस्तदस्ति । प्रकाशवच्च अवैशेष्यमेव परस्य । तदन्यश्चेतनः कोऽपि नास्ति । उन्मानादिव्यपदेशश्च उपासनार्थः पादवत् । स्थानविशेषादेव संबन्धभेदव्यपदेशौ । तदपि ब्रह्म सर्वगतम्, आयामश्रुतेः। एवं परमार्थतो निर्विशेषमपि ब्रह्म उक्तरीत्या सर्वशक्तियुक्तं सत् जीवानां कर्मफलप्रदातृ भवति । केवलं धर्ममात्रं फलदायीति जैमिनिमतमसाधु, अचेतनत्वात्, सगुणब्रह्मविषया प्राणादिविषया च विज्ञानभेदाभेदादिचिन्ता सर्वशाखासु क्रियते, गुणोपसंहारतदभावनिर्णयार्थम् । अविशिष्टफलासु तासु अनुष्ठाने विकल्पः । आत्मज्ञानं स्वतन्त्रं पुरुषार्थसाधनमिति । कर्मशेषत्वात् तज्ज्ञाने फलश्रुतिरर्थवाद इति जैमिनिपक्षः खण्डितः । शरीरादधिकस्य ईश्वरस्य वेद्यत्वेन उपदेशात् इति युक्तिर्बादरायणस्य । ज्ञाने सति कर्मोपमर्दं च वदति बादरायणः । विद्या कर्माङ्गं न भवति, ऊर्ध्वरेतस्सु सा श्रूयत इति ।

गार्हस्थ्यातिरिक्तोर्ध्वरेतसामाश्रमो वानप्रस्थः सन्यासश्च अस्त्येव अनुष्ठेय इति बादरायणसिद्धान्तः । नास्तीति जैमिनेः पक्षो निराकृतः । विद्या स्वोत्पत्तौ सर्वकर्मापेक्षापि मोक्षे जननीये तन्निरपेक्षा । विद्यायामन्तरंगसाधनानि शमदमादीनि । तान्यवश्यमनुष्ठेयानि । आश्रमकर्माणि तु विद्यासहकारीणि मुमुक्षुणाप्यनुष्ठेयानि । विद्या स्वोत्पत्तौ सर्वकर्मापेक्षापि मोक्षे जननीये तन्निरपेक्षा । विधुरादीनामपि ज्ञानाधिकारोऽस्ति । तथा द्रव्यादिसंपत्तिहीनाना-

मनाश्रमिणामपि जपादिभिः विद्याया उपकारसंभवात् । प्रतिपन्नोर्ध्वरेतोभावस्य सन्यासिनः स्वाश्रमप्रच्युतिः पातित्यहेतुः । पतितस्य बहिष्कारः शास्त्रादाचाराच्च ।

श्रवणादिविषयये नियमविधिः । मुमुक्षुः ज्ञानादिभिः आत्मानमनाविष्कुर्वन् दम्भादिभिः रहितो भवेत् । विद्याजन्म ऐहिकमपि भवति असति प्रतिबन्धके । सति तु आमुष्मिकम् । मुक्तिफलं तु एकरूपमेव विद्याया एकरूपत्वात् । मुक्त्यवस्थाया एकरूपत्वेन अवधारणाच्चेति ।

चतुर्थाध्यायार्थसंग्रहः

श्रवणादिसाधनावृत्तिः कर्तव्या । ब्रह्म आत्मेत्येव गृह्णीयात् प्रतीके तु न गृह्णीयात् । ब्रह्मदृष्टिः कर्तव्या आदित्यादिप्रतीकेषु, उत्कर्षात् । एवं कर्माङ्गभूतेषु तत्तद्दृष्टिः कर्तव्या । आसीन एव ध्यानं कुर्यात् । यत्रैकाग्रता संभवति तत्रैवोपासीत, विशेषानुक्तेः । उपासनं च आप्रायणात् कर्तव्यम् । ब्रह्मसाक्षात्कारे सति पूर्वोत्तरदुरितयोः विनाशासम्पर्कौ भवतः । एवं पूर्वोत्तरयोः सुकृतयोरपि । शरीरपाते तु विदुषो मुक्तिरेव । ते च अनारब्धकार्य एव संचिते निवर्तेते । शरीरपातावधिकरणात् । आरब्धकार्ये तु कर्मणी भोगेनैव निवर्तेते । अथ च विद्वान् ब्रह्म संपद्यते ।

वाङ्मनसि, मनः प्राणे, सोऽध्यक्षे, स च भूतेषु[1] अवतिष्ठते । एवं जीवस्य शरीरान्तरप्रेप्सावेलायामुत्क्रान्तिः । सेयम् उपासकस्य विदुष अन्यस्य च आसृत्युप्रक्रमात् समाना । उक्तदिशा सप्राणस्य सकरणग्रामस्य प्रयतः पुंसः तेजः परदेवतायां संपद्यते । तेजादिभूतसूक्ष्मं तु आसंसारमोक्षादवतिष्ठते । तदपि सूक्ष्मम् । अत एव च शरीरस्योपमर्देन नेदमुपमृद्यते । तेजश्च सूक्ष्मशरीरस्यैव । ऊष्मा च तदीय एव । परंतु ब्रह्मविदः गत्युत्क्रान्त्योरभावः एकेषां स्पष्टः, स्मृतौ च । परंतु ब्रह्मविदः सेन्द्रियाणि भूतसूक्ष्माणि परे ब्रह्मणि लीयन्ते । अतोऽविभाग एव । सगुणोपासको हृदयाग्रप्रज्वलनेन तत्प्रकाशितद्वारो विद्यासामर्थ्यात्; गत्यनुस्मृत्यनुयोगाच्च हार्दानुगृहीतः सन् शताधिकया मूर्धन्यया नाड्या निष्क्रमति । तदा च सूर्यरश्म्यनुसारी भवति रात्रावपि; रश्मिसम्बन्धस्य

1. देहबीजसूक्ष्मेषु

यावद्देहभावित्वात् । उत्तरायण इव दक्षिणायनेऽपि विद्याफलं प्राप्नोति । कालनियमस्तु योगिनोऽनावृत्तये स्मर्यते । तावता न विरोधः । स चोपासको विद्वान् अर्चिरादिना मार्गेण गच्छन् श्रुत्युक्तसंवत्सरादपि अनन्तरं वायुमभिसंभवति । विद्युदनन्तरं वरुणलोकम् । एवं श्रुत्युक्तमार्गेण गच्छति । तत्रत्यमार्गदर्शिन आतिवाहिका देवताविशेषा एवार्चिरादयः । तैर्दर्शितमार्गोऽमानवपुरुषसहायेन ब्रह्मलोकमेत्य कार्यं ब्रह्म अधिगच्छति[1] । तत्रापि प्रतीकालम्बनान् वर्जयित्वा अन्यान् विकारालम्बनान् नयति ब्रह्मलोकमिति बादरायणो मन्यते, ब्रह्मोपासकत्वात् । क्वचित् पञ्चाग्निविद्याविदोऽपि नयति ब्रह्मलोकं श्रुतिवचनात् ।

मुक्तो ब्रह्मीभूतः सन् केवलेन स्वरूपेण अभिनिष्पद्यते । सोऽपि ब्रह्मणाविभक्त एवावतिष्ठते । ब्राह्मेण ऐश्वर्येण अभिनिष्पद्यत इति जैमिनिः । चैतन्यमात्रेणेति औडुलोमिः । बादरायणस्तु यथाकथंचिदविरोधं प्रदर्शयति पक्षद्वये । एवं संकल्पादेव मुक्तस्य सर्वसिद्धिः । स च विद्वान् अनन्याधिपतिः स्वतन्त्रः । अस्य बादरिः तनुर्नास्तीत्याह । जैमिनिस्तु अस्तीत्याह । बादरायणस्तु अस्तिनास्तीत्युभयथाप्याह । तत्र तन्वभावपक्षे स्वप्नवत् स्वेष्टपदार्थोपलब्धिः । तत्सत्त्वे जागरित इव विद्यमानपदार्थोपलब्धिः । किं च मुक्तस्य प्रदीपवत् आवेशः सर्वत्र । ऐश्वर्यं चास्य जगद्व्यापारवर्जम् । ईश्वरेण भोगमात्रसाम्यं च । सर्वथा अनावृत्तिरस्य । इत्येवं दर्शितरीत्या सूत्रैः गम्यमानार्थसंक्षेपो मुख्यतया दर्शितः ।

दर्शितेऽस्मिन् अनेके प्रधानविषयाः अनिर्णीता एव भवन्ति । तथा संशयीताश्च । कः सिद्धान्त इति मन्दमध्यमानां परीक्षकाणामपि केषांचिद्विचक्षणानां व्यामोहमेवोपजनयन्ति तादृशानि सूत्राणि । तथाहि, आदौ ''अथातो ब्रह्मजिज्ञासे''[2] ति 'अथ' शब्दस्य अनेकार्थकस्य कतमोऽर्थो ग्राह्यः मङ्गलानन्तराद्यर्थेषु । आनन्तर्यार्थे स्वीकृते च कस्मादनन्तरमिति अर्थानिर्णयः । किं कर्मानुष्ठानात्? उत धर्मविचारात्? उत साधनचतुष्टयसंपत्तेः? इत्यादिरूपेण मन्दमध्यमानां संशयः सहज एव सूत्रकारैरस्पष्टोक्तेः । अत एव च विचक्षणानामपि आचार्यान्तराणां मतभेदः समजनि । किंच जिज्ञास्यं ब्रह्म किं सगुणम् उत निर्गुणम्

---

1. कार्यप्राप्तिः बादरिमते सिद्धान्ते च; न जैमिनिमते ।
2. ब्र.सू. 1-1-1

इत्यस्पष्टता । सूत्रेषूत्तरत्र "कार्यं बादरिरस्य गत्युपपत्तेः"[1] "परं जैमिनिर्मुख्यत्वात्"[2] इत्युभयथापि ब्रह्म निर्दिष्टमस्ति, तेनाप्यनिर्णयः । निर्गुणं चेदिष्टं सूत्रकाराणां जन्मादिसूत्रे तल्लक्षणोक्त्या लक्षणयुक्तं तत् सविशेषमेव स्यात् । अपि च "सर्वोपेता च तद्दर्शनात्"[3] "सर्वधर्मोपपत्तेश्च"[4] "अन्तस्तद्धर्मोपदेशात्"[5] इत्यादिसूत्रेषु तदीयशक्तितद्धर्माणां वर्णनात् सविशेषं ब्रह्म स्यात् । तथा "न स्थानतोऽपि ....."[6] "प्रकृतैतावत्त्वं हि प्रतिषेधति...."[7] "प्रकाशादिवच्चावैशेष्यं....."[8] "अरूपवदेव हि तत्"[9] इत्यादिसूत्रैर्निर्विशेषमपि वा स्याद् ब्रह्म ।

एवं जन्मादिसूत्रे जन्मादि अस्य इति च्छेदः, उत जन्म आद्यस्य इति, अत्रापि संशयः । 'आदि' पदेन स्थितिभङ्गद्वयं ग्राह्यमुत तन्त्रोक्तपंचकृत्यानि; आहोस्वित् यास्कोक्तषड्भावविकाराः 'जायते....' इत्यादयः इति लक्षणवर्णनेऽप्यनिर्णयः । शास्त्रयोनित्वादिति सूत्रं, शास्त्रप्रकृतित्वात् इत्यर्थकं वा उत अन्यार्थकम् । अत्र योनिशब्दप्रयोगेण प्रकृत्यर्थो लभ्यते "यद्भूतयोनिं परिपश्यन्ति धीरा"[10] इति श्रुतौ "योनिश्च हि गीयते"[11] इति सूत्रे च प्रकृत्यर्थकयोनिपदप्रसिद्धेः । ईक्षतेर्नाब्दमित्यत्र सूत्राक्षरतः किं निराक्रियते इत्यनिर्णयः । एवं बहुत्र सूत्राक्षरेषु ग्राह्यार्थस्य अस्पष्टता "गति सामान्यात्"[12] "भूमा संप्रसादादध्युपदेशात्"[13] इत्यादावूह्या ।

जीवेश्वरयोर्भेदे तात्पर्यमुताभेदे इत्यनिर्णयः । तथाहि तद्भेदपराणि सूत्राणि बहूनि सन्ति । "गुहां प्रविष्टावात्मानौ हि तद्दृर्शनात्",[14] "आनन्दमयोऽभ्यासात्"[15], "नेतरोऽनुपपत्तेः"[16] "अदृश्यत्वादिगुणको धर्मोक्तेः",[17] "विशेषणभेदव्यपदेशाभ्यां च नेतरौ"[18] "अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्"[19] शारीरश्चोभयेऽपि हि भेदेनैनमधीयते"[20] "अनुपपत्तेस्तु न

1. ब्र.सू. 4-3-7
2. Ibid 4-3-12
3. Ibid 2-1-30
4. Ibid 2-1-37
5. Ibid 1-1-20
6. Ibid 3-2-11
7. Ibid 3-2-22
8. Ibid 3-2-25
9. Ibid 3-2-14
10. मुं. 1-1-6
11. ब्र.सू. 1-4-27
12. Ibid 1-1-10
13. Ibid 1-3-8
14. Ibid 1-2-11
15. Ibid 1-1-12
16. Ibid 1-1-16
17. Ibid 1-2-21
18. Ibid 1-2-22
19. Ibid 1-2-18
20. Ibid 1-2-20

शारीरः''[1] ''मुक्तोपसृप्यव्यपदेशात्'',[2] ''प्राणभृच्च'',[3] ''भेदव्यपदेशात्'',[4] ''स्थित्यदनाभ्यां च''[5] ''इतरपरामर्शात्स इति चेत् नासंभवात्'',[6] ''जीवमुख्यप्राणलिङ्गात्''[7] ''इतरव्यपदेशात्''[8] ''अधिकं तु भेदनिर्देशात्''[9] ''आत्मनि चैवं विचित्राश्च हि'',[10] ''अंशो नानाव्यपदेशात् अन्यथा चापि दाशकितवादित्वमधीयत एके''[11] ''प्रकाशादिवन्नैवं परः'',[12] ''ज्ञोऽत एव,''[13] ''कर्ता शास्त्रार्थवत्त्वात्''[14] इत्यादिजीवस्वरूपनिरूपणपराणि बहूनि सन्ति । 'न स्थानतोऽपि' इत्यादिसूत्राणि ब्रह्मपराणि । एवं जीवेश्वरभेदपरेषु सूत्रेषु सत्सु तद्भेद एव प्रतिपाद्य इति वा स्यात्।

''तदनन्यत्वमारम्भणशब्दादिभ्यः''[15] इत्यादिसूत्राणि कार्यकारणयोरनन्यत्वबोधकानि यथा, तथा जीवेश्वरानन्यत्वबोधकान्यपि सन्ति । ''आत्मेति तूपगच्छन्ति ग्राहयन्ति च''[16] ''अविभागेन दृष्टत्वात्''[17] इत्यादीनि द्वित्राणि सन्ति । किमत्र निर्णय इति सूत्राक्षरैः दुरधिगमः । एवमात्मनोऽणुत्वं वा विभुत्वं वा, कर्तृत्वमकर्तृत्वं वा, अंशत्वं वास्तवमवास्तवं वा इत्यत्राप्यनिर्णयः । सूत्राणि परं भूयांसि अणुत्वसाधकानि, तथा कर्तृत्वसाधकानि, अंशत्वसाधकानि च दृश्यन्ते । अणुत्वे ''नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्''[18] इत्यादीनि । ''कर्ता शास्त्रार्थवत्वात्'',[19] ''यथा च तक्षोभयथा''[20] इत्यादीनि कर्तृत्वसाधकानि । अंशतासाधकानि, अंशांशिनोर्भेदाभेदसाधकानि च ''अंशो नाना व्यपदेशात्....''[21] ''उभयव्यपदेशात्तु अहि कुण्डलवत्''[22] इत्यादीनि । एवं गत्यागतिस्वप्नसुषुप्तिमूर्छाद्यवस्थाबन्धमोक्षादिपराणि जीवस्य बहूनि सन्ति । ''सन्ध्ये सृष्टिराह हि''[23] इत्यारभ्य ''मुग्धेऽर्धसंपत्तिः परिशेषादि''[24] त्यन्तानि सूत्राणि अवस्थाविचारपराणि । ''पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्ध

1. ब्र.सू. 1-2-3
2. Ibid 1-3-2
3. Ibid 1-3-4
4. Ibid 1-3-5
5. Ibid 1-3-7
6. Ibid 1-3-18
7. Ibid 1-4-17, 1-1-31
8. Ibid 2-1-21
9. Ibid 2-1-22
10. Ibid 2-1-28
11. Ibid 2-3-43
12. Ibid 2-3-46
13. Ibid 2-3-18
14. Ibid 2-3-33
15. Ibid 2-1-14
16. Ibid 4-1-3
17. Ibid 4-4-4
18. Ibid 2-3-21
19. Ibid 2-3-33
20. Ibid 2-3-40
21. Ibid 2-3-43
22. Ibid 3-2-27
23. Ibid 3-2-1
24. Ibid 3-2-10

विपर्ययौ''[1] ''संपद्यविर्भावः स्वेन शब्दात्''[2] इत्यादीनि बन्धमोक्षपराणि । ब्रह्मव्यतिरिक्तचेतनमात्रनिराकरणपराणि कानिचिन्, ''परमतः सेतून्मान-सम्बन्धभेदव्यपदेशेभ्यः'',[3] ''तथाऽन्यप्रतिषेधात्''[4] इत्यादीनि ।

मुक्तात्मनि स्वरूपेण तस्य स्थितिः केवल चिन्मात्रेण, तथा ब्रह्मसम्बन्धिसत्यसंकल्पत्वादिधर्मेण वा स्थितिः इत्येवं संशयास्पदानि ''ब्राह्मेण जैमिनिरुपन्यासादिभ्यः''[5] ''चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः''[6] इत्यादिसूत्राणि ।

इत्थं ब्रह्मविषये सगुणत्वनिर्गुणत्वयोस्तथा जीवेश्वरयोः भेदेऽभेदे भेदाभेदयोर्वा, अंशांशिभावे वा, बिम्बप्रतिबिम्बभावे वा, ज्ञानकर्मणोस्समुच्चयस्य उत एकतरस्य उत ज्ञानस्य केवलस्य मोक्षसाधनत्वमथवा उपासनस्य इत्यंशे च सूत्रमात्रेणानिर्णयः ।

एवं न्यायसूत्रे उपनिषदर्थनिर्णयाय प्रवृत्तेऽपि मन्दमध्यमानां संशये उपनिषदर्थनिर्णयः कथं स्वसंपादः? अतः सूत्रार्थनिर्णयाय वृत्तिभाष्यादिसमवतारः समुचित इति ज्ञायते । तदर्थं प्रवृत्तवृत्तिग्रन्थेषु भाष्यकारैरनूदितांशेषु प्राग्दर्शितेषु सूत्रश्रुतिविरोधयोर्जाग्रतोः पुनरप्यनिर्णय एव संजातः, किं केवलाद्वैते तात्पर्यमुत भेदाभेदवादे भर्तृप्रपञ्चसंमते तात्पर्यमिति । तन्निर्णयार्थं भगवत्पादभाष्यमेव प्रवृत्तमस्ति । तथापि माध्यस्थ्यमवलम्ब्य श्रुतिसूत्रपौर्वापर्यपर्यालोचने कस्यचित् निर्णयो भवेदेव ।

माध्यस्थ्येन सूत्रपरामर्शेऽद्वैतसिद्धान्तानुगुण्यम्

सूत्रेऽद्वैतपदाभावेऽपि तदर्थबोधकशब्दस्याभावो दुर्भणः । ''तदनन्यत्व-मारम्भणशब्दादिभ्य''[7] इति हि सूत्रेऽनन्यत्वपदमेवाद्वैतबोधकम् । भेदो हि अन्यत्वपदार्थः । स एव द्वैतम् । ''द्वैतं तद्भेद उच्यते''[8] इति गौडपादा अपि । तन्निषेधोऽनन्यत्वमिति 'नञ्' पदेन क्रियते । तथा च तदनन्यत्वमित्यनेन

1. ब्र.सू. 3-2-5
2. Ibid 4-4-1
3. Ibid 3-2-31
4. Ibid 3-2-36
5. Ibid 4-4-5
6. Ibid 4-4-6
7. Ibid 2-1-14
8. गौ.का 3-18

कारणीभूतसद्वस्तुनोऽन्यस्यान्यत्वं निषिध्यते । अत्यन्ताभेदस्य कार्यकारणयोः चिज्जडयोरसंभवात् अनन्यत्वमिति अत्यन्ताभेदो नार्थः । स्वरूपैक्यमेव हि सः । वक्तव्ये चानन्यत्वे सूत्रसंमते कारणव्यतिरेकेण कार्यभेदाभाव एव पर्यवस्यति । न चानन्यत्ववदन्यत्वमपि सूत्रकारसंमतमिति वक्तुं सुशकम् । कार्यकारणयोर्वास्तविकभेदाभेदाङ्गीकारे एतत्सूत्रविरोधवत् "नैकस्मिन्नसंभवात्"[1] इति एकस्मिन् विरुद्धधर्माणां निराकरणपरसूत्रविरोधो दुष्परिहरः । तथा च भेदाभेदयोः कारणात् कार्ये, जीवेश्वरयोर्वा तयोरङ्गीकृतयोः सूत्रविरोधः सुस्पष्टः । हेतूकृतारम्भणशब्दादिशब्देन "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्"[2] इति सदृष्टान्तं विकारस्य नाममात्रेणासत्यत्वं कारणमात्रस्य च सत्यत्वं प्रतिपादितम् । एवं श्रुतिनिर्दिष्टहेतुरेवोक्तानन्यत्वसाधकः । इदमेव सूत्रं द्वैतमिथ्यात्वबोधकम् । अनन्यत्वं, मिथ्यात्वम्, असत्यत्वमित्येतानि पर्यायपदानि । एतदेकमेव सूत्रं श्रुतितात्पर्यानुसारि, प्रत्यक्षादिप्रमाणान्तरानधिगतार्थबोधकं चेति प्रबलम् । भेदपरसूत्रेषु बहुषु जाग्रत्स्वपि भेदस्य प्रमाणान्तराधिगतत्वेन तद्विषये परमतात्पर्यस्य सूत्रकाराणामपि अनभीप्सितत्वात् । "अर्थेऽनुपलब्धे तत्प्रमाणम्"[3] इत्यौत्पत्तिकसूत्रे जैमिनिना वेदप्रामाण्यविषये बादरायणस्येति संमतिप्रदर्शनात् । तथा च प्रागुदाहृतसूत्रप्राबल्यात् परमतात्पर्यरहितभेदश्रुत्यनुगुणसूत्राणां दौर्बल्यमेव । परंतु व्यावहारिकभेदपरत्वं 'स्याल्लोकवत्' इति सूत्रेण वक्तव्यम्, अन्यथा पूर्वापरविरुद्धभाषित्वं सूत्रकारेषु आरोपितं स्यात् ।

किंच "सत्त्वाच्चावरस्य"[4] इति सूत्रे अवरस्य कार्यस्य यद्यपि सत्त्वमुक्तं, तदपि कारणीभूतसदात्मनैव न पृथक्सत्त्वम् । अन्यथाऽनन्यत्वोक्तिविरोधः । भेदबोधकसूत्रबाहुल्यदर्शनमात्रेण भेदपारमार्थिकत्वं साधयितुं न शक्यम्, असति अव्यभिचरितत्वरूपे सत्वे । अन्यथा भेदबोधककर्मकाण्डबाहुल्यादेव तत्सिद्धिसंभवे, सूत्रन्यायस्य निष्प्रयोजनत्वप्रसङ्गः । "नासतो विद्यते भावः"[5] इति सत् सदेव असदसदेवेति निर्णयस्य भगवत्कृतस्य विरुद्धोक्तेः प्रसङ्गश्च ।

1. ब्र.सू. 2-2-33
2. छां. 6-1-4
3. जै.सू. 1-1-5
4. ब्र.सू. 2-1-16
5. भ.गी. 2-16

सूत्राक्षरत एव व्यावहारिकपारमार्थिकदशा ज्ञायते । यथा - ''भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्''[1] इति सूत्र एव लोकवदिति लोकदृष्टानुरोधेन कारणात्मनानन्यत्वेऽपि भोक्तृभोग्यविभागो व्यवहाराय दर्शितः । अत्रत्य 'लोक' शब्दः समुद्रतरङ्गादिदृष्टान्तसूचकः । तद्वत् पूर्वोक्तविभागः तज्जातीयोऽन्योऽपि भेदमूलको व्यवहारो गृह्यते । भगवत्पादैश्च एतत्सूत्रवर्णनस्थल एव इत्थमभिहितम् ''अभ्युपगम्य चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागं 'स्याल्लोकवदि'ति परिहारो अभिहितः । तदनन्यत्वसूत्रे तु लोकवदिति शब्दाप्रयोगात् न त्वयं विभागः परमार्थतोऽस्ति । यस्मात्तयोः कार्यकारणयोरनन्यत्वमवगम्यते'' इति व्यावहारिकभेदविभागं परमार्थतः तदभावं च त एव वर्णयामासुः । अयं च दशाविभागः सूत्रकृदुपज्ञ एव । न भगवत्पादोपज्ञः । यतः सूत्रकाराः स्याल्लोकवदिति आदौ व्यवहारभूमौ विभागमुक्त्वा तदनन्तरमेव तदनन्यत्वमिति तन्निराचक्रुः । सूत्रकाराणामपि दशाविभागे मूलमुपनिषदेव, ''यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् केन कं विजानीयात्''[2] इति । अतः वस्तुतः श्रुत्युपज्ञ इति वक्तव्यम् ।

एवं जीवेश्वरभेदमपि प्रागुदाहृतसूत्रैर्दर्शयन्नप्याचार्यः न परमतात्पर्येण दिदर्शयिषति । यतः जीवात्संसारिणो भिन्नमकल्पितमसंसारि परं ब्रह्म सिषाधयिषति । तथैव न पुनर्जीवं तदतिरिक्तम् । लोकाप्रसिद्धं तत्त्वं तत्पदार्थं मुमुक्षुं प्रति प्रथमतो वाक्यार्थज्ञानोपयोगितया प्रमापयति । अत एव 'ब्रह्मजिज्ञासे'ति प्रथमतः प्रतिज्ञाय तल्लक्षणं तत्प्रमाणं च द्वितीयतृतीयसूत्रयोर्दर्शयति । उचितं च तत्; छान्दोग्योक्ततत्त्वं वाक्यार्थेऽवगन्तव्ये आदौ पदार्थविवेचनाय तत्पदार्थ एवाप्रसिद्धो वर्णनीयः । पदार्थविवेकपूर्वकत्वाद्वाक्यार्थबोधस्य सर्वत्र । तत्र 'त्वं' पदार्थस्तु लोकतोऽहमस्मीति प्रसिद्ध एवेति जानन्नाचार्यः तन्निरूपणे न प्रथममादरं दर्शयति सूत्रकारः । प्रसिद्धमनूद्य जीवं तदसीति बोधयितुं शक्यमिति । अत एव ''अधिकं तु भेदनिर्देशात्'',[3] ''भेदव्यपदेशाच्चान्यः''[4] इत्यादिसूत्रैः जीवात्तत्त्वतो भिन्नं ब्रह्म प्रतिपादयति । एवं सूत्रकाराशयो भगवत्पादैरेव दर्शितः । अत्र ब्रह्मवज्जीवः[5] परमार्थतोऽस्ति उत नास्ति इति संशये सूत्रकाराशयः नास्तीति विषय एव ।

1. ब्र.सू. 2-1-13
2. बृ. 4-6-15
3. ब्र.सू. 2-1-22
4. Ibid 1-1-21
5. अन्तःकरणोपाधिचेतनः ।

"आभास एव च"[1] "अत एव चोपमा सूर्यकादिवत्"[2] इति सूत्राभ्यां जीवस्य आभासत्वोक्त्या सूर्यप्रतिबिम्बसमानत्वोक्त्या च स्फुटितोऽयं विषयः। 'आभास' शब्दश्च आपाततः प्रतीयमानमिथ्यावस्तुपरः। यथा हेत्वाभासः, विरोधाभास इत्यादिप्रयोगे। स्वरूपतस्तु चैतन्यरूपजीवस्य ब्रह्मानतिरिक्तस्वरूपतया सत्यत्वमेव। एतदाशयेनैव 'आत्मेति तूपगच्छन्ति' इति ब्रह्म आत्मेति गृह्णीयादिति ऐक्यमुपदिशत्याचार्यः। एवं च सूत्रकारैर्जीवेश्वरभेदो व्यवहारदशायामेव स्वीकृत इति तदाशयो वक्तव्यः। तत्काल एव कर्तृत्वभोक्तृत्वादिसकलसंसारदशावर्णनम्। सर्वस्यापि प्रपञ्चस्य भोक्तृभोग्यवर्गजातस्य तदनन्यत्वन्यायेन मिथ्यात्वमेव। 'अप्राप्तेशास्त्रमर्थवदि'ति भाट्टाः। तदुपदेशकर्तारौ जैमिनिबादरायणौ अनुपलब्धेऽर्थे तत्प्रमाणमिति। 'कर्ता शास्त्रार्थवत्त्वादि'ति तु व्यावहारिककर्तृत्वसाधनायैव। वस्तुतः सांख्यमतनिरासपूर्वकं लोकप्रसिद्धकर्तृत्वव्यवस्थापनेन व्यवहारोपपत्तिकरणायैवेति वक्तव्यम्, अन्यथा सूत्रवैयर्थ्यप्रसङ्गः। तत्रापि परमार्थतः कर्तृत्वसाधने न तात्पर्यम्। सर्वथा मुमुक्षोः बन्धविमोकार्थिनः कुत्रापि कर्तृत्वसाधने प्रयोजनाभावः। अत एव तत्साधने शास्त्रार्थवत्वादिकमेव हेतूकृतम्। तदपि व्यवहारभूमौ। परमार्थदशायां मुक्तौ शास्त्रानर्थक्यस्येष्टत्वात्, "वेदा अवेदा"[3] इति श्रुतिवचनात्। सुषुप्तोदाहृतमपि वचनमिदं तुल्यन्यायेन निष्प्रपञ्चस्वरूपमुक्तावपि प्रमाणीभवति, सुषुप्तस्य मोक्षदृष्टान्तत्वेन बृहदारण्यक एव वर्णितत्वात्। भाष्यकाराश्च गीताभाष्ये 'मुक्तात्मनां हि संसारसंसारित्वव्यवहाराभावः सर्वैरेव आत्मवादिभिरिष्यते। न च तेषां शास्त्रानर्थक्यादिदोषप्राप्तिरभ्युपगता। तथा नः क्षेत्रज्ञानमीश्वरैकत्वे सति शास्त्रानर्थक्यं भवतु; अविद्याविषये त्वर्थवत्त्वम्। यथा द्वैतिनां सर्वेषां बन्धावस्थायामेव शास्त्राद्यर्थवत्वम् न मुक्तावस्थायाम्' इति। इत्थं दर्शितरीत्या अद्वैतसिद्धान्तानुगुण्यं सूत्राणां विद्यमानमपि तदविज्ञाय वृत्तिकारा भिन्नभिन्नाः श्रुतितात्पर्यमपि विहाय आपाततः प्रतीयमानसूत्राक्षरानुलोम्येन स्वाभिप्रायानुसारेण व्याचक्रुः। तन्मतं च प्रागेव तत्र तत्र सूत्रभाष्यानूदितरीत्या दर्शितम्। अत्रापि वृत्तिग्रन्थे श्रुतिसूत्रविरोधं दर्शयन्तो भगवत्पादा भाष्यमारचयामासुस्तत्त्वार्थप्रदर्शनाय। इदमेव सूत्रभाष्यावतारे कारणम्।

---

1. ब्र.सू. 2-3-50 2. Ibid 3-2-18 3. बृ. 4-3-22

गौडपादाः, तत्कारिका च

भगवत्पादभाष्यस्य सिद्धान्ताभिप्रायविशदीकरणे प्राचीनतमग्रन्थो गौडपादीयकारिकात्मकं प्रकरण चतुष्टयं श्रुतिवदाधारीभूतं प्रमाणम् । तत्रापि आदिमप्रकरणत्रयमविप्रतिपन्नम् । अन्तिमंतु कवचिदंशे प्रमाणीभवत्यपि तदिदं विवेचयामः ।

सुप्रथिताः खलु गौडपादाः परमगुरव इति श्रीशंकरदिग्विजयादिपरिशीलने तत्पराणामवगम्यते । माधवीयशंकरविजये, आनन्दगिरिशंकरविजये राजचूडामणिशंकराभ्युदये, चिद्विलासशंकरविजये, सदानन्दकृतशंकरविजये अन्यत्र च गुरुरत्नमालायां गौडपादविषयः स्पष्टीकृतः । शान्तिपाठं पठन्तः-

नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥
श्रीशंकराचार्यम्.............

इति आदौ गुरुपरम्परास्मरणकाले पठन्ति । एते सुरेश्वराचार्यैः नैष्कर्म्यसिद्धौ चतुर्थपरिच्छेदे गौडा इति अभिहिताः । एत एव माण्डूक्यकारिकाकर्तार इति सूचिताश्च ।

यथा - ''अस्यार्थस्य द्रढिम्न उदाहरणम् -

कार्यकारणबद्धौ ताविष्येते विश्वतैजसो ।
प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिद्ध्यतः ।

अन्यथा गृह्णतः स्वप्नो निद्रातत्त्वमजानतः ।
विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ।[1] इति ।

---

1. गौ.का. 1-11-15, नै.सि. 4-41, 42

तथा भगवत्पादीयमुदाहरणम्-

सुषुप्ताख्यं तमोऽज्ञानं बीजं स्वप्नप्रबोधयोः ।
स्वात्मबोधप्रदग्धं स्याद्बीजं दग्धं यथाभवम् ॥
एवं गौडैर्द्राविडैर्नः पूज्यैरर्थः प्रभाषितः ।
अज्ञानमात्रोपाधिस्सन्नहमादिदृग्गीश्वरः[1]

इति कारिकाद्वयोदाहरणान्ते 'गौड' शब्दोनानुस्मृताः गौडपादाः । ज्ञानोत्तममिश्रविरचितायां चन्द्रिकाख्यतट्टीकायां च 'गौडैः गौडपादाचार्यैः, द्राविडैः भगवत्पादाचार्यैः' इति । यद्यपि गौडद्राविडपदे केवले गौडद्राविडजनपदनिवासिमात्रमवगमयतः, तथापि श्रीसुरेश्वरैः तदीयग्रन्थोदाहरणेन प्रसिद्धेन गौडपादाचार्यान् शंकाराचार्यांश्च नियमेनोपस्थापयतः । द्राविडपदं तु शंकराचार्यानेव सुतरामवगमयति । यतो हि तत्रैव 'तथा भगवत्पादीयमुदाहरणम्' इति स्पष्टमुक्तम् । अतो न विप्रतिपत्तिरत्र । तत्समभिव्याहारात् 'गौड' पदमपि तत्परमगुरून् प्रकाशयति । यद्यपि सूत्रभाष्ये आचार्यैः तन्नामोल्लेखं विनैव तदीयकारिका प्रमाणीकृता । यथा - 'तथा च संप्रदायविदो वदन्ति'-

मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदिताऽन्यथा ।
उपायः सोऽवताराय नास्ति भेदः कथंचन ॥[2] इति ॥

अन्यत्र च - 'अत्रोक्तं वेदान्तार्थसंप्रदायविद्भिराचार्यैः

अनादिमायया सुप्तो यदा जीवः प्रबुद्ध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुद्ध्यते तदा ॥[3] इति

अथापि सुरेश्वरधृतगौडपदेन तदीयकारिकाग्रन्थान्तर्गतत्वेन आचार्यधृतकारिकयोः कर्तारो गौडपादा एवेति निर्णयः । पञ्चदश्यां च-

गौडाचार्यादिर्विकल्पे समाधावन्ययोगिनाम् ।
साकारब्रह्मनिष्ठानामत्यन्तं भयमूचिरे ॥
अस्पर्शयोगो वै नाम दुर्दर्शः सर्वयोगिभिः ।
योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः ॥[4] इति ।

---

1. नै.सि. 4-43, 44 (उप.सा. 17-26)
2. गौ.का. 3-15
3. Ibid 1-16
4. पं.द. 2-28, 29

यदि गौडपादा एव कारिकाकर्तारः त एव संप्रदायविदो वेदान्तानां, सिद्धान्तमार्गदर्शिनः परमगुरवो भगवत्पादानामिति न विप्रतिपत्तिः । एवं नैकधा व्यवहरणम् । गौडा इति भीमो भीमसेन इतिवत् क्वचित् गौडपादा इति गौडपादाचार्या इति गौडाचार्या इति च बहुधा ग्रन्थान्तरेषु व्यवहृताः । यथा-

निश्शेषवेदसिद्धान्तविद्वद्भिरपि भाषितम् ।
गौडाचार्यैरिदं वस्तु यथास्माभिः प्रपञ्चितम् ॥[1] इति

अपि च

श्लोकांश्च गौडपादादेर्यथोक्तार्थस्य साक्षिणः ।
अधीयतेऽत्र यत्नेन संप्रदायविदः स्वयम् ॥
तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः ।
तत्त्वीभूतस्तदारामस्तत्वादप्रच्युतो भवेत् ॥[2] इति ।

अन्ये, 'गौड' इत्येव नाम, 'पाद' इति गौरवार्थकमिति 'बालकृष्णानन्दसरस्वती' इति विमृष्टमन्यत्र विधुशेखरभट्टाचार्येण स्वीयवृत्तिसहिते गौडपादीयागमशास्त्रे । तत्रैव मोक्षमुल्लरपण्डितस्य जर्मन्देशीयस्य आशयोऽन्यथोल्लिखितः । शर्मण्यबुधो स्वकीये 'प्राचीनवेदान्ते' (Their elder Vedanta) मन्यते 'सुरेश्वरस्य 'गौडा' इत्यनेन 'द्राविडा' इत्यनेन च पदेन द्वौ प्रथितौ वेदान्तसंप्रदायौ बोद्धव्यौ । यदि तावदिह 'द्राविड' पदेन अर्वाच्यां केरलेषु शांकरसंप्रदायोऽवगम्यते; 'गौड' पदेनापि उदीच्यां गौडमण्डलस्थो वेदान्त-संप्रदायोऽवगन्तव्यः । अयं च गौडदेशः तत्र प्रचुरगुडोत्पत्तेः तथा प्रथित इति । तत्रैव टिप्पणी - 'उदीच्यो गौडपदः पुण्ड्रनाम्ना प्रथते । पुण्ड्रशब्दश्च लोहितेक्षुं बोधयति । एवं तदीयाशयसंकलनेऽयमपरः संशयः समुन्मिषति । इह गौडद्राविडपदाभ्यां किं कौचिदाचार्यौ आहोस्वित् द्वौ वेदान्तसंप्रदायाविति । उभयथाऽपि शक्यते व्याख्यातुम् । तत्र सन्त एव निश्चिन्वन्तु तत्त्वमिति ।

भट्टाचार्योक्तदिशा गौडपदमात्रं गौडदेशवासिनं नाभिधत्ते । अगौडस्यापि गौडपदव्यवहारो लघुवासिष्ठकर्तरि काश्मीरदेशीये अभिनन्दनामन्यपि दृश्यत इति ।

1. बृ.वा. 2-1-386 2. Ibid 4-4-886, 887

तथा लघुचन्द्रिकाकर्तरि ब्रह्मानन्दस्वामिन्यपि । गौडदेशवासित्वमात्रेण तथा प्रयोग इत्यादि विचारितं भट्टाचार्येण । तेनावगम्यते गौडदेशवासित्वादपि वा गौडाभिजनत्वात् तत्पदप्रयोग इति । अपरोऽयमाशयः बालकृष्णानन्दाशयानुसारी तत्रत्यलिखितेन गम्यते । गौडचरणाः कुरुक्षेत्रगतहिरावतीनदीतीरजातगौडजाति-श्रेष्ठाः । देशविशेषजातत्वमात्रेण गौडा इति द्वापरयुगादारभ्य सामान्यनाम्नैवैते लोकविख्याताः, न विशेषनाम्ना । अतो गौडब्राह्मणेषूत्पन्नत्वमात्रेण अस्मदाचार्योऽपि 'गौड' इति इदमेव बलीयः प्रमाणमिति । अन्यश्चाशयो विस्तरेण तत्रैव दर्शितः । न खलु गौडपादो नाम ग्रन्थकर्ता पुरुष आसीत् । केवलं प्रकरणचतुष्टयग्रन्थः गौडपादीयकारिका, गौडपादी, आगमशास्त्रविवरणमिति च कथ्यते । तावताऽभ्यूहितस्तन्नामा कर्तेति । अत्र कारणं तु टीकाकारानन्दगिरिगोविन्दानन्दस्वामिभिः तन्नामोल्लेखं विना केवलं 'वृद्धसंमतिमाह' इति व्याख्यानं; तथा नैष्कर्म्यसिद्धिटीकाकृता रामकृष्णेन 'आचार्यसंमति'रिति नाम विना उद्धरणम् । तथा सदानन्दीयवेदान्तसारे तदुक्तं कारिकाद्वयमुद्धरति । टीकाकृन्नरसिंहसरस्वत्या च वृद्धसंमतिरित्येवोक्तिः । तथा ब्रह्मसिद्धौ कारिकाद्वयग्रहणेऽपि नामानुल्लेखनम् । तथा विज्ञानभिक्षुणा सांख्य-प्रवचनभाष्ये तदनुल्लेखः । सर्वोऽप्ययं सूत्रभाष्यकारशंकराचार्यानुरोधेन । सर्वथा-गौडपादः कर्तेति निर्णयः न सुसाध इति । अतः संप्रदायवाचिगौडपदमिति ।

अस्मदाशयस्तु एवम् - शर्मण्यबुधाशयोऽपि आपातरमणीयः । यतो नैष्कर्म्यसिद्धिग्रन्थाधारेण प्रागुक्तदिशा देशनिवासिवाचिद्राविडपदवत् तत्समभिव्याहृतगौडपदमपि गौडदेशनिवासिनं ग्रन्थकर्तृविशेषमेवोपस्थापयति । देशवाचकपदानां तन्निवासिवाचकत्वं प्रसिद्धमन्यत्र वैदेहपाञ्चालवैदर्भादिपदेषु । नाप्रसिद्धसंप्रदायवाचकत्वं कल्पनीयम् । गीर्वाणभाषामर्यादाभङ्गप्रसङ्गात् ।

आस्तां कर्तृविचारः । गौडपादाचार्यकृतमिति यथाऽयं कारिकाग्रन्थः तद्वत् तन्त्रशास्त्रमप्येकमवर्ततेति श्रीभास्कररायाचार्यप्रणीते ललितासहस्रनामभाष्ये सौभाग्यभास्कराख्ये ग्रन्थे विज्ञायते । यथा तदुल्लेखः "गौडपादीयसूत्रभाष्ये तु सर्वेषां चिन्तितार्थप्रदमन्त्राणां निर्माणस्थानं तदेवेति तस्य चिन्तामणिगृहत्वमित्युक्त्वा तन्निर्माणप्रकारो विस्तरेण वर्णित" इति । वेदान्तग्रन्थेषु

च अयं प्रकरणग्रन्थो गौडपादीय इति प्राचीनतमश्चेति संप्रदायानुगत इति च भगवत्पादैः पुरस्कृतः । अस्य शास्त्रस्य आगमशास्त्रमितिवत् स्पन्दशास्त्रमित्यपि नामान्तरं दृश्यते । यथा तत्रैव सौभाग्यभास्करभाष्ये 'तदुक्तं स्पन्दशास्त्रे;

त्रिषु धामसु यद्भोग्यं भोक्ता यश्च प्रकीर्तितः ।
विद्यात्तदुभयं[1] यस्तु सभुञ्जानो न लिप्यते ॥ इति ।

अन्यदप्युत्तरगीताया भाष्यं, तथा नरसिंहोत्तरतापिन्युपनिषदः काचन व्याख्या तथा ईशकृष्णविरचितसांख्यकारिकाभाष्यं, दुर्गासप्तशतीटीका नाम अन्यो ग्रन्थः, तथैव सुभगोदयः श्रीविद्यारत्नसूत्रं चेति विधुशेखरभट्टाचार्येण गौडपादीया इति प्रसिद्ध्यनुसारेणोद्धृताः । परंतु भट्टाचार्याः एकं प्रश्नमत्रोत्थापयन्ति । अपि नाम द्वौ गौडपादावभूताम् । एको वैदान्तिकोऽपरस्तु तान्त्रिक इति । प्रगल्भाचार्यकृते श्रीविद्यार्णवे शंकराचार्यस्तान्त्रिकत्वेन वर्णितः । दृष्टश्च तत्र तस्य गुरुशिष्यपरम्पराक्रमः । न पुनरेषः मठाम्नायेन संवदति । ततश्च नायं कस्मैचित्कल्पते उपकाराय गौडपादकालविनिर्णये । एतत्पुनर्वक्तव्यं यत् विद्यार्णवगतायां गुरुशिष्यपरम्परायां द्वौ गौडपादौ दृश्येते । 'तयोरेको गौड इति, परस्तु गौडपादक इति पठितः इति । अस्य समाधानकरणे न वयं प्रयतामहे । वेदान्तग्रन्थत्वेन प्रसिद्धमिमं प्रकरणचतुष्टयात्मकं ग्रन्थं माण्डूक्योपनिषदं च आदृतामधिकृत्य विचारः प्रस्तूयते ।

तत्रादौ विधुशेखरभट्टाचार्याणां विमर्शः- का नाम माण्डूक्योपनिषत्? कियती चेयम्? अत्र विप्रतिपद्यन्ते वावदूकाः । लोकप्रसिद्धिश्चेयम् । ''ओमित्येतदक्षरमित्यादीनि, आत्मानं य एवं वेद'' इत्यन्तानि द्वादशगद्यवाक्यान्येव सोपनिषदिति कथ्यते । अष्टोत्तरशतोपनिषत्संग्रहे तथैव पर्यगणि संग्रहकारिणाम् । न तु मध्यवर्तिन्यः कारिकाः । तास्तु गौडपादकारिकेति प्रथिता उपनिषद्व्याख्यानरूपा इति । अपरः पक्षः, प्रथमप्रकरणपठिताः कारिकाः षड्विंशतिरपि तैर्द्वादशभिर्वाक्यैः सह सर्वाऽप्युपनिषदिति मध्वाचार्यतदनुयायि-व्यासतीर्थश्रीनिवासानामाशये प्रसिद्धः । यथाहुः माण्डूक्यभाष्ये मध्वमुनयः -

---

1 वेदैतदुभयमिति पाठान्तरम् ।

ध्यायन्नारायणं देवं प्रणवेन समाहितः ।
मण्डूकरूपी वरुणस्तुष्टाव हरिमव्ययम् ॥[1]

इति मण्डूकरूपी सन् ददर्श वरुणः श्रुतिम् ।

मण्डूकरूपिणा वरुणेन चतूरूपो नारायणोऽत्र स्तूयत इति । प्रमाणं चात्र -

ब्रह्म दृष्टानतो मन्त्रान् प्रमाणं सलिलेश्वरः ।
अत्र श्लोका भवन्तीति चकारैवं पुनः पुनः ॥[2] इति ।

व्यासतीर्थोऽपि मन्त्रत्वेनैव कारिका उद्धरति । न केवलं सः, अपि तु नृसिंहपूर्वतापनीभाष्यकाराः प्रपञ्चसारकर्तारोऽप्येवमाहुः । परं तु ऋषिं वरुणं न स्मरन्ति ।

श्रीमद्रामानुजानुगामी कूटनारायणोऽप्येवं प्रथमप्रकरणं सह कारिकाभिः द्वादशवाक्यानि उपनिषदिति आह । श्रीवैष्णवैः श्रीवत्साङ्कमिश्रैः ऊनत्रिंशच्छ्लोका उपनिषत्वेन व्याख्याताः । रङ्गरामानुजीयव्याख्याने तु गौडपादीया इति न व्याख्याताः । केचन श्लोका उपनिषत्वेन मध्वैः व्याख्याता इत्यन्यत्र चिन्तितं सर्वोपनित्तात्पर्यसंग्रहे तेलुगुपुस्तके । अप्पयदीक्षितोऽपि तन्मतमेव पुष्णाति । स हि प्रथमप्रकरणमेव व्याचष्टे, नाधिकं किंचित् ।

श्रीभाष्यकारा अपि 'अनादिमायया सुप्त' इति आगमशास्त्रकारिका श्रुतिरिति परिगणयन्तस्तदाशयमेवोपबृंहयन्ति ।

उक्तं खलु तैः तत्र जीवस्यैव निरोधः श्रूयते इति ।

अनादिमायया सुप्तो यदा जीवः प्रबुद्ध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुद्ध्यते तदा ॥[3] इति ।

---

1. मां. मध्वभाष्यारम्भे
2. अत्र टिप्पणी - अत्रैतयोर्वचनयोरादिमं पद्मपुराणात् अन्तिमं तु हरिवंशादुद्धृत' मिति । परमन्विष्यापि मुद्रितग्रन्थे न तयोरन्यतरदप्ययधिगतम् । कुत्रत्यमिदमिति न ज्ञायते ।
3. गौ.का 1-16

अत्र श्रूयत इति पदेन श्रुतित्वं व्यक्तम् । अत्र निर्णयो भट्टाचार्याणाम् - तयोरेवाचार्ययोर्वचनविरोधात् कारिकाद्वयं गौडैरुक्तमित्युक्त्वा संप्रदायविदो वदन्तीति श्रीशंकराचार्योक्त्या च सर्वथा कारिका न श्रुतित्वेन संप्रतिपन्ना । उपपिषत्वव्यवहारस्तु गौणोऽपि गीतास्विव भवेत् उपनिषदर्थसारग्राहित्वादिति । एवं सुविस्तरमवतरणिकायां भट्टाचार्यैरुक्तं तत्रैव द्रष्टव्यम् ।

अत्र आस्माकीनाशयः - इत्थं विमृष्टभट्टाचार्याशयं वयमपि गृह्णीमः । कारिका न तैत्तिरीयादिवदुपनिषदः । किंतु केवलानि गद्यानि द्वादश । परंतु एका संशीतिरपरिहार्या । कुतः ? वार्तिके कारिकाश्रुतिरित्युक्तत्वात् । यथा -

स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया ।
इत्यादिस्थानभेदोऽपि वेदान्तोक्तो विनिश्चितः ॥[1] इति ।

तथा वार्तिकसारे -

'मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ।
इति माण्डूक्यशाखायां श्रुतिवाक्यमधीयते ॥[2] इति ।

वार्तिकटिका च 'स्थानभेदे श्रुतिं प्रमाणयति' इति । एतदवलोकने प्रथम-प्रकरणोक्तकारिकाणां उपनिषदन्तःपातित्वमुत नेति संशीतिः पाठकानामुदेत्येव । अतः अत्र निर्णयः कथं करणीय इति चेत्; इत्थम् - आथर्वणिका हि अध्येतारोऽत्र प्रमाणम् । यदि कारिकां विहायधीयतेऽद्याप्यौत्तराहाः इममंशं साक्षात्प्रष्टव्याः । तर्ह्येव प्रागुक्तनिर्णयो द्रढीभवति । दाक्षिणात्येषु अथर्वणशाखिनां वैरल्यादभावाद्वा न निर्णयो भविता । सायणभाष्यरीत्या तु श्रीविद्यारण्यमुनिरचितवार्तिकसारानुसारेण श्रुतिवाक्यमधीयत इति स्पष्टोक्त्या कारिकाणामपि श्रुतित्वम्[3] अप्रत्याख्येयम् ।

एवमङ्गीकारे संप्रदायविदो वदन्तीति आचार्योदाहरणं तथा गौडोक्तं कारिकाद्वयमपि उपनिषदित्येव निर्णयः । परं तु श्रतिवचनमेव साक्षादिति 'मृल्लोहविस्फुलिङ्गाद्यैः' इति कारिका न सुवचा तृतीयप्रकरणस्थितत्वात् ।

---

1. गौ.का 1-14
2. इदं सायणाचार्यैः तैत्तिरीयारण्यकभाष्य उदाहृतम् । परंतु वार्तिकसार अन्विष्यापि न लब्धम् ।
3. उपनिषत्वम्

प्रथमप्रकरणस्थकारिकास्तु साक्षादेव श्रुतिरिति वक्तुं न काचिदपि बाधा परमनिर्णयस्तु विद्वदधीन इति नात्राग्रहः ।

अथवा एवं रीत्या मध्वादिष्वाचार्येषु कारिकायां श्रुतित्वभ्रमजनने तच्छैली कारणम् । तदप्येष श्लोको भवतीति तैत्तिरीयवत्, अत्रैते श्लोका भवन्तीति एतदुपनिषद्वाक्यमध्येऽनुवृत्तत्वात् । तैतिरीयोपनिषदि श्लोकशब्दो मन्त्रवाची । एवं बृहदारण्यकेऽपि बहुत्र । तस्मादत्रापि तेषां श्रुतित्ववचनम् । अद्वैतिनां तु न भ्रमे कारणमस्ति । संप्रदायविद्वचनत्वेन गौडभाषितत्वेन च प्रागुदाहृतत्वात् । एवं कारिकारूपप्रथमप्रकरणमुपनिषद्वाक्यैः सह पठितत्वात्, आगमप्राधान्याच्च आगमप्रकरणमित्युक्तम् । वेदैकदेशघटितस्तोत्रेषु वेदपादस्तवेषु आम्नायस्तोत्रमिति व्यवहारवत्, अथवा श्रुत्यर्थप्रतिपादकपौराणवाक्येषु भागवतादिषु श्रुतिगीतेति-व्यवहारवत् "न जायते म्रियते वे"[1] ति गीताश्लोके ऋग्व्यवहारवत् औपचारिकोऽयं समुदाये कारिकाविशिष्टे आगमे तद्व्यपदेशः ।

कैश्चित्तु प्रकरणचतुष्टयमपि स्वतन्त्रोपनिषत्तया गणितमिति भट्टाचार्यै-र्दर्शितम् । तत्तु सर्वथा अप्रामाणिकम् । मध्वादिभिः एकं प्रकरणमेव श्रुतिरिति स्वीकृतम् । अवशिष्टं प्रकरणत्रयमधिकृत्य न किंचिदप्याहुस्ते, इत्यपि भट्टाचार्याः। परं तु एतैः समष्ट्या आगमशास्त्रमिति व्यवह्रियते । तदयमत्र निर्णयः - एतानि चत्वारि प्रकरणानि अन्योन्यं स्वतन्त्राणि, निबद्धानि त्वेकस्मिन्ग्रन्थे आगमशास्त्रनाम्नेति । एतद्विस्तरस्तद्ग्रन्थत एव द्रष्टव्यः । उत्तरत्र तदाशयः संक्षेपेण प्रदर्श्यते ।

भगवत्पादास्तु आगमप्रकरणानुरोधीन्येवावशिष्टानि प्रकरणानि त्रीणि व्याचक्रुः उत्तरोत्तरसंगतिप्रदर्शनेन । तदाक्षिप्य तु भट्टाचार्याः स्वतन्त्राण्येवेति स्वाशयं प्रकटीचक्रुः । तदिदमग्रे वक्ष्यामः ।

प्रथमप्रकरणे कारिकाणां प्राथम्यम्, उपनिषदामानन्तर्यं चेति भट्टाचार्याः, तद्यथा प्रथमप्रकरणोक्ताः कारिकाः न गद्यबन्धरूपाया माण्डूक्योपनिषदो व्याख्यानम् । मुख्यतया कारिकार्थमेवावलम्ब्य गद्यबन्धरूपा

---
1. भ.गी. 2-20

माण्डूक्योपनिषदुत्पन्ना, न पुनर्द्वितीयं ग्रन्थमाश्रित्य प्रथमः । ततश्च प्राक्कारिकाः, पश्चात्तु गद्यबन्धरूपा माण्डूक्योपनिषद्बभूव । तत्रैवं निर्णये कारणमेवमाहुः ।

यानि तानि माण्डूक्योपनिषदो द्वादशवाक्यानि तानि चतुर्धा विभज्यन्ते । एकैकस्य भागस्यान्ते च तेषाम् अत्रैते श्लोका भवन्तीति केऽपि श्लोकाः पठ्यन्ते । ईदृशाः श्लोकाः अन्यास्वप्युपनिषत्सूद्धृता अवगमयन्ति यदेते तत्तदर्थसमर्थनायोद्धृता इति । इदं च व्यक्तं यत् यस्मिन् उद्ध्रियते तत् तस्मात्पूर्वमिति । यथा शारीकभाष्ये उद्धृता आलम्बनपरीक्षा तस्मात्प्राचीनेति, प्रकृतेऽपि गद्यबन्धेषु धृताः कारिकास्तेभ्यः प्राचीना इति । उक्ताः कारिकाश्च नाम, माण्डूक्योपनिषदर्थाविष्करणपरा इत्याहुः । एवमेवेदं चेन्नूनं गद्यबन्धे यद्यद्दुरूहमपेक्षितं वा नितान्तं न तत् कथमप्युपेक्षेत कारिकासु । प्रत्युतातिस्फुटं विव्रियेत । न पुनरेतत्तासु तथाऽवेक्ष्यते । विमृशतश्चैवं प्रतिभासते, कारिका एव प्रथमं ततश्च ते गद्यबन्धा इति । यथेदं प्रतीयते प्रथमाः पञ्च कारिकाः, द्वितीयस्य, तृतीयस्य, चतुर्थस्य च गद्यबन्धस्य व्याख्यानभूताः । अत्र तृतीये चतुर्थे च गद्यबन्धे सप्ताङ्ग इति एकोनविंशतिमुखश्चेति पदद्वयं दुरूहं विवृतं च बहुभिर्बहुधा । कारिकासु तु नेषदपि तदुक्तिः । कोऽत्र हेतुः? अन्यच्च, तृतीये नवमे च गद्यबन्धे वैश्वानराब्द एक एव दृश्यते, न तु विश्वशब्दोऽपि । कारिकासु पुनः विश्व एव, न तु वैश्वानरः । किंनिमित्तकोऽयं भेदः?

व्याख्याकारो यथोपलब्धं शब्दं व्याचक्षीत । न पुनस्तं स्वैरं परावर्तयेत् । न च विश्ववैश्वानरशब्दौ पर्यायौ । दुर्विवरणमिदम् । छन्दोनुरोधात् तथेत्यश्रद्धेयम् । किंच सन्त्यत्र त्रयः शब्दाः गद्यबन्धेषु, जागरितस्थानः, स्वप्नस्थानः तथा सुषुप्तस्थान इति । सर्वथापि ते तिरोहिताः कारिकासु । कः पुनरस्य हेतुः? नेदमवज्ञातुमुचितम् । अत्र हि प्रतिपित्सितस्यार्थस्य प्रतिपत्तये एतास्तिस्रोऽवस्था अवश्यमधिगन्तव्याः । एवमुक्त्वा भट्टाचार्या इत्थमाशयमाविष्कुर्वन्ति - तत्त्वं तु इहेत्थं प्रतिभाति । पूर्वं किल कारिका एवाभूवन् । पश्चात्तु ताभ्यस्ताभ्य उपनिषद्भ्यो गद्यबन्धरूपेयं माण्डूक्योपनिषत् संकलितेति । एतस्मिंश्च संकलने तासां कारिकाणां क्वचित् किंचित् त्यक्तम् । क्वचित् किंचिदाहितं, क्वचिद्वा किंचित्संस्कृतं विवृतं वा, दुर्गमं वा कृतं किंचित्सुगमम् । प्रकृते तु कर्ता गद्यबन्धानां 'विश्व' शब्दं कथं

कथमपि वैश्वानरार्थं मेने, महीयस्त्वात् तस्य मन्त्रब्राह्मणयोः अन्यस्माद्वा हेतोः । किं कारणोऽयमन्योन्यं विसंवाद इति चिन्तयितुमर्हन्ति सन्तः । द्वावपि विश्ववैश्वानराविह गृहीतौ, कश्च तयोर्विशेषार्थ इति प्रदर्शितं विद्यारण्येन पञ्चदश्याम् । वेदान्तसारे च सदानन्देन, नृसिंहोत्तरतापिन्युपनिषदः कारिकासु च विश्वशब्दग्रहणम्, प्राचीनोपनिषत्सु वैश्वानरशब्दग्रहणम् । एतदुभयस्य ग्रहणं त्वत्र कियत्यापि मात्रया सुगमार्थकरणेन । एवं गद्यबन्धेषु जागरितस्वप्नसुषुप्तिरूपा अवस्थाश्छान्दोग्यतो वा बृहदारण्यकतो वा उभाभ्यामेव वा पश्चात्संकलिताः । तच्च, अन्तःप्रज्ञ इति, बहिष्प्रज्ञ इति, घनप्रज्ञ इति चैषां कारिकागतानां शब्दानां परिष्करणाय । इयमुपनिषदपि कारिकाभ्य उपनिषद्भ्यश्च काभ्यश्चित्संकलितेति, उभयपर्यालोचनया प्रकाशते । तथाहि, कारिकासु तावत् घनप्रज्ञ इति आनन्दभुगिति आनन्द इति च पठ्यते । गद्यबन्धस्त्वेषः "यत्र सुप्तो न कंचन....."[1] "सुषुप्तस्थान एकीभूतः प्रज्ञानघनः"[2], आनन्दमयः..."[3] "आनन्दभुक्चेतो-मुखः प्राज्ञस्तृतीयः पादः"[4] इति, अत्र द्वयोः कतरन्मूलं, कतरद्वा विवरणमिति दुरवगमम् । इह कारिकाया घनप्रज्ञ इति प्रज्ञानघन इतीषद्भिद्यमानमपि नार्थतस्तथा भिद्यते । अत एवेह प्रयुक्तम् 'एकीभूत' इति । एवं विश्वस्यात्वविवक्षायामिति कारिकायाम् "जाग्रत्स्थानो वैश्वानरोऽकार इति...."[5] इत्यत्र विश्व - अकारयोरभेदे दर्शितसामान्यधर्म आद्ये द्वयम्, अन्त्ये विकल्पो दर्शित इति अत एवेदं पश्चात्संकलितमिति प्रतिभासते । एवमियमेव गतिरनन्तरयोः कारिकयोः गद्यबन्धयोश्च ।

किं चैवं एकविंशीकारिकायां गद्यबन्धे च एकादशार्थभेदेऽपि शब्दभेदः, मानं मितिरिति, लयः अपीतिरिति च मूलव्याख्यानयोरीदृगभेदः कियान् संगच्छत इति । गद्यबन्धे चतुष्पात्त्वं स्पष्टमपि कारिकासु नातिस्पष्टम् । तथा दर्शितस्तुर्यात् विश्वतैजसप्राज्ञानां भेदः कारिकासु । गद्यबन्धे न पुनस्तत्र किंचिदपि संवदेत् इति संवादाभावः । कारिकायां यत्तुर्यमुक्तं तदेव वर्णितं गद्यबन्धे । प्राक् समासेन वर्णितं यत् तदेव पश्चाद्व्यासेन भाषितम् । गद्यबन्धे विवृतमात्मनश्चतुष्पात्त्वं न कारिकासु लेशतोऽपि तद्दृश्यते । एवं चतुर्विंशीकारिका च अष्टमगद्येन सह विचार्यते चेत्

1. मां. 5
2. Ibid
3. Ibid
4. Ibid
5. Ibid 9

कारिकैवेयं विवृता गद्यबन्धेन । न पुनर्गद्यबन्धे कारिकेति । अन्यच्च, 'प्रभवः सर्वभूतानाम्' इति कारिकायां प्रभव एव विवृतः । अप्ययस्तु मनागपि न स्पृष्टः । अतः कारिकाणां व्याख्यानग्रन्थत्वे नेदं कथमपि संभवेत् । एतदन्तानि कारणानि कारिकाणां प्राचीनत्वे उपनिषदः पश्चादुद्भवत्वे इतरोपनिषद्भ्यः संकलितत्वे कारिकाणां व्याख्यानग्रन्थत्वाभावे चेति भट्टाचार्याणामाशयः ।

अत्र आस्माकीनाशयः, आनन्दगिर्यादिटीकानुसारेण माण्डूक्योपनिषदो वस्तुतो ब्राह्मणवाक्यरूपायाः, कारिकाणां च मध्ये आद्याया व्याख्येयत्वमन्त्यानां व्याख्यानत्वं चाभ्युपगम्यायं भट्टाचार्यविमर्शः प्रवृत्तः । वस्तुतोऽध्यापकाध्येतृसंप्रदाये गद्यबन्धानामुपनिषत्त्वं संप्रतिपन्नमिति अवश्यमभ्युपेयम् । तत्र च औत्तराहाध्ययन-संप्रदाय एव प्रमाणमिति प्रागेवावेदितम् । सायणमाधवाचार्याद्यभ्युपगमरीत्या प्रसिद्ध्या वा नेतरोपनिषद्भ्यः संकलितत्वमुचितम् । इतरत्र नृसिंहतापिनीयादिषु एतद्वाक्यानां व्यामिश्रणेऽपि संकलितत्वानुमानायोगात्; तथात्वे वैपरीत्यापत्तेः । यथा ऋग्वेदस्थानामृचां बह्वीनां यजुषि चाथर्वणे व्यामिश्रणेऽपि तत्संकलितत्वस्य कैश्चिदपि वैदिकाचार्यैरनभ्युपगतत्वात् । भट्टाचार्यैरपि संमतिप्रदानानर्हत्वादत्र ।

भगवत्पादास्तु उपनिषदां श्लोकानां च प्रथमप्रकरणस्थानां व्याख्यानव्याख्येयभावं नाङ्गीचक्रुः । परंत्वादितः प्रकरणचतुष्टयमित्येवोचुः । यथा, "ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं वेदान्तार्थसारसंग्रहभूतमिदं प्रकरणचतुष्टयमोमित्येतदक्षरमित्यारभ्यत"[1] इति । वस्तुत एतदवलोकने प्रकरणचतुष्टयमपि कस्यचिदाचार्यस्य कृतिरित्यवगम्यते । तदपि वेदान्तानामर्थसार-संग्रहभूतमिति स्पष्टोक्तेः साक्षाद् वेदान्तत्वं प्रथमप्रकरणस्यापि दुर्वचम् । यथा "गीताशास्त्रं समस्तवेदार्थसारसंग्रहभूत"[2] मिति गीताभाष्यवचनम् । एवं भाष्यकारानुसारेण आगमत्वे दुर्भणेऽपि उपनिषदिति प्रसिद्ध्यनुसारेण सांप्रदायिकेन द्वादशवाक्यानां तद्रूपत्वं स्वीक्रियते चेत् न तन्निराकरणार्हं भवति । नैष्कर्म्यसिद्धिवचनानुसारेण मुख्यागमत्वं परित्यज्य आगमसंस्पर्शित्वमात्रेण प्रथमप्रकरणकारिकाणामौपचारिकागमत्वव्यवहरणं कथंचित् संगमनीयम् । तैत्तिरीयवत् द्वादशवाक्येषु ब्राह्मणवाक्यत्वम् । एते श्लोका इति कारिकासु

1. मां.भा. 2. गीताभाष्योपक्रमणिकायाम् ।

मन्त्रसच्छायासु मन्त्रवाचिश्लोकरूपत्वं कृतकं स्वीकर्तव्यम् । एवं सति ब्राह्मणवाक्यानां विस्तृतार्थत्वं मन्त्राणां च तदुक्तार्थसंक्षिप्तरूपत्वं श्रुत्यन्तरप्रथितमत्रापि निर्विशंकमङ्गीकर्तुं शक्यम् । आगमप्राधान्याच्च आगमत्वं भाष्यकारैः सति युक्तिप्रदर्शनेऽपि कारिकासु सूक्तम् । यथा बृहदारण्यके मधुकाण्डमागमप्रधानं तद्वत् ।

अन्योऽप्याशयोऽत्र सुवचः ।[1] न हि व्याख्यानं नाम पदच्छेदादिपञ्च-लक्षणमेव । किं तु आवश्यकप्रमेयमात्रतात्पर्यबोधनलक्षणमपि भवति, संक्षिप्तसूत्र-वृत्तिवत् काशिकादिवृत्तिरिव । अत एव कारिका वृत्तिरूपाऽपि भाष्यसापेक्षा । तद्वचने चाचार्याणां प्रवृत्तिरुपपद्यते । प्रकरणचतुष्टये प्रागेव भट्टाचार्याशयसंक्षेपः प्रदर्शितः । एकग्रन्थरूपत्वं, तत्र च चत्वारोंऽशा इति, उतान्योन्यं स्वतन्त्रा एव ते निबद्धाः । इत्येवं प्रश्नान् स्वयमुद्भाव्य आचार्यमतेनैक एव ग्रन्थ इति, अमुं पक्षमुद्धृत्य चिन्तयामासुरवतरणिकायाम् । तत्राचार्योक्तप्रकरणपौर्वापर्यसंबन्धवर्णनं प्रत्येकमनूद्य प्रतिक्षिपन्ति । आचार्यैः भाष्ये द्वितीयप्रकरणारम्भे "ज्ञाते द्वैतं न विद्यत"[2] इत्युक्तम् "एकमेवाद्वितीयम्"[3] इत्यादिश्रुतिभ्यः । आगममात्रं तत्, तत्र उपपत्त्यापि द्वैतस्य वैतथ्यं शक्यतेऽवधारयितुमिति द्वितीयप्रकरणमारभ्यते ।

अत्र भट्टाचार्याणामाक्षेपः - न पुनरेतदस्ति प्रथमं प्रकरणं सर्वथैव विना कृतमुपपत्त्येति । स्पष्टा सा कारिकासु । अयमेक आक्षेपः संगतिविषये । अस्य समाधानं प्रागेवोक्तं मया प्रथमप्रकरणमागमप्रधानमिति । अपरस्त्वाक्षेपः - ग्रन्थकृता पूर्वापरसंगतिं कण्ठतोऽनुक्त्वैव वैतथ्यारम्भ इति । अस्य समाधानं ब्रह्मसूत्रवत् सूत्रप्रायासु कारिकासु कण्ठतः संगत्यनुक्तिः । अपरश्च प्रतिक्षेपः, ओंकारनिर्णयस्य वैतथ्येन न काचन संगतिः प्रदर्शिता भाष्यकारेण इति । अस्य समाधानं तु, ओंकारनिर्णयो हि आत्मतत्त्वप्रतिपत्त्युपायभूत इति श्रुत्यन्तरसिद्ध एवायं विषयः । यथा रज्वादिकल्पितसर्पादिविकल्पस्यारोपितत्वेन रज्वादिर्यथा परमार्थस्तथा प्राणाद्यात्मविकल्पविषयीभूतः सर्वोऽपि वाक्प्रपञ्च ओंकार एव । सोऽप्यात्मस्वरूपमेव, तद्वाचकत्वात् । एवं च अभिधानव्यतिरेकेण अभिधेयो

1. कारिकाणां व्याख्यानरूपत्वपक्षेऽपि
2. गौ.का. 1-18
3. छां 6-2-1

नास्तीतिवत् ओंकारव्यतिरेकेण यः कोऽपि शब्दो नास्तीत्युक्त्या मिथ्यात्वं वैतथ्यरूपं ओंकारनिर्णयफलीभूतं आगममात्रेण निर्णीतं पूर्वम् । नोपपत्तिप्राधान्येन । तद्वत्कारिकायामपि "ज्ञाते द्वैतं न विद्यते"[1] इति । तदाकांक्षितोपपत्तिवर्णनाय वैतथ्यप्रकरणस्य प्रवृत्तत्वात् भाष्यकारैर्दर्शितत्वाच्च संगतिरुक्तैव । वैतथ्यस्याल्पकमपि आगमे प्रपञ्चोपमशब्देन तथा द्वैतस्योपशम इति शब्देन चोक्तमेव । न पुनरुपलभ्यत इत्युक्तिरपि तेषामसमीचीना । वैतथ्यप्रकरणस्य स्वातन्त्र्ये न कापि हानिः, नासंबद्धतापत्तिः, न किंचिदसामञ्जस्य-मित्यादिवचनमेषां न युक्तम् । स्वातन्त्र्ये हि द्वैतस्य वैतथ्यं यत् साध्यते तन्निष्फलं भवेत् ।

अस्मत्पक्षे तु तदप्यात्मप्रतिपत्तये स्वाकांक्षितद्वैतवैतथ्यसाधने महदुपकरोति । एवं वैतथ्याद्वैतप्रकरणयोः संगतिरपि दर्शिता भाष्यकारैः "अद्वैतं किमागममात्रेण प्रतिपत्तव्यमाहोस्वित्तर्केणापि इत्यत आह - शक्यते तर्केणापि ज्ञातुम् । तत्कथमित्यद्वैतप्रकरणमारभ्यत"[2] इति । अत्र दृष्टान्तदार्ष्टान्तिकभाव-संगतिर्दर्शिता । यथा "ओंकारनिर्णये उक्तः प्रपंचोपशमः शिवोऽद्वैत आत्मेति प्रतिज्ञामात्रेण...... । द्वैताभावस्तु वैतथ्यप्रकरणेन स्वप्नमायागन्धर्वनगरादिदृष्टान्तैः दृश्यत्वाद्यन्तवत्वादिहेतुभिस्तर्केण च प्रतिपादित"[3] इत्ययमंशो दृष्टान्तः । अनेन द्वैताभावोपलक्षितस्यात्मनः प्रतिपत्तिः प्रयोजनं तृतीये । द्वैतस्य मिथ्यात्वमात्रं तु तत्र द्वितीये साध्यत इति तज्ज्ञानं पृथक् प्रयोजनमिति प्रयोजनभेदे वक्तुं शक्ये यद्भट्टाचार्यैरुक्तं द्वितीयतृतीययोः प्रकरणयोरभिन्नं प्रयोजनमिति वक्तव्यम् । उभयत्र हि तर्केणाद्वैतस्य प्रतिपत्तिस्तेनोच्यत इति; तथा अस्य प्रकरणस्य पूर्वेणैव प्रयोजने सिद्धे नैष्फल्यमिति । तथा अतो नूतनं प्रयोजनं वक्तव्यमिति, तन्निपुणं परीक्षमाणेनापि दुरधिगममिति च, तदिदमसमीचीनमिव प्रतिभाति । अन्यथा एतत्प्रकरणाभावे द्वैतमिथ्यात्वमात्रं सिद्ध्येत्, न तु कल्पनावधिभूतनित्यात्मतत्त्वम्। तदपि केवलप्रतिज्ञामात्रेणाङ्गीकर्तव्यं स्यात् ।

भट्टाचार्यैस्तु 'अतोऽस्येदं प्रयोजनं वक्तव्यम् । आदावजातिकीर्तनेन स्थापनेन च, एतत्तदुत्तमं सत्यमिति वेदान्तविचारणया जीवब्रह्माभेददर्शनम्

1. गौ.का. 1-18 2. गौ.का.भा. 3-1 3. Ibid 3-1

अस्पर्शयोगाख्यसमाधिप्रदर्शनं च सत्यावगमार्थमिति, अतोऽद्वैतप्रकरणमिदम्, अद्वैतवेदान्ते कश्चित् स्वतन्त्र एव ग्रन्थ इति युक्तम्' इत्युक्तम्। अलातशान्तिप्रकरणे भाष्यकृदुक्तसंगतिः ओंकारनिर्णयद्वारेण आगमतः प्रतिज्ञास्याद्वैते शास्त्रयुक्तिभ्यां साक्षान्निर्धारितस्य 'एतदुत्तमं सत्यम्' इत्युपसंहारः कृतः। ''तस्यैतस्यागमार्थस्याद्वैतदर्शनस्य प्रतिपक्षभूताः द्वैतिनो वैनाशिकाश्च; तेषां चान्योन्यविरोधात् रागद्वेषादिक्लेशास्पदं दर्शनमिति मिथ्यादर्शनं सूचितम्। क्लेशानास्पदत्वात् सम्यग्दर्शनमित्यद्वैतदर्शनं स्तूयते। तदिह विस्तरेण अन्योन्यविरुद्धतया असम्यग्दर्शनत्वं प्रदर्श्य तत्प्रतिषेधेनाद्वैतदर्शनसिद्धिरुपसंहर्तव्याऽवीतन्यायेनेत्यलातशान्तिरारभ्यत''[1] इति।

अत्र भट्टाचार्याणामाक्षेपः - इह वादीति पदं द्विःप्रयुक्तम्। तेन च द्वैतिन उद्दिष्टा इत्याहुः। अत्र तेषां मिथो विवादस्योक्तावपि न कश्चित्तद्विस्तरो दर्शितः। वैनाशिकानां तु उद्देशोऽपि नास्ति। अथ वैनाशिकपदेनाविशेषात् बौद्धा एवाभिप्रेताः, न खलु तेषां द्वैतिभिरन्योन्यं निरोधस्तत्र दृश्यते। आगमशास्त्रकारेण पुनः कण्ठतस्तन्मतमेवानुमोदितमस्मिन्प्रकरणे। यथा प्रदर्शितमनेन वृत्तिकारेण तत्र तत्र। एवं च सति कथं नु खलु कश्चिद्भाष्यकारमनुरुन्धानो जानीयात्। अस्मात् प्रकरणात् 'वैनाशिकानां दर्शनं मिथ्यादर्शनम्, अद्वैतदर्शनं तु सम्यग्दर्शन'मिति। इत्थमनेनालातशान्तिप्रकरणेन पूर्वस्य पूर्वेषां वा प्रकरणानां कश्चन विशेषसंबन्धो दुरवगम एवेति ग्रन्थादौ संस्कृते नमस्कारादिमंगलाचरणं सुप्रसिद्धम्। अत्र च प्रारम्भ एव तद्दृश्यते। तथा अन्ते च मंगलाचरणं दृश्यते। अतोऽपि चतुर्थं प्रकरणं स्वतन्त्रग्रन्थ इति गम्यते। तथा पूर्वप्रकरणस्थकारिकासु 'अजातिवाद' इति; तथा पूर्वोक्तकारिका एव असकृत् पठिताः। द्वितीयतृतीययोः केचिद्विषयाश्चिन्तिततरा अपि अलातशान्तौ पुनश्चिन्त्यन्त इति अनेन संपर्के समर्थितेऽपि प्रयोजनाभावः। अतोऽपि स्वतन्त्रग्रन्थः संपूर्णश्चायमिति। तथा चैतन्मते एतानि चत्वारि प्रकरणान्यन्योन्यं स्वतन्त्राणि। निबद्धानि त्वेकस्मिन् ग्रन्थे आगमशास्त्रनाम्ना। अथापि तैः प्रसिद्धिमनुरुन्धानैः प्रकरणचतुष्टयमेकग्रन्थतयैव पूर्वैरिव विवरीतुं प्रयतितम्।

1. गौ.का.भा. 4-1

भट्टाचार्यमते आगमशास्त्रस्य असाकल्यम् । तत्र हि अवतरणिकायाम् अपेक्षितकारिकाभ्रंशादिकं कारणं समर्पयन्ति । तत्र तत्रापेक्षितकारिकाभ्रशंवत् चतुर्थप्रकरण इवात्र प्रथमे मंगलाचरणाभावः । पञ्चमषष्ठकारिकयोः संबन्धस्य दुर्वचत्वम् । ऊनविंशकारिकाया गद्योपयोगिकिंचित्कारिकावैकल्यम् । कारिकासु च पाठक्रमवैपरीत्यम्[1], सक्रमाः व्युत्क्रमेण पठिता इति[2] क्वचिदन्वयानुपपत्तिरित्यादि ।[3]

भट्टाचार्यदर्शितागमशास्त्रीयपाठभेदाः यथा-

द्वौ तु	x	द्वे तु[4]
संवृतत्वेन	x	संवृतत्वं न[5]
विप्रतिपद्यते	x	ऽपिप्रतिपद्यते[6]
व्यवस्थितान्	x	ऽव्यवस्थितान्[7]
नात्मभावेन	x	नान्यभावेन[8]
खं यथा	x	स यथा[9]
यद्य	x	यद् इहास्ति[10]

'यदि' शब्दो द्वितीयपादे ।

ऽनादेः	x	ऽनादिः[11]
ह्यादिः	x	जातिः[12]
संसारं न प्रपद्यते	x	संसारो नोपलभ्यते ।[13]
सद्भावेन	x	स्वभावेन[14]

इत्यादिपाठभेदाः तदीयग्रन्थे आङ्ग्लवृत्तौ च दर्शितास्तत्रैव द्रष्टव्याः ।

1. गौ.का 2-23 इत्यत्र
2. गौ.का 4-38, 39, 40, 41 एतत्स्थाने 4-40, 38, 41, 32 पठिताः
3. 4-77 कारिकायां
4. गौ.का 1-11
5. Ibid 2-4
6. Ibid 2-7
7. Ibid 2-11
8. Ibid 2-34
9. Ibid 3-11
10. Ibid 4-12
11. Ibid 4-23
12. Ibid
13. Ibid 4-56
14. Ibid 4-57

गौडपादीय ग्रन्थस्य विविधनाम सत्वेऽपि आगमशास्त्रमिति सांप्रदायिकं नाम गृह्यते । अत्र प्रमाणम् - शंकरभगवतः कृतौ आगमशास्त्रविवरणे "प्रथमं आगमप्रकरणम्"[1] इति, "आगमशास्त्रभाष्ये वैतथ्याख्यं द्वितीयं प्रकरणम्"[2] इत्येवं परिसमाप्तिग्रन्थः । आगमशास्त्रमिति नामकरणे निमित्तम् - आगममूलकत्वात् इदमागमशास्त्रमिति कथ्यते । यथा माण्डूक्योपनिषदागमस्य तदुक्तार्थतत्त्व-प्रतिपादनौपयिकत्वात् । तथाहि "अभावश्च रथादीनां श्रूयते न्यायपूर्वकम्"[3] इति।

तथा श्रुतिश्च - "न तत्र रथा न रथयोगा भवन्ति"[4] इति ।

कल्पयत्यात्मनात्मानमात्मा देवः स्वमायया ।
स एव बुध्यते भेदानिति वेदान्तनिश्चयः ॥[5]

स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा ।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥[6]

वीतरागभयक्रोधैर्मुनिभिर्वेदपारगैः ।
निर्विकल्पो ह्ययं दृष्टः प्रपंचोपशमोऽद्वयः ॥[7]

रसादयो हि ये कोशा व्याख्यातास्तैत्तिरीयके ।
तेषामात्मा परो जीवः स्वं यथा संप्रकाशितः ॥[8]

द्वयोर्द्वयोर्मधुज्ञाने परं ब्रह्म प्रकाशितम् ।
पृथिव्यामुदरे चैव यथाकाशः प्रकाशितः ॥[9]

मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा ।[10]
नेह नानेति चाम्नानात् इन्द्रो मायाभिरित्यपि ॥

अजायमानो बहुधा मायया जायते तु सः ॥[11]
संभूतेरपवादाच्च संभवः प्रतिषिध्यते ।[12]

स एष नेति नेतीति व्याख्यातं निन्हुते यतः ॥[13]

1. गौ.का. भाष्यान्ते 1-29
2. गौ. का 2-38
3. Ibid 2-3
4. बृ. 4-3-10
5. गौ.का. 2-12
6. Ibid 2-31
7. Ibid 2-35
8. Ibid 3-11
9. Ibid 3-12
10. Ibid 3-15
11. Ibid 3-24
12. Ibid 3-25
13. Ibid 3-26

इत्येवमादिकारिका एव वेदान्तमूलकत्वमवगमयन्ति । आगमश्च वेदः, तन्मूलकत्वादागमशास्त्रमिति अस्माकमाशयः ।

भट्टाचार्यास्तु आहुः

आगम आम्नाय इत्यनर्थान्तरम् । आम्नायश्च ईदृशेषु स्थानेषु संप्रदायः । 'अथाम्नायः संप्रदायः' इत्यमरः । "वेदः श्रुतिस्तथाम्नायः स्वाध्यायश्छन्द आगमः" इति चाभिधानरत्नमाला । संप्रदायश्च गुरुपरंपरा; तदधिगतोपदशो वा । ततश्च ईदृशादागमात् अधिगतं शास्त्रमागमशास्त्रम् । एवमर्थतोऽपि तथेति स्पष्टम् । किं च स्मृतशब्दप्रयोगोऽपि तन्मतपरिपोषकः दशकृत्वः प्रयुक्तः शास्त्रेऽस्मिन् इति ।

आचार्योक्तसंप्रदायविद्वचनानि यथा "सतामिति विनिश्चयः"[1] "आहुर्मनीषिणः",[2] "दृष्टं वेदान्तेषु विचक्षणैः",[3] "इति तत्त्वविदो विदुः",[4] "निर्विकल्पो ह्ययं दृष्टः",[5] इत्यादीनि द्रष्टव्यानि ।

गौडपादेभ्योऽपि प्राग्विद्यमानमतभेदाः

अन्ये[6] अपरे,[7] आश्रमविदः,[8] प्राणविदः,[9] प्राण इति[10] भूतानीति भूतविदः[11] गुणा इति गुणविदः[12] तत्त्वानीति तत्त्वविदः[13] पादा इति पादविदः,[14] इति मतभेदाः । इदं तु छान्दोग्यादिसिद्धं चतुष्पादादिरूपं ब्रह्मेति मतम् । विश्वतैजसादिपादवद्ब्रह्मेति मतं श्रौतमानन्दगिर्युक्तं वा । विषया इति विषयविदः, शब्दादिभोग्या एव तत्त्वमिति वात्स्यायनप्रभृतिमतम् । आदिपदेन लोकायतिकानां, केषांचन बौद्धानां ब्राह्मणिकानां तान्त्रिकाणां च मतमिति भट्टाचार्याः । शब्दादयो विषया भूयो भूयो भुज्यमानास्तत्त्वमिति वात्स्यायनप्रभृतीनां मतमित्यत्र प्रभृतिशब्देन पूर्वोक्तं गृहीतं भट्टाचार्यैः ।

---

1. गौ. का. 1-6
2. Ibid 2-5
3. Ibid 2-31
4. Ibid 2-34
5. Ibid 2-35
6. Ibid 1-7
7. Ibid 2-26
8. Ibid 2-27
9. Ibid 2-20
10. Ibid हिरण्यगर्भतटस्थेश्वरवादिमतम् ।
11. Ibid पृथिव्यादिभूतचतुष्टयवादिलोकायतिकानां मतम् ।
12. Ibid सत्वरजस्तमोगुणा इति सांख्यमतम्।
13. Ibid 2-20 आत्मा विद्या शिवश्चेति तत्त्वत्रयवादिशैवमतम् ।
14. Ibid 2-21

लोका इति लोकविदः भूरादिलोकवादिनः पौराणिकाः, देवा इति देवविदः देवताकाण्डानुसारिमतम्, अग्नीन्द्रादयो देवास्तत्तत्फलदातारः, नेश्वर इति देवताकाण्डीयाः वेदा इति वेददः। यज्ञा इति याज्ञिकाः बोधायनप्रभृतयः। भोक्तेति भोक्तृविदः सांख्याः। भोक्ता च प्रभुरेव चेति गीतया तद्विद इति भट्टाचार्याः। भोज्यमिति भोज्यविदः सूपकाराः, "अन्नं ब्रह्मे"[1] ति श्रुतेः। सूक्ष्मा इति सूक्ष्मविदः, आत्मा अणुपरिमाण इति वदन्तो निम्बार्कमध्वरामानुजवल्लभवत् आत्माणुत्ववादिनः, "एषोऽणुरात्मा"[2] इति "सूक्ष्माच्च तत्सूक्ष्मतरं विभाति"[3] इति श्रुतेः। स्थूला इति स्थूलविदो देहात्मवादिनः। मूर्त इति मूर्तविदः शैवा वैष्णवा वा। मूर्तस्त्रिशूलधारी महेश्वरः, चक्रादिधारी वा परमार्थो भवतीत्यागमिकाः। "द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च"[4] इति श्रुतेरपि तत्तद्विदोऽत्र ग्राह्याः। अमूर्तः सर्वशून्य इति शून्यवादिनः। काल इति कालविदो जौतिषिकाः। दिश इति दिग्विदः। वादा इति वादविदः[5] नैयायिकोक्तवादोऽप्यत्र गृहीतः। भुवनानीति भुवनकोशविदः, चतुर्दशभुवनानि वस्तूनि इति। मन इति, बुद्धिरिति, चित्तमित्येते त्रयोऽपि विज्ञानवादिनो बौद्धाः। बुद्धिशब्देन विज्ञानं लक्षितम्। 'चित्तं मनोऽथ विज्ञानमेकार्थ'मिति वसुबन्धुः। धर्माधर्माविति मीमांसकाः। पञ्चविंशकः, षड्विंशकः, एकत्रिंशक इति क्रमेण सांख्यपातञ्जलपाशुपताः। अनन्त इति चापरे, वस्तूनामियत्ता नास्तीति मन्यमानाः। लोका इति लोकविदो लौकिकाः। आश्रमा इत्याश्रमविदो दक्षप्रभृतयो धर्मशास्त्रकाराः। स्त्रीपुंनपुसकमिति लैङ्गाः वैयाकरणाः। परापरमिति परापरब्रह्मविदः। सृष्टिः स्थितिः लय इति तद्विदः पौराणिकाः। इहेत्थं प्रत्यगात्मनि सर्वदा सर्वं कल्पनाजातं तत्तदाचार्योपदेशेन तत्र तत्र भावेऽभिनिवेशकर्तृभिः स्वस्वप्रीत्यास्पदत्वेन परिकल्प्यत इति विशंश्लोकादारभ्य ऊनत्रिंशश्लोकपर्यन्तं दर्शिता मतभेदाः दिङ्मात्रेणोदाहृताः। एवं भूतभविष्यद्वर्तमानलोकैः एक एवात्माऽनेकधा परिकल्प्यत इति "यं भावं दर्शयेद्यस्य"[6] इति कारिकया स्फुटितमिदम्।

---

1. तै.उ. 3-2
2. मुं 3-1-9
3. Ibid 3-1-7
4. बृ. 2-3-1
5. धातुवाद-मन्त्रवादादिवादिनः।
6. गौ. का. 2-29

गौडपादीयप्रकरणसारः

यथा भगवत्पादाः प्रकरणचतुष्टये विषयविभागमेवं प्रदर्शयन्ति - "ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानम्" इति प्रतीकमादाय "वेदान्तार्थसार-सङ्ग्रहभूतमिदं प्रकरणचतुष्टयमोमित्येतदक्षरमित्याद्यारभ्यत"[1] इत्यवतार्य विषयविभागमाहुः । "तत्र तावदोंकारनिर्णयाय प्रथमं प्रकरणमागमप्रधानम् आत्मतत्त्वप्रतिपत्त्युपायभूतम् । यस्य द्वैतप्रपञ्चस्योपशमेऽद्वैतप्रतिपत्ती रज्वामिव सर्पादिविकल्पोपशमे रज्जुतत्त्वप्रतिपत्तिः, तस्य द्वैतस्य हेतुतो वैतथ्यप्रतिपादनाय द्वितीयं प्रकरणम् । तथा अद्वैतस्यापि वैतथ्यप्रसंगप्राप्तौ युक्तितस्तथात्वप्रदर्शनाय तृतीयं प्रकरणम् । अद्वैतस्य तथात्वप्रतिपक्षभूतानि यानि वादान्तराण्यवैदिकानि तेषामन्योन्यविरोधित्वात् अतथात्वेन तदुपपत्तिभिरेव निराकरणाय चतुर्थं प्रकरण"[2] मिति ।

आगमप्रकरणसारः

ओंकारनिर्णय आत्मप्रतिपत्त्युपाय इति । तथाहि सर्पादिविकल्पस्य रज्वादिरिव प्राणादिविकल्पस्य विश्वादिविकल्पस्य च अज्ञातात्माद्वयः परमार्थः सन्नास्पदी भवति । एवं सर्वोऽपि वाक्प्रपञ्चः प्राणादिविकल्पविषय ओंकार एव । स चात्मस्वरूपमेव । तदभिधायकत्वात् । ओंकार विकारशब्दाभिधेयश्च प्राणादिरात्मविकल्पोऽभिधानव्यतिरेकेण नास्ति विचारे । 'वाचारम्भणं विकारो नामधेय'मिति विकारमात्रस्य मिथ्यात्वेन प्रतिपादनात् । नात्र ओंकारस्य शब्दस्याभिधेयेनात्मैक्यं मुख्यम् । चिज्जडयोस्तदसंभवात् । किं तु यद्रजतं सा शुक्तिरितिवत् बाधायां सामानाधिकरण्यस्य वस्तुतो विवक्षितत्वेन तदिदमारोपितमेव तत्त्वप्रतिपत्तिसाधनप्रविलापनसौकर्याय । अभिधेयभूतं भूतादिकालातीतमव्याकृतादि च सर्वं जगदोंकार एव । अर्थस्याभिधानाव्यतिरेकात् । पुनरभिधेयप्राधान्येन तस्यैव निर्देशः कृतः "सर्वं ह्येतद्ब्रह्म"[3] इति । ओंकारमात्रमिति यदुक्तं तदेतद्ब्रह्म । तदपि साक्षादपरोक्षम् । यतः "अयमात्मा ब्रह्म"[4] नापरः । एवमभिधानाभिधेययोरेकत्वप्रतिपत्तिप्रयोजनं तयोरेकेनैव यत्नेन युगपत्प्रविलापन-पूर्वकं तद्विलक्षणब्रह्मप्रतिपत्तिर्यथा स्यादिति । सोऽयमोंकाराभिधेय आत्माऽपि

1. मां.भा. 1 2. Ibid 3. मां. 2 4. Ibid

चतुष्पात्वेन परिकल्पितः। सोऽपि परापरत्वेन व्यवस्थितः, तुरीयः प्रत्यगात्मा परः, अपरस्तु विश्वतैजसप्राज्ञरूपः। तत्र पादत्रयात्मा उपायभूतः उपेयभूतस्तुरीयः पादः। पद्यतेऽनेनेति करणसाधनः पादः, विश्वादित्रयान्वयी, पूर्वपूर्वप्रविलापनेन तुरीयप्रतिपत्तिकारणत्वात् पद्यते गम्यत इति व्युत्पत्त्या उपेयस्तुरीयः। वस्तुतः पादरहितेऽपि कार्षापणे चतुष्पात्वव्यवहारवत् प्रत्यगात्मन्यपि तथा व्यवहारः काल्पनिकः निष्कलत्वश्रुतेः।

तत्र प्रथमः पादो विश्व इति वैश्वानर इति च कथ्यते। यदा अयमात्मा जागरितदशायां बाह्यान्तरेन्द्रियमुखेन पञ्चप्राणादिसहायः स्वात्मव्यतिरिक्तविषये बाह्यप्रपञ्च एव अविद्याकृतप्रज्ञावान् शब्दस्पर्शादिविषयान् स्थूलान् यथायथं भुङ्क्ते, सः प्रथमः पादो वैश्वानरः। विश्वत्वान्नरत्वात्, कर्मानुसारेण विश्वेषां नराणां सुखदुःखादिप्रापकत्वात् सर्वात्मकत्वाच्च सर्वपिण्डात्मा विराड् वैश्वानरोऽप्ययमेव। व्यष्टिजीवस्य जागरितावस्थापन्नस्य समष्टिविराड्वैश्वानरानन्यत्वात् जाग्रज्जीवोऽपि वैश्वानर इत्युच्यते। तदपि व्यष्टिसमष्टिजीवयोरैक्यानुसन्धानेन युगपदेव प्रविलापनसौलभ्यायेति मन्तव्यम्। एतत्पूर्वकत्वात् उत्तरपादाधिगमस्यायं प्रथम इति कल्पितः।

एवं स्वप्नावस्थापन्नो जागरितदशानुभूतस्थलविषयानुभवजन्यवासनावासितमनःप्रधानः सन् स्थूलविषयाभावेऽपि वासनात्मकतया केवलप्रकाशरूपान्तःकरणवृत्तिज्ञानेनान्तरप्रज्ञारूपेण स्वप्नगजतुरगादिकं साक्षिरूपेणानुभवन् यः पश्यति सः तैजसः। अत एव वासनामात्रा प्रज्ञा भोज्येति स्थूलरहितत्वात् प्रविविक्तभुगित्युच्यते द्वितीयः पादः। अयं हिरण्यगर्भ इत्यप्युच्यते समष्टिबुद्धिरूपोपाधिमत्वात्। व्यष्टिरूपोऽपि स्वप्नदर्शी जीवः तदनन्यत्वात् समष्टिजीवो हिरण्यगर्भोऽभिमतो भाष्यकाराणाम्। अत्र च भाष्यम् ''विराजैकत्वमुपलक्षणार्थं हिरण्यगर्भाव्याकृतात्मनोः''[1] इति। मन्त्रे हिरण्यगर्भ इत्यनुक्तमपि ग्राह्यम्। एतदैक्यप्रतिपादनं च, एकप्रयत्नेन युगपत्तयोरुत्तरत्र प्रविलापनार्थम्।

1. मां.भा. 3

यत्र न कस्यापि कामस्य कामना कस्यचिदपि वा स्वप्नस्य भानं भवति तत् सुषुप्तम् । तत्र आत्माऽव्याकृतोपाधिः स्वप्नजागरितमनोवृत्तीनां सप्रपञ्चानां विलयात् एकीभूत इव सामान्यचैतन्यरूपः सन् प्रज्ञानघन आनन्दमयः स्वरूपानन्दभुक् प्रज्ञप्तिमात्रेण स्थितः सन् प्राज्ञ इत्युच्यते । सुषुप्ताव्याकृतयो-र्निर्विशेषत्वात् प्राज्ञः सर्वेश्वरः सर्वज्ञोऽन्तर्यामी सर्वजगदुदयप्रलयहेतुः । अत्रापि तदैक्यप्रतिपत्तिप्रयोजनं युगपत् प्रविलापनकरणं पूर्ववत् ।

एवं पादत्रयेणात्मना आत्माऽप्येक एव दर्शितः, सोऽहमिति स्मृत्या प्रतिसन्धानाच्च स्थानत्रयव्यतिरिक्त एकः तदसंगित्वाच्छुद्धोऽसंग इति विज्ञेयम् । सोऽयं जागरितदशायामेव विश्वादिरूपोऽनुभूयते । तथाहि, दक्षिणाक्षिणि प्राधान्येन द्रष्टा स्थूलभुग्विश्वः । श्रोत्रेन्द्रियादिजन्यबुद्धिवृत्त्यभिव्यक्तचिद्रूपदीप्तिमान् आत्मा विश्वः । एवं सर्वेषु करणेषु निमीलितेषु निमीलिताक्षः सन् स्वप्न इव दृष्टमनुभूतं वा स्मरति यदा तदा वासनात्मा विद्यमानमेव पश्यतीति तैजसोऽयमेव भवति । एवं स्मरणाख्यव्यापारोपरमे च सर्वथा मनःस्पन्दाभावे तूष्णींभावदशायां सुषुप्त इव हृदयेऽविशेषेण प्राणात्मनावस्थित इति त्रिधाऽपि जागरित एव देहेऽनुभूयते । एवं सौषुप्तावस्थायामव्याकृतोपाधिरन्तर्यामी य उक्तः स एव सर्वभावानां प्रभवस्थानम् । स एव रविकिरणानिवावस्थितान् जीवान् विविधात्माभासान् जनयति । सोऽयं बीजात्मा प्राण इति कथ्यमानो जगत्कारणं भवति । ईश्वरसृष्टिविषये विभूतिरिति स्वप्नमायासरूपेति इच्छामात्रमिति भोगार्थं क्रीडार्थमिति च विमतेषु सत्स्वपि आप्तकामस्य निःस्पृहत्वात् देवस्यैव स्वभावो माया सृष्टिरित्येव सिद्धान्तः ।

अत्र प्रागुक्तविश्वदीनामात्मनां स्थानत्रयातीत आत्मा तुरीयः प्रपञ्चोपशमः शान्तः शिवोऽद्वैतश्चतुर्थः पादः । तत्र द्वैताग्रहणरूपबीजनिद्रयान्यथाग्रहण-रूपस्वप्नदोषेण च विश्वतैजसौ बद्धौ । प्राज्ञस्तु केवलबीजनिद्रायुतः । तुरीयस्तु उभयदोषविरहितः सकलप्रपञ्चसंबन्धविकलः केवलोऽद्वैतो भवति । स एव मुख्य उपेय आत्मा । तस्य प्रतिपत्तये मन्दमध्यमानामकारोकारमकाररूपमात्रोपासनानि प्रणवसंबन्धीनि विहितानि न तात्पर्येण । अकारोकारमकारान् क्रमेण विश्वतैजसप्राज्ञरूपेण निध्यायन् ओंकारं पादशो विद्यात् । अनन्तरं न किंचिदपि

चिन्तयेत्। ओंकारो हि परं ब्रह्म। तन्निष्ठस्य न भयं क्वचिदपि विद्यते। प्रणवमेव सर्वहृदयस्थमीश्वरं विद्यात्। एवं विजानन् न शोचति स एव मुनिर्नेतरः। अतोऽवश्यं प्रणवोपासनं मन्दमध्यमैरनुष्ठेयम् इति।

वैतथ्यप्रकरणसार :

आगमानुसारेणोक्तद्वैतमिथ्यात्वं वैतथ्यापरपर्यायमुपपत्त्याऽपि साधयितुं द्वितीयप्रकरणस्यास्यारम्भः। द्वैते च जाग्रद्दृश्यानां मिथ्यात्वसाधनाय स्वप्नदृष्टान्तं दर्शयन् दृष्टान्ते साध्यप्रसिद्धये[1] युक्त्या श्रुत्या च तदनुमोदिन्या स्वप्नदृश्यानां मिथ्यात्वं प्रथमं दर्शयत्याचार्यः। तद्यथा ''प्रमाणकुशला एवमाहुः, स्वप्नदृश्याः पर्वतहस्त्यादयो भावाः बाह्याध्यात्मिकाः सर्वे यथा देहान्तःसंकुचितदेशे समुलभ्यमानत्वात्, क्षणमात्रेण दृश्यमानत्वात् तदुचितविस्तृतदेशकालादिशून्यत्वाच्च मिथ्याभूताः, तथैव जागरितभावा अपि सर्वे मिथ्याभूता एव, दृश्यत्वात्। यद्यपि स्वप्नपदार्थानां देहान्तरवस्थानं संवृतत्वं चेति जाग्रद्दृश्यवैलक्षण्यमस्ति, तथापि दृश्यत्वाविशेषान्मिथ्यात्वम्। स्वप्नदृश्यानां 'न तत्र रथा न रथयोगा भवन्ति'[2] इत्युक्तन्यायावगतमिथ्यात्वानुवादिन्या श्रुत्याऽपि वैतथ्यं निश्चितम्। ब्रह्मविदश्चैवं संप्रतिपत्तिः। तथा च स्वप्नदृश्यवत् जाग्रद्दृश्यानां मिथ्यात्वम्। अन्ये पुनः स्वप्न जागरितयोरेकत्वमाहुः, ग्राह्यग्राहकत्वरूपहेतुना समत्वेन। आद्यन्तयोरभावादपि हेतोः मध्यकालेऽपि मृगतृष्णिकोदकादिवत् जाग्रद्भावा असन्तः इति निश्चयः। उत्पत्तेः प्रागूर्ध्वं चाविद्यमानत्वमानुभाविकं, सत्यत्वेन तेषां भानं तु प्रतिभामात्रम्[3]। किं च यथा स्वप्ने पानभोजनवहनादयो व्यवहाराः प्रबोधे निष्फला भवन्ति तथैव जागरिते कृतास्तेऽपि स्वप्ने प्राप्ते विप्रतिपद्यन्त एव। अत्र चायमनुभवः जागरिते भुक्त्वा पीत्वा च तृप्तो निवर्तितपिपासोऽपि सुप्तमात्र एव क्षुत्पिपासार्थमहोरात्रोषितमभुक्तमात्मानं पश्यति''[4] इति। अतो निष्प्रयोजनवत्वात् स्वप्नवदाद्यन्तवत्त्वाच्च ते मिथ्यैव।

अपि च स्वाप्निकाः पदार्थाः नापूर्वाः। अपूर्वत्वं हि स्थानिधर्मः। अन्तश्चेतसा कल्पितं मनोरथकल्पितमिवासत् चक्षुरादिना बहिर्गृहीतं सदिति

---

1. साध्यवैकल्यपरिहारायेत्यर्थः।
2. बृ. 4-3-10
3. अविद्यामात्रम्।
4. द्र.गौ.का.भा. 2-7

सदसद्विभागः स्वप्न इन जागरितेऽपि समान इति तद्वचेतःकल्पितत्वात् इमेऽपि भावाः मिथ्येति युक्त्यन्तरम् । एवमुभयस्थानकल्पितभावानां कल्पकस्त्वात्मैव । स एव स्वीयमायया आत्मानं भेदाकारं रज्वादौ सर्पादिकमिव कल्पयति । तत्रापि न केवल आत्मनि । किं तु स्वरूपतस्तत्त्वतोऽज्ञाते अज्ञातरज्वामिव । अहमिति जीवं प्रथमं कल्पयति । ततोऽपि भावान् पृथग्विधान् आकाशादीन् व्यवस्थितान् वासनारूपेण चित्तेऽवस्थितान् शब्दादीन् बाह्याध्यात्मिकान्, तथा चित्तकालांश्चाव्यवस्थितान् बहिः कल्पयति । तत्रापि प्रथमकल्पने जीवं हेतुकलात्मकं करोमि, तत्फलं च भुञ्ज इत्येवं कल्पयति यथा ज्ञानस्मरणम् । एवं जीवकल्पना सर्वकल्पनामूलम् । तस्याश्च स्वरूपतोऽनिश्चितात्मैव मूलम् । जाग्रद्भावानां व्यक्तत्वेन स्वाप्निकानामव्यक्तत्वेन वैषम्यमिति कल्पितत्वेन समत्वात् चित्तकाला द्वयकाला वा सर्वेऽपि कल्पिता एव । एवं कल्पितानां तत्त्वे निश्चिते रज्जुकल्पितसर्पादिनिवृत्तिवन्निवृत्तौ रज्जुकैवल्यमिव केवलमद्वैतमिति स्वात्मनिश्चयो भवति । प्राणः प्रज्ञात्मा बीजात्मा तत्कार्यभेदाश्च भूतादिस्थित्यन्ताः कारिका दर्शिताः । एवमन्येऽपि सर्वजन्तुपरिकल्पिताः भावाः तच्छून्येऽज्ञातात्मनि कल्पिता एव । देवस्य मायैषा, यया संमोहितः स्वयम् ।

संक्षेपेण तु यं यं भावं दर्शयेद्यस्याप्तोऽन्यो वा इदमेव तत्त्वमिति, सोऽप्ययमहमिति ममेति पश्यति ।

एवमाचार्यदर्शितो भावश्च ग्रहेण गृहीत इव तदभिनिवेशेन दृष्टः पदार्थः स्वात्मानमेव तत्त्वतो दूरीकृत्य निरुणद्धि । इदमेव तत्त्वमिति ग्रहीतारं निगच्छति । एवं गृहीतविकल्पेन पृथगिवैकोऽप्यात्मा परिकल्प्यते मूढैः । विवेकिभिस्तु 'इदं सर्वं यदयमात्मे' त्यविकल्पितः । द्वैतस्यासत्त्वं स्वप्नमायागन्धर्वनगरदृष्टान्तैर्निश्चितं दृष्टं च "वेदान्तेषु विचक्षणैः" । "नेह नानास्ति किंचन"[1] "इन्द्रो मायाभिः"[2], "आत्मैवेदं"[3], "ब्रह्मैवेदम्"[4] इत्यादि-निपुणतरवस्तुदर्शिभिः । एवमात्मैवैकः परमार्थतः । नान्यो लोकिको वैदिको वा द्वैतव्यवहारः, सर्वोऽपि अविद्याविषय एव । सृष्टिप्रलयबद्धमुक्तसाधकमुमुक्ष्वादिभेदा

1. कठो 4-11, बृ. 4-4-19
2. बृ. 2-5-15
3. Ibid 1-4-17
4. मुं. 2-2-12

वस्तुतो न सन्तीति एषा परमार्थता दर्शिता श्रुतिभिः । अनिश्चितायां यथा रज्वामसद्भिरेव सर्पधारादिभिरद्वयेन च रज्जुरूपेण सता, इयं धारा, अयं दण्ड इति रज्जुद्रव्यमेव विविधं कल्प्यते । तथा स्वयमेवात्मा सदैकस्वभावोऽप्यनिश्चितः सन् असत्प्राणादिभेदैः कल्पितः । परमार्थसताऽद्वयेन चास्त्येव सः । एवं भावा अपीतरेऽद्वयाधारेणैव विकल्पिताः । न हि निरधिष्ठाना काचित्कल्पनाऽस्ति । नाप्यप्रचलिते मनसि काश्चिद्भाव उपलक्षितुं शक्यते । तस्मादद्वैता शिवा । कुतः? अभयत्वात्तस्याः । द्वितीयाद्वै भयं भवति । यत्र येन पृथक्त्वं दृश्यते तत्राशिवं भयं दृष्टम् । आत्मनि कल्पितं निरूप्यमाणं जगदेव न वस्त्वन्तरं भवति; नापि स्वतः । इत्थं तत्त्वज्ञाः ब्राह्मणा विदुः ।

एवं दर्शितसम्यग्दर्शनं वीतरागभयक्रोधानां वेदपारगानामवगतवेदार्थतत्त्वज्ञानामेव सन्यासिनां निर्विकल्पस्य प्रपञ्चोपशमस्य द्वैतभेदरहितस्य दर्शनमानुभाविकम्, नान्येषाम् । एवं विदित्वापि साधकोऽद्वयरूपावगमायैव स्मृतिं कुर्यात् । अहमस्मि परं ब्रह्मेति अद्वैतं समनुप्राप्य विदित्वा जडवल्लोकमाचरेत् । अप्रख्यापन्नात्मानमेवमस्मि स्वयमिति । चर्या चैवमावश्यकी । ''तद्बुद्धयस्तदात्मान''[1] इति भगवदुक्तदिशा स्तुतिनमस्कारस्वाहास्वधाकारादिसर्वकर्मवर्जितः त्यक्तसर्वैषणः प्रतिपन्नपरमहंसपरिव्राज्यः चलाचलनिकेतः स्यात् । भोजनादिव्यवहारनिमित्तं चलस्वभावं शरीरम्, अचलस्वभावात्मविस्मृत्या अहमिति मन्यते यदा तदा चलाश्रयः । एवं कदाचित् नियतव्यवहारं परिसमाप्य पुनः सर्वदा आकाशवदचलनिकेतः स्याद्यतिरित्यर्थः । यदृच्छाप्राप्तकौपीनाच्छादनग्रासमात्रेण देहस्थितिर्भवेत् । पृथिव्यादिबाह्यमाध्यात्मिकं च देहाद्यसदेवेति स्वात्मानं च सदहमस्मीति पश्यन् तत्त्वीभूतस्तदारामो बाह्यरमणरहितस्तत्त्वादप्रच्युतः स्वात्मदर्शनो भवेत् । ''शुनि चैव श्वापके च पण्डिताः समदर्शिन''[2] इतिवदवतिष्ठेत इति ।

अद्वैतप्रकरणसारः

आगमप्रकरणे प्रपञ्चोपशमः शिवोऽद्वैत आत्मेति ओंकार निर्णयावसर उक्तम् । तत्प्रागपि ''प्रपञ्चोपशमं.... स आत्मा स विज्ञेयः''[3] इति च श्रुतौ

---

1. भ.गी. 5-17 2. Ibid 5-18 3. मां. 7

प्रतिज्ञामात्रेण यत् तदपि द्वितीये साधितं द्वैतवैतथ्यप्रतिपादनेन । इदानीं पुनरद्वैतमागमवत् तदनुसारितर्केणापि प्रतिपत्तुं शक्यमिति प्रतिपाद्यते । "अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते"[1] इति पूर्वापरग्रन्थेनाद्वैतस्य परमार्थस्य साधनात् प्रकरणमिदमद्वैतप्रकरणमिति कथ्यते । तर्केणाप्यप्रतर्क्यस्वरूपस्याप्यात्मनोऽद्वितीयत्वसंभावनामात्रमुच्यते । तदनुगृहीतागमेनैव तत्सिद्धिर्दृढीक्रियते, इति भगवत्पादोक्तसंबन्धः । भट्टाचार्यैस्तु स्वप्नादिदृष्टान्तैर्बहुयुक्तिभिश्च विश्ववैतथ्यं दर्शितम् । तेन प्रपञ्चोपशमश्च दर्शितो भवति पूर्वप्रकारणे । "विदित्वाऽद्वैते योजयेत् स्मृति"[2] मिति अद्वैतस्मरणं विहितम् । अथास्मिन् तृतीये प्रकरणे प्रधानतयाऽजातिवादेन तदद्वैतं पुनश्चिन्त्यत इत्युक्तम् ।

अतो वक्ष्याम्यकार्पण्यमजातिसमतां गतम् ।
यथा न जायते किंचिज्जायमानं समन्ततः ।[3]

इति सर्वथा अजातिवादमनुत्पत्तिवादं तदद्वैतसमर्थनार्थं प्रवृत्त आचार्य इत्यभिज्ञायते । अयमजातिवाद उत्तरत्र[4] चिन्तितः । अजातिशब्दश्च नवकृत्वः[5] प्रयुक्तः । अस्मिन् प्रकरणे प्रथमकारिकायामुपासनाश्रितो धर्म इत्यत्र ब्रह्मणो जातिरुद्दिष्टा सती द्वितीयायामविशेषेणैव सा प्रतिषिद्धा । इदमेवाजातिकथनप्रतिज्ञानम् । उपास्योपासकोपासनादिभेदजातं सर्वं मिथ्येति साधितमेव प्राक् । यश्चोपासकोऽहमद्य जाते ब्रह्मणि वर्ते, उत्पादात्प्राक् जगदिदमहं चाखिलमजमासीत् । ऊर्ध्वं तूपासावलम्बनेन पुनरजमेव प्रतिपत्स्य इति मन्यते स कृपणः क्षुद्रब्रह्मविदल्प इति नित्याजातब्रह्मदर्शिभिरुच्यते । "तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते"[6] इति श्रुत्या उपास्यस्य ब्रह्मतानिराकरणात् । जातिवादोऽत्र सर्वथा निराकरणीय इति प्रागुक्तप्रतिज्ञा साधनीया । तदर्थं कारिकातो हेतुं दृष्टान्तं च प्रदर्शयत्याचार्यः । आत्मा हि आकाशवत्सूक्ष्मो निरवयवो विभुरपि च सन् घटाकाशरूपैर्बहुभिरुत्पन्न इव जीवैस्तत्सदृशैस्तद्रूपैरुत्पन्नः । जीवात्मनां वेदान्तेषु मुण्डकादिषु

1. गौ.का 3-18
2. Ibid 2-36
3. Ibid 3-2
4. 2-32, 3-10, 38, 48, 4-5,71 इत्यादिकारिकासु ।
5. 3-2, 38; 4-4, 5, 19, 21, 29, 42, 43 इत्यासु कारिकासु ।
6. केनो 1-5

क्वचिदुत्पत्तिश्रवणेऽपि परमात्मनस्तेषां महाकाशात् घटाकाशानामिवोत्पत्तिसमाना, न तत्त्वतः सूक्ष्मत्वान्निरवयवत्वादेव च आकाशवन्नोत्पद्यत इति भावः । परं तु आकाशाद् घटादिसंघाता इव परमात्मनो जीवोपाधिभूतकार्यकरणसंघाता बाह्याश्च पृथिव्यादयो जायन्ते । एवमुक्तसंघातात्मना तदुपाधिमात्रेण जीवोत्पत्तिश्रवणमिति मन्दमध्यमदृष्ट्या जात्यङ्गीकारमात्रेण तत्पक्ष एव दृष्टान्तीकरणाय घटाकाशतत्संघातात्मना उदिताकाशो दर्शितः । एवं जीवप्रलयस्यापि परमात्मनि श्रवणं, घटादिषु लीनेषु तदाकाशादिलय इव महाकाशे तदुपाधिकार्यकरणेषु लीनेषु तल्लय इत्यपरमार्थाशयेनेति न स्वतो जीवस्योत्पत्तिर्लयो वा आकाशस्येवेति । आत्मैक्यपक्षे सर्वदेहेषु एकस्मिन्नात्मनि जननमरणादिमति सुखदुःखादिमति वोपलब्धेऽपि न सर्वे आत्मानस्तैः संसृज्यन्ते । यथा एकस्मिन् घटाकाशे रजोधूमादियुतेऽपि न सर्वे घटाकाशादयः संसृज्यन्ते तथैवामी । एकस्मिन्नप्यात्मनि तत्तद्देहाद्युपाधिपरिकल्पितभेदेषु जीवेषु महत्वदीर्घत्वादिरूपाणि देवदत्तादिनामानि सुकृतदुष्कृतादिकार्याणि एकस्मिन्नपि महाकाशे घटाकाशकरकाकाशादि-महाल्पत्वादिरूपाणि तत्तन्नामानि जलाहरणादितत्तत्कार्याणि आविद्यकानि यथा, तथा व्यवहारभूमौ संभवेयुः न तत्त्वतः । अपि च महाकाशस्य यथा घटाकाशादयो न विकाराः नावयवाश्च तथा जीवा अपि परस्य नावयवा न विकाराः। घनरजोधूमादिभिर्बालानां गगने मलिनबुद्धिवदज्ञानामपि निर्मलेऽप्यात्मनि रागादिक्लेशकर्मतत्फलाख्यमलैर्मलिनबुद्धिः, न तु तद्विवेकवताम् ।

इत्थं घटाकाशादिवत् जननमरणगत्यागतिस्थितिभिः सर्वशरीरेषु चात्मनः संबन्धोऽविशिष्टः । तिर्यगादिभ्य आधिक्येऽपि देवादिभ्यो न्यूनत्वेऽपि वा समत्वे मानवकार्यकरणसंघातानां स्वप्नदृश्यदेहादिवत् मायाविनिर्मितदेहादिवच्च आत्ममायाख्याविद्याप्रत्युपस्थापितत्वेनापरमार्थत्वम् । उपाधीनामतथात्वे तदीयधर्माणां भासमानानामपि स्वात्मन्यतथात्वमेव । आत्माऽद्वितीय उत्पत्त्यादिवर्जित इत्यत्र पञ्चकोशविवेचनप्रवणा तैत्तिरीयश्रुतिः प्रमाणम् । पञ्चानामपि प्रत्यगात्मैव जीवनहेतुः, महाकाश इव घटाकाशादीनाम् । एवं बृहदारण्यकीयमधुब्राह्मणमपि अधिदैवाध्यात्मस्थानद्वये प्रतिपर्यायं दर्शितपुरुषैकत्वबोधनपरं प्रमाणम् ।

कर्मकाण्डे जीवपरमात्मनोः पृथक्त्वोक्तिर्गौणी । एकत्वमेवौपनिषदं मुख्यं तत्त्वविषयत्वात् । अतोऽपि न विरोधः । एवमुत्पत्तेः प्रागजं सर्वमेकमेवाद्वितीयमिति निर्णयः । तदूर्ध्वं जगतो जीवानां च सृष्टिवर्णनं छान्दोग्यादिषु मृल्लोहविस्फुलिंगादिदृष्टान्तपुरःसरं यत्, तत् तत्त्वार्थे साधकान् अवतारयितुमुपाय एकः । नास्ति भेदः कथंचन । भेददृष्टिमवलम्ब्यैव हीनमध्यमाधिकारिभेदेन उपासनोपदिष्टा वेदेन । तथा आश्रमभेदेनाधिकृतपुरुषदृष्ट्या वर्णभेदेन च कर्माणि विहितानि उत्तमदृष्टिमद्वितीयात्मविषयिणीं कथमिमां प्राप्नुयुरिम इति दयालुना वेदेन, न तत्त्वतः । उत्तमस्य तु नोपासना, किं तु ज्ञानमेव । तदिदमद्वयात्मदर्शनं सम्यग्दर्शनं द्वैतिभिर्न विरुद्ध्यते । यद्यपि कपिलकणादादिमतानुगा द्वैतिनोऽन्योन्यं स्वसिद्धान्तव्यवस्थासु अयमेव परमार्थो नान्यथेति स्वस्वसिद्धान्तनिमित्तं विरुद्ध्यन्ते तथापि तादृशैरपीदं दर्शनं स्वहस्तपादादिभिरिव न विरुद्ध्यते, रागद्वेषानास्पदत्वात् ।

अद्वैतं परमार्थः । तद्भेद[1] द्वैतम् । द्वैतिनां परमार्थत्वेऽपरमार्थत्वे च सर्वं द्वैतमेव तेनायं परमार्थो न विरुद्ध्यते । किं चेदमजमद्वैतं सर्वथा अजायमानं न कथंचन भेदमर्हति, मायया तु भिद्यते । तत्त्वतो भिद्यमानत्वेऽमृतस्य मर्त्यतापत्तिः । ये पुनरजातस्यैव जातिमिच्छन्ति भावस्य ते प्रष्टव्याः कथमजातस्यामृतस्य मर्त्यतावाप्तिरिति । अमृतं न कदाचिन्मर्त्यं भवति । मर्त्यमपि न कदाचिदमृतं भवति । अत्र कारणमिदमेव, प्रकृतेः स्वभावस्यान्यथाभावो न जातु घटते । तथा वादिनामन्यथा स्वभावेनामृतस्य मर्त्यता, कृतकत्वेन चामृतस्य भावस्य कथं निश्चलत्व मविकारत्वं च? सतोऽसतोऽपि वा सृष्टिश्रुतिसत्वेऽपि यद्युक्तियुक्तं तदेव ग्राह्यं नेतरत् । अत्र च 'नेह नाने' ति, 'इन्द्रो मायाभि' रिति, 'कोन्वेनं जनयेत्पुनः' इत्यादि च प्रमाणम् ।

"अन्धं तमः प्रविशन्ति"[2] इति संभूतिनिराकरणात्, "नेति नेतीति"[3] प्रपञ्चप्रतिषेधाच्च जातिवादोऽपरमार्थः । सतोऽपि माययैव जन्म युज्यते, न तत्त्वतः।

---

1. तत्कार्यम् ।
2. ईशावा. 9-12
3. बृ. 2-3-6

अन्यथा जातमेव जायत इत्यापत्तिः । असतो मायया वा तत्त्वतो वा जन्म न युज्यते । वन्ध्यापुत्रस्य केनापि जन्म न दृश्यत इति । सतो माययैव जन्मेत्यत्र स्वप्नमनोदृष्टान्तः । स्वप्ने मनोगजतुरगादिद्वैताभासं सत् यथा स्पन्दते तथा जागरितेऽपि मनो द्वयाभासमिव स्पन्दते । स्वप्नेऽपि मन आत्मरूपेणाद्वितीयमेव सत् द्वयाभासं भवति । स्वप्ने विज्ञानव्यतिरेकेण ग्राह्यग्राहकद्वयाभावात् । तथा जागरितेऽपि । किं बहुना; यत्किंचित्सचराचरं द्वैतमिदं मनोदृश्यमेव । मनः कल्पनामात्रमेव । तद्भावे भावात् । मनसो ह्यमनीभावे[1] लयं गते वा सुषुप्तादौ द्वैतभावाभावादिति । कोऽयममनीभाव इति चेत् आत्मैव सत्यमित्येतादृशात्मसत्यानुबोधेन संकल्प्याभावादेव संकल्पनाभावे मनसो ग्रहणविकल्पनावर्जिततयाऽमनस्ता अमनीभावः । अत एव सर्वकल्पनावर्जितमजं नित्यं ज्ञानं परमार्थसता ज्ञेयेन ब्रह्मणाऽभिन्नं ब्रह्मविदः प्रचक्षते । नित्यविज्ञानैकरसं तत् सर्वतो नित्यप्रकाशस्वरूपं ज्ञानान्तरनिरपेक्षं भासत इति ।

एवम् आत्मसत्यानुबोधेन निरुद्धस्य निर्विकल्पस्य मनसः प्रचारः सुषुप्ताद्विलक्षणः । सुषुप्ते हि अविद्यामोहग्रस्ततया अनेकानर्थप्रवृत्तिबीजवासनावदेव मनः स्थीयतेऽव्यक्ततया । ज्ञानिनस्तु उक्तबोधेनाविद्याबीजदाहात् प्रशान्तसर्वक्लेशरजसः प्रचारः ।

अत्र च कारणम्, सुषुप्ते हि मनो लीयते सवासनम् निरुद्धं सन्न लीयते । तदेव निरुद्धं मनो द्वैतरहितं भवति । निर्भयं ज्ञानालोकं ब्रह्मैव समन्तात् ।

तदेवमजमनिद्रमस्वप्नं नामरूपेऽतिक्रान्तं सकृद्विभातं सर्वज्ञं कथ्यते मुख्यतः । अनात्मविदामेव हि ब्रह्मणि समाध्यादिरुपचारः कर्तव्योऽस्ति । न निरुद्धात्मनाम् । इदं च सकृज्ज्योतिः सर्वाभिलापवर्जितः सर्वाचिन्ताभिरुत्थितः सुप्रशान्तोऽचलोऽभयः समाधिरिति भाष्यते । अत एव हानोपादाने वा काचिदपि चिन्ता वा न विद्यते । तदा हि स्वात्मसंस्थमेव भवति सर्वत्र समं नित्यविज्ञानम् । इदं परमार्थतत्त्वमस्पर्शयोग इति श्रुतिस्मृतिप्रसिद्धमिति भगवत्पादाः ।

---

1. निरोधे ।

भट्टाचार्यास्तु सौगतशास्त्रमात्रप्रसिद्ध इति मन्यन्ते । सोऽयं सर्वयोगिभिर्दुर्दर्शः । अभयेऽप्यत्र साधका योगिनो बिभ्यति । हीनमध्यमदृष्टीनां मनोव्यतिरिक्तमात्मनः पश्यतां तु आत्मसत्यबोधरहितानामेषां तन्निग्रहायत्तमभयं दुःखक्षयः, आत्मप्रबोधः, अक्षया मोक्षाख्या शान्तिश्च । सर्वमेतन्मनो निग्रहायत्तम् । अयं मनोनिग्रहोऽपि तेषामुदधेः कुशाग्रेणैकैकबिन्दूत्सेचनेन शोषणव्यवसायवत् व्यवसायवतामनिर्विण्णान्तःकरणानां भवति । अत्र चायमुपायः कामभोगविक्षिप्तं मनः उपायेन निगृण्हीयात् आत्मन्येव निरुन्ध्यात् । सुषुप्ते सुप्रसन्नमपि दुःखवर्जितमपि निगृह्णीयात् ।

निग्रहे च वैराग्यं संपादयेत् सर्वत्र च द्वैते दुःखमेवेति प्रतिपदानुचिन्तया विषयभोगप्रसृतं मनो निवर्तयेत् । अथ च सर्वमजं ब्रह्मेति शास्त्राचार्योपदेशमनुभावयेत् । ज्ञानाभ्यासं कुर्यात् । ज्ञानाभ्यासवैराग्याभ्यां चित्तं कामभोगेषु विक्षिप्तं शमयेत्, लये सुषुप्तात् प्रबोधयेत् । तथा अन्तरालावस्थं सरागं बीजयुक्तं तज्जानन् यत्नेन साम्यमापादयेत् । सर्वत्र निःस्पृहः सर्वतो निगृह्य आत्मन्येवैकीकुर्यात् । एवं कृते अचलं विषयविकल्पेनानाभासं ब्रह्मैव संपद्यते चित्तं, ब्रह्मरूपेण चित्तं भवतीति भावः ।

यथोक्तं परमार्थसुखं स्वात्मसत्यानुबोधरूपं स्वस्थं शान्तं सनिर्वाणं न कथ्यं सुखमुत्तमं तथेदमजं ज्ञेयेनाजेनाभिन्नं स्वेन रूपेण सर्वज्ञं ब्रह्मविदः परिचक्षते ।

न कश्चिदपि जीवो वस्तुतो जायते, यतोऽस्य संभवकारणं न विद्यते । पूर्वमुपायतयोक्तानां मनोनिग्रह सृष्टिप्रभृतीनां सत्यानां मध्ये परमिदमुत्तमं सत्यं यस्मिन् ब्रह्मणि अणुमात्रमपि न किंचिज्जायते, अतः परमार्थ सत्यमेकमेव परं इति ।

अलातशान्तिप्रकरणसारः

आदौ पूर्वापरप्रकरणसंबन्धोऽयम् ओंकारनिर्णयद्वारेणागमतः प्रतिज्ञातस्याद्वैतस्य बाह्यविषयभेदवैतथ्याच्च सिद्धस्य पुनरद्वैतप्रकरणे शास्त्रयुक्तिभ्यां निर्धारितस्य एतत्तदुत्तमंसत्यमित्युपसंहारः कृतोऽन्ते, तस्यैतस्यागमार्थस्यादैत-दर्शनस्य प्रतिपक्षभूता द्वैतिनो वैनाशिकाश्च तेषामन्योन्यविरोधाद्रागद्वेषादिक्लेशास्पदं

दर्शनमिति मिथ्यादर्शनमिति सूचितम् । क्लेशानास्पदत्वात् सम्यग्दर्शनमित्यद्वैतदर्शनं तेन च स्तूयते । तदिह तदीयदर्शनानामन्योन्यविरुद्धतयाऽसम्यग्दर्शनत्वं प्रदर्श्य तत्प्रतिषेधेना- द्वैतदर्शनसिद्धिरुपसंहर्तव्येति, सापि चावीतन्यायेन (व्यतिरेकन्यायेन) अलातशान्तिप्रकरणमिदमारभ्यते ।

प्रथमकारिकयाऽद्वैतदर्शनसंप्रदायकर्तुरद्वैतस्वरूपेणैव नमस्कारात्मकमङ्गलमाचरितम् आचार्यपूजाभिलषितार्थसिद्धिकरी शास्तारम्भे सर्वैरिष्यत इति । आत्माख्यज्ञेयाभिन्नेन सवितृप्रकाशतुल्येनाकाशकल्पेनाकाशतुल्यानात्मनो यो वेद नारायणः तं वन्दे द्विपदां वरमिति श्री गौडपादा बदरिकाश्रमे नरनारायणाधिष्ठिते तपसा समाराधिततत्प्रसादलब्धात्मविद्याः श्रीनारायणं वस्तुतो ज्ञेयज्ञातृज्ञानभेदरहितं परमाथत्त्वं नमस्कुर्वन्ति । अनेनोक्तत्रिपुटीभेदरहितात्मतत्वदर्शनं प्रतिपक्षप्रतिषेधमुखेन प्रकरणार्थतया प्रतिज्ञातम् ।

द्वितीयकारिकयाऽद्वैतदर्शनयोगस्य नमस्कारः कृतस्तत्प्रशंसार्थम् । अस्पर्शयोग इति च कथ्यते, स योगो ब्रह्मविदां प्रसिद्ध इति केनापि संस्पर्शरहितब्रह्मस्वभाव एव नान्यः, स च सर्वसत्वानां सुखो हितश्च न तपोवद्दुःखरूपोऽपि नापि सुखभूतविषयोपभोगवदहितोऽपि, सदविचलितस्वरूपत्वात्, अविरुद्धश्च सः विमतशून्यत्वादिति ईदृशार्थोपदेशः शास्त्रेण संजातः, तेन विना दुरधिगमत्वात् तस्यापि नमस्कार इति ।

द्वैतिनां परस्परविरोधप्रदर्शनम् ।

द्वैतिनः कथं परस्परं विरुध्यन्त इति प्रश्ने तद्विरोधप्रकाशनाय इमाः[1] कारिकाः सांख्याः पुनः भूतस्य विद्यमानस्य जन्मेच्छन्ति (ते सत्कार्यवादिनः) अभूतस्य असतो जन्मेति नैय्यायिका वैशेषिकाः अपरे एते असत्कार्यवादिनः स्वस्वपक्षसमर्थनाय परस्परं प्रतिक्षिपन्ति । अनेन असतो जन्मनेति सांख्यैः सतो जन्मनेति तार्किकैः परस्परविरोधप्रकाशनेन सर्वथा द्वयैर्द्वैतिभिरजातिवाद एव समर्पितो भवति । यद्येवं वयमजातिवादमेवार्थिकमनुमोदामहे, न पक्षप्रतिपक्षपरिग्रहेण विवदामः । अजातस्य धर्मस्य (पदार्थस्य) जन्मवादिनाम्

1. गौ.का. 4-3 तः 8 पर्यन्ताः

अजातस्यामृतस्य मर्त्यतापत्तिरपरिहार्या अमृतस्य मर्त्यत्वं मर्त्यस्यामृतत्वञ्च न संभवि। कुतः प्रकृतेरन्यथाभावो न कथमपि भविष्यति ॥

प्रकृतिः लौकिक्यपि न विपर्येति, सा च सांसिद्धिकी सिद्धपुरुषाणामणिमाद्यैश्वर्यप्राप्तिरूपा वा. स्वाभाविकी अग्न्यादि-द्रव्याणामौष्ण्यादिरूपा वा, सहजा आजानसिद्धा पक्षिणामाकाशगमनादिरूपा वा, अकृता वा केनाप्यसृष्टा नदीजलस्य निम्नगमनादिलक्षणा, एवं चतुर्विधापि प्रकृतिः स्वभावं न विमुञ्चति । तथा च प्रकृते सर्वे धर्मा आत्मानः जरामरणरहिताः प्रकृतितः, तथात्वेऽपि यदि जरादि परिकल्प्यते वादिभिः तदिदं मिथ्यैव भवेत्, रज्जुपरिकल्पितसर्पवत् स्वभावविच्युतिरेव स्यात् तदा ।

सज्जातिवादिसांख्यकल्पनमसाधु इति वैशेषिकः सयुक्तिकमाह - यन्मते कारणमेव कार्यं तन्मते कारणमेव जायत इत्यापत्तिः यद्येवमजं प्रधानादि जायते कथमविरोधः 1. यदि स्फुटितमेकदेशेन तत् कथं नित्यं भवेदिति ।

किञ्च कारणादनन्यत्वात् कार्यस्याजत्वापत्तिः । तर्हि कार्यमजञ्चेति विरुद्धञ्च, अनन्यत्वे जायमानकार्यादनन्यत्कारणं कथं ध्रुवं भवेत्, इत्ययं दोषः, अयमपरश्च अजात् सतो वस्तुनो जायते कार्यमित्यत्र दृष्टान्ताभावः, तदा च तत्सिद्धिर्न स्यात्, जाताज्जायमानं वस्तु यदि स्वीक्रियते अन्यस्माज्जातात्तदप्यन्यस्माज्जातादित्यनवस्थापत्तिः ।

अपि च धर्मादिहेतोरादिः देहादिसंघातः फलमिति ये वदन्ति, तन्मते हेतुफलयोरितरेतरकारणत्वेनादिमत्वे तद्विरुद्धं कथमनादित्वम्? आत्मनस्तु कूटस्थस्य हेतुफलत्मना परिणामानुपपत्तिश्च । पुत्राज्जन्मपितुरितिवत् तत्र विरोधप्रसङ्गश्च हेतुजन्यादेव फलाद्धेतोर्जन्माङ्गीकारे ।

किञ्च धर्मादिहेतुदेहरूपफलयोर्युगपदेव सव्येतरगोविषाणयोरिव संभवाङ्गीरे पौर्वापर्यं हेतुफलनियतं न सिद्ध्येत् ।

अपि च फलाज्जन्यादलब्धात्मकादुत्पद्यमानो हेतुश्च न प्रसिद्ध्यति जन्म न लभते, अलब्धात्मकस्य स्वतोऽसत् कल्पत्वात्, अप्रसिद्धस्य तादृशस्य

फलोत्पादनमपि न दृष्टम् एतद्दोषपरिहाराय हेतुफलयोरन्योन्यसिद्ध्यभ्युपगमे तयोः कतरत्पूर्वं कतरत्परश्चादित्यनिर्णयः ।

यदि न शक्यते वक्तुं सेयमशक्तिरपरिज्ञानं तत्वाविवेको मूढता, इतरेतरानन्तर्यलक्षणक्रमस्य कोपो विपर्यासश्च एवमन्योन्यपक्षदोषं ब्रुवद्भिः तयोः कार्यकारणभावानुपपत्तिप्रदर्शनेन अजातिवाद एव प्रकाशितो भवति स च सिद्धान्ताभीष्ट एव ॥

बीजाङ्कुरवदनादित्वशङ्कासमाधानम्

बीजाङ्कुरवदनादित्वं कार्यकारणभावश्चेत्यपि न समीचीनम् । सिद्धान्तस्य साध्यसमत्वात्, तादृशस्य साध्यसिद्धिनिमित्तत्वं न संभवति, तत्प्रयोगश्च न लोके । बीजाङ्कुरसन्ततेरनादित्वमसंभवि, न हि बीजाङ्कुरव्यतिरेकेण तत्सन्ततिरेकाभ्युपेयते तथा हेतुफलसन्ततिर्वा, अतोऽनादित्वं कार्यकारणभावश्च दृष्टान्ते विप्रतिपद्यते ॥ हेतुफलयोः पूर्वपरापरिज्ञानम् अजातेः परिदीपकम् ।

जायमानं वस्तु स्वतो वा परतो न किञ्चिदपि जायते । तत् सद्वा असद्वा, सदसद्वा, वक्तव्यम् तदिदं स्वतोऽपरिनिष्पन्नात्स्वरूपात् न जायते यथा घटस्तमादेव घटात् नापि परतः, यथा घटात् पटः पटात् पटान्तरं वा तथा नोभयतः विरोधात् यथा घटपटाभ्यां घटो वा पटोऽन्यो वा न जायते ।

किञ्चानादित्वोपगमे हेतुफलयोरजन्मैवाभ्युगतं स्यात् अनादेः फलात् हेतुर्नजायते । यस्यादिः कारणं नास्ति तस्य जातिः न विद्यते ।

बाह्यार्थप्रतिक्षेपिविज्ञानवादिमतम्

घटादिप्राप्तिरूपायाः प्रज्ञप्तेः वैचित्र्यरूपद्वयस्य दुःखस्योपलब्धेर्युक्तितो बाह्यविषयस्य स्वीकारेऽपि तस्य निमित्ततया त्वदभिमतस्य तत्वे निश्चिते तत्त्वव्यतिरेकेणाभावादेव निमित्तत्वं नाङ्गीक्रियते । यथा घटस्य मृद्रूपयथाभूतार्थदर्शने मृद्व्यतिरेकेण स नोपलभ्यते यथा च पटस्तन्तुव्यतिरेकेण तन्तवश्च तदंशव्यतिरेकेणेत्येवमुत्तरोत्तरभूतदर्शने शब्दप्रत्ययमात्रनिरोधात् निमित्तमुपलभ्यत इति सुदुर्वचम् किञ्चाभूतदर्शनरज्जुसर्पादेरिव भ्रान्तिदर्शनविषयत्वाच्च

निमित्तस्यानिमित्तत्वम् भ्रमाभावे सुषुप्तसमाहितमुक्तानां भ्रमाभावादेव स्वात्मव्यतिरिक्तबाह्यविषयामुपलम्भादिति ।

अत एव बाह्याभावादेव हेतोः चित्तं न संस्पृशत्यर्थं नापि तदाभासं, अभूतत्वादेव स्वप्नार्थवत् जागरितेऽपि चित्तं न संस्पृशति स्वप्नचित्तवदेव, त्रिष्वपि कालेषु चित्तं न स्पृशति क्वचिदपि, तेन न कुत्रापि सत्यार्थनिमित्तोऽविपर्यासस्तत्वतोऽस्ति, अतोऽनिमित्तो विपर्यासः कथं चित्तस्य? न कथंचित्, अतोऽसत्यपि निमित्ते घटादौ चित्तस्य तद्वदवभासनमात्रम् 'प्रज्ञप्तेः सनिमित्तत्व' मित्यादि एतदन्तं बौद्धस्य विज्ञानवादिनो मतम् अनुमोदितमाचार्येण कुतः भूतदर्शनात्, यथा चित्तदृश्यं न जायते तथा चित्तमपि न जायतेऽसत्यपि जन्मनि तस्यापि चित्तस्य जायमानावभासत्वम् न्यायसाम्यात् असत्यपि तद्वद्भासनमिति । अतश्चित्तस्य ये जातिं पश्यन्ति विज्ञानवादिनः क्षणिकत्वादि च, तेनैव चित्तेन चित्तस्वरूपं द्रष्टुमशक्यं पश्यन्तस्ते खे पक्षिणां पदं पश्यन्ति । इमे द्वैतिभ्योऽपि नितरां साहसिकाः पश्यन्त एव सर्वशून्यतां ये माध्यमिकाः प्रतिजानते, तेभ्योऽपि साहसिकतमा इति ।

तस्मादजमेकं ब्रह्मेति सिद्धम् अजातं यच्चित्तं ब्रह्मैव जायत इति वादिनां प्रकृत्यन्यथाभावो आपतेत् ।

अयमपरो दोषः संसारमोक्षयोः परमार्थसद्भाववादिनामुपरि दुर्निवारः ।

'अनादेरन्तवत्वं संसारस्य न सेत्स्यति ।
अनन्तताचादिमतो मोक्षस्य न भविष्यति ॥ इति

सर्वे धर्माः (पदार्थाः) आद्यन्तवत्वादेव 'आदावन्ते' चे तिनयेन मिथ्याभूताः । स्वप्नदृष्टान्तेन जागरितवस्तुनोऽसत्वं जागरितस्य स्वप्नहेतुत्वमपि न परमार्थतः ।

परमार्थतः कयोश्चिदपि न कार्यकारणभावः । कारणत्वेनाभिमतं नासत् तेन चासत्कार्यमुत्पन्नं न दृष्टम् शशविषाणादेराकाशकुसुमादि नोत्पद्यते खलु । नापि सद्घटादिकार्यमसद्धेतुकं दृष्टमिति सतोऽपि नासत् कारणम् । नापि सदेव सतोऽपि

कारणम् । घटादि घटादिविद्यमानहेतुकं न दृष्टम्, सतः कार्यमसत् कुतः? उक्तप्रकारान्तरेण कार्यकारणभावः संभवति ।

एवं स्वप्नजागरितयोरपि न कार्यकारणभावो वास्तवः । अविवेकादेव रज्जुसर्पादिवज्जाग्रद्वस्तूनि परमार्थानीव पश्यन् स्वप्नेऽप्येवं हस्त्यादीन् कल्पयेत् । तत्सर्वं तत्रैव पश्यति । न तु जागरितादुत्पन्नान् असतोः स्वप्नप्रजागरयोः कार्यकारणभावासम्भवात् । यद्यप्यद्वैतवादिभिर्बुद्धैजातिरुपदिष्टा (सृष्टिप्रकरणे सर्वत्रोपनिषत्सु) उपलम्भात् वर्णाश्रमादिधर्माचरणात्मकात् समाचारात् अस्ति द्वैतं वस्तु इति वदनशीलानां मन्दविवेकिनां तत्रैवदृढग्रहवतामर्थे, ते हि श्रोत्रियाः स्थूलबुद्धित्वात् सदाऽजातिवस्तुनः स्वात्मनाशं मन्यमाना अविवेकिनस्तां गृह्णन्तु, वेदान्ताभ्यासिनां तु तेषामेवाजाद्वयात्मविवेको भविष्यतीति, न परमार्थदृष्ट्या सोपदिष्टा ।

ये चैवं प्रागुकादिशा द्वैतं प्रतिपद्यन्ते तेऽपि सन्मार्गप्रावृता इति तेषां जातिकल्पनादोषो नैव स्थायितया तिष्ठेत् । मायाहस्तिवत् द्वैतं न सत्यम् उपलम्भसमाचारयोरत्रैव सत्यत्वव्यभिचारात् मायाहस्ती उपलभ्यते बन्धनारोहणादिसमाचारैश्च हस्ती दृश्यते अथापि न सत्य इति ॥

अथाप्यस्ति परमार्थमेकं यदालम्बना एव जात्याद्याभासाः प्रतीयन्ते, तदेव विज्ञानमजमचलमद्रव्यं शान्तमद्वयञ्च । एवं चित्तं उक्तहेतुभ्यो न जायते, धर्मा आत्मानोऽपि न जायन्ते, एवं तत्त्वविज्ञानिनो न पतन्ति विपर्ययेऽविद्याध्वान्तसागरे ।

सदृष्टान्तं परमार्थदर्शनप्रपञ्चनम्

अलातशान्तिप्रकरणनामनिर्वचने प्रागेवाद्ये षट्कारिकार्थविवरणं तात्पर्यतो दर्शितमिति न पुनर्वितन्यते, अलातवन्नित्यविज्ञानं सदाचलं, तत्र धारणभ्रमणादिकाले भासमानर्जुवक्रादिभावा इव जातिचलद्रव्यधर्माविभासाः केवलं प्रतीयन्ते न परमार्थतः सन्तीति पिण्डितार्थः यतोऽचिन्त्या अवस्तुत्वात् कार्यकारण-भावानुपपत्तेरिति नायान्ति, न यान्ति, न प्रविशन्ति च ते सर्वथा । अद्रव्यत्वात् इति तु संक्षेपार्थः ।

कार्यकारणभाववादिनामपि द्रव्यमेव द्रव्यस्य कारणं तदपि तदन्यस्य नतु स्वयमेव स्वस्य नाप्यद्रव्यं कस्यचित्कारणं स्वतन्त्रं दृष्टं लोके, अतोऽपि धर्माणामात्मनां कार्यकारणभावो न सुवचोऽद्रव्यत्वादमीषाम् । अनन्यत्वाच्च । अतोऽपि आत्मविज्ञानस्वरूपं चित्तमिति न चित्तजा बाह्यधर्मा नापि तज्जं चित्तं सर्वेषां नित्यविज्ञानस्वरूपभासमात्रत्वात्, अतो ब्रह्मविदोऽभावमेवात्मनि हेतुफलयोर्मन्यन्ते तदेतत् परमार्थदर्शनम् ।

हेतुफलावेशस्थितिपर्यन्तं संसारः न ततः परम् । मयेदं कर्तव्यं कर्म, अहं कर्ता तेन तत् फलं कालान्तरे भोक्ष्य इति हेतुफलाग्रहः आत्मन्यध्यारोपेण तच्चित्ततेति यावत् । तावत्तदुत्पत्तिः तावदेव संसारः सुदीर्घोऽक्षीणो भवति, तस्मिन् क्षीणे संसारप्रतिपत्तिर्न भवति कारणाभावात् ।

संसारोत्पत्तिविनाशौ संवृतिमात्रसिद्धौ

संवृतिर्नाम संवरणमविद्यविषयो लौकिको व्यवहारः तेन तद्भूमौ नित्यं नश्यदपि अतः परमार्थ सद्भावेन तु सर्वमजमात्मैव, अतोऽपि जात्यभावान्नोच्छेदः कस्यचित् ।

आत्मानात्मनां धर्माणां जन्म प्रतीयमातं संवृति सिद्धम् । आत्मनामन्येषां वा धर्माणां जन्म संवृतिमात्रमेव न तत्त्वतः, तदपि मायोपमम् या न विद्यते सा माया मायामयादाम्रादिबीजात् यथा मायामय एवाङ्कुरः नासौ नित्यो न विनाशी चा- सत्वादेव तद्वत् प्रकृतेऽपि, तथा परमार्थतोऽजेषु नित्यैकरसविज्ञप्तिमात्रसत्ताकेषु चात्मसु शाश्वतोऽशाश्वत इति शब्दप्रयोगो न प्रवर्तते तदभिधातुं वर्णा एव न प्रवर्तन्ते, नित्योऽनित्य इति मनसोऽपि विवेको नोच्यते ''यतो'' वाचो निवर्तन्त इत्यवाङ्मनसगोचरत्वात् परमार्थे तादृशे विज्ञाने शब्दप्रयोगोऽपि मनस्पन्दनमात्रमेव स्वप्नजागरयोरद्वयमपि चित्तं द्वयाभासं मायया यथा चलति. तथेदमपि न तत्वतः यथा च स्वप्ने स्वप्नदृशा दृश्यमानाः स्वेदजाण्डजादयो जीवाः केवलं स्वप्नदृकचित्तदृश्याः सन्तस्तच्चित्तमेव ततो न प्रथक् सन्ति, चित्तमेवानेकजीवाकारेण कल्प्यते एवं तदपि स्वप्नदृक् चित्तं स्वप्नदृग्दृश्यत्वात् स्वप्नदृग्व्यतिरेकेण न तत्वतोऽस्ति एवं जाग्रति तद्दृशा दृश्यमानं सर्वं तच्चित्तमेव

चित्तमपि तद्दृश्यत्वात् दृष्टव्यतिरेकेण नास्ति इति सर्वथा वाग्गोचरत्वं द्वैतस्य न तात्विकम् । वस्तुतस्तु चित्तचैत्ये जीवचित्ते ते परस्परापेक्षसिद्धिके भवतः तस्मान्नकिञ्चिदस्ति चित्तं वा तदीक्षणीयं वा, स्वप्नवत् प्रमाणशून्यं तदुभयम् ।

यथा स्वप्नमय जीवमायामयजीवमणिमन्त्रौषधादिनिर्मितजीवाः जायन्ते म्रीयन्ते तथा जागरेऽपि मनुष्यादिजीवा भवन्ति न भवन्ति चेति सर्वथा मिथ्या इमे । उत्तमं तु परमार्थसत्यं न कश्चिज्जायते जीव इति पूर्वप्रकरणेऽन्ते कीर्तितमिदम् ।

ग्राह्यग्राहकद्वयमात्रं चित्तकल्पितमेवेति चित्तं परमार्थत आत्मैव तेन रूपेण निर्विषयं नित्यमसङ्गम् 'असंगो ह्ययं पुरुष' इति हि श्रुतिकीर्तितम् । शास्त्रशास्तृ-शिष्यादिभेदोऽपि परमार्थप्रतिपत्त्युपायत्वेन कल्पितसंवृतिसिद्धः न तत्त्वतः ।

परशास्त्रव्यवहारेण पदार्थ एवं जातीयः स्यादपि तत्त्वतो निरूप्यमाणो नास्ति, तेनापि चित्तमसङ्गम् । एवमज इति परतन्त्रानुसारेण शास्त्रपरिकल्पितसंवृत्यैव च कल्पना, वस्तुतो नाप्यजः योऽप्यज इत्युक्तः सोऽपि संवृत्या जायते, अतोऽपि सर्वाऽपि कल्पना परमार्थे नैव संक्रमते, तथा च द्वैतेऽसति केवलमभिनिवेशमात्रम् । तदेव च जन्मनः कारणम्, अतो द्वयाभावज्ञानेन तन्निवृत्तौ स पुनर्न जायते । निर्निमित्तोन जायते, तथाहि - उत्तममध्यमाधमजन्महेतून् धर्माधर्ममिश्रलक्षणान् यदा चित्तं न पश्यति सर्वकल्पनावर्जितमेवात्मतत्वमिति जानन् तदा हेत्वाभावादेव जन्माख्यं फलं न प्राप्नोति ।

उक्तनिमित्ताभावे चित्तस्य मोक्षाख्यानुत्पत्तिः सर्वावस्थास्वपि निर्विशेष समा अद्वयाच, प्रागपि विज्ञानात् सर्वचित्तदृश्यं द्वयं यतः तत एवं चित्तव्यतिरेकेण तस्याभावात् तदैकरूपै, । जन्मनिमित्तद्वयाभावात् सत्यामनिमित्ततां ज्ञात्वा उक्तहेतुसंसर्गाभावेन ज्ञानी वीतशोकमभयं पदमश्नुते । अभूताभिनिवेशविषयाद् विनिवर्तते च । एवं निवृत्तस्य द्वैतादन्यत्रचाप्रवृत्तस्य चित्तस्य निश्चला स्थितिरेव, सैषा ब्रह्मस्वरूपास्थितिरद्वयविज्ञानैकघनरसलक्षणा परमार्थदर्शिनां बुद्धानां गोचरः तदेव परं साम्यमद्वयं निर्विशेषमजम् । तदिदमनिद्रमस्वप्नं स्वयंप्रभं सकृदेव विभातम् । स एव वस्तु स्वभावतोऽप्येवंलक्षण आत्माख्यो धर्मः ।

तादृशात्मनो वेदान्तैराचार्यैश्चोपादिश्यमानस्यापि लौकिकैरग्रहणे तदितरद्वैत ग्रहाभिनिवेश एव मुख्यं कारणम् । पण्डितानामपि परीक्षकाणां भगवति परमात्मनि अस्ति नास्ति, अस्तिनास्तीति, नास्तिनास्तीति ग्रहाः, किमुत मूढानाम्, पण्डितोऽपि चलस्थिरोभयाभावैः प्रकारचतुष्टयेन भगवन्तं परमात्मानमावृणोति, अतोऽयमपि बालिश एव तत्वानवबोधात् । उक्तचतुष्कोटिविनिर्मुक्तत्वेनात्मा येन ज्ञातः स सर्वदृक् सर्वज्ञः परमार्थपण्डितः उक्तसर्वज्ञतां पूर्णां प्राप्यैव अद्वयब्राह्मण्यं पदमश्नुते जन्मादिरहितमीदृशं पदं प्राप्तो न किमपि कर्तुं चेष्टते निष्प्रयोजनम् ।

उक्तात्मस्वरूपेणावस्थानमेव स्वाभाविकविनयशमदमादिः । ब्राह्मणानमीदृशात्म स्वरूपेणावस्थानमेव विनयः शमो दमश्च स्वभावत एवोपशान्तं ब्रह्म विद्वान् शमं स्वाभाविकं व्रजेत् ।

स्वप्रक्रिया प्रदर्शनम्

ज्ञानं त्रिविधं लौकिकं, शुद्धलौकिकं, लोकोत्तरं चेति । तत्र सांवृतवस्तूपलंभ-सहितमाद्यम्, तदपि ग्राह्यग्राहकलक्षणद्वयं जागरितम् । तादृशवस्तुरहितमुपलम्भ-सहितं शुद्धं प्रविविक्तं स्थूलज्जागरिताद् यत् तत् स्वप्न इति द्वितीयम् । वस्तूपलम्भरहितं द्वयरहितं च लोकोत्तरमिति सर्वप्रवृत्तिबीजं सुषुप्तमिति कथ्यते तृतीयम् । एतान्येव त्रीणि ज्ञानज्ञेयराशिः तद्व्यतिरेकेण ज्ञेयानुपपत्तेः परमार्थसत्यं तु विज्ञेयम्, तुरीयाख्यमद्वयमजमात्मतत्वम् । सदैतद्बुद्धैः परमार्थदर्शिभिः ब्रह्मविद्भिः प्रकीर्तितम् ।

मुमुक्षुविज्ञेयानि

एवं क्रमेण विदिते ज्ञाने ज्ञेये च त्रिविधे तुरीयं विदितं भवेत्, अस्य महाधियः सर्वत्र सदा सर्वज्ञता भवति । एवंक्रमेण ज्ञेयत्वे लौकिकादीनामस्तित्वशंका न कार्या परमार्थतः । तत्र लौकिकादित्रयं हेयं ज्ञेयं चतुष्कोटिविनिर्मुक्तं परमार्थतत्वम् । पाण्डित्यबाल्यमौनत्रयमाप्यं भिक्षुणा संन्यासिना । रागद्वेषादिकं पाक्यम् विज्ञेयाद् ब्रह्मणोऽन्यत्र हेयादिषु न परमार्थसत्यता केवलमविद्योपलम्भमात्रम् ।

प्रकृत्याऽऽकाशवज्ज्ञेयाः सर्वधर्मा आत्मनो ज्ञेया अनादयो मुमुक्षुभिः, अथापि तेषां नानात्वं क्वचन किञ्चन न विद्यते ।

तेचादिबुद्धा आदिशान्ताश्च प्रकृत्यैव नित्यबोधस्वरूपाः शान्तश्च, अतोऽपि न संदिह्यमानस्वरूपाः सदेति निश्चयः कर्तव्योऽपि नास्ति तेषां, स्वार्थं परार्थं वा सदा बोधनिश्चयनिरपेक्षताख्या क्षान्तिर्भवति । नित्यशान्तत्वादेव प्रकृत्यैव सुनिर्वृता अनुत्पन्ना अभिन्ना समाचेति विशारदं विशुद्धमात्मतत्वमतोऽपि शान्तौ मोक्षे वा कर्तव्यतांशो नास्त्येव । एतादृशं वैशारद्यमन्येषां कृपणातां भेदनिम्नानां संसारपथगानां नास्त्येव, ते सर्वे भेदवादिनोऽमी कृपणाः स्मृताः । ये पुनः केचिद् अजे साम्ये परमार्थतत्त्वे निश्चिता भविष्यन्ति ते महाज्ञानाः, तेषां वर्त्म लोको न गाहते, लोकसामान्यबुद्धिविषयो न भवतीति ।

सर्वेष्वजेषु धर्मेषु असंक्रान्तमचलं च ज्ञानं तदन्यविषयेषु न क्रमत इति तदसंङ्गं कथ्यते गगनकल्पं तदेव महाज्ञानम् ।

अज्ञानां तन्नास्ति । अणुमात्रेऽपि वैधर्म्ये बहिरन्तरेव स्थितेऽसङ्गत्वं न स्यादेव नापि तदावरणभङ्गः । इत्थमविवेकिवैलक्षण्ये महाज्ञानिन सर्वेऽविद्यानिबन्धनावरणरहिता एव प्रकृतिनिर्मला आदिबुद्धा आदिमुक्ताः नायकाः स्वामिनः समर्थाः बोद्धुम् ।

परमार्थदर्शिनो ज्ञानं विषयान्तरे न क्रमते, तापिनोऽस्य संतानवतो निरन्तरस्याकाशकल्पस्य धर्मा अन्ये जीवात्मानोऽपि न क्रमन्ते तदनन्यरूपत्वात्, इदं ज्ञानमाकाशमिवाचलमविक्रियं निरवयवं नित्यमद्वितीयमसङ्गमदृश्यमग्राह्यमशनायाद्यतीतं ब्रह्मात्मतत्वं ज्ञानज्ञेयज्ञातृभेदविरहितमद्वयं परमार्थतत्त्वं न बुद्धेन भाषितम् । यद्यपि बाह्यार्थापलपनं ज्ञानमात्रकल्पनेत्यादि चाद्वयवस्तुसामीप्यमुक्तम्, इदं तु वेदान्तेष्वेव विज्ञेयमिति, आदावुपन्यस्तमाकाशकल्पमिति अस्यैव दुर्दर्शस्यातिगम्भीरस्य विशुद्धस्याजस्य साम्यपदस्य बोधेन तद्भूताः सन्तो गौडपादाचार्याः तदेव पदं यथाशक्ति नमस्कुर्वन्ति अन्तिमकारिकया ।

श्रीसुरेश्वराचार्याः, तदीयवार्तिकादिग्रन्थाश्च

श्रीपरमहंसपरिव्राजकाचार्यभगवत्पादानामन्तेवासिनः साक्षादिमे सुरेश्वराचार्या इति इतिहासप्रथिताः । इदं चैषां नाम सन्यासस्वीकारानन्तरं कृतमिति प्रतिभाति माधवीयशंकरविजयतः । "ततः स संप्राप्य सुरेश्वराख्याम् ...."[1] इति । प्राग्गृहस्थाश्रमस्थितानामेषां विश्वरूप इति, मण्डनमिश्र इति उम्बेक इति, भवभूतिरिति च नामान्तराण्यासन्निति प्रतीयते "सुधीश्वरो मण्डनमिश्रशर्मा..."[2]। "सदा वदन् योगपदं च सांप्रतं सविश्वरूपः प्रथितो महीतले"[3] । "उम्बेक इत्यभिहितस्य हि तस्य लोकैः ....."[4]। "अथ प्रतस्थे भगवान् प्रयागात् तं मण्डनं पण्डितमाशु जेतुम्"[5] इत्यादिभिः ।

चित्सुखाचार्याभिप्रायेण उम्बेको भवभूतिश्चैक एवेति पूर्वमीमांसाया ऐतिह्ये टिप्पण्यां विलिखितम् । भट्टोम्बेको नामा भट्टकुमारिलगुरोः कश्चन शिष्यः श्लोकवार्तिकस्य व्याख्यामेकां निरमासीत् इत्यादिविचारस्तत्रैवैतिह्ये कृतः । परं तु ब्रह्मसिद्धिकारमण्डनेभ्योऽन्य एवेमे मण्डना इति कतिपयपक्षः ।

स्फोटसिद्धिग्रन्थे ब्रह्मसिद्धिकारमण्डनेन भगवत्पादखण्डितस्फोटवादस्य स्थापनात् शब्दाद्वैतवादस्य, ब्रह्मणः शब्दात्मकत्वस्य च ब्रह्मसिद्धौ दर्शितस्य नामरूपातीतशुद्धब्रह्मवादिभगवत्पादमतविरुद्धत्वाच्च, तथा शंकरसुरेश्वरविरुद्धभावाद्वैतमतसमर्थनात् वार्तिके सुरेश्वरैरेतन्मतस्य खण्डनाच्च सोऽयं पक्षः समर्थितः ।

किं च ब्रह्मसिद्धिकारा हि स्वग्रन्थे सिद्धवस्तुपराणि श्रुतिवाक्यान्यपि सन्तीति मीमांसकमतविरुद्धमुद्घोषयन्ति । तदिदं कर्म मीमांसकत्वेन प्रसिद्धमण्डनमिश्राणां नाभिमतं, विरुद्धं च । वार्तिके पुनः ब्रह्मसिद्धिमतखण्डनं यथा -

---

1. मा.शं.वि. 10-104
2. Ibid 7-113
3. Ibid 7-114
4. Ibid 7-116
5. Ibid 8-1

अन्ये तु पण्डितंमन्याः संप्रदायानुसारतः ।
विज्ञायेति वचः श्रौतमिदं व्याचक्षतेऽन्यथा ॥
तत्त्वमस्यादिवाक्योत्थविज्ञानेन यथोदितम् ।
विज्ञाय वस्त्वसंसर्गिप्रज्ञां कुर्वीत यत्नतः ॥[1] इति ।

अत्र आनन्दगिरिटीका -

संप्रति अकार्यकारणासामान्यविशेषं प्रत्यग्ब्रह्मेति उपगच्छतां मण्डनादीनां तद्व्याख्यामुत्थापयति - अन्येत्विति । कथमन्यथाव्याख्यानं, तदाह - तत्त्वमिति - इत्यादिना 609 तमवार्तिकपर्यन्तं मण्डनादिमतम् । तदिदं खण्डयन्ति -

इत्येवमादिवाक्यानि गम्भीरन्यायवेदिनः ।
केचिद्व्याचक्षते यत्नादत्र प्रतिविधीयते ॥[2]

इत्यादिना ग्रन्थेन । तदेतत्खण्डनं मण्डनमिश्रेभ्यः सुरेश्वराचार्याणां व्यक्तितो भेदे कारणम् । किं च मीमांसाग्रन्थेषु स्वीयेषु विधिविषये मीमांसकवेदान्तिनोर्मतभेदं स्फुटीकृत्येष्टसाधनत्वबोधनमेव विधेः कृत्यमिति प्रतिपाद्य च, वेदान्तसिद्धान्तस्य महतीमुपकृतिं विदधुरिति स्पष्टमिदं विधिविवेके । अतोऽपि कर्ममीमांसकः सन् मण्डनमिश्र आचार्यशिष्यो बभूवेति न सुवचम् ।

केचन शंकराचार्येभ्योऽपि प्राचीनाः ब्रह्मसिद्धिकारमण्डना इति । कुप्पुस्वामिशास्त्रिणस्तु 'आचार्याणां ब्रह्मसूत्रभाष्यावलोकनानन्तरं ब्रह्मसिद्धिर्विलिखिता स्यादिति नैकैर्लिङ्गैरवगम्यत इति ते शंकरेभ्यः प्राचीना इति न सम्यगिति' विमृशन्ति ।[3]

सुब्रह्मण्यशास्त्रिणामाशयस्तु मण्डनसुरेश्वरयोरैक्यमिति । तत्साधने च कतिपयहेतवः सन्तीति तत्र संबन्धवार्तिकब्रह्मसिद्धिग्रन्थयोः समानविषयत्वं बहुत्रेति हेतुरेकः । एवमन्येऽपि ब्रह्मसिद्धिप्रस्तावनायां दर्शिताः । अस्मिन् पक्षे पूर्वाश्रमविलिखितांशान् कांश्चन स्वयमेव उत्तराश्रमस्वीकारानन्तरं सिद्धान्तानुगुण्येन अविरोधिन एव वार्तिके योजयामासुः सुरेश्वरा इति किंचिदिव युक्तं सुवचं च ।

1. बृ.वा. 4-4-796, 797 2. Ibid 4-4-810 3. द्र. ब्रह्मसिद्धिप्रस्तावना

मण्डनपदस्य गौरवपदसूचकत्वपक्षेऽपि व्यक्त्यैक्ये न काऽपि हानिः इति केषांचन विमर्शः । तद्भेदपक्षे मण्डनोक्ताः काश्चन युक्तीः संयोज्य स्वसिद्धान्तविरुद्धार्थ-खण्डनं कृतमिति वार्तिककृतामसाधारणं कार्यमिदम् । तथा शांकरभाष्ये कतिपयविषयाः संक्षेपेणोक्ताः, त एव मण्डनमिश्रेण वितानिता इत्यपि सुवचम् । इत्थमन्यत्र कर्तृविवेचनं कैश्चित्कृतम् । वयमत्र भेदपक्षमेवावलम्ब्य वार्तिकनैष्कर्म्यसिद्धिग्रन्थविमर्शं किंचिदिव कर्तुं प्रयतामहे ।

यद्यपि पंचीकरणवार्तिकं, दक्षिणामूर्तिस्तोत्रीयमानसोल्लासटीका याज्ञवल्क्यस्मृतिटीका बालक्रीडेति सन्ति सुरेश्वरीयाः ग्रन्थाः । अथापि प्राधान्येन तैत्तिरीयबृहदारण्यकवार्तिकद्वयं, नैष्कर्म्यसिद्धिरिति प्रकरणग्रन्थः इत्येतत्त्रयमत्र विमृश्यते ।

वार्तिकं नाम उक्तानुक्तदुरुक्तचिन्तनमिति राजशेखरः काव्यमीमांसायाम् । आनन्दगिरिटीकायाम् -

उक्तानुक्तद्विरुक्तादिचिन्ता यत्र प्रवर्तते ।
तं ग्रन्थं वार्तिकं प्राहुर्वातिकज्ञा मनीषिणः ॥

इत्यन्यथाऽपि तल्लक्षणं निरुक्तम् । उभयथापि संगमयितुं शक्यते । भाष्यकारैरुक्तस्यैवात्र स्फुटीकरणं, भाष्यगम्यस्य वाचानुक्तस्य जिज्ञासूनामर्थे परिपूरणम्; प्रतिवादिभिर्दुरुक्तस्य भाष्येऽनूदितस्य शून्यवादादेर्विशदीकरणम्; द्विरुक्तस्य च सार्थकीकरणमित्यादिचिन्ता वार्तिके दृश्यत एव । वार्तिकविवेचितं बृहदारण्यकभाष्यं च काण्वोपनिषद्भाष्यमेव । तदपि सकलोपनिषदर्थसंशोधनार्थमेव काण्वोपनिषद्व्याख्यानव्याजेन प्रवृत्तम् । इदमपि वार्तिकारंभ एव सुरेश्वराचार्याः प्रकाशयन्ति । यथा

यां काण्वोपनिषच्छलेन सकलाम्नायार्थसंशोधिनीम् ।
संचक्रुर्गुरवोऽनुवृत्तगुरवो वृत्तिं सतां शान्तये ।[1] इति ॥

अत्र वृत्तिशब्देन भाष्यमेव गृह्यते । उत्तरार्धेन वार्तिककरणोद्देशः स्फुटितः । अर्थाविष्करणं कुतार्किककृताशंकासमुच्छित्तये तस्या न्यायसमाश्रितेन

1. सं.वा. 2

वचसा प्रक्रम्यते लेशत इति । अनेन कुतार्किककृताशंकोच्छेदनमेव स्वकीयवार्तिकस्योद्देश इति गम्यते । इदं च वार्तिकं वार्तिकामृतमिति कथ्यते, तथा द्वादशसहस्रग्रन्थात्मकं च । एवमेव तैत्तिरीयवार्तिकं वार्तिकामृतमिति तत्रैव लिखितम् ।

तैत्तिरीयकसारस्य वार्तिकामृतमुत्तमम् ।
मस्करीन्द्रप्रणीतस्य भाष्यस्यैतद्विवेचनम् ॥[1] इत्यन्ते ।

बृहदारण्यकवार्तिके संबन्धवार्तिकमिति प्रथमं विभज्यते । पूर्वोत्तरकाण्डयोः संबन्धवर्णनार्थं भाष्यवत् अस्यापि प्रवृत्तत्वात् । तत्र च श्लोकसंख्या षट्त्रिंशदुत्तरशताधिकमेकसहस्रम् इति गणिता । अथापि तद्विरुद्धतया गणनं कृतम्; यथा-

शतानि दश चैकं च चत्वारिंशत्तथाऽष्ट च ।
श्लोकाः संबन्धभाष्येऽस्मिन् संख्याताः संख्यया खिलाः ।

इत्येवं न्यूनाधिक्ये कारणं गवेषणीयं केचन परिभ्रष्टा वेति ।

एवमेव प्रथमाध्यायान्ते -

चत्वार्येव सहस्राणि श्लोकानां द्वे शते तथा ।
श्लोकाः पंचदशान्ये च तृतीयस्यैव संङ्गहः ॥ इति ।

अत्रापि संख्यावैपरीत्यं दृश्यते ।

तत्र	प्रथमब्राह्मणे	श्लोकाः	9
	द्वितीयब्राह्मणे	श्लोकाः	227
	तृतीयब्राह्मणे	श्लोकाः	389
	चतुर्थब्राह्मणे	श्लोकाः	1853
	पञ्चमब्राह्मणे	श्लोकाः	390
	षष्ठब्राह्मणे	श्लोकाः	93
	आहत्य श्लोकाः		2961 इति गणिताः ।
	आदितः समष्टचङ्काः		4094 इति गणिताः ।

1. तै.वा 3-10-48

एवं द्वितीयाध्याये,

प्रथमब्राह्मणे	श्लोकाः	611
द्वितीयब्राह्मणे	श्लोकाः	31
तृतीयब्राह्मणे	श्लोकाः	254
चतुर्थब्राह्मणे	श्लोकाः	485
पञ्चमब्राह्मणे	श्लोकाः	147
षष्ठब्राह्मणे	श्लोकाः	5
आहत्य श्लोकाः		1533 इति गणिताः ।

शतानि दश पञ्चैव श्लोकाः सप्तदशापरे ।
श्लोकसंख्यात्र विज्ञेया चतुर्थाध्यायवार्तिके ॥ इति ।

आदितः 5630 श्लोका इति दर्शिताः ।

तृतीयाध्यायान्ते

त्रयोदशैव ज्ञेयानि पञ्चमेऽस्मिन् समासतः ।
शतानि वार्तिकग्रन्थे षष्ठे वक्ष्याम्यतः परम् ॥ इति ।

तत्र	प्रथमब्राह्मणे	श्लोकाः	59
	द्वितीयब्राह्मणे	श्लोकाः	165
	तृतीयब्राह्मणे	श्लोकाः	173
	चतुर्थब्राह्मणे	श्लोकाः	189
	पञ्चमब्राह्मणे	श्लोकाः	214
	षष्ठब्राह्मणे	श्लोकाः	29
	सप्तमब्राह्मणे	श्लोकाः	60
	अष्टमब्राह्मणे	श्लोकाः	181
	नवमब्राह्मणे	श्लोकाः	210
आहत्य श्लोकाः			1280 इति गणिताः ।

एवं चतुर्थाध्यायान्ते,

त्रिसाहस्री तथा पञ्च शतान्यत्र समासतः ।
चत्वारिंशत्तथा श्लोकाः षष्ठाध्यायस्य वार्तिके ॥ इति ।

प्रथमब्राह्मणे	श्लोकाः	35
द्वितीयब्राह्मणे	श्लोकाः	113
तृतीयब्राह्मणे	श्लोकाः	1975
चतुर्थब्राह्मणे	श्लोकाः	1345
पञ्चमब्राह्मणे	श्लोकाः	30
आहत्य श्लोकाः		3498 इति गणिताः ।

पञ्चमाध्यायान्ते

प्रथमब्राह्मणे	श्लोकाः	130
द्वितीयब्राह्मणे	श्लोकाः	3
तृतीयब्राह्मणे	श्लोकाः	5
चतुर्थब्राह्मणे	श्लोकाः	5
पञ्चमब्राह्मणे	श्लोकाः	14
षष्ठब्राह्मणे	श्लोकाः	7
सप्तमब्राह्मणे	श्लोकाः	3
अष्टमब्राह्मणे	श्लोकाः	4
नवमब्राह्मणे	श्लोकाः	3
दशमब्राह्मणे	श्लोकाः	7
एकादशब्राह्मणे	श्लोकाः	4
द्वादशब्राह्मणे	श्लोकाः	6
त्रयोदशब्राह्मणे	श्लोकाः	5
चतुर्दशब्राह्मणे	श्लोकाः	15
पञ्चदशब्राह्मणे	श्लोकाः	9
षोडशब्राह्मणे	श्लोकाः	83
सप्तदशब्राह्मणे	श्लोकाः	23
आहत्य	श्लोकाः	326 इति गणिताः ।

षष्ठाध्यायान्ते

प्रथमब्राह्मणे	श्लोकाः	39
द्वितीयब्राह्मणे	श्लोकाः	163
तृतीयब्राह्मेण	श्लोकाः	62
चतुर्थब्राह्मणे	श्लोकाः	127
पञ्चमब्राह्मणे	श्लोकाः	25
आहत्य	श्लोकाः	416 इति गणिताः

एवं सर्वत्र न्यूनतायां कारणं तु गणनाविपर्यय एव । द्वात्रिंशदक्षरमितं हि छन्दः, उत तावत्संख्यास्वरयुतं वा ग्रन्थशब्देनाभिधीयते । इदमेकमनुष्टुप् छन्दः । अत्र वार्तिके ग्रन्थाभिधेयश्लोकाः अनुष्टुप्छन्दोबद्धाः प्रायेण सन्ति । तद्भिन्नच्छन्दांसि मङ्गलश्लोकादीनि अत्यन्तं विरलानि । एवं स्थितेऽत्र गणनाविपर्ययः परीक्षणीयः । कथं? द्वात्रिंशदक्षरग्रन्थानामिव सार्धश्लोकानामष्टचत्वारिंशदक्षरमितानां संख्या निबद्धा दृश्यते । यथा संबन्धवार्तिके-

औपगवो नृपहयस्तथा श्येनचिदादयः ।
नैतदेवं यतस्तत्र नैवं प्रत्यक्तयेष्यते ॥
अन्येनान्यस्य संबन्धः कृशोऽहमितिवत्क्वचित् ॥[1] इति ।

एवमन्येऽपि[2] श्लोकाः अत्र उपलभ्यन्ते ।
क्वचिदेकार्धमात्रश्लोकाः संख्यया परिगणिताः[3] ॥

तथा वार्तिके सर्वत्र गणनाविपर्ययोऽस्तीति परीक्षकैः शोधनीयः ।

षडध्यायात्मकबृहदारण्यकभाष्यवत् इदमपि संपूर्णं वर्तते । बृहदारण्यकस्य भर्तृप्रपञ्चभाष्यं 'द्वयाह' इत्यादि माध्यन्दिनश्रुतिमधिकृत्य प्रवृत्तम् । तत्र तत्र भाष्यकाराः भर्तृप्रपञ्चाभिमतं व्याख्यानं खण्डयन्ति यथा तथैव वार्तिककारा अपि

1. सं.वा. 117
2. संबन्धवार्तिके 132, 159, 267, 270 इत्येते श्लोकाः ।
3. यथा 265, 268, 210, 302, 311 इत्येतेऽपि एकार्धमात्रश्लोकाः ।

तदीयनामोल्लखेनापि तन्मतं खण्डयन्ति इति दृश्यते । एवं श्रुतिविरुद्धप्रक्रियाणां भाष्यवदेव खण्डनमपि विस्तरेण कृतमेतैः ।

तत्र संबन्धवार्तिकेऽपरमतोक्तसंबन्धनिराकरणपूर्वकं सयुक्तिकं भाष्योक्त-संबन्धपुष्टीकरणं तद्द्रढीकरणं वा वार्तिककृतामसाधारणं कार्यम् ।

वेदान्तप्रक्रियाविषये सुरेश्वरदर्शिता विशालदृष्टिः

यया यया भवेत्पुसां व्युत्पत्तिः प्रत्यगात्मनि ।
सा सैव प्रक्रिया ज्ञेया साध्वी सा चानवस्थिता ॥[1]
प्रक्रियानियमो नापि पुंव्युत्पत्तिप्रधानतः ।
प्रतिश्रुतिविगीतिश्च प्रक्रियाणां समीक्षते ॥[2]

इति प्रत्यगात्मव्युत्पादनमेव प्रधानीकृत्य तत्साधनीभूताः प्रक्रियाः साध्वीरनवस्थिता अङ्गीचक्रुर्वार्तिककाराः । प्रक्रियानियमोऽपि नास्तीति कण्ठरवेणोचुः । इदमेव सिद्धान्तलेशसंग्रहदर्शितविविधवेदान्तप्रक्रियाणां नवनवरूपाणामवतरणे बीजमभवत् । अत एव प्रत्यगात्मबोधनेऽवस्थात्रयपरिशोधिनी प्रक्रिया । अपरा च सृष्टिप्रक्रिया । अन्या च विधिरूपेण तत्त्वबोधिनी । निषेधरूपेण च 'नेति नेतीति' वाङ्मनसातीतप्रत्यगात्मबोधिनी अध्यारोपापवादन्यायेन । आद्या माण्डूक्योपनिषदि बृहदारण्यके च । द्वितीया तैत्तिरीयादौ । तृतीया तु मूर्तामूर्तब्राह्मणे, तैत्तिरीये च । कठवल्ल्यां च 'अशब्दमस्पर्श' मित्यादौ; तथा मुण्डकेऽपि । पञ्चकोशविवेकरूपेण च तत्त्वबोधिनी प्रक्रिया । सा तैत्तिरीयादौ प्रसिद्धैव । एवमेव बहुविधप्रक्रियाणां नवनवानामद्वैतसिद्धान्ते वल्लरीणामिव उत्तरोत्तरविताने बीजमिदमेव । सुरेश्वरोक्तिर्विशालदृष्टिपरा । वस्तुतः प्रतिश्रुतिविगीतसृष्टिविषये विप्रतिपत्तौ तस्या अनवस्थिततत्वमप्रधानतयेति वर्णनाय 'प्रक्रियानियमो नास्ती'त्यादिवार्तिकम् । अथापि 'यया ययेति' द्वितीयवार्तिकेण इतरप्रक्रियाणामपि प्रत्यगात्मबोधनप्रवणानां श्रुत्यविरुद्धानां नियमो नास्तीत्यत्रैवाशयः स्फुटितः । सुरेश्वरमतानुसारिणश्च अप्पय्यदीक्षिताः ।

1. बृ.वा. 1-4-402
2. Ibid 1-4-401

'प्राचीनैर्व्यवहारसिद्धविषयेष्वात्मैक्यसिद्धौ परम् ।
सन्नह्यद्भिरनादरात्सरणयो नानाविधा दर्शिताः'[1] ॥ इति वदन्ति ।

अन्याऽपि विशालदृष्टिः स्वीया प्रकटिता । यथा - सर्वशास्त्रसमुद्यमोऽपि आत्मज्ञानावतारार्थः । अत एव तेषां विरोधेऽप्यविरोधप्रतिपादनं निवृत्त्यर्थमिति । तदुक्तम्-

यदर्थं सर्वशास्त्राणां प्रवृत्तिरतिविस्तरा ।
आत्मज्ञानावतारार्थः सर्वशास्त्रसमुद्यमः ॥
विरोधः सर्वशास्त्राणां स्वाभिधेयव्यपेक्षया ।
निवृत्त्यर्थेऽविरोधित्वादत एतत्समीरितम् ॥
स्वत एव यतः पंसां प्रवृत्तिः स्वार्थसिद्धये ।
तत्रानुवादि शास्त्रं स्यान्निवृत्तावेव तन्मितिः ॥[2]

इत्येवमुक्त्वा सर्वशास्त्राणां साक्षादेव प्रतीच्येव प्रामाण्यमेष्टव्यमित्यप्याहुः ।

अपि वात्स्यायनादीनां शास्त्राणामुक्तहेतुतः ।
प्रामाण्यमविरुद्धं स्यादैकात्म्यज्ञानजन्मने ॥[3] इति

ततोऽपि वात्स्यायनादिकामशास्त्रतो भोगप्रवृत्तस्य पुरुषस्य निवृत्तिहेतुत्वाभावात् कथं प्रत्यग्बोधे पर्यवसानं तेषामित्याशङ्क्य समादधुः-

प्रवर्तमानः पुरुषः शास्त्रोद्दीपितवर्त्मना ।
प्रवृत्तिविषयं दुष्टं दृष्ट्वाऽतो विनिवर्तते ॥[4] इति ।

तथा च भोगादौ दुःखमवलोक्यापि विषयदोषदर्शनेन निवृत्तो विरक्तः सन् पुरुष आत्मज्ञानेऽवतरेदिति समाधानतात्पर्यम् ।

एवं वैशेषिकादितन्त्राणां तथा वैनाशिकतन्त्राणामपि प्रत्यग्बोधार्थत्वमिति सुरेश्वराः । यथा

1. सि.ले.सं. श्लो. 2
2. बृ.वा. 1-4-405, 406, 407
3. Ibid 1-4-408
4. Ibid 1-4-409

अनित्यदुःखशून्यत्वं पदार्थानां ब्रुवन् स्फुटम् ।
बुद्धोऽपि रागाद्युच्छित्तौ यतते नात्मनिह्नुतौ ॥[1]

त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमम् ।
त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदम् ।[2] इति ।

अत्र टीकाकारणामानन्दगिरीणामुक्तिश्च; यथा, कामशास्त्रे नन्दिकेश्वरादिभिरनेकधा कृते कामो धर्माविरुद्धोऽवान्तरफलम् । यथाह न कामस्तत्र परमं फलम् । उक्तं हि, तेषां समवाये पूर्वः पूर्वो गरीयानिति ।

धर्ममर्थं च कामं च प्रत्ययं लोकमेव च ।
पश्यन्नेतस्य तत्त्वज्ञो न च रागात्प्रवर्तते ॥ इति ।

तत्तु वैराग्यद्वारा प्राप्ततत्त्वज्ञानस्य कैवल्यम् । यथाह,

एवमर्थं च कामं च धर्मं चाप्याचरन्नरः ।
इहामुत्र च निश्शल्यमत्यन्तं सुखमश्नुते ॥
तदेतत्कुशलो विद्वान्धर्मार्थाववलोकयन् ।
नातिरागात्मकः कामी प्रयुञ्जानः प्रसिद्ध्यति ॥ इति ।

न च साधारणसांप्रयोगिककन्यासम्प्रयुक्तकभार्याऽधिकारिकपारदारिक-वैशिकोपनिषदिकाद्यधिकरणेषु अर्थान्तरप्रतिपादनात् न यथोक्तार्थतेति वाच्यम् । तत्रार्थान्तरोपदेशस्य वैराग्यार्थत्वात् । यथाह -

अधिकारवशादुक्ता ये चात्राचारवर्जिताः ।
तदनन्तरमत्रैते प्रयत्नाद्विनिवारिताः ॥ इति ।

तदेवं शास्त्रान्तराण्यपि कामशास्त्रवत् परमसुखे ब्रह्मणि पर्यवस्यन्तीति भावः । यथाह सर्वज्ञवचनार्थो नाम क्षणिक नैरात्म्यादिचातुरर्थ्यसत्यतत्त्वपरिज्ञानेन सकलसंसारदुःखनिवृत्त्याख्यः परमपुरुषार्थ इति; अतो न तद्दर्शनं नैरात्म्यसाधकम् । तत्प्रतिपादकाभावेन तदसिद्धेरिति ।

1. बृ.वा. 1-4-410
2. Ibid 1-4-411 सं.वा. 215

वार्तिकप्रस्थाने मुख्यविषयाः

वार्तिकेऽनेकेषु विषयेषु सत्स्वपि मुख्यविषयाः केवलं संकलीक्रियन्ते । तत्राव्याकृतवादस्थाव्याकृतपदार्थो नित्याज्ञानं, नित्यचैतन्याश्रयविषयकं, तथेश्वरान्तर्यामिसाक्षिजीवादिस्वरूपं प्रत्यक्स्वरूपं च वाचकानां परिचयार्थं तदुक्तरीत्या प्रदर्शयिष्यामः ।

वार्तिकेऽव्याकृतशब्दप्रयोगव्यवस्थाप्रसङ्गे 'तद्धेदं तर्ह्यव्याकृतमासी' दित्यत्र 'आत्मानात्मद्वयार्थविवक्षयाऽत्र प्रयोगः' इति निर्णीतः । क्वचिदात्मैव विवक्ष्यते, क्वचित्त्वनात्मैव, क्वचिदुभयमपि । यथा-

विवक्षातश्च शब्दानां प्रयोगो जगतीक्ष्यते ।
यथा ग्रामादिशब्दानां तथेहाप्यवसीयताम् ॥
निवासश्च निवासी च तथा चोभयमुच्यते ।
ग्रामशब्देन लोकेऽस्मिंस्तथेहापि जगद्गिरा ॥
क्वचिदात्मैव निर्देश्योऽनात्मैव क्वचिदुच्यते ।
तथोभयविवक्षाऽपि व्याकृताव्याकृतोक्तितः ॥
यत्र नाशादिमद्वस्तु प्राधान्येन विवक्ष्यते ।
तत्रानात्मैव वाच्योऽर्थः प्रत्यगात्मोपसर्जनः ॥
अस्थूलोऽजरः शुद्धो यत्र चाप्यभिधीयते ।
प्रत्यगात्मविवक्षैव तत्र ज्ञेयाऽभिधानतः ॥[1]

अव्यक्तं व्याकृतं विश्वं यत्र चाप्यभिधीयते ।
आत्मानात्मद्वयार्थैव विवक्षा तत्र गम्यते ॥[2]

इत्युक्तदिशाऽन्तिमश्लोकेन आत्मानात्मोभयविवक्षेति ज्ञेयम् । तत्रापि व्याकृताव्याकृतात्मकजगतोऽविद्यामात्रयाथात्म्यादात्माविद्यैवाव्याकृतपदेन ग्राह्येति निर्णयमाहुः । यथा

प्रथते वैश्वरूपेण यतोऽविद्यैव सर्वदा ।
अविद्यामात्रयाथात्मादतस्तद्धेदमुच्यते ॥[3] इति ।

---

1. बृ.वा. 1-4-522, 523, 524, 525, 526
2. Ibid 1-4-527
3. Ibid 1-4-207

यद्यपि

अविद्याकर्मसंस्कारास्तेजोऽप्क्ष्मासूत्रसंश्रयाः ।
खे लीनास्त्वस्तितामात्रा अव्यक्ताख्याः सहात्मना ॥[1]

इति वार्तिकेण अविद्यादिसंस्काराः भूतचतुष्टयसहिताः सूत्रात्मसंश्रिता आकाशे लीनाः केवलं सन्मात्रा भोक्त्रात्मना सह प्रलयेऽव्यक्ताः अव्याकृतशब्देन गृहीताः । अथापि 'प्रथते....' इति वार्तिकेण सर्वेषां मूलभूतप्रत्यगात्माविवेककल्पितत्वात् सैव प्राधान्येनाव्याकृत शब्देन ग्राह्या । तत्राप्यज्ञातात्मा वा, आत्माज्ञानं वा जगत्कारणमिति, तथाध्यासरूपसंसारस्यापि तदेव कारणमिति निष्कर्षेण निरुक्तम् । तेन प्रधान वादनिरासोऽप्यव्याकृतवादे कृतः । यथा - 'आत्मन्यध्यासरूपोऽयम्' इत्यारभ्य 'यदात्मके नामरूपे' इति श्लोकपर्यन्तमयं विषयः प्रतिपादितः । इयमेव सर्वशक्यस्य सर्जनोपयोगिशक्ति-शब्देन, पराविवेक शब्देन, प्रकृतिमायाशब्देन, मृत्युतमोऽप्शब्दैश्च वार्तिकेऽभिहिता। इयमेवाध्यासकारणीभूता मूलाविद्या टीकाकारैस्तत्र तत्राभिधीयते । वार्तिके च मौली अविद्येत्युक्तम् । मूलमेव मौली, स्वार्थे प्रत्ययः । इदमेव मूलं टीकाकाराणां मूलाविद्यापदेन व्यवहरणे ।

नामरूपादिना येयमविद्या प्रथतेऽसती ।
माया तस्याः परं सौक्ष्म्यं मृत्युनैवेति भण्यते ॥[2]
मृत्युर्वै तम इत्येवमाप एवेदमित्यपि ।
अविद्या प्रथते मौली व्यक्ताव्यक्तात्मनाऽनिशम् ॥[3]

आत्माऽविद्यैव नःशक्तिः सर्वशक्यस्य सर्जने ।
नातोऽन्यथा शक्तिवादः प्रमाणैरवसीयते ॥[4]

परोऽविवेको भूतानामात्माऽविद्येति कथ्यते ।
ईशादिविषयान्तं यत्तदविद्याविजृम्भितम् ॥[5]

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
इति वेद शिरस्सूक्तिस्तथा चोद्धुष्यते स्फुटा ॥[6]

1. बृ.वा. 1-4-205
2. Ibid 1-2-135
3. Ibid 1-2-136
4. Ibid 4-3-1784
5. Ibid 1-4-381
6. Ibid 1-4-382

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
वैष्णवी खल्वियं मायेत्यपि लोकेऽपि गीयते ॥[1] इति ।

इदमेव निमित्तमुपादानं च द्वैतस्येत्युक्तम् । यथा -

अस्य द्वैतेन्द्रजालस्य यदुपादानकारणम् ।
अज्ञानं तदुपाश्रित्य ब्रह्म कारणमुच्यते ॥[2]

बुद्ध्यादिष्वपि सूक्ष्मेषु यत्सूक्ष्मतममुच्यते ।
बुद्ध्यादिकारणं नित्यमात्माऽविद्येति भण्यते ॥[3] इति ।

अस्यैव चोपादानत्वमन्वयिकारणत्वरूपं मृद इव घटादीन् प्रति समर्थितम् । बुद्ध्यादिकार्ये जाड्यगुणान्वयात् इति । यथा

तमोऽन्वयस्तमः कार्ये बुद्ध्यादावेव युज्यते ।
न त्वकारणकार्येऽस्मिन्नित्युबुद्धे परात्मनि ॥
वृत्तिं च लभते कार्यं न स्वकारणतोऽन्यतः ।[4] इति ।

अत्र च स्वकारणतो मूलाविद्यात एव बुद्ध्यादिवृत्तिलाभः इति वदन्तस्तत्परिणामित्वं स्फुटयन्ति वार्तिककाराः । इयमविद्याऽध्यासहेतुरिति तत्रैवोक्तम्

एतन्निदानमधुना मिथ्याज्ञानं निरूप्यते ।
यतो बिभ्यति भूतानि संसारानर्थलक्षणात् ॥[5] इति ।

हेतुं विना अध्यासश्च नोपपद्यत इति तत्रैवोक्तम् ।

अध्यासश्च विना हेतुं न लोक उपपद्यते ॥[6]
तस्माद्धेतूपदेशाय यः कारणमितीर्यते ॥[7] इति ।

इयं च चैतन्याश्रितेति तत्रैव -

1. बृ. वा 1-4-383
2. Ibid 1-4-371
3. Ibid 4-3-348
4. Ibid 4-3-1530
5. Ibid 1-4-385
6. Ibid 1-4-478
7. Ibid 1-4-479

प्रमात्रादिविविक्तार्थमनुभूयोत्थितस्ततः ।
नावेदिषमिति प्राह स्वानुभूत्यनुसारतः ॥[1]

प्रमात्राद्युत्थितेः पूर्वं चिदन्यानन्वयात्तमो ।
विशेषणा चिदेवैका स्वानुभूत्यैव गम्यते ॥[2] इति ।

इयं च प्रमेयभूता । तत्र च प्रमाणान्तरं नेष्यते ।

असाधारणमज्ञानं प्रतीच्येव यतः स्थितम् ।
एतत्प्रमेयमेवातः प्रमाणं नान्यदिष्यते ॥[3] इति ।

सेयं साक्ष्यनुभवसिद्धा,

न वेद्मीत्यनुभूतिर्हि सर्वेषामात्मसाक्षिका । इति ।

इयं चाभावविलक्षणा,

मिथ्याज्ञानस्य वस्तुत्वं येनैव स्यात्सदात्मना ।
अज्ञानस्यापि तेनैव सत्यत्वं केन वार्यते ॥[4]

तत्र दृष्टान्तमाह,

रज्जुसर्पो यथा रज्वा सात्मकः प्राग्विवेकतः ।
अवस्तु सन्नपि ह्येष इति पूज्यैरपीरितम् ॥[5] इति ।

वस्तुतस्तु अज्ञानमिथ्याज्ञानयोः स्वरूपतो न सत्यत्वम् अविचारितसिद्धत्वादिति । इयं चागन्तुकी न भवति । अन्यथाऽनिर्मोक्षप्रसङ्गः ।

आगन्तुं चेदिहाज्ञानमनिर्मोक्षः प्रसज्यते ।
पुरेवानागतं भूयो नेष्यतीत्यत्र का प्रमा?[6] इति ।

अनादेरप्यस्या उच्छित्तिः संभवति विद्यायाम् -

नित्यस्यानुच्छित्तिरिति चोद्यस्यापि न संभवः ।
नित्याज्ञानसमुच्छित्तौ यतः प्रमाण्यमाश्रितम् ॥[7] इति ।

1. बृ. वा 1-4-289
2 Ibid 1-4-290
3. Ibid 1-4-179
4. Ibid 1-4-442
5. Ibid 1-4-443
6. तत्रैव 1-4-361
7. Ibid 1-4-359

आत्मानात्मनोरविद्यासंबन्धश्च न परमार्थतः -

योऽप्यविद्यादिसंबन्धः सोऽप्यविद्याप्रकल्पितः ।
वास्तवस्त्वभिसंबन्धो नोपपत्त्यात्मनो यथा ॥[1]

अविद्वद्दृष्ट्यैवात्मनि उक्ताविद्यास्वीकार इत्यपि ।

स्वतो बुद्धे कुतोऽविद्या तामृते संसृतिः कुतः ।
इति बुद्धात्मतत्त्वस्य गीरियं न तमस्विनः ॥[2]

अवस्थात्रयेऽपि प्रत्यग्दृष्ट्याऽज्ञानाभावः । पराग्दृष्ट्या तु अज्ञस्य प्रतीच्यविद्याकल्पनम् इति । यथा

नैवाज्ञानं मृषाज्ञानं संशयज्ञानमीक्ष्यते ।
प्रत्यक्प्रवणया दृष्ट्या जाग्रत्स्वप्नसुषुप्तिषु ॥[3]
पराक्प्रवणया दृष्ट्या धीस्थोऽज्ञोऽज्ञानमात्मनि ।
व्योमकार्ष्ण्यादिवत्तज्जं संभावयति न स्वतः ॥[4] इति ।

एतावन्तमव्याकृतपदार्थो विचारितः ।

दृष्टृश्रोत्रादिरूपश्च यश्च द्रष्ट्रादिसाक्ष्यपि ।
बुद्धितत्कारणोपाधी क्षेत्रज्ञेश्वरसंज्ञकौ ॥[5] इति ।

अत्र ईश्वरः बुद्धिकारणनित्याज्ञानोपाधिकः । स एव साक्षी । क्षेत्रज्ञस्तु जीवो बुद्ध्युपाधिक इत्युक्तम् । साक्षिभेदः प्रतिदेहं व्यवहारदशायामपि न विद्यते । तदुक्तम् ।

मातृमानप्रभेदेऽपि प्रतिदेहं न भिद्यते ।
साक्षी बाह्यार्थवद्यस्मात्स आत्मेत्युच्यते ततः ॥[6]

अविज्ञातं परं तत्वं जनिमत्कारणं श्रुतौ ।
आन्त्यात्कार्यात्तदेव स्यात्सर्वकार्यविशेषणम् ॥[7] इति ।

---

1. बृ.वा. 4-3-95
2. Ibid 1-4-311
3. Ibid 1-4-299
4. Ibid 1-4-298
5. Ibid 1-4-614
6. Ibid 3-4-54
7. Ibid 1-4-15

अत्र अज्ञातं ब्रह्मैव जायमानपृथिव्यादिकार्यान्तमपि मूलकारणमित्युक्तम् ।

विष्णुः साक्षात्परमात्मा । स च स्वात्मचैतन्याभासानुविद्धतमोरूपोपाधि-सहितः सन् सूत्रादिकार्येण विशिष्टः तेजोऽबन्नादि ससृजे, न तु तत्त्वतः ।

तेन तेनात्मकार्येण स्वात्माभासतमोऽवधिः ।
विशिष्टः ससृजे विष्णुस्तेजोऽबन्नादिमायया ।[1] इति ।

कूटस्थस्यापि स्रष्टृत्वमविद्यया, तथा कारणत्वं च । इदमपि ज्ञानोदय पर्यन्तं नित्यम् ।

अविद्ययास्य स्रष्टृत्वं कूटस्थस्यापि सर्वदा ।
यथा वस्तुधियः सूतेः प्राङ्नित्यं तेन तन्मतम् ॥[2] इति ।

अज्ञाननिमित्तं साक्षित्वं, साक्षिस्वरूपं च

अज्ञानमात्रोपाधित्वादविद्यामुषितात्मभिः ।
कौटस्थ्यान्निर्द्वयोऽप्यात्मा साक्षीत्यध्यस्यते जडैः ॥[3]

मोहतत्कार्यनीडं यत्कूटस्याभासरूपकम् ।
ज्ञानं तदविनाभूतः परः साक्षीति भण्यते ॥[4] इति साक्षित्वम् ।

ईश्वरस्वरूपम् -

सर्वज्ञः सर्वशक्तिश्च सर्वात्मा सर्वगो ध्रुवः ।
जगज्जनिस्थितिध्वंसहेतुरेष सदेश्वरः ॥[5]

अन्तर्यामिस्वरूपम्; तथा ईशस्यैव हरिब्रह्मादिनाम

यः पृथिव्यामितीशोऽसावन्तर्यामी जगद्गुरुः ।
हरिर्ब्रह्मा पिनाकीति बहुधैकोऽपि गीयते ॥[6] इति

प्रत्यक् स्वरूप विवरणम्; तत्र व्यासवाक्यम् -

---

1. बृ.वा. 1-4-16
2. Ibid 1-4-17
3. Ibid 1-4-372
4. Ibid 1-4-374
5. Ibid 1-4-376
6. Ibid 1-4-377

यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ।
यच्चास्य सन्ततो भावस्तस्मादात्मेति कथ्यते ॥[1] इति ।

अस्योपव्याख्यानम् :-

यस्मादर्थे तु विज्ञेया यच्छब्दाः सर्व एव तु ।
समुच्चये च शब्दाश्च तथा सर्वत्र योजयेत् ॥[2]

व्याप्नोत्यनवशेषेण सर्पादीन्स्रगिवाखिलान् ।
प्रत्यक्तयाऽनात्मनोऽतः प्रत्यगात्मेति भण्यते ॥[3]

स्वचिदाभासमोहेन तदुत्थानखिलान्यतः ।
आदत्तेऽनात्मनः प्राज्ञे ततश्चात्मेति तं विदुः ।[4]

अत्र श्रुतिं प्रमाणयति -

पर आत्मनि सर्वेऽपि संप्रतिष्ठन्त एकले ।
पृथिव्याद्या अनात्मान इति चाथर्वणे वचः ॥[5]

यच्चात्तीत्यस्य व्याख्यानम्-

स्वात्माभासाः पराचीना धीवृत्तीर्विषयोन्मुखाः ।
प्रत्यगत्ति यतोऽतोऽसावात्मेत्युक्तो मनीषिभिः ॥[6] इति

अत्र प्रमाणमाह-

विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक् ।
आनन्दभुक्तथा प्राज्ञ इति चागमशासनम् ॥[7] इति ।

यच्चास्येत्यस्य व्याख्यानम्-

अव्यावृत्ताननुगतः पूर्णः स्वात्मन्यवस्थितः ।
यतोऽस्य सन्ततो भावस्तस्माच्चात्मेति शब्द्यते ॥[8] इति ।

---

1. बृ.वा. 1-4-737
2. Ibid 1-4-738
3. Ibid 1-4-739
4. Ibid 1-4-741
5. Ibid 1-4-742
6. Ibid 1-4-743
7. Ibid 1-4-744
8. Ibid 1-4-745

तत्र प्रमाणम् :-

तद्विष्णोरिति मन्त्रोऽपि विष्णोस्तत्परमं पदम् ।
चक्षुर्वदाततं व्योम्नि व्याचष्टे प्रत्यगात्मनि ॥[1]

इति कारिकाभिः प्रत्यगात्मा मुख्यात्मरूप इति व्युत्पत्त्या निरुक्तः । तथा च स्वारोपितजगति व्याप्नुवन्, तथा स्वाविद्याकल्पितं प्रपञ्चं स्वात्मन्युपसंहरन् बहिर्विषयाकारान्तःकरणवृत्तिप्रतिबिम्बितचिदाभासाख्यज्ञानविशेषान् द्रष्ट्रादि-रूपेणानुभवंस्तथा स्वरूपतोऽव्यावृत्तोऽननुगतश्च सूत्रमणिगणविलक्षणः परिपूर्ण आत्मेति, स एव प्रत्यगात्मेति विविधमात्मशब्दनिर्वचनेन दर्शितः ।

साक्षी सौषुप्तानुभवसिद्धः

निष्क्रियश्चेतनः साक्षी सक्रियोऽचेतनः पराक् ।
व्यावृत्तश्च प्रमात्रादेः सिद्धः साक्षी सुषुप्तगः ॥[2]

साक्ष्यनुभवाभावे नावेदिषं सुषुप्तेऽहमिति जागरिते तत्परामर्शो न सुवचः । बुद्ध्यादेर्लीनत्वात् देहादेश्च जडत्वात् नावेदिषमितीक्षणं तदा केन कथमिति दुर्निरूपम् । अतो नावेदिषमिति तमःसिद्धिः साक्षिण चिदाभासैकमात्रैणेति साधितम् ।

स्मृतिनिश्चितिसंशीतिरागादिहिरुगात्मसु ।
अहंरूपेण योऽन्वेति स प्रमाता परो मतः ॥[3]

स्मरणादिविभागेन ज्ञातर्येकत्र यत्पृथक् ।
प्रथतेऽनेकरूपाभं तज्ज्ञानं ज्ञातृकर्तृकम् ॥[4]

संवित्तन्मोहधीवृत्तिशरीरादिविशेषणम् ।
भोक्तरीह यदा भाति तत्प्रमाणफलं स्मृतम् ॥[5]

इति प्रमातृज्ञानप्रमाणफलस्वरूपमुक्तम् ।

---

1. बृ.वा. 1-4-746
2. Ibid 3-4-102
3. Ibid 3-4-106
4. Ibid 3-4-107
5. Ibid 3-41-09

अपि च प्रमातुः साक्ष्यत्वमेव, तद्व्यतिरेकेण साक्षिणः सिद्धेरिति, तथा आत्मनः कर्तृत्वं जडोपाधितः, चिद्रूपेण च भोक्तृत्वमिति वार्तिके दर्शितम् ।

द्विधेतं द्वीतमित्याहुस्तद्भावो द्वैतमुच्यते ।
तन्निषेधेन चाद्वैतं प्रत्यग्वस्त्वभिधीयते ॥[1]

इति अद्वैतं मण्डनोक्तविलक्षणं वार्तिककृत्संमतम् । मण्डनमिश्रैः शब्दाद्वैतसत्ताद्वैतभावाद्वैतपक्षा य उक्तास्तान्नाङ्गीकुर्वन्ति ।

अभिधानाकृतिर्नाम शब्देनेहाभिधीयते ।
अभिधेयाकृतिस्तद्वद्रूपमित्युपदिश्यते ॥[2] ॥

इति अभिधानाभिधेययोरपि नामरूपयोः कल्पितत्वेनाव्याकृतकार्यत्वेन च तदतीतपरब्रह्मणः शब्दाद्वैतरूपत्वासंभवात् न प्रथमपक्षस्यावसरः । एवम्-

अव्यावृत्ताननुगतं तद्वैतत्प्रत्यगात्मनि ।
तद्दर्शनादृषिः साक्षात् पश्यन्सर्वं प्रपन्नवान् ॥[3] इति ।

निर्विशेषनिस्सामान्यस्वरूपं ब्रह्मेति वर्णनात् मण्डनोक्तसत्ताद्वैतवादस्य नावसरः । तथा 'नेति नेती'ति वाक्यं सर्वथा भावाभावोभयरूपं द्वैतमपि निराकरोति नाभावं परिशिनष्टि । तथा प्रमात्रादीनामभावो येन चैतन्यात्मना सिद्ध्यति तमपि नञ्शब्दो लक्षणया बोधयतीति भावाद्वैतवादोऽपि वार्तिककारैर्निराकारि ।

अध्यासं प्रत्यनाद्यज्ञानं केवलं हेतुः । सर्वत्राध्यासं प्रति सामान्यज्ञानं विशेषाज्ञानमारोप्यस्मृतिरित्येतत्त्रयं हेतुरिति मतं न साधु । अपि तु मोहमात्रं[4] हेतुः । कुतः? व्यभिचारात् । शुक्तौ रजताध्यासे शुक्तित्वजडत्वादिषु शुक्लत्वमात्रग्रहणं सामान्यज्ञानमिति न सुवचम् । रजतस्मरणं तु भ्रमे न हेतुः । तत्स्मरणेऽपि केषांचन तदनुत्पादात् । सामान्यविशेषशून्ये गगने सर्वेषां गगनं नीलमिति नैल्यभ्रमो भवति । तत्र सामान्यज्ञानं विशेषाज्ञानं वा दुरुपपादम् । तत्रैव च पूर्वादिदिग्विभागं च कल्पयन्ति जनाः । स्वाप्नभ्रमस्थले उक्तसामग्री सुतरां दुर्लभा । एवं सादृश्यज्ञानं

1. बृ.वा. 4-3-1807
2. Ibid 1-4-391
3. Ibid 1-4-1445
4. अनाद्यज्ञानं हेतुरित्यर्थः

पुरोवर्तिवस्तुप्रत्यक्षं च कारणमित्यपि न सम्यक्, गगननैल्यादिभ्रमे व्यभिचारात् । तस्मादविद्यैव भ्रमहेतुः, अन्वयव्यतिरेकाभ्याम् ।

रजतज्ञानस्य स्मृतित्वनिरासः

शुक्तिकानुविधायित्वान्नेदं स्मर्तव्यसंश्रयम् ।
अनालिंगितबाह्यार्था बुद्धावेव स्मृतिर्यतः ॥[1] इति ।

तथा स्मृतिभ्रान्त्योर्भूतार्थविषय निरासः ।
स्वोत्पत्तिव्यतिरेकेण ज्ञानकालोऽपि नेष्यते ।

अगत्वरं सद्विज्ञानं भूतार्थं ढौकते कथम् ।[2] इत्यादिना ।

एतेन ज्ञानसमसमयोत्पत्तिमत्त्वं भ्रान्तिस्थले विषयस्योक्तं भवति । एवं रजतादेर्भ्रमस्थले प्रत्यक्षत्वमेव । नाप्रत्यक्षत्वमिति वार्तिककाराः । तत्संक्षेपस्त्वयम् - येषां मते ज्ञानमप्रत्यक्षं तन्मते इदं रजतमिति ज्ञानं कथं शुक्तावनुभूयते? असाधारणधर्मोत्पादितस्य साधारणकारणेन इदृशव्यपदेशो न संभवी । शुक्तौ च न रजतधर्माः सन्ति । कथं तदाकृतिज्ञानं भवेत्? न हि आकारानालिङ्गितं किंचिदपि ज्ञानं प्रसिद्धम् । अतः प्रत्यक्ष इदं पदार्थे शुक्तिकादौ तद्विरुद्धं तदज्ञानेन केवलेन रजताभं प्रत्यक्षज्ञानं जायत इति साधु । इत्थं च प्रकृतेऽपि आत्माविद्ययैव अध्यासाय अलमिति किमन्यैर्हेतुभिरिति । एवमेवाध्यासभाष्येऽपि अविवेकमात्रेणाध्यासो दर्शितः । मिथ्यज्ञानं प्रति कारणतयाऽन्यदज्ञानं नास्तीति खण्डितम् । यथा-

मिथ्याज्ञानातिरेकेण नान्यदज्ञानमिष्यते ।
येषां तान्प्रति चोद्यं स्यान्नत्वज्ञातात्मवादिनाम् ॥[3] इति ।

वार्तिकदर्शितसिद्धान्तविरुद्धपक्षाः, खण्डनानि च

1) ज्ञानं विधेयमिति वादः । 2) कर्मैकमेव मोक्षायालमिति वादः । 3) कामविलयेन मोक्ष इति वादः । 4) ज्ञानकर्मसमुच्चयादेव मोक्ष इति वादः । 5) प्रपञ्चप्रविलयादेव मोक्ष इति वादः । 6) ज्ञानं कर्मविशेष इति वादः ।

---

1. बृ. वा. 1-4-454
2. Ibid 1-4-457
3. Ibid 1-4-420

7) वासनानिरोधमनोनिरोधयोर्मोक्षार्थं वेदान्तेषु विधानमिति वादः । 8) वेदमात्रमपि कार्यपरमिति वादः । 9) प्रसंख्यानवादः । इत्येते नवपक्षाः शांकरभाष्य एवानूद्य खण्डिताः । तत्राद्यः समन्वयाधिकरणे तथा उभयलिङ्गाधिकरणे । अत्रैव प्रपञ्चप्रविलयेन मोक्ष इति पञ्चमोऽपि पक्षः खण्डितः । द्वितीयस्तु प्रस्थानत्रयेऽपि । तृतीयस्तु बृहदारण्यकभाष्ये तृतीयाध्याये । एवं चतुर्थोऽपि प्रस्थानत्रये । षष्ठस्तु समन्वयाधिकरणे । सप्तमो बृहदारव्यकभाष्ये प्रथमाध्याये । अष्टमः समन्वयसूत्रभाष्ये बृहदारण्यकभाष्ये च खण्डितः । प्रसंख्यानवादस्तु आवृत्त्यधिकरणे बृहदारण्यके च खण्डितः । अथापि भाष्यकारदर्शितसिद्धान्तानां स्फुटीकरणाय युक्तिभिः पुष्टीकरणाय च वार्तिके सुरेश्वराचार्याणां, प्राधान्येन एतत्पक्षखण्डने प्रयतनम् ।

अविद्याद्वयवादः तत्खण्डनं च

आत्मनि विषये नैसर्गिकी अविद्यैका । अनात्मविषये तु आगन्तुकी चापरा । अत्र नैसर्गिकी स्वाभाविकी, आगन्तुकी त्वस्वाभाविकी । एवंजातीयमविद्याद्वयमात्रं खण्डितम् । न तु अग्रहणान्यथाग्रहणरूपाविद्याद्वयवादः । स खल्वङ्गीकृतो मण्डनैरिवात्रापि । तत्र आद्याविद्यानिरासार्थं ज्ञानाभ्यासः कर्तव्य इति मतमित्थं खण्डितम् । अज्ञानं, संशयः, मिथ्याज्ञानमितीदं त्रयमप्यज्ञानमेव । अस्य चात्मा प्रत्यगेव विषयः । तदतिरिक्तं न किंचिदपि प्रमेयमस्ति । अत एव उक्ताविद्याद्वयं नांगीकर्तव्यमिति । अविद्यासत्वे न किमपि प्रमाणम् । केवलमनुभवमात्रसिद्धा । तन्मूलकं हि प्रमाणतदभावाप्रमाणादिकम् । तस्मात् प्रमाणादपि प्रागेवाविद्या स्वीकार्या । सा च आत्मैकविषयाश्रया । सेयं न जानामीति साक्ष्यनुभवसिद्धा । अतः स्वप्रकाशे वस्तुनि कथं सेति आक्षेपोऽपि न संगच्छते । प्रमाणे सति तेन वस्तुगताज्ञाननिवृत्तेरपि हेतोः प्रमाणसिद्धत्वमस्या बाधकं दुर्वचं च । अविचारितसिद्धैषा । सापि विचारे सति प्रतीचि न स्यादेव । समीचीनज्ञाने खलु अविद्यैव नास्तीति सिद्ध्यति । सेयमविद्वद्दृष्ट्या आत्माश्रयविषया । अनात्मवस्तुनि न स्वीक्रियते । तस्य स्वतो जडत्वात् । अविद्याकार्यस्य कस्यचनापूर्वस्याभावात् । अविद्याजन्यत्वादन्तःकरणाद्यनात्मसु तदाश्रयत्व-मनुपपन्नमेव । न जानामीत्यविद्याकृत्यस्यावरणकार्यस्य स्वप्रकाशे चेतने

सुवचत्वादिति सैषा आत्माश्रयेति । एतद्विषये वार्तिकानि प्रागेवोदाहृतानि । अविद्यया अनादेर्ज्ञानाभावरूपतोक्तावपि न तत्वतस्तद्रूपत्वम् । अभावस्य निःस्वरूपत्वात् तुच्छत्वेन कारणत्वाभावप्रसंगात् । अतोऽविद्याया अधिष्ठान-सदात्मना सत्ताङ्गीकारेण सद्रूपत्वस्वीकृतेरभावविलक्षणरूपत्वम् । तदपि न वास्तवमुत्तरत्र बाधात् । अतोऽनिर्वाच्यत्वं विचारदृष्ट्या । अविद्याशब्दस्तु मिथ्याज्ञानसंशययोरनात्मवस्तुनि च प्रयुज्यते । तत्त्वतः परामर्शे तेषामविद्यामूलकत्वेन तद्रूपत्वादिति । परं तु गौणः । मूलशक्तौ मायायां मुख्यः ।[1]

अविद्यया आत्मनि कल्पितद्वैतविभागः ईदृशः । आत्माऽविद्यासंबन्धः, तेनात्मानात्मानौ, ज्ञाताज्ञाते, सत्यासत्ये, ज्ञातृत्वाज्ञातृत्वे, व्यक्ताव्यक्ते, व्यष्टिसमष्टी, क्रियाकारके, साक्षी, ईश्वरोऽन्तर्यामीत्यादि, सृष्टिस्थितिलयाः, अवस्थात्रयम्, एतत्सर्वं द्वैतविभागे मुख्यतया वर्णितम् । प्रत्यग्दृष्टिकरणेऽविद्यानाशात् सर्वमिदं द्वैतमनुनश्यति समकालमेव ।

वार्तिकमते वेदवाक्यप्रामाण्यम्

उक्ताविद्यातत्कार्यं च द्वैतमात्मतत्त्वाविचारनिबन्धनमिति तदुभयं वाक्यजन्यज्ञानेनैव निवर्तते[2] । शास्त्रमपि प्रत्यक्षादिप्रमाणवत् यथावद्वस्तु बोधयतीति तत्प्रमाणम् । मण्डनमिश्रोक्तरीत्या शास्त्रस्य निरवद्यत्वादेव तदुक्तार्थस्य अबाधितत्वात् तदप्रामाण्यशंकायाः नावसरः । अप्रामाण्यहेतुभूतानामनवबोध-संशयबाधानामभावादेव वेदवाक्यं वाक्यमात्रं वा प्रमाणीभवत्येव । तच्चोक्तम्-

न च वेदोक्तितो वेदः श्रद्धेयार्थ इहेष्यते ।
किं त्वमानत्वहेतूनां वेदवाक्येष्वसंभवात् ॥
प्रामाण्यं वेदवाक्यानां न च मानान्तराश्रयात् ।
अक्षादेरपि मानत्वं यथोक्तादेरेव कारणात् ॥[3] इति ।

---

1. एतद्ग्रन्थप्रणेतृभिरेव 'मूलाविद्या भाष्यवार्तिकसंमता' इति ग्रन्थः प्रणीतः । जिज्ञासुभिरवलोकनीयः स ग्रन्थः ।
2. द्र.सं.वा. 1007
3. बृ.वा. 2-4-325, 326

कार्यबोधेनैव प्रामाण्यमिति मीमांसकमतं वा तदनुयायिमतं वा न समीचीनम् । इष्टप्राप्त्यनिष्टपरिहारोपायबोधनपरत्वेन तस्य प्रामाण्यं विधिनिषेधस्थले । ब्रह्मवाक्येषु तु आत्मतत्त्वावरणप्रतिबन्धनिरासेन आत्मस्वरूप-प्राप्तिसाधनबोधनपरत्वेनैव प्रामाण्यं निर्वाह्यम् ।

इतिहासादिप्रामाण्यम्

इतिहासपुराणादयस्तु श्रुतिमूलकत्वेन प्रमाणम् । प्रत्यक्षवेदवचनविरुद्धं बुद्धवाक्यादिवत्तेष्वपि श्रुतिविरोधात् त्याज्यमेव वाक्यं ब्रह्मात्मैक्यं कथं बोधयति? अविद्यां च कथं निवर्तयति? इति सुरेश्वराचार्याः विशेषेण विमर्शं चक्रुः । सर्वत्र महावाक्ये अहमिति शब्दं प्रयुक्तं महावाक्यीयं लोके स्वात्मनि प्रयुञ्जते लौकिकाः । ब्रह्मशब्दं तु सर्वतो महदित्यर्थे प्रयुञ्जते, यतः तत एवेमौ पदार्थौ नाप्रसिद्धौ । एवं लोकप्रसिद्धयोरेव ब्रह्मात्मनौरैक्यमतीन्द्रियं शास्त्रमेव बोधयति इति । संबन्धवार्तिके-

नात्मन्येवात्मशब्दस्य प्रयोगात्स्यादलौकिकः ।
ब्रह्मार्थोऽपि महत्त्वेन प्रसिद्धो व्यवहारतः ॥
एवं पदात्परिज्ञाते पदार्थे लोकमानतः ।
वाक्यार्थोऽतीन्द्रियो वेदे वाक्यात् केन निवार्यते ॥[1] इति ।

अत्र दृष्टान्तमाह -

अपूर्वदेवतास्वर्गपदार्थेष्वपि लोकतः ।
सिद्धेष्वतीन्द्रियोऽप्यर्थो वाक्यादेवावगम्यते ॥[2] इति ।

अत्रायमर्थः, कृतिसाध्यं कार्यमपूर्वम् । तच्च मानान्तरेणापि वेद्यमिति न्यायात् लोकतोऽधिगतम् । इन्द्रादिदेवताऽपि लोकतः सिद्धा । वज्रहस्तमिन्द्रमालिखान्ति, पाशहस्तं वरुणमिति हि प्रसिद्धम् । स्वर्गोऽपि सुखविशेषो लोकविशेषो वा लोकादेवावगम्यते परं तु सामान्यतः । एवं प्रसिद्धेषु तेषु तच्छब्दानां शक्तिधीः ज्ञातशक्तिपदसंघातरूपवाक्यात् विशिष्टार्थदृष्टिर्यथा तथा आत्मब्रह्मरूपार्थयोर्लोक-सिद्धयोरेवाखण्डैकरसरूपो मानान्तरागोचरो वाक्यार्थो वाक्यादेव सिद्ध्यति इति ।

1. सं.वा. 861, 862 2. Ibid 863

तथा आत्मा तत्त्वतो ब्रह्मैव, ब्रह्मापि चात्मैवेत्यतोऽपि हेतोर्वाक्यमात्रेण तदैक्यं सुज्ञेयं नाद्भुतं चेति वर्णितम् ।

आत्मनो ब्रह्मता यत्र ब्रह्मणोऽप्यात्मता स्वतः ।
तत्त्वमस्यादिवाक्योत्थबोधाच्चेत्किमितीहते ॥[1] इति ।

लोकवादवैलक्षण्यं महावाक्यस्य

किं च वाक्यस्य लोके संसर्गबोधकत्वं वा भेदबोधकत्वं वा अतद्व्यावृत्तिरूपाभावबोधकत्वं वा । अत्र यथाक्रममुदाहरणम् । नीलमुत्पलमिति नैल्य-उत्पलत्वयोस्तादात्म्यरूपसंसर्गबोधकत्वम् । राज्ञः पुरुष इत्यादौ तु षष्ठ्याः स्वस्वामिभावसंबन्धार्थकतया भेदनैयत्येन च राजपुरुषयोर्भेदबोधकत्वम् । बौद्धमत इव गौरित्यत्र गवेतरव्यावृत्तिरूपापोहबोधकत्वम् । एवं लौकिकवाक्ये सृष्टपदार्थ-बोधकत्वं मतभेदेनास्ति । तथा वैदिके च कर्मोपासनाकाण्डवाक्ये प्रथितम् । अथापि तत् त्रितयं ब्रह्मवाक्ये ज्ञानपरे महावाक्ये वा न सुवचम् । यतो हि 'अयमात्मा ब्रह्म', 'अहं ब्रह्मास्मि' इत्यादौ भेदः संसर्गोऽपोहो वा नावगम्यते, अविवक्षितश्च । उक्तत्रयस्याप्याविद्यकत्वेन तदपनयनमेव वेदान्तवाक्यीयमुख्यव्यापार इति वक्तव्यम् । वस्तुत आत्मा ब्रह्मेति पदार्थद्वयमपि नास्ति । अत एव द्वयाधीनो भेदोऽप्यसंभवी, तत्संसर्गश्च । स्वतोऽसंगत्वात्, तद्व्यतिरेकेण चान्यस्याभावात् । तथा स्वेतराभावरूपोऽपि नात्मेति ।[2]

किंच महावाक्ये सर्वत्र सामानाधिकरण्यप्रयोगादपि द्वयमप्येक एव पदार्थ इति वक्तव्यम् । तदपि परस्परविशेषणत्वेन निर्दिष्टं सत् ब्रह्मणि परोक्षत्वमात्मनि दुःखित्वं च निवर्तयदेव बोधयति तत्त्वमसीत्यादौ । घटाकाशो महाकाश इति वाक्यार्थवन्महावाक्यार्थोऽपि ज्ञेयः ।

एवमवगमोत्तरं साक्षाद् ब्रह्मैवाहमित्यनुभवे चिन्मात्ररूपोऽयमात्मा भेदसंसर्गादिरहितो वस्तुतोऽवाक्यार्थ इति च ज्ञेयम् । तदुक्तम् -

1. बृ.वा. 1-4-818 2. द्र.सं.वा. 902-910

भेदसंसर्गहीनत्वात्पदवाक्यार्थतात्मनः ।
दुःसंभाव्योऽत आत्मायमात्मनैवानुभूयते ॥[1] इति ।

अवाच्यब्रह्मणो महावाक्यबोध्यत्वशङ्का, तन्निरासश्च

अत्र सुप्तप्रबोधदृष्टान्तेन परिहारः । यथा सुषुप्तपुरुषं बोधयितुं तदीयनाम्ना 'देवदत्त उत्तिष्ठे'ति प्रयुक्तेन घोषमात्रेण स पुरुषः प्रबुद्धो भवति तत्र च शब्दात् संबन्धज्ञानं विनैव स बोध आनुभाविकः, तथा प्रकृतेऽविद्यानिद्रायां प्रसुप्तं पुरुषं बोधयितुमाचार्योपदिष्टेन 'तत्त्वमसी'ति वाक्येन वस्तुतो ब्रह्मस्वरूपस्य स्वस्यावाच्यत्वेऽपि बोधो भवति । शब्दस्याचिन्त्यशक्तित्वेन तदज्ञाननिबर्हणे सामर्थ्यमस्त्येव । अतस्तेन ब्रह्मज्ञानं संभवेदेव । तदपि मृत्युरूपं सत् रोगं निवर्तयदौषधमिव स्वतःसिद्धशुद्धबुद्धमुक्तस्वभावमात्मानमवशेषयदज्ञानं च निवर्तयदेव स्वयं विनिवर्तते । रोगनिवर्तकौषधस्य यथा निवर्तकान्तरं नास्ति नापेक्ष्यते च तथा ज्ञानस्यापि निवर्तकान्तरं नापेक्ष्यते । तदुक्तम्-

माहात्म्यमेतच्छब्दस्य यदविद्यां निरस्यति ।
सुषुप्त इव निद्राया दुर्बलत्वाच्च बाधते ॥

दुर्बलत्वादविद्याया आत्मत्वाद्बोधरूपिणः ।
शब्दशक्तेरचिन्त्यत्वाद्विद्मस्तं मोहहानतः ॥

अगृहीत्वैव संबन्धमभिधानाभिधेययोः ।
हित्वा निद्रां प्रबुद्ध्यन्ते सुषुप्ते बोधिताः परैः ॥

जाग्रद्वन्त यतः शब्दं सुषुप्ते वेत्ति कश्चन ।
ध्वस्तेऽतो ज्ञानतोऽज्ञाने ब्रह्मास्मीति भवेत्फलम् ॥

अविद्याघातिनः शब्दाद्योऽहं ब्रह्मेति धीर्भवेत् ।
नश्यत्यविद्या सार्धं हत्वा रोगमिवौषधम् ॥[2] इति ।

यद्यपि मण्डनाचार्या इव सुरेश्वराचार्या अपि विरोधसमाधानं प्रत्यक्षादिविषये एकरीत्यैव ब्रुवन्ति, तथाप्यस्ति विशेषः । यथा तद्वदविरोधाभ्युपगमेन परिहारक्रमः।

1. बृ.वा. 1-4-1408
2. बृ.वा. 1-4-859, 860, 861, 862, 863 द्र.नै.सि. 3-105, 106,

वस्तुतः एकस्मिन् विषये प्रमाणानां संप्लवो न संभवत्येव, तद्वादोऽपि नैषामभिमतः। अतः प्रमाणानां प्रातिस्विकविषयनैयत्येन विरोध एव नास्ति; अतोऽपि तत्परिहारोऽनवसर एवात्र। किं च स्वतः सिद्ध आत्मनि प्रमाणकृत्यमपि प्राकट्यादि अनात्मनीव नास्ति। प्रमातृप्रमाणादीनामपि तदधीनत्वात् तदुत्तरकालिकत्वाच्च।

मोक्षस्वरूपम्

अविद्यास्तमयो मोक्षः सा च बन्ध उदाहृतः।
निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः॥[1]

अत्राविद्यैव बन्धः, तदस्तमय एव मोक्ष इत्युक्तम्। सर्वस्यापि कल्पितस्य प्रपञ्चस्य अविद्यामूलकत्वेन अविद्यैव बन्ध इति तन्निवृत्तिरेव मोक्ष इति चोक्तेस्तात्पर्यम्। सा च ज्ञातत्वेनोपलक्षितात्मरूपैव। न तदतिरिक्ताऽवशिष्यते। अतो निवृत्तिपदार्थेन द्वैतशंकाया नावकाशः। आत्मज्ञानमात्रेणैव अविद्यातत्कार्यनिवृत्तौ सामान्यतः सुषुप्तिरेव दृष्टान्तः बृहदारण्यकश्रुतिदर्शितः। यथा सुषुप्तौ स्वात्मा अविद्यारहितो भेदरहितश्च सन् स्वयं भासते तथा ज्ञान्यपि स्वात्मानमविद्यातत्कार्यरहितमसंसारिब्रह्मरूपं पश्यति। अस्य मुक्तात्मनो जीवद्दशायामन्यद्रूपमनन्तरं चान्यद्रूपमिति रूपद्वयं नास्ति, एकरूपैव मुक्तिः। यथाहुः-

यस्मादेतत्स्वतो बुद्धं स्वतश्शुद्धमतोऽद्वयम्।
प्रमात्रादेस्तदज्ञाननिवृत्तौ विनिवृत्तितः॥

मुक्तं चातस्स्वतस्तत्त्वं मुक्तमित्युपचर्यते।
तदविद्यादिविध्वंसात् त्रिर्वश्शपथयाम्यहम्॥

योऽक्रियाकारकं साक्षादक्रियाकारकात्मकः।
आत्मानमात्मनैवात्मा साक्षाद्वेत्ति सुषुप्तवत्॥

---

1. अयं श्लोकः वार्तिकेऽन्विष्यमाणोऽपि नोपलब्धः, लघुचन्द्रिकाकारैस्तु वार्तिकश्लोक इत्युद्धृतः, परंतु मण्डनमिश्रैः ब्रह्मसिद्धौ दर्शितः। प्रायेण मण्डनमिश्राणां वार्तिककाराणां चाभेदपक्षमाश्रित्य चन्द्रिकाकारैरुदाहृतः स्याद्वा? विपश्चित एवात्र प्रमाणम्।

न तस्य जीवतः कश्चिद्विशेषोऽस्ति मृतस्य वा ।
यतः सर्वविशेषाणामविद्यैवास्ति कारणम् ॥[1] इत्यादिना ।

अत्र भर्तृप्रपञ्चमतं, तत्खण्डनं चेत्थम् - शरीरे वर्तमाने ब्रह्मसाक्षात्कार-प्राप्तिरेको मोक्षः मरणानन्तरं ब्रह्मणि लयोऽपरो मोक्ष इति तन्मतम् । तत्खण्डनं तु-

एवं परिजिहीर्षन्ति न तु न्यायोक्तिरीदृशी ।
प्राप्तोऽसीति मुनेरुक्तेः परिहारो न युज्यते ॥
तज्ज्ञानमात्रमेवोक्त्वा प्राप्तोऽसीति यतोऽवदत् ।
तत्साक्षात्करणान्नान्यस्तल्लयो वाऽत इष्यते ॥[2] इति ।

"ब्रह्मवेद ब्रह्मैव भवति"[3] इत्युक्तिरपि केवलमौपचारिकीत्युक्तम् । मुक्तिं प्रति देहपातो नावश्यकः । कार्यस्य स्वकारणे लयार्थं देहपातोऽपेक्ष्यत इति युक्तम् । तत्त्वज्ञानमिदं तु कार्यकारणभावमेवापगमयदुदेति, तस्मिन्नुदिते न किंचिदवशिष्यते । प्रागप्यज्ञानेनात्मनि न कश्चित्परिणामः पारमार्थिकः संजातो रज्वामिव सर्पः । तदुत्तरं बाधदशायां वा न कश्चिदप्यपूर्वो विशेषः संजातः । रज्जुस्वरूपस्य सदा अप्रच्युतत्ववत् आत्मनः सदा अप्रच्युतस्वरूपत्वादिति । जीवन्मुक्तिर्विदेहमुक्तिरिति मुक्तिद्वयवादे पूर्वोक्तरीत्या तिरस्कृतेऽपि सद्योमुक्तिः क्रममुक्तिरितीदं द्वयं भाष्यकारा इवाभ्युपयन्ति । यत उपासनानां ब्रह्मलोकप्राप्तिमुखेन तत्र ज्ञानान्मुक्तिरिति । 'अनावृत्तिश्शब्दादि'ति सूत्रभाष्यवदत्रापि स्वीकृता ।

मोक्षसाधनविचारः

तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः ।
अविद्या सह कार्येण नासीदस्ति भविष्यति ॥[4]

इत्येतादृशज्ञाने जननीये परमाधिकारिणां योग्यता आवश्यकी । तदर्थं नित्यकर्मानुष्ठानं, तेन पुण्यसंपत्तिः, तथा दुरितक्षयः, ततः चित्तशुद्धिः, तथा

1. बृ.वा. 4-4-302, 303, 304, 306
2. Ibid 4-2-103, 104
3. मुं. 3-2-9
4. सं.वा. 183

संसारमण्डले नित्यानित्यविवेकः, तेन वैराग्यं, ततो मुमुक्षुत्वं चेत्येवं क्रमेण साधनचतुष्टयसंपत्तिमती योग्यता । किं च, कर्मतत्साधनत्यागरूपः सन्यासः । तेन योगः चित्तस्य बाह्यवैमुख्येन अन्तर्मुखतालक्षणः । एवं संपन्नयोग्यतावत एव अधिकारिणो महावाक्यार्थज्ञानेन साक्षात्कारपर्यवसायिना अविद्यातत्कार्यनाशे स्वात्मरूपे ब्रह्मण्यवस्थानम् ।[1]

मुक्तौ ज्ञानेतरसाधनपराकृतिः द्रष्टव्या । ज्ञानमेवैकं मोक्षसाधनम् । न कर्म, उपासनं वा, प्रपंचप्रविलयो, निरोधो योगशास्त्रसंमतो वा साक्षात्कारणम् । संबन्धवार्तिके ज्ञानं मोक्षसाधनं नेति पक्षं कर्मसुमच्चयपक्षं तत्प्रतिनिधिपक्षं च सर्वं खण्डयामासुः । न केवलं तत्रैव, अपि तु तैत्तिरीयभाष्यवार्तिके बृहदारण्यकवार्तिकेऽन्यत्र नैकर्म्यसिद्धौ च । भाष्यकारकृतखण्डनानां परिपोषार्थमेव वार्तिककृतां पुनः खण्डने प्रवृत्तिः । एतदर्थं मण्डनोक्तयुक्तीनामुपयोगोऽपि वार्तिके दर्शितः । नूतनयुक्तीनामायोजनमपि दृश्यते । मुख्या वादा इमे वार्तिककृता खण्डिताः ।

१. योगशास्त्रोक्तचित्तनिरोधेनैव कैवल्यमिति वादः । २. महावाक्यादेव ज्ञानं न संभवति, अतो भावनयैवोत्पन्नज्ञानेन मुक्तिरिति वादः । ३. वाक्यजन्यज्ञानस्य संसर्गात्मकतया मुक्तिहेतुत्वं न संभवति । अतोऽसंसर्गज्ञानसंपत्तये ध्यानं कर्तव्यमिति वादः । ८. वाक्यज्ञानेनाज्ञाननाशेऽपि वासनाप्राबल्येन तद्वर्तेतैवेति तन्निबर्हणाय ज्ञानाभ्यासरूपं प्रसंख्यानं कर्तव्यमिति वादः । एते वादाः वाक्यज्ञानमहिमानं नीचीकृत्य ध्यानविधिमुच्चपदवीमारोपयितुं प्रवृत्ता वादाः । एतत्खण्डनं तु वार्तिके दृश्यते[2] । किं तु पदार्थज्ञानानन्तरं वाक्यार्थज्ञानमपरोक्षं भवति । तदुत्तरं साधनं न किमपि कर्तव्यमवशिष्यत इति तद्विशदीकरणं खण्डेन मुख्योद्देशः ।

श्रवणादिसाधनविषये मण्डनाचार्येभ्यो वार्तिककृतां वैमत्यं दृश्यते ।

---

1. द्र.बृ.वा. 1-3-98, 99 नै.सि.9-52
2. 1-4-849, 850, 4-4-767 तः 779, 4-4-811 तः 820 पर्यन्तं तथा 4-4-953 तः 958 पर्यन्तवार्तिकेषु दृश्यते ।

श्रवणादीनि न विधिविषयाणीति मण्डनमिश्राः । वार्तिककृतस्तु तानि विधिविषयाणीत्याहुः ।

दर्शनस्याविधेयत्वात्तदुपायो विधीयते ।
वेदान्तश्रवणं यत्नादुपायस्तर्क एव च ॥[1]

श्रुतिलिङ्गादिकैर्न्यायैः शब्दशक्तिविवेककृत् ।
आगमार्थविनिश्चित्यै मन्तव्य इति भण्यते ॥[2]

वेदशब्दानुरोध्यत्र तर्कोऽपि विनियुज्यते ।
वाच्यवाचकसंबन्धनियमे तस्य हेतुता ॥[3] इति ।

अत्र टीका - 'त्वंपदवाच्यं न देहादि । किं तु तत्साक्षी चिदात्मा । तत्पदवाच्यमपि न प्रधानादि । किं तु सच्चिदानन्दात्मकमद्वयं ब्रह्मेत्येवं विधो वाच्यवाचकसंबन्धनियम इति ।

निदिध्यासनस्वरूपम्

अपरायत्तबोधोऽत्र निदिध्यासनमुच्यते । न तु ध्यानं तर्कः पदार्थविषयः, तथैवानुमितिः । वाक्यार्थज्ञानं तु वाक्यादेव । ध्यानं परं विज्ञानोत्पत्तिसाधनमेव । विज्ञानं निदिध्यासनं श्रवणमननफलरूपं स्वानुभवात्मकम् । तत्फलं तु मुक्तिरेव । अतो निदिध्यासने विधिर्नास्ति श्रवणादिफले । विधिर्नाम श्रवणमननयोरात्मांशेऽज्ञातज्ञापनम् । न पुनरप्रवृत्तप्रवर्तनम् । तत्रापि परिसंख्याविधिर्वार्तिकमते । सूत्रभाष्यकारमते तु नियमविधिः ।

नियमः परिसंख्या वा विध्यर्थोऽत्र भवेद्यतः ।
अनात्मादर्शनेनैव परात्मानमुपास्महे ॥[4] इति ।

सिद्धान्तलेशसंग्रहेऽपि परिसंख्याविधिरुपपादितो दीक्षितचरणैः । 'ब्रह्मज्ञानार्थं वेदान्तश्रवणे प्रवृत्तस्य चिकित्साज्ञानार्थं चरकसुश्रुतादिश्रवणे प्रवृत्तस्येव मध्ये मध्ये व्यापारान्तरेऽपि प्रवृत्तिः प्रसज्यत इति तन्निवृत्तिफलकः श्रोतव्य इति परिसंख्याविधि'रित्यादिना ।

1. सं.वा. 762
2. बृ.वा. 2-2-214
3. Ibid 2-2-216
4. नै.सि. 1-88

श्रवणाङ्गसन्यासः त्रैवर्णिकाधिकारिकः, तदुक्तम्-

यथा त्रयाणामविशेषेण सन्यासः श्रूयते श्रुतौ ।
यदोपलक्षणार्थं स्याद् ब्राह्मणग्रहणं तदा ॥ इति ।

बृहदारण्यकवार्तिकसारे विद्यारण्यस्वामिपादैः सन्यास विषयेऽयमाशयः प्रकटितः ।

ब्राह्मणग्रहणश्रुत्या विप्राणामेव भाष्यकृत् ।
सन्यासेऽधिकृतिं प्राह चतुर्थाश्रमरूप्यसौ ॥
विद्याङ्गतत्फलात्मानं गार्गीविदुरयोरपि ।
स्त्रीशूद्रयोर्भाष्यकारः सन्यासमनुमन्यते ॥[1] इति ।

बृहदारण्यकयीकायां लिङ्गधारणं तु विप्राणामेवेति भाष्यकाराभिप्रायः सर्वकर्मत्यागलक्षणः तत्फलत्यागरूपो वा सन्यासः त्रैवर्णिकसाधारणः । 'ब्राह्मणः क्षत्रियो वापि वैश्यो वा प्रव्रजेद् गृहात्' इति स्मृतेः । एतदवलोकनेनेदमत्र प्रतीयते बृहदारण्यकश्रुतौ "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन"[2] इत्यादौ ब्राह्मणग्रहणमुपलक्षणमिति सुरेश्वराचार्या वर्णयन्तः सन्यासः त्रैवर्णिकाधिकारिक इति साधयन्ति, भाष्यकाराः पुनः विप्राणामेव सन्यासाधिकार इति, सोऽयं विद्याङ्गभूतो विविदिषासन्यासो भाष्यवार्तिकोभय-विवेचने त्रैवर्णिकाधिकारिक इति सुस्पष्टम् । अन्यथा त्रयाणामिति उपलक्षणार्थमिति नैव वदेयुः । विद्याफलीभूतो विद्वत्सन्यासः साहसिकः सर्वलौकिकवैदिक-सकलकर्मोपरतिलक्षणः, सोऽयं वार्तिकसारोक्तरीत्या गार्ग्यादिस्त्रीणां विदुरादिशूद्राणां च जन्मान्तरसुकृतपरिपाकवशात् विद्योदये तत्समका-लिकोऽवार्योऽनुभवसिद्ध उदाहृतो भाष्यकृदनुमत इति । लिङ्गधारणमिति दण्डधारणकाषायग्रहणादिरूपं परमहंसपारिव्राज्यमज्ञानिमुमुक्षुकर्तृकं विविदिषा-सन्यासाभिधानं विप्राणामेव । सर्वकर्मत्यागलक्षणं तु त्रैवर्णिकानामिति आनन्दगिरिटीकाशयो न शोभते । यद्यस्ति त्रैवर्णिकानामेकरूपमेव वक्तव्यम् । अन्यथा भाष्यवार्तिकाप्रदर्शितवैलक्षण्यप्रदर्शनेन टीकाकाराणां न्यूनता वा

1. वा.सा. 3-5-37, 38
2. बृ. 4-4-22

स्वाशयमात्रप्रकटनं वा पर्यवस्यति । तदिदमन्यैर्भाष्यकृदनुयायिभिरादरणीयम्? विद्वद्भिरेव चिन्तनीयमिदम् ।

वार्तिकमते आभासवादः

स्वरूपतो मिथ्याभूतं प्रतिबिम्बमिति वादः । बुद्ध्युपहितः अज्ञानोपहिततादात्म्यापन्नः स्वचिदाभासाविवेकाज्जीवः कर्ता भोक्ता प्रमातेति च कथ्यत इति जीवस्वरूपं वर्णितं वार्तिकरीत्या सिद्धान्तबिन्दौ । "अज्ञानोपहित आत्मा अज्ञानतादात्म्यापन्नः स्वचिदाभासाविविक्तोऽन्तर्यामी साक्षी जगत्कारणमिति च कथ्यते । प्रतिदेहं बुद्धीनां भिन्नत्वात् तद्गतचिदाभासभेदेन चैतन्यमपि भिन्नमिव प्रतीयते । अज्ञानस्य तु सर्वत्राभिन्नत्वात् तद्गतचिदाभासभेदाभावात् तदविविक्तसाक्षिचैतन्यस्य न कदाचिदपि भेदभान"[1] मिति । बिन्दुटीकायामपीदं विवेचितम् । एवमाविद्यकजीवेशभेदस्य महावाक्यजन्यब्रह्मसाक्षात्कारेण अविद्यानिवृत्त्या निवृत्तौ नित्यशुद्धबुद्धमुक्तस्वभावः स्वरूपात्मा अत्रैव भासत इति संक्षेपः ।

1. सि.बि. p.88

नैष्कर्म्यसिद्धिः

नैष्कर्म्यसिद्धिरिति वेदान्तप्रकरणम् । 'अतोऽशेषवेदान्तसारसंग्रह-प्रकरणमिदमारभ्यत' इति ग्रन्थारम्भ एव सुरेश्वरैरुक्तम् ।

प्रकरणार्थश्च "अनर्थानर्थहेतुपुरुषार्थतद्धेतुप्रकरणार्थसंग्रहख्यापनायोपन्यासः"[1] इति तैरेव कण्ठोक्तोऽर्थः । तथा च अनर्थः अनर्थहेतुः पुरुषार्थः तद्धेतुश्चेति प्रकरणेऽस्मिन् प्रतिपाद्याश्चत्वारोऽर्थाः ।

नैष्कर्म्यसिद्धिनामधेयार्थः

नैष्कर्म्यं नाम निष्कर्मभावः कर्मशून्यता । सैषा ज्ञानयोगेन निष्ठा निष्क्रियात्मस्वरूपावस्थितिरिति पर्यवसितार्थः । तस्य सिद्धिः । तामधिकृत्य कृतो ग्रन्थः । नैष्कर्म्यसिद्धिर्हि फलम् । नित्यनैमित्तिकरूपकर्मणामननुष्ठानमात्रान्न सिद्ध्यति । नापि तत्सन्यासात् केवलात् । अपि तु तत्त्वज्ञानसहितात् तत्सन्यासात् ।

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च सन्यसनादेव सिद्धिं समधिगच्छति ॥[2] इति वचनात् ।

तच्च फलं ज्ञानेनाज्ञाननिवृत्तिमात्रेण सेत्स्यति । अथवा नैष्कर्म्यस्य पूर्वोक्तस्य हेतुभूतासिद्धिः, तत्त्वज्ञानमित्यर्थः । तथाच 'ज्ञानतत्फलयोः प्राधान्येन व्यपदेशा भवन्ति' इति न्यायेन ग्रन्थस्य नामकरणम् । ज्ञानानङ्गीकारमतकेवलकर्मवादिमतज्ञानकर्मसमुच्चयवादिमतनिरासस्यात्र ग्रन्थे विशेषतः कृतत्वेन केवलज्ञानमेव मोक्षसाधनं साक्षात् इति सूचनाय तथा नामकरणम्; सिद्धिपदेन केवलतत्त्वज्ञानस्याभिधानात् । भगवानपि -

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां सन्यासेनाधिगच्छति ॥[3] इति ।

---

1. 'ऐकात्म्याप्रतिपत्तिर्या' (1-7) इति श्लोकात् पूर्वं कण्ठतोऽभिहित इत्यर्थः ।
2. भ.गी. 3-4
3. Ibid 18-49

सुरेश्वरा एव स्वोद्देशं प्रकाशीचक्रुः । यथा-

न ख्यातिलाभपूजार्थं ग्रन्थोऽस्माभिरुदीर्यते ।
स्वबोधपरिशुद्ध्यर्थं ब्रह्मविन्निकषाश्मसु ॥[1] इति ।

तेन स्वज्ञानपरिशुद्धिरेव उद्देश इति गम्यते । श्रीगुरुचरणोक्तभाष्योपरि स्वीयापूर्वविषयप्रकाशनमपि नोद्दिष्टम् । यतः स्वस्मिन्नसामर्थ्यमेव प्रकाशीचक्रुः । यथा

गुरूक्तो वेदराद्धान्तस्तत्र नो वच्म्यशक्तितः ।
सहस्रकिरणव्याप्ते खद्योतः किं प्रकाशयेत् ॥[2] इति ।

ग्रन्थस्वरूपस्थितिः

अयं च ग्रन्थः कारिकातद्वृत्तिरूपः । अध्यायचतुष्टयमत्र । प्रथमे शतं कारिकाः । द्वितीये एकोनविंशत्युत्तरशतम् । तृतीये षड्विंशत्युत्तरशतम् । चतुर्थेऽष्टसप्ततिः । आहत्य त्रयोविंशत्युत्तरचतुश्शतम् । कारिकावृत्तिश्च तैरेवारचिता । सा च प्रतिकारिकासंबन्धोक्तिरूपा । नैष्कर्म्यसिद्धितात्पर्यज्ञाने सेयमावश्यकीति तैरेवान्ते बोधितम् ।

प्रथमाध्याय आदौ संक्षेपेण पदार्थत्रयं प्रतिपाद्यमाहुः-

ऐकात्म्याप्रतिपत्तिर्या स्वात्मानुभवसंश्रया ।
साऽविद्या संसृतेर्बीजं तन्नाशो मुक्तिरात्मनः ॥[3] इति ।

अत्र अविद्यासंसृतेर्बीजमित्यनेन अनर्थोऽनर्थहेतुश्च, तन्नाशो मुक्तिरिति पुरुषार्थ इत्येतत्पदार्थत्रयम् । वेदान्तवाक्यजन्यसम्यग्ज्ञानमेव परमपुरुषार्थसाधनं, न कर्मेति संक्षेपेण प्रतिज्ञाय प्रतिज्ञातार्थशुद्ध्यर्थं पूर्वोत्तरपक्षरूपेण आअध्यायपरिसमाप्तेः विस्तरेण विषयं वितेनुः । तदपि ज्ञानं तत्त्वमस्यादिवाक्यत एवेति बह्वीभिरुपपत्तिभिः प्रकाशितम् । तदिदमाहुः द्वितीयाध्यायारम्भे "प्रत्यक्षादीनामनेवं विषयत्वात्[4] तेषां स्वारम्भकविषयोपनिपातित्वात्,

1. नै.सि. 1-6
2. Ibid 1-5
3. Ibid 1-7
4. आत्माऽविषयत्वात् ।

आत्मनश्चाशेषप्रमेयवैलक्षण्यात् सर्वानर्थहेत्वज्ञानापनोदिज्ञानदिवाकरोदयहेतुत्वं वस्तुमात्रयाथात्म्यप्रकाशनपटीयसस्तत्त्वमस्यादेः वचस एव'' इति । अयमेव प्रथमाध्यायार्थः । अतः परं द्वितीयाध्यायार्थस्तत्रैव - 'अतस्तदर्थाप्रतिपत्तौ यत्कारणं तदपनयनाय द्वितीयाध्याय आरभ्यत, इत्युक्त्या वाक्यार्थज्ञानं प्रति उपायभूततत्त्वंपदार्थविवेचनं विस्तृतमत्र । तृतीये तु अज्ञानतत्कार्यद्वैतापनोदो वाक्यादेव तत्तत्पदार्थाभिज्ञस्य । अतो वाक्यव्याख्यानाय उद्यमः । चतुर्थाध्यायस्तु - प्रागुदिताध्यायत्रयोक्तार्थस्य विस्तृतस्य संक्षेपेण कथनात्मकः ।

आत्मानात्मा च लोकेऽस्मिन्प्रत्यक्षादि प्रमाणतः ।
सिद्धस्तयोरनात्मा तु सर्वत्रैवात्मपूर्वकः ॥

अनात्मत्वं स्वतः सिद्धं देहाद्भिन्नस्य वस्तुनः ।
ज्ञातुरप्यात्मता तद्वन्मध्ये संशयदर्शनम् ॥

असाधारणांस्तयोर्धर्मान् ज्ञात्वा धूमाग्निवद्बुधः ।
अनात्मनोऽथ बुद्ध्यन्ताञ्जानीयादनुमानतः ॥

इदमित्येव बाह्येऽर्थे ह्यहमित्येव बोद्धरि ।
द्वयं दृष्टं यतो देहे तेनायं मुह्यते जनः ॥[1] इति ।

केन पुनर्न्यायेन आत्मानात्मनोरश्वमहिषयोरिव विभागः क्रियत इति न्यायप्रदर्शनार्थमाह - सप्तमकारिकायां प्रागुदितन्यायेनैव इदमहंपदार्थयोर्विभागो ज्ञेय इति । अष्यमकारिकायां तु तत्त्वंवाक्याद् भावाभावदृशं साक्षिणं सदा विद्यात् । तथा आन्तरार्थं भेदरहितं बाह्यदेहादिभिन्नं प्रत्यक्स्वरूपं विद्यात् इत्युक्तम् । उच्यतां तर्हि कया तु परिपाट्या वाक्यार्थं वेत्तीति । उच्यते, अन्वयव्यतिरेकाभ्याम्-

त्यक्तकृत्स्नेदमर्थत्वात् त्यक्तोऽहमिति मन्यते ।
नावगच्छाम्यहं यस्मान्निजात्मानमनात्मनः ॥[2] इति ।

अथ शरीरादिबुद्धिपर्यन्तः स सर्वोऽनात्मैवेति प्रमाणाद्विनिश्चित्य किमिति बुभुत्सातो नोपरमते? ।

1. नै.सि. 4-3, 4, 5, 6
2. Ibid 4-9

अनुच्छिन्नबुभुत्सश्च प्रत्यग्घेतोरनात्मनः ।
डोलायमानचित्तोऽयं मुह्यते भौतवन्नरः ॥[1]

अविलुप्तविज्ञानात्मन आत्मत्वादेव नित्यसान्निध्यात् बुभुत्सुः किमिति न प्रतिपद्यत इति? यस्मात्-

यैरद्राक्षीत् पुरात्मानं यमनात्मेति वीक्षते ।
दृष्टेर्द्रष्टारमात्मानं तैः प्रसिद्धैः प्रमित्सति ॥[2]

कस्मात् पुनर्हेतोः पराचीनाभिः शब्दाद्यवलोडिनीभिः बुद्धिभिः आत्मानमनात्मवन्न वीक्षत इति? उच्यते-

चक्षुर्नवीक्षते शब्दमतदात्मत्वकारणात् ।
यथैवं भौतिकी दृष्टिर्नात्मानं परिपश्यति ॥[3] इति ।

प्रत्यक्षादिप्रमाणस्वाभाव्यानुरोधेन तावत् तददर्शनकारणमुक्तम् । अथ प्रमेयस्वाभाव्यानुरोधेन प्रतिषेध उच्यते-

धीविक्रियासहस्राणां हानोपादानधर्मिणाम् ।
सदा साक्षिणमात्मानं प्रत्यक्त्वान्नाहमीक्षते ॥[4] इति ।

क्व पुनरियं विवेकबुद्धिः किमात्मनि? उत अनात्मनीति? यद्यात्मनि, कूटस्थत्वव्याघातः । अनात्मदर्शित्वात् । अथ अनात्मनि, तस्याप्यचैतन्यात् न विवेकसंबन्ध इति । उच्यते, दाह्यदाहकतैकत्रेत्युक्तपरिहारात्-

बुद्धावेव विवेकोऽयं यदनात्मतया भिदा ।
बुद्धिमेवोपमृद्नाति कदलीं तत्फलं यथा ॥[5]

सोऽयमतत्त्वे तत्त्वदृक् -

---

1. नै.सि. 4-10
2. Ibid 4-11
3. Ibid 4-12
4. Ibid 4-13 अहम् अन्तःकरणं विषयिणं न पश्यतीत्यर्थः ।
5. Ibid 4-14

अनुमानप्रदीपेन हित्वा सर्वाननात्मनः ।
संसारैकावलम्बिन्या तदभावं धियेप्सति ॥[1] इति ।

योऽयमन्वयव्यतिरेकजो विवेक आत्मानात्मविभागलक्षणो अनात्मस्थः स्थाणौ संशयावबोधवत् प्रतिपत्तव्योऽयथावस्तुस्वाभाव्यान्मृगतृष्णिकोदक-प्रबोधवदित्यत आह-

संसारबीजसंस्थोऽयं तद्धिया मुक्तिमिच्छति ।
शशो निमीलनेनेव मृत्युं परिजिहीर्षति ॥[2] इति ।

अस्यार्थस्य द्रढिम्ने श्रुत्युदाहरणम्-

इममर्थं पुरस्कृत्य श्रुत्या सम्यगुदाहृतम् ।
यच्चक्षुषेति विस्रब्धं न दृष्टेरिति च स्फुटम् ॥[3]

बुद्ध्यन्तमपविद्ध्यैवं कोन्वहं स्यामितीक्षितुः ।
श्रुतिस्तत्वमसीत्याह सर्वमानातिगामिनी ॥[4]

इति विस्तृततया तैरेव दर्शितः पूर्वाध्यायत्रयार्थसंक्षेपः । एवं न्यायोपेतेऽपि शास्त्राचार्यप्रसादलभ्ये वेदान्तार्थे शास्त्राचार्यप्रसादं विनैव अनन्यापेक्षसिद्धस्वभावत्वं मन्यमानानां केवलं श्रद्धालूनां ग्रहणं न स्यादिति तेषामपि संग्रहणाय स्वोक्तार्थे प्रामाण्यसंपादनाय तथा स्वमनीषिकामात्रकल्पितत्वव्युदासाय च भगवत्पादानुदाहृतार्थविषये आप्ततमान् स्वोपदेशकाचार्यान् प्रमाणयन्ति ग्रन्थकाराः[5] । स्वोक्तार्थे भगवत्पादोक्तमुपदेश- साहस्रीवचनमुदाजहुः । किं च चतुर्थाध्यायेऽपरो विशेषो भाष्यकाराशयेन उपदेशसाहस्रीरीत्या दर्शितः । यथा उपदेशः कस्य? इति प्रश्ननिर्णयः । किं परमात्मन उपदेशः? उत अपरमात्मन? इति । यदि परमात्मनः तस्य उपदेशमन्तरेणैव मुक्तत्वात् निरर्थक उपदेशः । अथ अपरमात्मनः, तस्यापि स्वत एव संसारस्वाभाव्यात् निष्फल उपदेश इति प्रश्नस्य

1. नै.सि. 4-15
2. Ibid 4-16
3. Ibid 4-17 'यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति' 'न दृष्टेर्द्रष्टारं पश्येः' इति श्रुत्या उदाहृतम्।
4. Ibid 4-18
5. भगवत्पूज्यपादैश्चाप्युदाहार्येवमेव तु (नै.सि. 4-19) इत्यस्यां कारिकायाम्)

समाधानमिदम् - ''अविविच्योभयं वक्ति श्रुतिश्चेत्स्याद् ग्रहस्तथा''[1] इति । अयमर्थः - आत्मानात्मरूपोभयमपि वस्तु अविविच्य विवेकं विना अध्यस्य अन्तःकरणकञ्चुकं परिधाय अहमिति व्यवस्थितं प्रत्यगात्मानमुद्दिश्य तत्त्वमस्यादिश्रुतिः ब्रवीति । तदा उपदेशः सुग्रह इति तदर्थः । अविविच्येति श्लोक उपदेशसाहस्यां तत्त्वमसिप्रकरणे वर्तते[2] । पूर्वोत्तरपक्षौ तत्रैव दर्शितौ । एवमात्मानं ज्ञात्वा किं प्रवर्तितव्यमुत निवर्तितव्यमाहोस्वित् मुक्तप्रग्रहता[3] इति शङ्का । समाधानं तु-

ज्ञेयाभिन्नमिदं यस्माज्ज्ञेयवस्त्वनुसार्यतः ।
न प्रवृत्तिं निवृत्तिं वा कटाक्षेणापि वीक्षते ॥[4] इति ।

कुत एतज्ज्ञेयाभिन्नमिति-

प्रागात्मबोधाद्बोधोऽयं बाह्यवस्तूपसर्जनः ।
प्रध्वस्ताखिलसंसार आत्मैकालम्बनश्रुतेः ॥[5] इति

अनेनेदमुत्तरं लब्धम् - आत्मबोधात् प्राक् सर्वोऽपि बोधोऽनात्मविषयसंमिश्रः, आत्मबोधोदये तदीयं ज्ञानं ज्ञेयभूतपरब्रह्मावलम्बनमेव भवति । ब्रह्म च प्रवृत्तिनिवृत्तिरहितमहेयमनुपादेयं च । एवंरूपब्रह्मविदः प्रवृत्तिः निवृत्तिः स्वच्छन्दप्रवृत्तिर्वा न संभवतीति । किं च

वास्तवेनैव वृत्तेन निरुणद्धि यतो भवम् ।
निवृत्तिमपि मृद्नाति सम्यग्बोधः प्रवृत्तिवत् ॥[6]

इत्यादिग्रन्थेन सम्यग्ज्ञानस्य प्रवृत्तिनिवृत्त्युभयनिरोधकत्वं, तन्मूलभूताज्ञाननिवर्तनेनेत्यादि प्रतिपाद्य यथेष्टाचरणमज्ञानाभावेनैव ब्रह्मविदि निराकृतं सप्रमाणमुपपादयन्ति । तथा सांप्रदायिकपक्षपरिग्रहेणापि । अथ अपरः सांप्रदायिकः-

1. नै.सि. 4-20
2. द्र.उप.सा. 18-78
3. स्वच्छन्दवर्तनमित्यर्थः ।
4. नै.सि. 4-54
5. Ibid 4-55
6. Ibid 4-56

निवृत्तसर्पः सर्पोत्थं यथा कम्पं न मुञ्चति ।
विध्वस्ताखिलमोहोऽपि मोहकार्यं तथात्मवित् ॥[1] इति

यतः प्रवृत्तिबीजमुच्छिन्नं तस्मात्-

तरोरुत्खातमूलस्य स्पर्शेनैव यथा क्षयः ।
तथा बुद्धात्मतत्त्वस्य निवृत्त्यैव तनुक्षयः ॥[2]

इत्यनेन श्लोकद्वयेन लब्धसारार्थोऽयम् - रज्जुसम्यग्ज्ञानात् निवृत्तसर्पभ्रमस्य पुंसः तादृशसर्पजन्यभयकम्पादिकं यथा अनुवर्तते वासनया तथा विध्वस्ताखिल-संसारभ्रमस्य विदुषोऽपि मोहकार्यं कंचित्कालं प्रारब्धकर्मोपभोगपर्यन्तमनुवर्तत एव। प्रवृत्तिबीजाज्ञानस्य ज्ञानेनैवोच्छिन्नत्वात् उत्खातमूलतरोः करस्पर्शमात्रेण पतनवत् तत्त्वविदोऽपि प्रारब्धस्य भोगेनैव निवृत्त्या विद्यमानदेहपातो भवितेति ।

अथ अलेपकपक्षनिरासार्थमाह-

बुद्धाद्वयसतत्वस्य यथेष्टाचरणं यदि ।
शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे ॥
अधर्माज्जायतेऽज्ञानं यथेष्टाचरणं ततः ।
धर्मकार्ये कथं तत्स्याद्यत्र धर्मोऽपि नेष्यते[3] ॥ इति ।

गीता चात्र प्रमाणम्,

यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥[4]

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥[5] इति ॥

---

1. नै.सि. 4-60
2. Ibid 4-61
3. Ibid 4-62,63
4. भ.गी. 4-19
5. Ibid 14-22 अयमत्राशयः - उक्तगीतानुसारेणापि यथेष्टचेष्टाप्रसंगो नास्ति 'यतो धर्मविशेष-संपादिते ज्ञाने प्रवृत्तिबीजस्याज्ञानस्याभावः । अतोऽपि ज्ञानिनि धर्मस्यापि तदुत्तरस्य तत्त्वतो न संभावना, किमुत अधर्ममूलकाज्ञानस्य रागमूलकयथेष्टाचरणस्य वा तस्मिन् संभावना। तदंगीकारे तत्त्वदृशां शुनां च को भेदः प्रतिवादिना उच्येत? इति ।

अपरमपि समाधानमत्रोक्तम्; मुमुक्षुदशायामेव वैराग्येण लोकत्रयमपि दूरीकृतवतः पुंसो यथेष्टचेष्टाप्रसंगाभावेन तस्यैव ज्ञानोदये तत्प्रसंगस्य अनवसर एवेति । क्षुधा पीडयमानस्यापि विवेकिनो न विषादनेच्छा । तस्यैव मिष्टान्नभोजननिवृत्ततृषः, तज्जिघत्सा न सुतरां यथा तथेति । किं च अज्ञानस्य लिङ्गंरागो विषयभूमिषु । यस्य तु रागविध्वंसकं ज्ञानमस्ति तस्य रागावसरः कुतः? यस्य कोटर एवाग्निः तत्रैव तरौ कथं शाद्वलतोदयः? इत्येवं प्रवृत्तिबीजरागोच्छेदादेव यथेष्टचेष्टाप्रसंगो ब्रह्मविदो वारितः । अत्र ग्रन्थे उपदेशसाहुस्रीवचनानि प्रमाणतया उदाहृतानि । तत्र तत्त्वमसिप्रकरणे "युष्मदस्मत् ......"[1] इति श्लोके उपदेशसाहस्रीगताः "अन्वयव्यतिरेकौ हि....."[2] इत्यादयः[3] गृहीताः । तथा विशेषापोहप्रकरणेऽपि "छित्वा त्यक्तेने"[4] त्यारभ्य चत्वारः श्लोकाः गृहीता इत्यलमतिविस्तरेण ।

वार्तिक इवात्रापि मण्डनाचार्यमतवैमत्यम्

ब्रह्मसिद्धौ मोक्षं प्रति कर्मपिक्षितमित्युक्तम् । अत्र तु कर्मनिरपेक्षं ज्ञानमेव अविद्यानिवृत्तिरूपमोक्षं प्रति कारणमित्युक्तम् । ज्ञानकर्मणोश्च विरोध एव स्थापितः। अत एव ग्रन्थस्यापि नैष्कर्म्यसिद्धिरिति नाम सार्थकम् । ब्रह्मसिद्धौ वाक्यज्ञान-मात्रादपरोक्षज्ञानं न संभवेत्, कर्मोपासनासमुच्चयान्मुक्तिः । वाक्यज्ञानोत्तरमपि अपरोक्षार्थं यत्नान्तरं कार्यम् । विधितो वा लोकानुभवसिद्धाद्दृष्टान्ताद्वा तत्सिद्धचति इति । इदं मतं शांकरसिद्धान्तेनापि विरुद्धचते । अत्रापि एतत्खण्डयन्ति प्रथमाध्याये । तद्यथा -

> वेदावसानवाक्योत्थसम्यग्ज्ञानाशुशुक्षणिः ।
> दन्दहीत्यात्मनो मोहं न कर्माप्रतिकूलतः ॥[5]

---

1. नै.सि. 4-21
2. उप.सा. 18-96
3. आदिपदेन 18-97,99,100,172,174, 175,178,190,191,231,232 इत्येते श्लोकाः ग्राह्याः ।
4. 'छित्वा त्यक्तेन हस्तेन' इत्यारभ्य 'ज्ञातैवात्मा सदा ग्राह्यो' इत्येतत्पर्यन्तं चत्वारः श्लोकाः (उप.सा.6-1 तः 4)
5. नै.सि. 1-8

अज्ञानहानमात्रत्वान्मुक्तेः कर्म न साधनम् ।
कर्मापमार्ष्टि नाज्ञानं तमसीवोत्थितं तमः ॥[1]

हेतुस्वरूपकार्याणि प्रकाशतमसोरिव ।
विरोधीनि ततो नास्ति सांगत्यं ज्ञानकर्मणोः ॥[2]

सकृत्प्रवृत्त्या मृद्नाति क्रियाकारकरूपधृत् ।
अज्ञानमागमज्ञानं सांगत्यं नास्त्यतोऽनयोः ॥[3] इति ।

अत्र पक्षद्वयमनूद्य निराकृतम् ।

एवमुपसंहृते केचित् स्वसंप्रदायबलादवष्टम्भादाहुः, यदेतद्वेदान्तवाक्यादहं ब्रह्मेति विज्ञानं समुत्पद्यते तन्नैव स्वोत्पत्तिमात्रेणाज्ञानं निरस्यति । किं तर्हि, अहन्यहनि द्राघीयसा कालेन उपासीनस्य सतो भावनोपचयान्निश्शेषम-ज्ञानमपगच्छति । ''देवो भूत्वा देवानप्येती''[4] ति श्रुतेः ।

अपरे तु ब्रुवते वेदान्तवाक्यजनितमहं ब्रह्मेति विज्ञानं संसर्गात्मकत्वादात्मवस्तुयाथात्म्यावगाह्येव न भवति । किं तर्हि? एतदेव गंगास्रोतोवत् सततमभ्यस्यतोऽन्यदेव अवाक्यार्थात्मकं विज्ञानान्तरमुत्पद्यते । तदेवाशेषाज्ञानतिमिरोत्सारीति । ''विज्ञाय प्रज्ञां कुर्वीत''[5] इति श्रुतेः । इत्यस्य पक्षद्वयस्य खण्डनाय सकृत्प्रवर्त्येति कारिका । इदं च नानारसत्वशून्यं ब्रह्माद्वयमिति पक्षमभ्युपगम्य ज्ञानकर्मसमुच्चयनिराकरणम् । अनन्तरं तत्रैव[6] द्वैताद्वैतरूपं ब्रह्मेति वादिमतानुसारेणापि समुच्चयो दुर्वच इति खण्डितः । तत्रापि संसारदशायामपि अभेदं भेदं चाहुः । अपरे तु संसारदशायां भेद एव । मुक्तिदशायामेवाभेद इति । एवं भेदाभेदपक्षद्वयेऽपि ज्ञानमेव फलावाप्तेः कारणं, तत्र कर्म निरर्थकमिति प्रथमं खण्डनम् । अनात्मरूपे ब्रह्मणि कर्म कर्मसमुच्चितं ज्ञानं वा तदसमुच्चितं वा ज्ञानं न साधनीभवति । स्वत एव साधकस्य ब्रह्मणोऽन्यत्वे सिद्धे अन्यस्य अन्यभावापत्तिहेतोरसंभवात् स्वविनाशं विना परमात्मभावः सर्वथा न सेत्स्यतीति द्वितीयं खण्डनम् । एवमेवोत्तरत्र उक्तपक्षद्वयोपर्येव दोष उक्तः । केवलाद्वैतज्ञानेन

1. नै.सि. 1-24
2. Ibid 1-66
3. Ibid 1-67
4. बृ. 4-1-2
5. Ibid 4-4-21
6. नै.सि. 1-68 तमे श्लोके, ततः 70,71,72 कारिकासु च ।

न मुच्येरन्। द्वैताद्वैतविरोधिना केवलाद्वैतज्ञानेन न मुच्येरन्। अपि तु उपासनयैवेति तत्रैव विधिः स्यान्न कर्मणि विधिः। अभेदपक्षे तु ज्ञानविधिः कर्मविधिश्च सर्वथा न संभवतीति दोषः समुद्भावितः। अथवा, सर्वानन्यत्वदर्शिनः कर्मविधाने हेतुरेव नास्तीति दूषणमुद्भावितम्। एवमुत्तरत्र समुच्चयवादो निराकृतः प्रकारान्तरेण। आत्मज्ञानस्य भावनया मोक्ष इति वादः, वाक्यज्ञानाभ्यासेन जायमानेन असंसर्गात्मकज्ञानेन मोक्ष इति वादः, उक्तसमुच्चयेन अनेकरसात्मकब्रह्मप्राप्तिरूपा मुक्तिरिति वादश्चेत्येते वादाः प्रथमाध्याय एव संक्षेपेण निराकृताः।

नैष्कर्म्यसिद्धिटीका

टीकेयम् ज्ञानोत्तममिश्रविरचिता चन्द्रिकानाम्नी। टीकाकर्तारः चोलदेशप्रथिते मङ्गलग्रामेऽवसन्निति तदुक्त्या विज्ञायते।

चोलेषु मंगलमिति प्रथितार्थनाम्नि
ग्रामे वसन् पितृगुरोरभिधां दधानः।
ज्ञानोत्तमः सकलदर्शनपारदृश्वा
नैषकर्म्यसिद्धिविवृतिं कुरुते यथावत्॥ इति।

ग्रन्थान्ते च 'व्याख्याचन्द्रिकया विधूय सुधिया' मिति व्याख्यायाः चन्द्रिकेति नाम तैरेव उत्कीर्तितम्। अनया चन्द्रिकया मूलेऽस्फुटानां संक्षिप्तानां विषयाणां विस्तरेण विवरणं क्रियमाणं, लोके चन्द्रिकया वस्तु रात्राविव स्फुटं प्रकाश्यमानं सत् बुभुत्सुलोकस्य महत उपकाराय भवतीत्येतत् चन्द्रिकापरामर्शकानां नाविदितम्। एतादृशचन्द्रिकासहितनैष्कर्म्यसिद्धिग्रन्थो झटिति संक्षेपेण च वार्तिककारहृदयावगमने महदुपकरोतीति वार्तिककारमतजिज्ञासुभिः सर्वथा अवलोकनीय इत्युपरम्यते।

बृहदारण्यकवार्तिकटीका

अस्याः टीकायाः शास्त्रप्रकाशिकेति नाम। टीकाकर्तॄणां च आनन्दज्ञान इति आनन्दगिरिरिति च नामद्वयम्। एषां साक्षाद्गुरुः शुद्धानन्दस्वामी। एतत्सर्वं तदुक्त्यैव गृहीतम्। यथा आरम्भे[1]

1. श्लो 9

यत्पादाम्बुज चञ्चरीकधिषणा...............
शुद्धानन्दमुनीश्वराय गुरवे तस्मै परस्मै नमः ॥ इति ।

संप्रदायविदामुक्तीरनुसृत्य प्रणीयते ।
शास्त्रप्रकाशिका सेयं सुरेश्वरवचोनुगा ॥[1] इति च ।

ग्रन्थान्ते "आनन्दज्ञानप्रणीता जगति मुदमियं सद्धियां संविधत्ताम्" इति च ।

वार्तिकामृत सर्वस्वमास्वादयितुमिच्छवः ।
आनन्दगिरिसंभूतां समुपाध्वं सरस्वतीम् ॥ इति

साक्षादाचार्यशिष्य आनन्दगिरिरिति शंकरविजयादौ प्रसिद्ध एतद्भिन्न एव । अत्र स्वगुरोः शुद्धानन्द इति संकीर्तनात् । तथा उपनिषद्भाष्यादिटीकासु आनन्दगिरिकृतत्वेन प्रसिद्धासु विद्यारण्यदीपिकाग्रन्थभागानां समुद्धरणाच्च विद्यारण्य मुनिसमनन्तरकालिकोऽयमानन्दगिरिरिति प्रतीयते । अनेनैव टीकाकृता बृहदारण्यकभाष्यस्यापि साक्षाद्वार्तिकानुसारेण टीका विरचिता । तस्या न्यायनिर्णय इति नाम; यता सूत्रभाष्यटीकाया एतदीयायाः । यथा -

बृहदारण्यके भाष्ये शिष्योपकृतिसिद्धये ।
सुरेश्वरोक्तिमाश्रित्य क्रियते न्यायनिर्णयः ॥

इत्यादावेव टीकानामोल्लेखः कृतः । एतेषां टीका तत्र तत्र वार्तिकेषु दुरुहार्थविवरणप्रवृत्ता सती महदुपकरोति पाठकानाम् इत्येतत् सहृदयसाक्षिकम् । एतदनन्तरं व्याख्यान्तरं नोपलब्धम् । एवं तैत्तिरीयवार्तिकस्य कल्याणविवरणमिति व्याख्या नूतना जागर्ति । इयं तु अत्यन्तं सरलतमा व्याख्या । पद्यरूपं बृहदारण्यकं सव्याख्यानमन्यत्पुस्तकमपि वर्तते ।

1. श्लो 11

ब्रह्मसिद्धिः

ब्रह्मसिद्धिकर्तारो मण्डनमिश्राः सुरेश्वरेभ्यो भिन्ना इति वार्तिकविमर्शावसरे निवेदितमेव, परमेते तत्समकालिकाः । एतदीयाः ग्रन्थाः १) विभ्रमविवेकः २) विधिविवेकः ३) भावनाविवेकः ४) मीमांसानुक्रमणिका ५) स्फोटसिद्धिः । ६) ब्रह्मसिद्धिश्चेति प्रसिद्धा एव ।

तेषु ब्रह्मसिद्धिरिति वेदान्तग्रन्थः सुप्रसिद्धः । अस्मिन् ग्रन्थे चत्वारः काण्डाः । ब्रह्मकाण्डः, तर्ककाण्डः, नियोगकाण्डः, सिद्धिकाण्डश्चेति । ब्रह्मसूत्रेषु चतुरध्यायवत् चतुष्काण्डविभागोऽयम् । तथापि ब्रह्मसूत्रवत् तदीयविषयसाकल्यं न दृश्यतेऽत्र । उपनिषद्गीतासूत्रप्रमाणानां शरणीकरणेन वेदान्तसिद्धान्तः प्रतिपादितोऽत्र । परं तु श्रीशंकराचार्योक्तसिद्धान्तप्रमेयभेदेषु क्वचिद्विलक्षणः सलक्षणश्च दृश्यते । तदिदमग्रे स्पष्टीभविष्यति । इमं ग्रन्थं गौडपादीयप्रकरणवत् प्रकरणमिति वक्तुं पारयामः । तत्र प्रथमकाण्डे ब्रह्मणि विषयेऽधिगन्तव्ये किमुपनिषदः प्रमाणानि, उत नेति विचार्य प्रमाणानीति सुष्ठु विनिर्णयः कृतः । द्वितीयकाण्डे तु वेदान्तप्रतिपादितब्रह्माङ्गीकारे कर्मकाण्डस्य प्रत्यक्षादिप्रमाणानां वा न कोऽपि विरोध इति दर्शितम् । तृतीये तु प्रतिपत्तिविधिद्वारैव तद्विषयतया ब्रह्न वेदान्ता बोधयन्तीति वृत्तिकारमतप्रतिक्षेपेण वेदान्तप्रामाण्यं व्यवस्थापितम् । चतुर्थे तु ब्रह्मणो वाक्यप्रतिपाद्यात्वसंभवप्रदर्शनेन पुरुषार्थसद्भावेन च तद्विषये वेदान्तवाक्यं प्रमाणमेवेति प्रतिपादितम् ।

अयं ग्रन्थः कारिकातद्वृत्तिद्वयरूपः नैष्कर्म्यसिद्धिवत् । तत्र प्रथमः काण्डः कारिकात्रयेण समाप्तः । द्वितीयः त्रयस्त्रिंशच्छलोकैरुपनिबद्धः । तृतीयः त्र्यशीत्युत्तरशतश्लोकैः सुग्रथितः । चतुर्थः द्वादशश्लोकैः सुयोजितः । आहत्य एकत्रिंशदुत्तरद्विशतं श्लोकाः । तत्र ब्रह्मकाण्डारम्भश्लोकः प्रकरणार्थोपक्षेपकः । 'प्रकरणार्थं चोपक्षिपती'ति ग्रन्थकृता मङ्गलश्लोकावतरणात् । 'विप्रतिपत्ति-निराकरणमुखेन वेदान्तानामेवंभूतेऽर्थे प्रामाण्यप्रतिपादनात् यतो भवत्येषोऽपि प्रकरणार्थ' इति । एतद्ग्रन्थमहिमा मिश्रैरेवेत्थमुपवर्णितः ।

एषा वेदान्ततत्त्वप्रविचयचतुरप्रस्फुरन्न्यायतेजा
मार्गं मुक्तेर्निरुन्धन् निबिडमपि तमोऽनादि निर्दारयन्ती ।
सद्यः प्रक्षालयन्ती धनमपि जगतां तीर्थदुस्तर्कपङ्कम्,
व्याख्यातोत्खातविश्वाशिवनिरतिशयश्रेयसे ब्रह्मसिद्धिः ॥[1] तथा

तत्त्वस्पृशः खण्डितवेदवादिनो
विनिस्सृताः पण्डितषण्डमण्डनात् ।
ध्वान्तच्छिदो मण्डनवक्त्रपङ्कजात्
जयन्ति वाचः श्रुतिनीतिमण्डनाः ॥[2] इति ।

ग्रन्थकाराः ब्रह्मसिद्धेर्विद्यारूपायाः ग्रन्थरूपायाश्च साधारण्येन मुक्तिप्रतिबन्धकनिबिडतमोनिबर्हकत्वं जिज्ञासुलोकस्य दुस्तर्कपङ्कक्षालयितृत्वं निःश्रेयसप्रदायितृत्वं च वर्णयन्तो ग्रन्थस्यास्य महिमानं समुदघोषयन् । द्वितीयश्लोके च ब्रह्मसिद्ध्युक्तानां वाचां भेदवादखण्डनध्वान्तच्छेदनश्रुतिनीतिमण्डनैर्लोकोत्तर-विजयशालितां प्रकटयन्तो महिमानं द्विगुणीचक्रुः ।

स्वग्रन्थरचनाप्रयोजनम्

स्वग्रन्थारम्भे तद्रचनायाः प्रयोजनं स्वयमेव दर्शयन्ति । यथा -

आनन्दमेकममृतमजं विज्ञानमक्षरम् ।
असर्वं सर्वमभयं नमस्यामः प्रजापतिम् ॥[3] इति ।

''वेदान्तेषु विप्रतिपद्यन्ते - केचिदप्रामाण्यं मन्यन्ते आत्मनः प्रमाणान्तरसिद्धत्वे तेषामनुवादकत्वात् । असिद्धत्वे संबन्धाग्रहणात् । अपदार्थत्वे वाक्यस्याविषयत्वात् । प्रवृत्तिनिवृत्त्यनुपदेशे चापुरुषार्थत्वात् । अन्ये तु प्रतिपत्तिकर्तव्यताप्रामाण्यव्याजेन अप्रामाण्यमेवाहुः । अपरे तु कर्मविधिविरोधात् प्रत्यक्षादिविरोधाच्च श्रुतार्थपरिग्रहे उपचरितार्थान् मन्यन्ते । तन्निरासायेदमारभ्यते - आनन्दमिति'' ।[4]

1. ब्र.सि. 4-11
2. तत्रैव अन्ते
3. Ibid 1-1
4. ब्र.सि. P1

एवं प्रथमश्लोकमवतारयन्तो मिश्रा वेदान्तानां वादिविप्रतिपत्तिनिरासमुखेन आनन्दादिरूपे परब्रह्मणि प्रामाण्यप्रतिपादनमेव प्रकरणार्थ इति सूचयन्ति । वादिविप्रतिपत्तिनिरासं प्राधान्येन प्रयोजनं कण्ठरवेणावेदयन्ति । अत्र च शङ्खपाणिकृता टीका- "उपलक्षणार्थाश्चैता विप्रतिपत्तय उक्ताः । इतरा अपि वक्ष्यमाणनिराकरणाद् द्रष्टव्याः । तदेवं विप्रतिपत्तिषु तासां निरासायेदमारब्धमित्याह - तन्निरासायेति"[1] इति । अनया टीकया मूलदर्शितविप्रतिपत्तिव्यतिरिक्ता अपि वक्ष्यमाणा ग्राह्या इति गम्यते । किं च विप्रतिपत्तिनिरासे ब्रह्ममीमांसाशास्त्रे प्रागेवारब्धे तद्भाष्ये च सति एतदारम्भः किमर्थ इति शङ्कायाम्, टीकाकार आह - "किंतु यत्र नानाप्रदेशे संक्षेपतश्चार्थसिद्धं सिद्धवच्च युदुक्तं तदत्रैकत्र प्रदेशे विस्तरेण साक्षात् सोपपत्तिकं कथ्यत इति पुनरारम्भ इत्याह"[2] इति । इत्थमस्य ग्रन्थस्योत्थाने सबीजं फलं दर्शितम् ।

अस्य ग्रन्थकर्तुर्वैशिष्टचम्

अस्य ग्रन्थकर्तुर्वैशिष्टचम् इत्थं भाति । ग्रन्थस्य समासव्यासरूपाभ्यां सूत्रतद्भाष्यवद्रचनायां बुभुत्सुजनसौलभ्यसंपादने मिश्राणां महत्कौशलं प्रयत्नं च चकास्ति । यत एकस्मिन् मंगलपद्ये प्रथमे आनन्दैकामृतादिपदानां विशेषणतया दाने तत्कृत्यं पृथक् पृथक् विमतनिरसनं वृत्तिग्रन्थे विस्तरेण आदितो द्वाविंशतिपुटपर्यन्तं दर्शयन्ति । तदेतत् सूत्रभाष्यानुकरणम् । एतत्कौशलं परमाद्भुतं काण्डचतुष्टयेऽपि तदेतद्द्रष्टृसाक्षिकम् । तत्रैकमुदाहरणं साक्षीक्रियते । यथा, अत्र केचित् .... "आनन्दात्मकत्वे ब्रह्मण आनन्दरागान्मुमुक्षुप्रवृत्तिः स्यात् । रागनिबन्धना च प्रवृत्तिः संसारबीजमिति न मुक्तये स्यात् । शान्तस्य दान्तस्य चात्मनि दर्शनमुच्यते । न चानन्दरागात् प्रवर्तमानः शान्तो भवति । तस्मात् सकलदुःखातिगे ब्रह्मतत्त्वे दुःखेभ्य उद्विग्नः सुखेभ्यश्च वीतरागः प्रवर्तमानो मुच्यते । आनन्दश्रुतयश्च सकलदुःखातिक्रममेवाहुः । दृष्टो हि क्षुद्दुःखादिनिवृत्तौ सुखशब्दः । सैव सुखमित्यन्ये । न चाश्मादौ प्रसंगः । प्रत्यग्वृत्तेरुपलभ्यमानायाः सुखत्वात् । तद्विशिष्टात्मोपलब्धेर्वा तान् प्रत्याह आनन्दमिति"[3] एवमेवोत्तरत्रापि ।

1. ब्र.सि.टीका. P.3
2. Ibid P.2
3. ब्र.सि. P.1

एतद्ग्रन्थे विशेषतो दर्शितमतभेदास्तुइदानीमेवोदाहृते दुःखनिवृतिरेव सुखं; सा च प्रत्यगात्मवृत्तितयोपलभ्यमानैव, उताहो तद्विशिष्टात्मोपलब्धिः सुखमिति मतद्वयं गृहीतम्। कामनावृत्तिरेव सुखमित्यपरं मतम्। यदपि मन्यन्ते ''यदापि नान्यद्दुःखं निवर्त्यम्; तदापि कामस्य दुःखात्मकत्वात् तन्निबर्हणं सुखम्। तत्राप्यकामस्य विषयविशेषोपभोगे न सुखिता स्यात्। भवति मध्यस्थोऽपि रमणीय विषयसंपर्के ह्लादवा''[1] निति।

किं च ''आनन्दश्चेद् ब्रह्मणि संवेद्यः, कर्तुरन्यत् कर्मेति द्वैतप्रसंगः। कर्तृकर्मभावश्च न क्रियां करणं चान्तरेण। तत आनन्दं ब्रह्मेति न स्यात्। तद्वत्तया व्यपदेशे अद्वितीयमिति न युज्यते। असंवेदने सन्नपि असत्कल्प इति व्यर्थं तत्संकीर्तनम्। असंवेद्यश्च कथं पुरुषार्थः''?[2] इत्यानन्दसंवेद्यत्वे विमतम्।

ब्रह्मवृत्त्यानन्दस्याभावरूपत्वमंङ्गीकृत्यापि अद्वैताविघातः[3]

''अन्ये मन्यन्ते द्विविधा धर्माः भावरूपा अभावरूपाश्चेति। तत्र अभावरूपाः नाद्वैतं विघ्नन्ति। यथा एकममृतमजमित्यत्र भेदव्ययोदयानां निवृत्तिर्नकिंचिद्वस्तु येन द्वैतमावहेत्। आनन्दश्च यदि भावः तस्य धर्मित्वे विज्ञानं धर्मः स्यात्। अथ विज्ञानं धर्मि, आनन्दो धर्मः, उभयथापि न युक्तम्। न ह्येकस्य द्वे रूपे युज्येते, विरोधात्। तत्र 'विज्ञानमानन्दं ब्रह्मेति' भावरूपयोरानन्दब्रह्मणोर्धर्म धर्मिणोर्भेदात् अद्वैतव्याघातः। तस्माद्विज्ञानात्मनो ब्रह्मणो दुःखाभावोपाधिरेव आनन्दशब्दः। यथा स्थूलाभावाद्युपाधयोऽस्थूलमनणु.... इत्यादयः शब्दाः। ... तस्माद् दुःखोपरम एवानन्दशब्दस्य ब्रह्मण्यर्थ इति। न च विज्ञानानन्दयोरेकत्वमेव। शब्दद्वयप्रयोग वैयर्थ्यात्''[4] इति।

उक्तमतभेदानां खण्डनसंक्षेपः

न तावद् दुःखनिवृत्तिरेव सुखम्, युगपत् सुखदुःखयोर्दर्शनात्, सन्तापवतो हि शीतह्रदे निमग्नार्धकायस्य। अथ सत्यप्यनिमग्नार्धकायस्य दुःखे

1. ब्र.सि. P.2. अत आनन्दश्रुतय उक्तजातीयनिवृत्तिपरा एव, न स्वरूपानन्दपरा इति।
2. Ibid P.3.4 अयमंशः बृहदारण्यके तृतीये 'विज्ञानमानन्दं ब्रह्मे'ति श्रुत्यर्थनिर्वचनवेलायां भाष्ये सुविचारितः।
3. अयं भाष्यानुक्तो नूतनो विचारः।
4. ब्र.सि. P.4.5

इतरस्याभावात्सुखमिति चेत् कुम्भीपाके पच्यमानस्य नरकान्तरदुःखाभावात् सुखित्वप्रसङ्गः । एकेन्द्रियद्वारदुःखस्य चेन्द्रियान्तरद्वारदुःखाभावात् तत्प्रसङ्गः । अदुःखस्यापि विषयविशेषसंपर्कात् संवेद्याह्लादोपपत्तिरित्यादिना खण्डन-भङ्गिरेका ।

द्वितीयमतखण्डनभङ्गिसंक्षेपः

'तदप्यसारम् । यतो विषयोपभोगा नावश्यं कामनिबर्हणाः । उक्तं हि - 'न जातु कामः कामानामुपभोगेन शाम्यती' ति । तथा भोगाभ्यासमनुविवर्धन्ते रागाः । कौशलानि चेन्द्रियाणाम् । विषयदोषदर्शनादपि च कामनिवृत्तिः । तत्र उपभोगतुल्याह्लादः स्यात् । समाने च प्रार्थितार्थलाभे प्रमोदभेदो न स्यात् । कामनिवृत्तेरविशेषात् । ..... न च यत्र कामस्तत्र सुखम् । मनोरथशतार्थितस्याप्युपभोगेन कस्यचिद्दुःखित्वदर्शनात् । सुखपूर्वकस्तु कामः । अनुभूततद्भावे तद्दर्शनात् । अननुभूतेऽपि कामप्रवृत्तिर्जननान्तरानुभवनिबन्धना । ..... अपि च कामनिवृत्त्यापि केचिद् दूयन्ते । तदभावे विषयोपभोगसामर्थ्याभावात् किमिति तर्हि दूयन्ते? तत्रानुभूतचर- तज्जन्माह्लादविच्छेदान्नान्यो हेतुः । तस्मात् प्रत्यात्मवेदनीय सुखप्रत्याख्यानम- युक्तम् । सुखसंगिजनोपच्छन्दनाय तु तत्र भवद्भिः वर्णितमिति पश्यामः । तदेवं दुःखनिवृत्तेरन्यत् सुखम् । स चानन्दशब्दस्य मुख्योऽर्थः । शब्दप्रमाणके च यथाशब्दं प्रतिपत्तिर्युक्तेति ।'[1]

तृतीयमतखण्डनभङ्गिसंक्षेपः

'न च रागनिबन्धना तत्र प्रवृत्तिः । न हि इच्छामात्रं रागः । 'अविद्याक्षिप्तमभूतगुणाभिनिवेशं रागमाचक्षते' । तत्त्वदर्शनवैमल्यात्तु तत्त्वे चेतसः प्रसादोऽभिरुचिरभीच्छा न रागपक्षे व्यवस्थाप्यते । यथा संसारा-सारतातत्त्वदर्शननिष्पन्नो नोद्वेगस्ततो द्वेषपक्षे । अन्यथा सर्वदुःखातिगेऽपि तत्त्वे तद्द्वेषनिबन्धना प्रवृत्तिरिति संसारानुबन्धः स्यात्'[2] इत्यादिना रागनिबन्धनप्रवृत्तिः न ब्रह्मानन्द इति ।

---

1. ब्र.सि. P.2,3
2. Ibid P.3

चतुर्थमतखण्डनभङ्गिसंक्षेपः

'फलवत् कर्तृवच्चेदं द्रष्टव्यम् । तथाहि - प्रमाणस्य फलमर्थान्तरं तद्भिन्नं वा सर्वपरीक्षकैः प्रतिज्ञायते प्रज्ञायते च । न च तदसंवेद्यम् । तथात्वे सर्वासंवेद्यत्वप्रसङ्गः। तत्कर्तृत्वाद्धि भावानां संवेद्यभावस्य । न च संवेद्यम्; फलान्तरानुपलब्धेरनवस्थाप्रसङ्गाच्च । तस्मात् संवेद्यमात्मप्रकाशत्वात् । असंवेद्यं च विषयवत् कर्मत्वाभावात् । तस्मादात्मप्रकाशतैव तस्य संवेद्यता । तथा ब्रह्मणः स्वात्मप्रकाशस्य आनन्दस्वभावो न संवेद्यः, कर्मत्वाभावात्। न चासंवेद्यः स्वप्रकाशत्वात् । 'तत्केन कं पश्येत्'[1] इति यदा अस्य सर्वमात्मैवाभूदिति सर्वकर्मप्रत्यस्तमयहेतुकनिषेधः श्रूयते ।

पञ्चमतखण्डनभङ्गिसंक्षेपः

'विशिष्टस्याह्लादस्य प्रकाशस्य चान्द्रमसस्येव शब्दद्वयप्रतिपादनात् न दोषः । यथा च प्रकृष्टप्रकाशश्चन्द्र इति । यथा अनयोः शब्दयोः न पर्यायत्वम् । अथ चैक एवाभ्यामर्थविशेषः प्रतिपाद्यते प्रकाशविशेषः, ... तथा 'विज्ञानमानन्दंब्रह्मे'ति आनन्दभेदो विज्ञानभेदो वा ब्रह्मरूपमिति'[2] तस्मादात्मप्रकाशप्रकृष्टानन्दस्वभावमेव ब्रह्मेति ।

'एवं च लौकिकानन्द एतस्यैवानन्दस्य मात्रेति युज्यते अवच्छेदात् । दुःखनिवृत्तौ दुर्योजमेतत् । तथा इतश्चानन्दस्वभाव आत्मा, परमप्रेमास्पदत्वात् । श्रूयते हि परमप्रेमास्पदत्वं -'तदेतत्प्रेयः पुत्रा'दिति । प्रतीयते च 'सर्वस्येयमात्माशीः कृमेरपि मा न भूवं भूयास'मिति । सा च प्रिये अवकल्पते । प्रीतिश्च सुखात्मनि, न दुःखे, द्वेषात् । नोभयरूपरहिते उपेक्षणादिति'[3] । आनन्दरूपत्वे सौषुप्तानन्दानुभवप्रदर्शनं सिद्धान्तिना - ''अन्ये तु, सुषुप्ते सुखमहमस्वाप्समिति परामर्शादात्मनि सुखानुभवमाहुः । न हि अननुभवे परामर्श एवं स्यात् । न चान्यथा अनुभवे सुखमिति परामर्शः स्यात् । न चान्यदस्ति । अहरहः ब्रह्मलोकावाप्तिश्च श्रूयते । नापि दुःखोपरमनिमित्तः सुखशब्द इति युज्यते । उभयथा व्यपदेशदर्शनात्,

---

1. ब्र.सि. P.4
2. Ibid P.5
3. Ibid

उपपत्तेश्च । न व्यपदेशमात्रादर्थसिद्धिः''[1] इति । सुखव्यतिरेकेण अन्यथाभावस्य अनवगतत्वादिति । इत्येवं ब्रह्मानन्दस्वरूपसमर्थनम् ।

अविद्याविवेचनम्

अग्रहणं विपर्यय इति द्वे अविद्ये । अविद्या चानिर्वचनीया । सा च ब्रह्मणो वा जीवस्य वा न स्वाभाविकी । यदि स्वाभाविकी; तदा परमार्थसती स्यात् । तथा अविद्यैव न स्यात् । नाप्यत्यन्तासती । यतो व्यवहारोपयोगिनी सा आवश्यिकी । अतो न सती, नासती, ब्रह्मणो भिन्ना न, नाभिन्ना च । अन्यैरपि वादिभिः एषा अङ्गीकार्या । अन्यथा व्यवहारकारणीभूय सैषा विद्यया निवर्त्या न स्यात् । अविद्यामायामिथ्यावभास इति नामकरणात् अविद्यामाययोरैक्यवादः भाष्यवार्तिकवत् स्फुटितः । अन्यैस्तु, 'प्रप्रथममेतैरेव प्रावर्ति' इति विमर्शः कृतः । वस्तुतस्तु भाष्यारूढः श्रुत्युपज्ञ इति वदामः । यथा ''तरत्यविद्यां विततां, योगीमायाममेयाय''[2] । ''मायामेतां तरन्ति ते''[3] इति हि मूलं समेषामाचार्याणाम् । अविद्याया ब्रह्मस्वभावताखण्डनं बृहदारण्कभाष्यानुगुणम् । अविद्याया मायात्वे अन्या च युक्तिः, अत एव चास्यानिवृत्तिरदृढस्वभावाया मायामात्रत्वात् । अन्यथा स्वभावे दृढं व्यवस्थिताया अस्याः कथमन्यथात्वम् । स्वभावाहानात् । शून्यत्वे स्वयं निवृत्तत्वात् ।[4] एवमनिर्वचनीयाविद्याङ्गीकारेण नाद्वैतहानं, 'न निवर्तनीयस्याभावो वा'[5] इति । अविद्या च जीवानामेवास्मिन्मते। भामतीकाराणामिदमेव मूलम्; 'यत्तु कस्याविद्येति शङ्का, जीवानामिति ब्रूमः'[6] इति । ब्रह्मणः परमार्थतोऽभिन्ना अपि जीवाः कल्पनया भिद्यन्ते इति तदाश्रिता अविद्या । अत्र काचन शङ्का - 'कस्य पुनः कल्पना भेदिका? न तावद् ब्रह्मणः । तस्य विद्यात्मनः कल्पनाशून्यत्वात् । नापि जीवानाम् । कल्पनायाः प्राक् तदभावात् । इतरेतराश्रयप्रसङ्गाच्च, कल्पनाधीनो जीवविभागो जीवाश्रया कल्पनेति'[7] इति । अत्र समाधानं मतभेदेन ग्रन्थे दर्शितम् । तत्संक्षेपो यथा, अत्र केचिदाहुः - वस्तुसिद्धावेव अयं दोषः । नासिद्धं वस्तु वस्त्वन्तरसिद्धयेऽलम् । न

1. ब्र.सि. P.5.6
2. वि.पु. 5-17-14
3. भ.गी. 7-14
4. विद्यया निवर्तनमनर्थकमिति भावः ।
5. ब्र.सि. P.9,10
6. Ibid P.10
7. Ibid

मायामात्रे । न हि मायायां काचिदनुपपत्तिः । अनुपपद्यमानार्थैव हि माया । उपपद्यमानार्थत्वे यथार्थभावात् न माया स्यादिति । अन्ये तु अनादित्वादुभयोरविद्याजीवयोः बीजाङ्कुरसन्तानयोरिव नेतरेतराश्रयत्वमक्लृप्तिमावहतीति । तथा चोक्तम् अविद्योपादानभेदवादिभिः 'अनादिरप्रयोजना चाविद्या' । तत्र अनादित्वान्नेतरेतराश्रयत्वदोष'[1] इति ।

'ननु जीवा अपि ब्रह्मतत्त्वाव्यतिरेकात् विशुद्धस्वभावाः । तत्कथं तेष्वविद्यावकाशः? अत्र समाधानम् न च तावत् बिम्बादवदातात् प्रतिबिम्बं कृपाणादिषु भिन्नम् । अथ च तत्र श्यामतादिरशुद्धिः । विभ्रमः स इति चेत्; समानमेतज्जीवानामपि अविशुद्धिर्विभ्रमः । अन्यथा दुरवापैव विशुद्धिरित्यादिग्रन्थेन बिम्बप्रतिबिम्बन्यायेन ब्रह्मप्रतिबिम्बस्थानीयानां जीवानां भ्रमसिद्धाविशुद्धिमङ्गीकृत्य अविद्यावकाशसंभव इति समाधानम् । सादिविभ्रमे हेतुसत्वेऽप्यनादिविभ्रमे हेत्वन्वेषणमेवासांप्रतम् । स्वप्नादिवदविद्यायाः प्रवृत्तिः तस्याः किंकृता'[2] इति हेतुशंकानिवारणम् । स्वाभाविक्या अनादेरविद्याया कथमुच्छेदः? इत्याक्षेपे परिहारः - अत्रोच्यते - 'उक्तमेतज्जीवानामविद्याकलुषितत्वम् । न ब्रह्मणः । अन्यथा ब्रह्मभूयंगतस्यापि नाविद्या निवर्तेत । अविद्यया जीवाः संसारिणः, विद्यया मुच्यन्ते । अविद्यैव नैसर्गिकी जीवानां, न विद्या । तस्या आगन्तुक्या विद्यया प्रविलय उपपद्यते । अव्यतिरेकिब्रह्मणो जीवानां बिम्बप्रतिबिम्बवद् विद्याऽविद्याव्यवस्था । ब्रह्मैव संसरति, ब्रह्मैव मुच्यत इति पक्षे एकमुक्तौ सर्वमुक्तिप्रसंग इति । अविद्ययैव तु ब्रह्मणो जीवो विभक्तः । तन्निवृत्तौ ब्रह्मस्वरूपमेव भवति । यथा घटादिभेदे तदाकाशं परिशुद्धं परमाकाशमेव भवति'[3] इति । एतन्मते विपरीतख्यातिः । अविद्यया वस्तु सदिव भानमेव ख्यातिरिति । तादृशभ्रमनिवृत्तिरेव बाधः । भाट्टा अपि विपरीतख्यातिं मन्यन्ते । 'व्यवहारे भट्टनय' इति न्यायेन अद्वैतिनोऽपि तामनुसरन्ति । परंतु अन्यस्य वस्तुनोऽन्यथा भाने अन्यस्य वास्तविकतां नाङ्गीकुर्वन्ति । ख्यात्यन्तरनिरासः विपरीतख्यातिसाधनं च विभ्रमविवेके मण्डनैः दर्शितम् ।

---

1. ब्र.सि. P.10
2. Ibid P.11
3. Ibid P.12

अविद्यानिवर्तनोपाया:

योऽयं श्रवणमननपूर्वको ध्यानाभ्यासः प्रतिषिद्धाखिलभेदप्रपञ्चे "स एष नेति नेती" त्यात्मनि सः व्यक्तमेव भेददर्शनप्रतियोगी तन्निवर्तयति । स च सामान्येन भेददर्शनं प्रविलापयन् आत्मनापि प्रविलीयते । तस्मिन्नपि प्रविलीने स्वच्छः परिशुद्धः अस्यात्मा प्रकाशते । श्रवणमननध्यानाभ्यासानां भेददर्शन-प्रतिपक्षत्वमविद्यानुबन्धेऽपि । यथा पयः पयोन्तरं जरयति स्वयं च जीर्यति । यथा च विषं विषान्तरं शमयति स्वयं च शाम्यति इति समाधानं 'भेदेनैव भेदः कथं प्रतिसंह्रियत' इत्याक्षेपस्य । अत्र 'विद्यां चाविद्यां चे'ति मन्त्रं प्रमाणयन्ति । अस्यार्थद्वयं तु भाष्यविजातीयं दृश्यते । प्रकरणानुसारेण अस्य मन्त्रस्य यथाश्रुतार्थपरित्यागेनान्यार्थकरणमीशभाष्ये द्रष्टव्यम् । तथा ऐतरेयभाष्ये प्रासङ्गिकमर्थान्तरकरणं दृश्यते । कल्पतरावपि मन्त्रस्य अर्थान्तरकरणं द्रष्टव्यम् । 'अविद्यानिवृत्तिस्तु न पृथक् । किं तु विद्योदय एव । विरोधिभावान्तरोत्पाद एव पूर्वप्रध्वंसः, न शून्यम् । अन्यथा न प्रध्वंसो हेतुमान् स्यात् । विरोधिनी च विद्या विपर्ययज्ञानस्य । तदुत्पत्तौ विपर्यासो नष्ट एव भवति'[1] इति ।

ब्रह्मणः शब्दात्मत्वसमर्थनम्

'यथा अक्षरमिति शब्दात्मतामाह । विशेषेणसामान्यस्य लक्षणात् । तथाहि - "परं चापरं च ब्रह्म यदोंकार" इत्यादिश्रुतेः । न चेदमभिधेयापेक्षम् । 'कार' प्रत्ययस्य शब्दस्वरूपपरत्वात् । अवर्णादपि वर्णसमुदायात् परः 'कार' प्रत्ययो दृश्यते- 'एव' कारः किमर्थ इति । ओंकारस्य प्रतीकत्वमभिधानत्वं वा नात्र विवक्षितम् । ओमित्येवमात्मानं ध्यायथ । ओमिति युञ्जीतेति यत्र योगाङ्गता श्रूयते तत्रैवम् । यत्र तु युञ्जीतेत्यादेरश्रवणात् तादात्म्य एव पर्यवस्यति वाक्यं तत्र नेत्थम् । यथा "ओमिति ब्रह्म" "ओमितीदं सर्वम्" "तद्यथा शङ्कुना" "ओंकार एवेदं सर्वम्" इति । अत्र हि सर्ववागनुगमेन तदत्यागात् ओंकारो वाचस्तत्त्वमिति दर्शयित्वा वाग्रूपात्यागाच्च रूपप्रपञ्चस्य ओंकार एवेदं सर्वमित्युपसंहरति । एतेन 'परं पुरुषमभिध्यायीते'ति श्रवणमपि सर्वात्मभाव - प्रतिपादनपूर्वकम् । तेन वाचः सार्वात्म्यविद एव ध्यानोपदेशः, "तस्माद्विद्वान्"[2] इति । वाचः सार्वात्म्यं च

1. ब्र.सि. P.33

2. Ibid P.16, 17

'वागेव विश्वा भुवनानि' इति श्रुत्या, तथा 'अहं रुद्रेभि' रिति श्रुत्या च प्रदर्शितम् ।

किं च पकृतिरूपान्विता विकाराः वाग्रूपान्वितं च जगत् । वाचो विपरिणामो विवर्तो वा अवसीयते । तदुपरागविज्ञानवेदनीयत्वात् । सन्ति चार्थाः व्यावहारिकाः । तेषां शब्दविवर्तादन्यन्न तत्त्वम् । तत्सामान्यादितरेऽपि तथा । किं च कुर्यान्न कुर्यादिति विधिनिषेधौ वाक्यार्थः । असन्तश्च अलातचक्रशशविषाणादयः । न च अनालम्बना ज्ञानस्वभावत्वात् प्रतिभा युक्ता । न च सा शब्दरूपपरामर्शविकला । अतः प्रवृत्तिनिवृत्त्यानुगुण्येन शब्दतत्त्वमेव तथा तथा अवभासत इति सांप्रतम् । न च विकल्पप्रत्ययो वाग्रूपोपरागरहित इति वाक्तत्त्वमेव । तथा तथा विवर्तत इति युक्तम् । एवं समूहे वनादौ असत्सु चालातचक्रादिषु योजनीयम् । अपरं च मतम् - वाग्रूपाधीनमेव चितश्चितित्वम् । वाक्शक्तिरेव वा चितिः । तत्प्रतिसंहारेऽपि सूक्ष्मा वाक्शक्तिरित्येके । सर्वथा वाग्रूपाधीनो ज्ञेयः । सर्वं ज्ञेयं वाग्रूपान्वितं गम्यत इति तद्विकारस्तद्विवर्तो वा मृद इव घटादयः, चन्द्रमस इव जलतरङ्गचन्द्रमस इति । एवं ब्रह्मण ओंकारशब्दात्मत्वसमर्थनं श्रीशांकरभाष्यविरुद्धं तत्त्वतः । नामरूपातीतस्य तस्य शब्दात्मत्वसमर्थनं विरुद्धमेवेति ।

ब्रह्मणः परिणामित्वपरिणामिनित्यत्वयोः खण्डनम्

मङ्गलश्लोके अक्षरमिति शब्दतः परिणामित्वपरिणामिनित्यत्वयोः 'ध्रुवः' 'नित्य' इति श्रुतिषु श्रवणात्, तन्निराकृतेः, इत्यादिरूपेण भाष्यानुगुण्येनैव खण्डनं ग्रन्थे एव द्रष्टव्यम् ।

ब्रह्मणः सर्वात्मतापक्षनिराकरणम् - केचित्तु 'सर्वगन्धः सर्वरसः' इति श्रुत्या ब्रह्मणः सर्वात्मतामुपागमन् । एवं च विषयभोगोपपत्तिः । प्रकाशस्वभावस्यात्मनो विषया युक्तं यत्प्रकाशेरन् । अन्यत्वे तु जडानां प्रकाशनमसंभावनीयमिति । तान् प्रत्याह - असर्वमिति । अत्र खण्डनसारांशः- "अस्थूलमनण्वह्रस्व"[1] मिति सर्वभेदोपरागप्रतिषेधात् । सर्वात्मत्वे सर्वभेदावियोगाच्चानिर्मोक्षप्रसङ्गः । न हि

1. बृ. 3-8-8

स्वभावाद्वियोजयितुं वस्तु शक्यम् इत्यादिरूपेण खण्डयन् अतो न प्रपञ्चात्मकं ब्रह्म, अविद्याक्रीडितमेव प्रपञ्च इति सांप्रतमित्युपसंहरति । सर्वमिति मंगलश्लोके यत् सर्वत्वं ब्रह्मण उक्तं तस्यायमाशयः, ब्रह्मणो न सर्वात्मकता । सर्वं तु ब्रह्मात्मकम् । ब्रह्मरूपेण रूपवत् । न तु शून्यमेव । तथात्वे नित्यमुक्तिप्रसंगेन तदर्थोपदेशवैयर्थ्यप्रसंगः । नित्यमुक्तत्वेऽप्यविद्यानिबन्धनः संसारीति चेत्, तत्रोत्तरम् - अविद्याया ग्रहणाभावरूपत्वे न तेन संसारः । मुक्तावपि तस्य समानता । अयथार्थाग्रहणरूपत्वे न सर्वशून्यता । 'कथमसत' इति शून्यताया निषेधात् । ''तेनेदं पूर्णं पुरुषेण सर्वं''[1] मिति श्रुतेः । भावो हि यथावदप्रकाशमानोऽध्यस्ता-विद्यमानरूपः प्रकाशते । शून्ये तु क्वाध्यासः? किं प्रकाशताम्? इति । ''विज्ञानमानन्दं ब्रह्मे''ति[2] रूपोपदेशाच्च न सर्वाभावमात्रं ब्रह्म । अपि तु सर्वस्यात्मेति ।

अन्येषां वेदान्ताभियुक्तानामाशयस्तु-

> संहृताखिलभेदोऽतः सामान्यात्मा स वर्णितः ।
> हेमेव पारिहार्यादिभेदसंहारसूचितम् ॥[3] इति ।

यतश्च विशेषप्रत्यस्तमयमुखेन तन्निरूपणम्, अतोऽन्यैरभियुक्तैः सामान्यरूपं ब्रह्मेति निरूपितम् । स एष महानज आत्मा सत्तालक्षणः, तथा सत्तैव सर्वभेदयोनिः प्रकृतिः परेति । यथा सुवर्णतत्त्वं कटकाङ्गुलीयादिविशेषोपसंहारेण निरूप्यमाणं तत् सामान्यमिति गृह्यते, तद्वत् । अत्रैव मतान्तरखण्डनम् एवं 'निर्विशेषं न सामान्यं भवेच्छशविषाणवत्' इत्यभावमाहुस्तान् प्रत्युच्यते 'संहृताखिलभेद' इति । यदि तावदसामान्यत्वं साध्यते, तर्हि सिद्धसाधनम् । विशेषाणामभावे केषां तत्सामान्यम् ? सामान्यं तु उक्तं ब्रह्मवादिभिः विशेषप्रत्यस्तमयमुखेन निरूपणादुपचारत एव । अथाभाव एव साध्यः, विशेषैरेवास्य निर्विशेषैर्व्यभिचारः[4] ।

---

1. महाना 10-4
2. बृ. 3-9-34
3. ब्र.सि. 1-3
4. इत्यौपचारिकसत्तासामान्यरूपत्वं ब्रह्मण उक्तमिति निःसामान्यविशेषब्रह्मसिद्धान्तेन शांकरभाष्यवार्तिकसंमतेन न विरोधः ।

प्रपञ्चप्रविलयमुखेन ब्रह्मनिरूपणे सप्तपक्षखण्डनम्

सर्वत्राप्याम्नाये क्वचित् कस्यचिद्भेदस्य प्रविलयो गम्यते । यथा स्वर्गकामवाक्ये शरीरात्मभावप्रविलयः । गोदोहनवाक्ये अधिकृताधिकारिभेदप्रविलयः । विधिनिषधश्रुतिषु सर्वत्र नैसर्गिकरागादिनिमित्तप्रवृत्तिप्रविलयः । एवं रीत्या कर्मविधय आत्मज्ञानोपयोगिनः । शमादियुतस्य हि तदुपदिश्यते । यतमनसो हि आत्मदर्शनाधिकारसामर्थ्यमिति प्रथमः[1] । अनवाप्तकामः कामोपहतमनाः न परमाद्वैतदर्शनयोग्यः । कर्मभिस्तु कृतकामनिबर्हणः सहस्रसंवत्सरपर्यन्तैः प्राजापत्यपदेन परमाद्वैतमात्मानं प्रतिपद्यत इति । उभयोरपि पक्षयोः कृत्स्न एवाम्नायः आत्मज्ञानैककार्यपर्यवसायीति द्वितीयः । पृथक् कार्या एव सन्तः कर्मविधय आत्मज्ञानाधिकारमवतारयन्ति पुरुषम् । अनपाकृतर्णत्रयस्य तत्रानधिकारात् । ''ऋणानि त्रीण्यपाकृत्यमनो मोक्षे निवेशयेत्'' इति स्मृतेः इति तृतीयः । अन्ये तु संयोगपृथक्त्वन्यायेन सर्वकर्मणामेव आत्मज्ञानाधिकारानुप्रवेशमाहुः इति चतुर्थः । अन्ये तु, पुरुषसंस्कारतया आत्मज्ञानाधिकारसंस्पर्शं कर्मणां वर्णयन्ति । 'महायज्ञैश्च यज्ञैश्चेति' स्मृतेः । 'यस्यैते' इति स्मृतेश्च इति पञ्चमः । एतदेव विपरीतं वर्णयन्ति । आत्मज्ञानमेव कर्तृसंस्कारतया कर्माधिकारानुप्रवेशीति षष्ठः । अन्ये तु परस्परविरोधिनोः कर्मात्मज्ञानयोः द्वैताद्वैतविषयत्वेनासंबन्ध एवेति मन्यन्ते[2] इति सप्तमः ।

तेषां परिहारः- न हि कर्मादिविधयः स्ववाक्यसमधिगतस्वर्गादिकार्याः कार्यान्तरमपेक्षन्ते । नाप्यात्मज्ञानविधिः ब्रह्मचर्यादिसाधननिराकांक्षः कर्मविधीनपेक्षते । अत एकाधिकारत्वं न संभवति । विधिनिषेधमात्रस्य नामरूपप्रविलयकार्यापवर्गतात्पर्ये जन्तूनामभ्युदयसंपत्तिः आकस्मिकी स्यात् । तथा अपवर्गोऽपीति शास्त्रवैयर्थ्यापात इत्यादिरूपेण प्रथमपक्षनिरासः । न द्वितीयपक्षः । न हि कामावाप्त्या कामप्रविलयः । किं तु दोषपरिभावना भुवा प्रसंख्यानेन । 'न जातु कामः कामानामुपभोगेन शाम्यति' इति स्मृतेः । न तृतीयपक्षः, आश्रमविकल्पस्य श्रवणात् । तस्याश्रमविकल्पमेके । 'यदि वेतरथा' इत्यादिश्रुतेः ।

1. अयं पक्षः 'फलमत उपपत्ते' इत्यधिकरणेऽनूदितो दृश्यते ।
2. ब्र.सि. p.27,28

अतोऽपाकृतर्णत्रयस्यैव ज्ञानाधिकार इति न समञ्जसम् । ऋणत्रयापाकरणश्रुतेः गृहस्थविषयत्वात् । विहिताकरणनिमित्तपापस्य ज्ञानप्रतिबन्धकत्वमेवाशयः । अतः कर्मविधीनां पृथक्कार्याणां, न ज्ञानाधिकारावतारसामर्थ्यम् । चतुर्थपञ्चमपक्षौ तु समीचीनौ । ''तमेतं वेदानुवचनेने''[1] ति श्रुत्या विद्याङ्गत्वस्याप्युक्तेः । तदपि तदुत्पत्त्यर्थतया; न प्रयाजादिवत् कार्योपयोगितया । विद्यायाः कार्यान्तराभावात् । संस्कारपक्षश्च प्रागुक्तश्रुतेः सम्यगेव । संस्कृतस्य हि विद्योदयः । तदुक्तम् ''विहितत्वाच्चाश्रमकर्मापी''[2] ति सूत्रे । तत्रापि ऊर्ध्वरेतसां कर्मभिः विनापि शमदमादिभिर्विद्योदयः । तत्रापि कालकृतो विशेषः । साधनविशेषाद्धि विद्या क्षिप्रं क्षिप्रतरं च व्यज्यते । तदभावे चिरेण चिरतरेण वा । ''सर्वापेक्षा च यज्ञादि श्रुतेरश्ववत्''[3] इति सूत्रात् 'यज्ञेन दानेने'ति श्रवणाच्च । अभ्यासलभ्यायां विद्यायां कर्मापेक्षा यथा अन्तरेणाप्यश्वं ग्रामप्राप्तौ सिद्ध्यन्त्यां शैघ्र्यायाक्लेशाय चाश्वापेक्षा तद्वत् ।[4] न षष्ठश्च, येऽपि विपर्ययेण ज्ञानकर्मणोः एकाधिकारत्वमाहुः तत्र प्रमाणाभावः । कर्मप्रकरणे अनाम्नातत्वात् ज्ञानस्य । आत्मनश्चाव्यभिचरितक्रतु-संबन्धाभावाच्च कर्मसंबन्धोऽस्य दुर्भणः । ज्ञाने फलश्रुतिः नार्थवादः । औपनिषदात्मा च प्रत्यक्षादिसिद्धकर्तृत्वभोक्तृत्वविशिष्टात्मनो भिन्न इति । ''यदेव विद्यये''ति श्रुतिः प्रकृतोद्गीथविषया । ''यो वा एतदक्षर''मिति तु कर्मनिन्दया अक्षरज्ञानस्तुतिपरा । ''तं विद्याकर्मणीति''[5] तु न समुच्चयपरा । किं तु कर्मवन्तं कर्म विद्यावन्तं विद्या समन्वारभत इति भेदेनान्वयपरा ।[6] नापि सप्तमः- एतन्मते अद्वैतज्ञानानुत्पत्तिप्रसंगः । प्रमाणादिविभागाद्वैतज्ञानयोः विरोधात् । अथ उपायोपेययोः कर्मज्ञानयोरयौगपद्यादविरोधः तदा अद्वैतप्रतिपत्तौ सर्वो विभागो लीयत एवेति विरोधो वा कर्मणोऽनुपायत्वं वा न सुवचम् । उपायस्य कर्मणः

---

1. बृ.4-4-22
2. ब्र.सू. 3-4-32
3. Ibid 3-4-26
4. इदं तु भाष्यविरुद्धम् । आदितः संस्कारपक्षान्तं भाष्यानुगुणमेव । तैः कर्मकाण्डस्य पृथक् तात्पर्यवर्णनात् । उपासनाव्यतिरिक्तवाक्यानां ज्ञेयपराणामेव प्रपंचप्रविलयद्वारा ज्ञानपरत्वोक्तेः । कामावाप्त्या कामप्रविलयादिनिराकरणस्य बृहदारण्यकभाष्ये कृतत्वात् । आश्रमविकल्पोक्तेः कर्मणां संस्कारत्वेन विद्यांगत्वोक्तेश्च ।
5. बृ. 4-4-2
6. अयमाशयो भाष्यानुगुणः ।

पूर्वकालत्वात्, तदा अविलीनत्वात् । तथा च भेद एव चाभदेप्रतिपत्त्युपाय इति सूक्तम् ।[1] अन्यत्र ग्रन्थत एव विस्त्तरेण ज्ञेय इति । तत्त्वदर्शनाभ्यासस्तत्त्व- विदोऽपि । ज्ञातेऽपि तत्त्वे मिथ्यावभासा निवर्तन्ते, हेतुविशेषाद्नुवर्तन्ते च सर्वत्र । यथा द्विचन्द्रदिग्भ्रमादयः । आप्तवाक्य- मात्रविनिश्चित- दिक्चन्द्र- तत्त्वानामपि । तथा अनादिमिथ्या दर्शनाभ्यासदृढीकृत- प्रबलसंस्कार- सामर्थ्यात् आम्नायावगत तत्त्वस्यापि मिथ्यावभासा अनुवर्तन्ते । तन्निवृत्तये तत्त्वदर्शनाभ्यास आवश्यकः । तद्वत् शब्दप्रमाणका यज्ञादयश्च । परं तु अभ्यासो हि पूर्वसंस्कारं प्रतिबद्ध्य स्वकार्यं सन्तनोति इति लोकदृष्टः । तद्वदत्रापीति । यज्ञादयस्तु केनाप्य- दृष्टेन प्रकारेण श्रेयः । परिपन्थिकलुषनिबर्हणद्वारेणेति वा दुरितक्षयार्थत्वात् तेषामिति । तथा च मन्तव्यो निदिध्यासितव्य इति शमदम- ब्रह्मचर्ययज्ञादिसाधनं च विहितं समञ्जसम् । अन्यथा तदुपदेशवैयर्थ्यमिति ।[2] एकस्मिन्नद्वये शब्दप्रमाणस्य प्रत्यक्षादि विरोधपरिहारौ तर्ककाण्डे विस्तरेण दर्शितौ- यथा,

> आहुर्विधातृप्रत्यक्षं न निषेधृ विपश्चितः ।
> नैकत्व आगमस्तेन प्रत्यक्षेण विरुद्ध्यते ।।[3]

इत्यादिना विरोधाभावं संक्षेपेण कारिकया दर्शयामासुः । आम्नायस्य सापेक्षत्वात् सावकाशत्वात् दृष्टव्यभिचारत्वात् कर्मविधिव्याहतार्थत्वेन व्याकुलत्वात् प्रत्यक्षानन्तरकालिकत्वेन अमुख्यत्वात् अर्थतोऽप्यमुख्यत्वाद् दौर्बल्यमिति । प्रत्यक्षादीनां तु निरपेक्षत्वात् निरवकाशत्वात् अदृष्टव्यभिचारत्वात् ज्येष्ठत्वेन मुख्यत्वात् अर्थतोऽपि मुख्यत्वाच्च प्राबल्यमिति शङ्का ।

तत्परिहारसंक्षेपस्तु तुल्यबलत्वेऽपि प्रत्यक्षादीनाम् आम्नायस्य च वस्तुनि विकल्पानुपपत्त्या विरोधे संशयापत्तेः अविरोध एवोपपद्यात इत्यन्यमतेन परिहारः । स्वमते च आम्नाय एव बलवान् प्रत्यक्षादिविरोधे । 'पौर्वापर्ये पूर्व दौर्बल्यं प्रकृतिवत्', 'पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिद्ध्यति' इति न्यायात् इति ।

---

1. अयं पक्षः ज्ञानबहिरङ्गकारणत्वेन कर्मणः स्वीकारात् भाष्यानुकूलः दृश्यते ।
2. ज्ञानोत्तरं कर्तव्यमात्रनिषेधात्, कर्तव्याभावाच्च, अभ्यासस्य ज्ञानपूर्वकालत्वेन च भाष्यसंमतत्वात् विविदिषासन्यासिनोऽपि यज्ञादिर्कमसन्यासविधानादयं पक्षो भाष्यविरुद्धः ।
3. ब्र.सि. 2-1

संभवद्विचित्रभ्रमहेतुत्वात् प्रत्यक्षादीनाम् । तेभ्यो विगलितनिखिलदोषाशङ्कात्मा आम्नाय एव बलवानिति । पुरुषाश्रयदोषाणां पुरुषाभावे शब्देऽसंभवात् । किं तु प्रत्यक्षादीनां व्यावहारिकं प्रामाण्यम् । अविद्या संस्कारस्थेम्ना व्यवहारविपर्ययाभावात् व्यवहारविसंवादलक्षणं प्रामाण्यम् । न तत्वावेदनलक्षणम् इत्यादिरूपेण परिहारः कृतो ग्रन्थत एव द्रष्टव्यः[1] । पूर्वात् परबलीयस्त्वमेव न्याय्यम् -

पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम् ।
अन्योन्यनिरपेक्षाणां यत्र जन्मधियां भवेत् ॥

इति परत्वादेव आम्नाय एव बाधकः । प्राथम्यं प्रत्यक्षप्राबल्ये न प्रयोजकमित्यादिरूपेण भङ्ग्यन्तरेण परिहारक्रमश्चिन्तितः । भेदविषयविविधकल्पनानुवादः तत्प्रत्याख्यानं च भाष्यान्नवीनक्रमेण कृतम्, यथा-

न भेदो वस्तुनो रूपं तदभावप्रसङ्गतः ।
अरूपेण च भिन्नत्वं वस्तुनो नावकल्पते ॥[2] इत्यादिना ।

भेदो वस्तुनः स्वभावः, परस्परानात्मतास्वभावः, परापेक्षो वस्तुनो भेदस्वभावः, एवमर्थक्रियाकृतो वस्तुभेद इत्यादिरूपेण भेदे विकल्पं कृत्वा भेदपरमार्थत्वं निराकृत्य आविद्यकत्वं व्यवस्थापितम् । यथा-

अर्थक्रियाकृते भेदे रूपभेदो न लभ्यते ॥[3]
दाहपाकविभागेन कृशानुर्नहि भिद्यते ॥[4]

इत्यादिकारिकया तद्व्याख्यानग्रन्थेन च ।

एकस्यैवैष महिमा भेदसंपादनासहः ।[5]
वन्हेरिव यदा भावो भेदकल्पस्तदा मुधा ॥[6]

इत्यादिना भेदकल्पनाया वैयर्थ्यं अभेदसिद्धान्त पारम्यं चोपसंहृतम् । ''एतावानस्य महिमा''[7] यदेकोऽपि ''सहस्रशीर्षा'',[8] ''यद्भूतं यच्च भव्यम्''[9] इति ऋग्द्वयं च प्रमाणीकृतम् । अन्तिमा च कारिका-

1. इदं भामतीसाम्यम् ।
2. ब्र.सि. 2-5.
3. Ibid 2-7
4. Ibid 2-8
5. Ibid
6. Ibid 2-9
7. पुरुषसूक्तम्
8. Ibid
9. Ibid

यथानुवृत्तव्यवहारसिद्धिं यथावभासं कथयन्ति बाह्याः ।
तथैव भेदव्यवहारयोगं वदन्ति वेदान्तविवेकभाजः ॥[1]

इति तर्ककाण्डे एवमुपसंहृता ।

मण्डनमिश्राणां भगवत्पादानां चाद्वैते मतभेदः

मिश्रा हि शब्दाद्वैतं, सत्ताद्वैतं, भावाद्वैतमिति त्रिधा वर्णयन्ति । तत्र शब्दाद्वैतपक्षः - मंगलश्लोकीयाक्षरपदविशेषणव्याख्यानावसर एव दर्शितः प्रागस्माभिः । सत्ताद्वैतपक्षोऽपि दर्शितः । एवं भावाद्वैतपक्षश्चानूदित आनन्दस्य भावरूपत्ववर्णनावसरे । तत्र शब्दाद्वैतवादो भर्तृहरिणा वैयाकरणेन स्वकीये वाक्यपदीये समर्थितः । - 'अक्षरमाद्यन्तरहितं शब्दतत्त्वमेव अर्थरूपेण विवर्तत इति, तस्मादेव सर्वं जगदिदमिति' सिद्धान्तितम् ।

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ इति ।

मिश्रास्तु केवलशब्दब्रह्मवादमनङ्गीकुर्वन्तोऽपि शब्दरूपेण सर्वं जगदिदं ब्रह्मैवेति वर्णयन्ति । अर्थज्ञानं शब्दरूपोपरक्तमेव भवतीति 'न सोऽस्ति प्रत्ययो लोके यत्र शब्दो न भासते' इति वैयाकरणोक्तहेतुमेव स्वीयवादस्य आधारीकुर्वन्ति, चैतन्यज्ञानमपि वाग्रूपाधीनमिति । अयमेव शब्दाद्वैतवादः । अयं तु माण्डूक्यभाष्यविरुद्धः ।

आचार्या हि नामरूपातिक्रान्तं ब्रह्मेति वर्णयन्तः तद्विरोधं प्राकाशयन् । किं च ब्रह्मणो जगत्सृष्टावपि, 'अतः प्रभवा'दिति शब्दादर्थसृष्टिवर्णनात् प्रतिपादितं शब्दार्थसंबन्धनित्यत्वं भगवत्पादीयं[2] शब्दाद्वैतपक्षस्य विरोधीत्येतत् स्पष्टम् । तथा मिश्राः स्फोटसिद्धिग्रन्थे वैयाकरणसंमतस्फोटवादमङ्गीकुर्वन्ति । इदं तु आचार्यैः सूत्रभाष्ये मीमांसक-उपवर्षाचार्यसंमतवर्णपदवादस्य वर्णनित्यत्ववादस्य वा पुनरुद्धृतत्वेन वर्णातिरिक्तस्फोटस्वीकरणमेषां विरुद्ध्यते । सत्ताद्वैतवादश्च सद्रूपं ब्रह्मैव समस्तभेदप्रपञ्चं प्रति कारणमित्येष वादः । अयं वादः कुमारिलैः

1. ब्र.सि. 2-33 2. सू.भा. 1.3.28

तिरस्कृतोऽपि तेभ्यः प्राचीनोऽपि एतैः मिश्रैः किंचिदिव विपरिणामेन सत्तासामान्यरूपं निर्विशेषमपि उपचारेण तथोच्यत इति प्राग्दर्शितरीत्या परिपोषं प्रापितः । किं तु प्राङ्मङ्गलश्लोके ''आनन्दमेकममृतमजं विज्ञानमक्षर''[1] मिति सत्यज्ञानानन्दरूपमेव स्वीकृतमिति प्रतिभाति ।

भावाद्वैतवादः

अन्ततो अभावरूपधर्माङ्गीकारेऽपि ब्रह्माद्वैतवादस्य न विरोध इति समर्थकोऽयं वादः । अयं प्रागेवोदाहृत इति पुनः न प्रपञ्च्यते । अथापि आनन्दविषये दुःखाभावतिरिक्तानन्दरूपभाववस्तुसमर्थनेन सिद्धान्तकरणात् एतेषां भावाद्वैतवादः सर्वथा संमत इति वा न संमत इति वा स्पष्टमनुक्तत्वात् अनिर्णय एव । अथापि सिद्धिकाण्डे एतच्छास्त्रकृत्यप्रदर्शनावसरे[2] भेदप्रपञ्चाभावबोधनमेव कृत्यमित्युक्ततया प्रपञ्चाभावेनाद्वैतस्यहानिर्नास्तीति तैरङ्गीकृतप्राय एवेति सुवचम् । अत एवाद्यापि मण्डनमिश्रा भावाद्वैतवादिन इति कतिपयविपश्चितामाशयः प्रसिद्ध्यति । शास्त्रेण प्रथमं संसृष्टज्ञानमेवोदीयात्, न तु निर्विकल्पकं ज्ञानमिति मतमनुवदति[3] न तु खण्डयति । अपि तु शब्दज्ञानोत्तरमपि साक्षात्कारार्थमुपासनं कर्तव्यमिति वदति । तत्र विधिरस्तु वा, मा वा । अनेन निर्धारणेन ज्ञानोत्तरमपि प्रपञ्चाभाववाद एतत्संमत इति दुर्विनिश्चेयः । अथाप्येतेभ्यः प्राक् स वादो अवर्तत इति सुवचम् । आचार्यसुरेश्वरादिसिद्धान्तानुसारेण निर्विशेषं निःसामान्यं नामरूपातीतं भावाभावादिसर्वविकल्पातीतं सच्चिदानन्दरूपं ब्रह्मेति निर्णयात् तद्विरोधिनः पक्षाः प्रागुक्तास्त्रय इति आस्माकीनाशयः ।

मण्डनमते ब्रह्मविषये शास्त्रप्रामाण्यं भाष्यतो विलक्षणम् । अप्रामाण्यशंका तत्खण्डनं च-

नन्वन्वितपदार्थत्वाद्वाक्यार्थस्य पदार्थताम् ।
अप्राप्य न स्याद्वाक्यार्थः पदार्थत्वेऽन्यमानकः ॥[4] इति ।

सामान्येन पदार्थत्वे सिद्धेऽसाधाणैर्गुणैः ।
शक्यापूर्वविशेषस्य लोकवत्प्रतिपादना ॥[5] इति ।

1. ब्र.सि. 1-1
2. Ibid P.157
3. Ibid P.33
4. Ibid 4-1
5. Ibid 4-2

अयमर्थः- यथा लोके द्वीपविशेष एवंनामानो मरकतमयपादा पद्मरागमयचञ्चवः सौवर्णराजतपक्षाः पक्षिण इति वाक्ये पक्षिसामान्यं प्रमाणान्तराधिगतम् । उक्तेनानन्यसाधारणेन धर्मकलापेन संसृज्यमानं प्रमाणान्तरानधिगतं विशेषरूपमासादयति, वाक्येन च प्रमीयते प्रमाणान्तरानधिगतेन विशेषरूपेण । सर्वस्यैव हि वाक्यस्यानधिगतो विशेष एव प्रमेयः । कारणसामान्यं वा सत्सामान्यं वा 'यतो वा इमानि भूतानि जायन्ते' इत्यादिवाक्ये; तथा 'अस्थूलमनणु' इत्यादिवाक्ये चावगतपदार्थैः संसर्गात् भेदाच्च प्रमाणान्तरानधिगतं विशेषरूपमासादयति । वाक्यस्य च प्रमेयं भवति । तदेवं लोकसिद्धपदार्थान्वयेनैवापूर्वार्थप्रतिपत्तेः नानवबोधकत्वमनुवादकत्वं वा इति ।[1] किं च

सर्वप्रत्ययवेद्योऽस्मिन् ब्रह्मरूपे व्यवस्थिते ।
प्रपञ्चस्य प्रविलयः शब्देन प्रतिपाद्यते ॥
प्रविलीनप्रपञ्चेन तद्रूपेण न गोचरः ।
मानान्तरस्येति मतमाम्नायैकनिबन्धनम् ॥[2] इति ।

कारिकाशयस्त्वेवम्, अथवा प्रामाण्यमित्थमपि वक्तुं शक्यम् । न तावल्लोके अत्यन्तमप्रसिद्धं ब्रह्म । सर्वप्रत्ययवेद्यत्वात् । ब्रह्मव्यतिरेकेण प्रत्येतव्यस्याभावात् । विशेषप्रत्ययानां च सामान्यरूपानुगमात्, भेदोपसंहारविशिष्टं च सत्यं ब्रह्मेति वाचारम्भणश्रुत्या सदृष्टान्तं प्रतिपादनात्, शब्देन तु प्रपञ्चाभावः प्रतिपाद्यते । तत्रापि प्रपञ्चो, निषेधश्च सिद्धः, तयोः संसर्गात् तदभावप्रतीतिः । आम्नायैकनिबन्धनत्वं तु तस्योच्यते । प्रत्यक्षादीनामविद्यासंभिन्नत्वेन प्रत्यस्तमित-निखिलभेदेन रूपेणाविषयीकरणात् भेदप्रत्यस्तमयस्याम्नायगम्यत्वमिति ।[3] भूतार्थपरत्वे अपुरुषार्थत्वादप्रामाण्यशंका तत्परिहारश्च इत्थम् । प्रमाणस्य हि फलं प्रवृत्तिनिवृत्तिवत् उपेक्षाऽपि फलमित्याचक्षते । किं च अज्ञानतः शोकदुःखादेः जीवेऽनुभवात् तन्निवृत्तिश्च विज्ञानं पुरुषार्थो भवेत् । क्वचिद्विज्ञातेऽप्यर्थे व्याकुलानां कुतूहलिनां च नृणां ज्ञानमपि जातं पुरुषार्थः संमतः ।

---

1. ब्र.सि. p. 157
2. Ibid 4-3,4
3. Ibid P.157

रुपादिविषयेऽप्यक्षादौ नापुरुषार्थत्वं, नापि प्रवृत्तिपरत्वम् । तथैव प्रवृत्त्यविषयीभूतेऽपि ज्ञेये ब्रह्मणि पुरुषार्थत्वं संभवि । यतः स्वयं ब्रह्म प्रशान्तं विरजादिरूपं च । अत एव तत्त्वमसीत्युपदिश्यते शिष्याय । अन्यच्च

परप्रवृत्तेरङ्गत्वं प्रत्यक्षादेर्मतं यदि ।
अत्रापि साक्षात्करणप्रवृत्तावङ्गतेष्यताम् ॥[1]

इति । अत्र अन्तिमकारिकायाम् ... आत्मसाक्षात्कारप्रवृत्त्यङ्गत्वेन प्रामाण्यं यत् स्वीकृतं मिश्रैः, तदिदमहेयानुपादेयब्रह्मज्ञानमात्रेणाविद्यानि- वृत्तिशोकादिनिवृत्तिसमर्थनेन पुरुषार्थपर्यवसायिज्ञेयब्रह्मवाक्यप्रदर्शकभाष्येण समन्वयाधिकरणस्थेन विरुद्धम् । अन्यत्तु समानम् । तत्रापि प्रपञ्चप्रविलयस्यैव आम्नायैकगम्यत्ववर्णनेन प्रामाण्यसमर्थनमपि औपनिषदपुरुषपराम्नायसमर्थकभाष्येण समन्वयाधिकरणस्थेनैव विरुद्धम् । प्रथमोक्तं प्रामाण्यं तु कथंचिद्भाष्येण संगमयितुं शक्यम् । आत्मत्वेन प्रसिद्धस्यैव ब्रह्मणो ब्रह्मशब्देन च योगात् । प्रसिद्धत्ववर्णनेन च विशेषविप्रतिपत्तिनिरासद्वारा तत्स्वरूपप्रतिपादनादाम्नायस्य प्रामाण्यं जिज्ञासासूत्रभाष्योक्तरीत्या संगतमेवेति ।

मोक्षविचारः

मोक्षो हि विद्यासाध्यः । शब्दगम्यस्य[2] मोक्षस्य शब्दादेव व्यवस्थापनमिति "न च पुनरावर्तत"[3] इति श्रुत्या साध्यत्वेऽपि नान्तवत्वमित्यवगम्यते । अनन्तविद्यासाध्यत्वाद्वा अनन्तत्वम् । क्षणिकत्वेऽपि विज्ञानस्य सन्ततिरूपेणानन्तत्वम् ।

अनागतदेहेन्द्रियबुद्ध्यनुत्पादः मोक्षः । "अशरीरं वाव सन्त"[4] मित्यादिश्रुतेः । स च प्रागभावः । अतो न साध्यः ।

अथवा ब्रह्मप्राप्तिः । सा च चैत्रग्रामयोरिव जीवब्रह्मणोः स्यात् । "शतं चैका च"[5] "स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छति"[6] "तेऽर्चिषमभिसंभवन्ति"[7] इत्यादिमार्गश्रुतिभ्यः । अविभागलक्षणा ब्रह्मप्राप्तिः । यथा मधुनि नानाकुसुमरसानां

1. ब्र.सि. 4-11
2. श्रुतिप्रतिपाद्यस्येत्यर्थः ।
3. छा. 8-15-1
4. Ibid 8-12-1
5. कठ 2-3-16
6. छा. 8-6-5
7. बृ. 6-2-15

समुद्रे च नदीनां प्राप्तिस्तथा । "यथा लोके मधुकृतः"[1] इति "यथा सोम्येमा नद्यः"[2] इत्यादिश्रुतेः । कार्यस्य कारणभावापत्तिर्वा । "तथा विद्वान् पुण्यपापे विधूय[3] " इत्यादिश्रुतेः ।

तद्रूपपरिणामलक्षणा वा ब्रह्मप्राप्तिः । योगव्याघ्रवत् । "स यो ह वै तत्परमं ब्रह्मवेद ब्रह्मैव भवति"[4] इति श्रुतेः ।

स्वरूपप्राप्तिलक्षणा वा ब्रह्मप्राप्तिः । स्फाटिकस्येव रागापकर्षणेन "परं ज्योतिरुपसंपद्य स्वेन रुपेणाभिनिष्पद्यत"[5] इति श्रुतेः । एवमादिमेन सह सप्तपक्षाः मोक्षे वादिनाम् ।

अत्रोच्यते, नाद्यः, आत्मनः सर्वगतत्वादनन्यत्वात्, तद्विज्ञानेन सर्वविज्ञानोपदेशात्, तत्त्वमसीति साक्षात् प्रतिपादनात्, प्रत्यगात्मवाचिना आत्मशब्देन सर्वत्र निर्देशात्, "अथ योऽन्या"[6] मिति भेददर्शननिन्दाकरणाच्च । न द्वितीयः । 'निष्कल' मिति निरवयवत्वश्रवणादुक्तहेतुचयाच्च परस्परावयव-संभेदलक्षणस्य अविभागस्यानुपपत्तेः । नापि तृतीयः । कार्यस्य सर्वदा कारणात्मत्वात् कार्यरूपनाशे मोक्षस्योच्छेदरूपताप्रसङ्गः । अमृतश्रुतिविरोधश्च । आत्मोच्छेदस्यानिष्टत्वात्, अक्षरमिति तत्प्रतिषेधात्, कार्यकारणभावप्रतिषेधात्, विकारानृतत्वश्रवणादित्यादिहेतुभ्यः । न चतुर्थः । अनन्यत्वादेव चैतन्यस्य ब्रह्मस्वरूपस्याविशेषात् । शोकमोहादीनामात्मरूपत्वेऽनुच्छेदापत्तिः । तदनात्मत्वे क्षणिकत्वे वा, क्षणिकत्वादेव नाशसंभवेन ज्ञानसाधनायोगः । नाप्यैश्वर्यविशेषो ब्रह्मणि मोक्षः, तत्प्राप्तिः, तद्रूपपरिणामो वा । "स स्वराड् भवती"ति[7] श्रुतेः । अनेकेश्वरापत्तेश्च । ब्रह्मापेक्षया न्यूनसमानान्यतरैश्वर्यप्रसंगो जीवानां स्यात् । न्यूनैश्वर्ये स्वाराज्यं न स्यात् । तत्रैव परमेश्वरस्य जीवाधिपत्ये जीवानामन्यराजता स्यात् । तदा चान्तवत्वप्रसङ्गः । "अथ येऽन्यथाऽतोविदुरन्य-राजानस्ते क्षय्यलोका भवन्ति"[8] इति श्रुतेः । समत्वस्य तु युगपदनुपपत्तिरेव । एकश्चेत् सर्वाधिपतिः तदा किं कुर्वन् ईशः स्यात्? सर्वेषां समत्वे च

1. छा. 6-9-1
2. Ibid 6-10-1
3. मु. 3-1-3
4. मु. 3-2-9
5. छां. 8-3-4
6. बृ. 1-4-10
7. छां. 7-25-2
8. Ibid

एकमतित्वाभावात् विरोधापत्तिः । एकाभिप्रायानुरोधित्वेऽन्येषामनीश्वरत्वप्रसङ्गः । अननुरोधित्वे च विरोधादनीश्वरत्वापत्तिः । पर्यायेणैश्वर्यस्वीकारेण विरोधपरिहरणेऽपि अन्तवत्वप्रसंगः । न ब्रह्मतुल्यमैश्वर्यम् । जगत्सर्गासंभवात् ।

परमसिद्धान्तः

तस्मात् स्फटिकस्येव रागाद्यपकर्षणेन स्वरूपाविर्भावो ब्रह्मप्राप्तिर्मोक्षः । विज्ञानात्मनो ब्रह्मरूपत्वादिति । परंज्योतिःश्रुतौ च स्वेनेति विशेषणात् नान्यरूपनिष्पत्त्यवकाशः । मोहावरणविगमे मलापगमे शुक्लवस्त्रमिव प्रागपि शुक्लं जातमितिवत् स्वरूपाविर्भावे सति स्वेनरूपेणाभिनिष्पद्यत इत्युक्तिः । एवं स्वरूपावस्थितिलक्षणमोक्षस्य न कार्यता, नाप्यन्यत्वम् । तदुपयोग्यविद्यापगम एवोक्तरीत्या मुक्तिः । अविद्या हि संसारः । यद्यग्रहणमविद्या विद्यैव चाविद्यानिवृत्तिः, सर्वत्र भाव एवाभावव्यावृत्तिरिति । यदि विपर्यासोऽविद्या, विरोधितत्त्वज्ञानोदय एव तन्निवृत्तिः । विद्याब्रह्मप्राप्त्योस्तु तुल्यकालता श्रूयते "ब्रह्म वेद ब्रह्मैव भवति"[1] इति । क्वचित् पौर्वापर्यश्रवणेऽपि 'मुखं व्यादाय स्वपिती' तिवदविरुद्धम् । एकस्यापि वस्तुनस्तुल्यकालत्वं नानुपपन्नम् । 'यदा घटो नश्यति तदा कपाला जायन्ते' इतिवत् । मार्गश्रुतयस्तु सोपाधिकब्रह्मविषयाः । ब्रह्मविदामुत्क्रान्त्यभावेन गतिरेव नास्ति । अतो न शुद्धब्रह्मविद्याविषयाः इत्यादिसमाधानसंक्षिप्तार्थः । सगुणब्रह्मविदां क्रममुक्त्याश्रयणेन कार्यब्रह्म प्राप्य तत्रैवोत्पन्ननिरुपाधितत्त्वज्ञानानां परमपदप्राप्तिरिति "वेदान्तविज्ञान-सुनिश्चितार्थाः...... परिमुच्यन्ति सर्वे"[2] इति श्रुतेः । तत्र सन्यासयोगादित्यस्य भेदेन परमेश्वरे स्वकृतानां कर्मणां फलानां च सन्यासात् योगाच्च सर्वमिदं कर्त्रादि ब्रह्मेत्युपासनादिति, अन्यत् समानम् । "ब्रह्मणा सह ते सर्वे........"[3] इत्यादिस्मृतेश्च ।[4]

अन्येषां समाधानम्-, अनावृत्तिश्रवणं, ब्रह्मलोकेस्थित एव सगुणविदां चन्द्रलोकादिव नावृत्तिः, अपि तु तत्प्रलयपर्यन्तावस्थितिः । अमृतत्वं

1. मुं. 3-2-9
2. महाना. 8-15 मुं. 3-2-6
3. कूर्म 1-12-269
4. इदं समाधानद्वयमपि भाष्यानुगुणम् ।

चापेक्षिकम् । एकस्य ब्रह्मणो विकृताविकृततत्त्वरूपेण भेदाश्रयणेऽपि नाब्रह्मविदो मार्गः, नापि विद्यावतः, तदुदये निखिलभेदोच्छेदात् । अविभागश्रुतिश्च नदीमधुनिदर्शनेन विवेकविज्ञानाभावपरा, न तु तद्भिदविभागपरा । सर्गश्रुतिरपि एकात्मतत्त्वप्रतिपत्तिप्रधाना । तदानुगुण्येनैव सर्गश्रुतीनामर्थव्यवस्थापनम् । सर्गश्रुतेस्तत्वप्रतिपत्तिं प्रति उपायत्वमेव । कारणाव्यतिरेकात् कार्यस्य । एकमेवाद्वितीयमित्यभ्यासात्, सर्वभेदनिरासात्, भेदस्य मायामात्रत्वश्रुतेः, कारणसत्यत्वावधारणाच्चैकत्र भेदाभेदविरोधादपि कार्यकारणरूपेण तदुभयोपपादनमप्यनुपपन्नम् । भेदविकल्पस्य बिम्बप्रतिबिम्बवत् वर्णपदवाक्यादिवच्च तदुपादानमात्रत्वम् । स्वप्नश्रुतिवत् सृष्टिश्रुतिः ।

अत्रैवान्येषां दर्शनम्, - आविर्भूतस्वरूपस्य ब्रह्मणः सर्वात्मत्वात्, सर्वेशितृत्वात्, सर्वभोक्तृत्वात्, देवाद्यानन्दानामपि तदानन्दरूपत्वाच्च मुक्तात्मनि "स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्"[1] "स स्वराड् भवती"[2] ति संकीर्तनं ब्रह्मरूपाविर्भावलक्षणमोक्षप्रशंसार्थम् इत्यादीनि भिन्नभिन्नदर्शनानि अनूदितानि । एवं मोक्षस्य साध्यात्वसाधनाय मतान्तरमनूद्य खण्डितम्-

प्रायश्चित्तदिशा बन्धहेतूच्छेदोऽपि नो ततः ।
सर्वाविद्याप्रविलये न च्छेद्यमवशिष्यते ॥[3]
बन्धहेतुरविद्यात्मा विद्यायां साऽस्तमागता ।[4]

इति विस्तरभिया सर्वं संग्रहेण दर्शितम् ।

ज्ञानानन्तरं देहपातशंका समाधानं च;

उक्तरीत्या कर्मक्षयाभ्युपगमे तत्त्वदर्शनानन्तरमेव मुक्तिः[5] स्यात् । न देहपातप्रतीक्षा स्यात् । "तस्य तावदेव चिरम्"[6] इति प्रतीक्षाश्रुतिर्बाध्येत । 'भोगेन त्वितरे' इति सूत्रविरोधश्च इति शङ्का ।

1. छां 8-7-1
2. Ibid 7-25-2
3. ब्र.सि. 3-107
4. Ibid 3-108
5. सद्यो देहपातरूपा ।
6. छां 6-14-2

समाधानं तु, श्रुतेः मुक्तौ चिरकालविशिष्टदेहपातावधिबोधने न तात्पर्यम्; अपि तु क्षिप्रतायाम्। तदा चिरमित्येव ब्रूयात्, तावदेवेति न ब्रूयात्। यथा एतावन्मे चिरं यत् स्नातो भुञ्जानस्य चेति तद्वत्। अतः क्षिप्रैव मुक्तिः। न तु प्रतीक्षणीयमस्ति। देहपातप्रतीक्षा तु नान्तरीयकत्वाद् भवत्येव इति। अथवा चिरत्वमनूद्य देहपातावधित्वमुच्यतेऽत्र। अर्थस्तु यदि कस्यचित् चिरं तावदेव यावन्न विमोक्ष इति। उभयोरपि पक्षयोः स्थितप्रज्ञलक्षणोपपत्तिः। स्थितप्रज्ञस्तावन्न विगलितनिखिलाविद्यः सिद्धः। किं तु साधक एवावस्थाविशेषं प्राप्तः स्यात्। न च ब्रूमः, ब्रह्मवेदनानन्तर एव देहवियोग इति। किं तु प्रारब्धकार्यकर्मक्षयं भोगेन प्रतीक्षत इति। तत्र कस्यचित् तत्कालोऽपवर्गः। कस्यचित् कियांश्चित् क्षेपः रज्जुतत्त्वदर्शनेऽपि सर्पभ्रमजनितभयकम्पप्रभृतयः कस्यचित् तदैव निवर्तन्ते। कस्यचित् संस्कारवशादनुवर्तन्ते कियन्तंचित्कालम्। तथा सर्वकर्मक्षयेऽपि भुज्यमानविपाकसंस्कारानुवृत्तिनिबन्धना शरीरस्थितिः कुलालव्यापारविगम इव चक्रभ्रान्तिः। एवमनुवृत्तावपि चिरकालो नैव नियतः। संस्कारश्च न मूलकारणतुल्यफलकः। नापि स्थायी। अन्यथा कम्पादीनां निवृत्तिरेव न स्यात्। निवृत्तये च हेत्वन्तरं नापेक्षते। तत्त्वदर्शनादेव हि क्रमेण निवर्तते। स्वयमेव वा कुलालचक्रभ्रमणसंस्कारवत्। तथा निवृत्तायामविद्यायामारब्धानारब्धकार्येषु कर्मसु निवृत्तेषु आरब्धविपाकसंस्काराद्विद्वानपि, शरीरिणमिव भोक्तारमिव चात्मनामाभासमात्रेण प्रत्येति। न तु अविद्वानिव आरूढाभिनिवेशः। स चायमीदृशः स्थितप्रज्ञो वर्णितः। वीतकाम आत्मरूपसन्तुष्टो दुःखेषु च्छायामात्ररूपेषु तत्त्वदर्शनेनाभिनिवेशाभावात् कृत्रिमेभ्य इव व्याघ्रादिभ्योऽनुद्विग्नमनाः, सुखेषु च कृत्रिमरमणीयेष्विव विगतस्पृहः सा चेयमवस्था जीवन्मुक्तिरिति गीयते। आरब्धकार्यकर्मसंस्कारक्षयश्च देहपातादेव गम्यते। तदनुवृत्तौ देहपात एव न स्यादिति न देहपातोत्तरकाले तद्विपाकस्य च्छायामात्रेणापि दर्शनं शक्यते। येन हि कर्मणा यच्छरीरमारब्धं तत्रैव तद्विपाकशेषावभासः। संचितानां निवृत्तत्वात्, नास्ति तत्संस्कारः। लब्धव्यापारकारणसंस्काराद्धि कार्यलेशानुवृत्तिः। कार्यसंस्कारादेव वा, उभयसंस्कारादेव वा भवतीति कार्यशेषानुवृत्तिः कारणविगमेऽप्यस्ति। तदुक्तं सांख्यकारिकायाम्। 'तिष्ठति संस्कारवशाच्चक्रभ्रमवद्धृतशरीर' इति, अतो विदुषः पतितेऽस्मिन् शरीरे

कैवल्यमवश्यंभावि । तत्पूर्वं तु उक्तरीत्या संस्काराद्विदुषोऽपि शरीरस्थितिः । प्रारब्धकर्मप्रतिबन्धात् भोगेन क्षयप्रतीक्षेति तु मिश्रैर्नांगीक्रियते ।[1] कर्मविपाकश्च विदुष आत्मसंस्पर्शात् आभासमात्रम् । मणिकृपाणदर्पणादिनिबन्धनविशेषवत् । नाविदुष इव विपाकः । अनभिनन्द्यमानत्वादद्विष्यमाणत्वाच्च । "तत्तत्प्राप्य शुभाशुभम्, नाभिनन्दति न द्वेष्टि"[2] इति वचनात् । मण्डनमिश्रैरुपक्षिप्तानां विचारविशेषाणां भाविवेदान्तिषु विचारधाराप्रवहणे परममूलत्वम् - तथाहि,

1. विपरीतख्यातिविचारः भाविवेदान्तिकृतख्यातिबाधविचारे अङ्गम् ।
2. वेदप्रामाण्यविचारः तत्रापि प्रमाणसामान्यनिरूपणे प्रमाणान्योन्य-विरोधेऽन्यतमस्वीकारनिर्णये च निदानम् ।
3. साक्षात्कारविषये कृता चर्चा । वाक्यात् स भवति वा न वा, इति पौनःपुन्येन उत्तरवेदान्तिषु चर्चाया आस्पदीभवति ।
4. अविद्या अनिर्वचनीयेति वादः । उत्तरवेदान्तिषु शाखोपशाखावत् तत्प्रवर्धने बीजीभवति ।
5. एवमविद्याया आश्रयविषयविचारः एतैर्वादभूमिमारोपितः, भाविवेदान्तिषु अद्यापि विवादग्रस्तो भवति ।
6. अविद्यानिवृत्तिविचारः । अयमपि विद्याविद्ययोर्विरोधः कीदृशः ? सुषुप्तेऽविद्या अस्ति उत न । तत्रापि किं वैविध्यमस्ति? अनाद्यविद्याया निवृत्तिश्च कथम्? तत्संस्कारोऽपि किमवशिष्यते? इत्यादिविचारस्य मूलम् ।
7. कर्मज्ञानसंबन्धविचारः । वाक्यज्ञानोत्तरमपि कर्मोपासने किमावश्यके? ज्ञानिव्यवहारश्च कथम्? कर्म कथं मोक्षोपयोगि? ज्ञानोत्तरं सद्यः

---

1. अत्र स्थितप्रज्ञलक्षणं न सिद्धस्य, अपि तु साधकविशेषस्येति य एकोऽभिप्राय उक्तः स शाङ्करभाष्यविरुद्धः । स्थितपज्ञस्य सिद्धजीवन्मुक्तस्वरूपत्वात् । तदनङ्गीकारे तत्त्वोपदेशकस्याभावप्रसंगः । द्वितीयाभिप्रायस्तु न शाङ्करमतेनात्यन्तं विरुद्ध्यते । परंतु 'भोगेन त्वितरे क्षपयित्वा संपद्यत' इति किंचिदिव विरुद्ध्यते । ज्ञानेन प्रारब्धस्य निवृत्त्यनङ्गीकारात्।
2. भ.गी.2-57

शरीरपातोऽस्ति? इत्यादिप्रश्नानां समाधानैः परिबृंहयन् भाविवेदान्तिनामपि समुच्चयवादचर्चाया मूलम् ।

8. शास्त्रस्य कार्यपरत्वेन प्रामाण्यवादिखण्डने एतैरनुसृतो मार्गः । शब्दार्थयोः संबन्धज्ञानं कथम्? वाक्यात् संसर्गो भेदो वा किमवश्यं बुध्यते? वाक्यं प्रवर्तकमेव वा? इत्यादिरूपो वेदान्ते चर्चाविषयः ।

9. श्रवणादि किं विहितमुत न? एतैस्तु तत्र विधिर्नास्ति, अर्थवादमात्रमिति उक्तम् । अत्राप्यर्वाचीनानां मतभेदस्यानेनावसरो दत्तः ।

10. भेदनिरासः तर्केणापि कृतो मण्डनमिश्रैः । भेदः किं भावः उत अभावः? किं प्रत्यक्षादिसिद्धः? उत न, इत्यादिविचारो शङ्करैरकृतोऽपि मिश्रैः कृतः, भाविवेदान्तिनां भूयो भूयो विचारस्य मार्गदर्शी भवति ।

ब्रह्मसिद्धिपरामर्शो ग्रन्थान्तरेषु दृश्यते यथा, प्रकरणपञ्चिका, सुरेश्वरवार्तिकं, नैष्कर्म्यसिद्धिः, भामती, कल्पतरुः, न्यायकणिका, न्यायमकरन्दः, न्यायदीपावली, तत्त्वदीपिका, शतदूषणी, न्यायसारव्याख्या, न्यायचन्द्रिका, श्रीभाष्यं, पञ्चपादिकाविवरणं, भास्कराचार्यभाष्यं, न्यायकन्दली इत्यादिग्रन्थेषु ब्रह्मसिद्धिभागपरामर्शः संवादार्थं क्वचित्, खण्डनार्थं क्वचित् अर्थतः शब्दतश्च तत्तद्ग्रन्थकारैः कृतः । विशेषेण कुप्पस्वामिशास्त्रिभिः 'ब्रह्मसिद्धि' पुस्तके भूमिकायां प्रदर्शित इति न वितन्यते ।

पञ्चपादिका

पञ्चपादिकाकर्तारः श्रीपद्मपादाचार्या इत्येतत् शंकरविजयादि-ग्रन्थतोऽवगम्यते । वस्तुतस्तु पञ्चपादिकाकर्तार इमे क इति चरितव्यतिरेकेणास्माद् ग्रन्थादवगन्तुं न शक्यते कुत्रापि स्वनामानुल्लेखनात् । साक्षादेव भगवत्पादान्तेवासिन इत्यपि न निर्णेतुं शक्यम् । अथवा-

नमाम्यभोगिपरिवारसंपदं निरस्तभूतिमनुमार्धविग्रहम् ।
अनुग्रहमुन्मृदितकाललाञ्छनं विना विनायकमपूर्वशंकरम् ॥

इति मंगलश्लोके आचार्यनामोल्लेखात् अपूर्वशंकरत्वेन आचार्येषु प्रसिद्धशंकरवैलक्षण्यपुरःसरं निरतिशयमहिमवर्णनमिदं किंचिदिव तदन्तेवासित्वं ग्रन्थकर्तृषु व्यञ्जयति । तथा 'तान्भाष्यवित्तकगुरून् प्रणमामि मूर्ध्ना' इति सामान्यतो निर्देशोऽपि ग्रन्थकर्तृगुरुनिर्णयं न स्पष्टयति । स्वनामानुल्लेखेऽपि इतिहासप्रसिद्धिमात्रेणैतत्कर्तारः पद्मपादा इति गृहीतम् । प्रायेण अध्यात्मग्रन्थकर्तृभिः प्रसिद्धाचार्यैः नित्यतृप्तैः प्रख्यात्यादिकामनाभावेन स्वीयनामनिर्देशो न क्रियत इति वस्तुस्थितिः इत्यास्तां कर्तृविचारः ।

पञ्चपादिकेति नाम कथमस्याः टीकायाः इति विचारे अनन्तकृष्णशास्त्रिभिः कृतभूमिकायामित्थं विमृष्टम् ''तत्र पद्मपादानां व्याख्या पञ्चपादिकेति विख्यातम् । इयं हि चतुःसूत्रीपर्यन्तमेवोपलभ्यते । इदमत्रैतिह्यम् 'पद्मपादाचार्या व्याचक्षत ब्रह्मसूत्रभाष्यम् । परं तु कैश्चित् तदीयं पुस्तकं दग्धम् । अनन्तरं चाचार्यपादैरेवानुग्रहवरेण पुनरप्युज्जीवितं यावच्छ्रुतमाचार्यपादैरिति' । पञ्चपादिकेति नामापि पादपञ्चकपर्यन्तमेव तथोज्जीवितमिति । पञ्चपादिकाविवरणे पञ्चपादिकानाम्नैव ग्रन्थस्यास्योपक्षेपात् चतुःसूत्रीपर्यन्तमेव विवरणग्रन्थप्रवर्तनाच्च पञ्चपादिकेति चतुःसूत्र्या एव नामेति जानीमः । व्याख्या तु पद्मपादाचार्यैः संपूर्णस्यैव भाष्यस्य विरचितेति ग्रन्थमध्ये 'एक आत्मनः शरीरे भावात्' इत्यादिसूत्राणां विषयविशेषाणां विस्तृतविचारस्थानत्वेनोल्लेखनादध्यवसीयते । सति चैवं चतुःसूत्र्या एव पञ्चपादिकेति नामनिदानमिदमेव प्रतिभाति यत्

पादशब्देनावयवार्थाभिधानात् पञ्चावयवा व्याख्येति पद्मपादाचार्या मन्यन्त इति, चतुःसूत्री सर्वाऽपि शास्त्रारम्भसमर्थनरूपत्वात् एकाधिकरणमिति पक्षेणोपपद्यते। शास्त्रारम्भसमर्थनं चतुःसूत्र्याः कार्यमिति विशिष्टाद्वैतिनोऽपि मन्यन्त''[1] इति।

पदादिवृन्तभारेण गरिमाणं बिभर्ति यत्।
भाष्यं प्रसन्नगम्भीरं तद्व्याख्यां श्रद्धयारभे ॥[2]

इति भाष्यमिति पूर्णभाष्यग्रहणपुरःसरं व्याख्याकरणे स्वप्रवृत्तिप्रतिज्ञानात् भाष्यस्य संपूर्णस्यैव व्याख्या चिकीर्षिता ग्रन्थकृतेति निश्चयः। परं तु सा सपादैकाध्यायपर्यन्तमेवानुवृत्ता सती मध्य एवान्तरायैरुपरता स्यादिति नाम्ना तर्कयामः। एवं मध्योपरतिश्च कादम्बर्या इव संभाव्यते। अत्रापि पञ्चानामपि पादानां व्याख्या नोपलब्धा। केवलं चतुःसूत्रीमात्रस्य। उपलब्धटीकाया एव विवरणादिव्याख्या प्रवृत्तेति वयमभिप्रैमः।

टीकायाः प्राचीनतमत्वे आद्यत्वे च प्रमाणम्

अत्रोपलभ्यमानानां बहूनां विषयाणां भामतीरत्नप्रभादिग्रन्थेषु संवादेऽपि पद्मपादाचार्याणां भाष्यकारसमानकालिकत्वात् तदुत्तरकालिकत्वाच्चान्येषां व्याख्याकारणां प्रथममेतैरेव अभ्यूहिता उपपत्तयोऽन्यैः संकलिता इत्यत्र न कस्यापि संशीतेरवकाशः। नानाशास्त्रीयविषयसंग्रथनं युक्तिगाढत्वं प्रतिपादनप्रौढिमा चात्र सूक्ष्मदृशां शिरसा श्लाघागोचरा इत्यत्र न कापि विप्रतिपत्तिः। अस्मादेव प्रबन्धात् स्वस्वमतिसंमानितेषु संगृहीतेष्वपि व्याख्याकृद्भिः विषयेषु प्रसिद्धेष्वपि सन्ति भूयांसः। तेऽमी विषयाः विहायेमं ग्रन्थं नान्यत्रोपलभ्यन्ते। त इमे विषयाः प्रथमवर्णकादारभ्य नवमवर्णकान्तम् उत्तरत्र प्रदर्शयिष्यन्ते। अथापि कल्पतरौ भामतीप्रतीकमादाय पञ्चपादिकाकर्तृमतखण्डनं सूचितम्। तथाहि, वैश्वानराधिकरणे कल्पतरौ 'पञ्चपादिकाकृतस्तु वाजसनेयिवाक्यस्यापि आत्मोपक्रमत्वलाभे किं शाखान्तरालोचनयेति पश्यन्तः पुरुषमनूद्य वैश्वानरत्वं विधेयमिति' व्याचक्षते। तद्दूषयति भामत्याम् 'अत एवे'ति। तथैवान्यत्र

1. P.32
2. पं.पा. मंगलश्लोकः -5

पञ्चपाद्यां तु जाठरे ईश्वरदृष्टिपक्षमुक्त्वा योगात् अग्निवैश्वानरशब्दयोरीश्वरे वृत्तिरिति पक्षान्तरं वक्तुमयमुद्देश्यविधेयभाव आश्रित इति चिन्त्यमिदं दूषण'[1] मिति । अन्यत्र दहराधिकरणे 'पञ्चपाद्यां तु रूढिरुक्ता । तां दूषयति येत्विति । ये तु आकाशशब्दो ब्रह्मण्यपि मुख्य एव नभोवदित्याचक्षते, तैः 'अन्यायश्चानेकार्थत्वमिति' 'अनन्यलभ्यः शब्दार्थ' इति च मीमांसकानां मुद्राभेदः कृतः' । एवं तत्र तत्र पञ्चपादिकाव्याख्यांशखण्डनं पञ्चपादिकायाः पूर्णतामवगमयति । अनेन भामतीकल्पतरुकारैरियं व्याख्या परिपूर्णा दृष्टेति च गम्यते । आनन्दगिरिकृतन्यायनिर्णयटीकायामियमेव पञ्चपादिका आधारीकृता तत्र तत्र । 'मिथ्या च तत् अज्ञानं चेति मिथ्याज्ञानम्' इत्यादि व्याख्यानम् अध्यासभाष्यस्थं पञ्चपादिकाऽनूनम् । कुतः? तद्वदेवानाद्यज्ञानमभावविलक्षणं निमित्तमुपादानं च स्वीकृतं टीकाकृता । एवमेव विवरणतत्त्वदीपनादिबहुग्रन्थेषु पुरस्कृतेयमिति हेतोरियमेव प्राचीनेति तर्क्यते ।

वर्णकविभागः

अत्र नव वर्णकानि भाष्यविभागेन दर्शितानि । तत्र आदितः 'अस्यां शारीरकमीमांसायां प्रदर्शयिष्याम' इत्यन्तं प्रथमवर्णकम् ।

वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रमिति द्वितीयवर्णकम् । तत्र 'अथ' शब्द इत्यारभ्य 'तस्माद् ब्रह्मविजिज्ञासितव्य' मित्यन्तं तृतीयं वर्णकम् ।

तत्पुनर्ब्रह्म प्रसिद्धमित्यारभ्य 'निश्रेयसप्रयोजना प्रस्तूयत' इत्यन्तं चतुर्थवर्णकम् । एवं प्रथमसूत्रे चत्वारि वर्णकानि । ब्रह्मजिज्ञासितव्यमित्युक्तमित्यारभ्य द्वितीयसूत्रभाष्यं पञ्चमं वर्णकम् । एवं शास्त्रयोनित्वाधिकरणभाष्यं षष्ठं, सप्तमं च, भाष्यीयवर्णकद्वयानुसारेण । एवं 'कथं शास्त्रयोनित्वमिति' साक्षेपं चतुर्थसूत्रीयप्रथमवर्णकं भाष्यमष्टमम् । एवं चतुर्थसूत्रीयद्वितीयवर्णकं प्रतिपत्तिविधिनिरासपरम् अत्रापरे इत्यारभ्य आन्तं भाष्यं नवमवर्णकम् ।

1. वे.क. 1-2-25

नवानां वर्णकानां संक्षिप्ताः मुख्यविषयाः-प्रथमवर्णके प्रथमसूत्रसूचितविषय-प्रयोजनसिद्धिहेतुभूताध्याससमर्थनम् । द्वितीये पूर्वमीमांसया गतार्थत्वशंका-समाधानम् । तृतीये अधिकारिसमर्थनम् । चतुर्थे पुनः प्रकारान्तरेण विषयाक्षेपपुरःसरं शास्त्रारम्भसमर्थनम् । पञ्चमे ब्रह्मणो लक्षणवर्णनम् । षष्ठे वेदकारणत्वेनापि ब्रह्मणः सर्वज्ञत्वदृढीकरणम् । सप्तमे ब्रह्मणः शास्त्रैकगम्यत्व-वर्णनम् । अष्टमे शास्त्रप्रमाणगम्यत्वाक्षेपेण तत्समर्थनम् । नवमे प्रकारान्तरेण शास्त्रप्रमाणगम्यत्वाक्षेपेण तत्समाधानम् ।

शारिरकशब्दनिर्वचनम्-शरीरमेव शरीरकम् । शरीरके भवः शारीरकः जीवः । तमधिकृत्य कृतो ग्रन्थः शारीरकः । तदिह वेदान्तानां जीवस्य सत्वमधिकृत्य प्रवृत्तानां ब्रह्मरूपतायां पर्यवसानमिति कथयितुं प्रणीतानामपि शारीरकं जीवतत्त्वमधिकृत्य कृतत्वमस्तीति शारीरकाभिधानम् ।

प्रत्यक्शब्दनिर्वचनम् - तं प्रचारमशेषमसंगितयाऽविकारित्वेन च हानोपादानशून्यः साक्षादव्यवधानमवभासयति 'चिति' धातुः । स एव देहादिष्विदन्तया बहिर्भावमापाद्यमानेषु प्रातिलोम्येन अञ्चतीवोपलक्ष्यत इति प्रत्यगुच्यते । आत्मा च निरुपचरितस्वरूपत्वात् ।

ब्रह्मशब्दनिर्वचनम्-ब्रह्मशब्दे व्युत्पाद्यमाने बृंहतेर्धातोः वृद्धिकर्मणोऽर्थानुगमात् प्रयोगानुगतमेवासति विशिष्टार्थविषयस्य आपेक्षिकमहत्व-स्यापरिग्रहात् सर्वतो निरवग्रहमहत्वसंपन्नं वस्तु वाक्यार्थान्वयि ब्रह्मपदादनुगम्यते । ततश्च कालकृतावच्छेदनिमित्तस्याल्पत्वस्याभावात् सदा सत्वात् नित्यं किंचिद्वस्तु ब्रह्मपदात् प्रतीयते । तथा रूपान्तरसद्भावे तद्रूपविकलत्वात् अवच्छेदकृतमल्पत्वं स्यात्, तच्च ब्रह्मपदादेवापास्यते । तस्मादेकरसमद्वैतं वस्तु ब्रह्मपदात् प्रतीयते तेन देशकृतोऽपि परिच्छेदो निराकृतो भवति । वस्त्वन्तरसद्भावे हि तदपेक्षया एतावति सद्भावः, नातः परमस्तीति स्यात् एतस्माद् व्यावृत्त इति । तदभावे न परिच्छिन्नबुद्धिर्भवति । बुद्धत्वं च बृहत्यर्थान्वयादेव । कथम्? अबोधात्मकं हि वस्तु भोग्यम् । तत् भोक्तारं प्रति शेषत्वात् निकृष्टम् । चेतनः पुनः न कस्यचिद्गुणीभूत इति सर्वस्मादुत्कृष्टं बुद्धस्वरूपं किंचित् प्रतीयते । एवं 'मुक्त' मिति च ।

अविद्याकामकर्मपरतन्त्रः तैरितश्चामुतश्च पशुवन्नीयमानो[1] निकृष्टो भवति लोके । ब्रह्मशब्दस्तु स्वार्थान्वयेन वाच्यं किंचिद् गमयन् सदैवाविद्यादि-संसारबीजानाकलिततया तस्योत्कृष्टमहत्वमावेदयति । एवं सर्वज्ञंसर्वशक्तिसमन्वितं च तदिति 'ब्रह्म' शब्दादेव अवगम्यते । कथम्? यदि किंचिदविदितं तेन कुतश्चिद्वा कार्याद् व्यावर्तते शक्तिः, आपेक्षिकस्तदोत्कर्षः स्यात् । न तद्युक्तम् । अन्यतोऽसिद्धस्य वस्तुनः पदप्रयोगादेव प्रतिपत्तौ । सिद्धे हि वस्तुनि प्रयोगे, तस्य यथासिद्धमेव महत्वं निरुच्येत । शब्दादेव तदर्थान्वयप्रतीतौ निरंकुश एवार्थोऽभ्युपेयः । एवं च बृंहतेरर्थः परिपूर्णो भवति । यदि सर्वमस्य साक्षादेव संविद्गोचरे वशे च वर्ततेति । इत्थं च सर्वज्ञं सर्वशक्तिसमन्वितं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेति 'ब्रह्म' शब्दव्युत्पत्तिमहिम्ना प्रतीयत इति ग्रन्थकृता विस्तरेण प्रदर्शितम् ।

श्रवणादिशब्दार्थनिर्वचनम्-श्रवणं नाम आत्मावगतये वेदान्त वाक्यविचारः, शारीरक श्रवणं च । मननं नाम वस्तुनिष्ठं वाक्यापेक्षितदुन्दुभ्यादिदृष्टान्त-जन्मस्थितिलयवाचारम्भणत्वादियुक्त्यनुसन्धानम् । वाक्यार्थाविरोध्यनुमानानुसन्धानं च । निदिध्यासनं नाम मननोपबृंहितवाक्यार्थविषये स्थिरीभावः । विधेयस्य उपासनापर्यायस्य निष्फलत्वात् । दर्शनं नाम ततो वाक्यार्थे स्थैर्यात् निरस्तसमस्तप्रपञ्चावभासविज्ञानधनैकतानुभवः ।

श्रवणादौ विधितात्पर्याभावः; अत्र ज्ञाने श्रूयमाणा अपि विधयः, विधय इव लक्ष्यन्ते । विधिकार्यलेशस्य बहिर्मुखतानिरोधरूपस्य सत्वात् । केवलप्रमाणवस्तुपरतन्त्रे ज्ञानेऽकिंचित्करत्वात् कुण्ठीभवन्ति । किं तु अर्थवादतया आत्मज्ञानस्तावकत्वेन तदुन्मुखीकरणात् बहिर्मुखतानिरोधाच्च विधय इव । अर्थवादस्तु, मैत्रेयीं प्रति याज्ञवल्क्यस्य तत्त्वोपदेशकाले ''न वाऽरे पत्युः कामाये''[2] त्यादिना अभिहितः पत्यादेरीप्सिततत्त्वप्रतिषेधेन आत्मन एव ईप्सिततमत्वप्रतिपादको ग्रन्थः । मनननिदिध्यासनेऽपि न ब्रह्मावगत्युत्तरकालीने, अपि तु श्रवणवदवगत्युपायतया तत्पूर्वकालभाविनी ।

---

1. जन्तुः
2. बृ. 2-4-5

जीवस्वरूपं जीवभेदश्च

जीवः पुनः प्रतिबिम्बकल्पः सर्वेषां नः प्रत्यक्षः चिद्रूपः । स पुनरेवंभूतो जाग्रत्स्वप्नयोरहमुल्लेखरूपेण सुषप्ते तत्संस्कार रञ्जिताग्रहणाविद्या-प्रतिबद्धप्रकाशत्वेन च गतागतमाचरन्नयं संसारी, जीवः, विज्ञानघनः विज्ञानात्मा, प्राज्ञः, शरीरी, शारीरः, आत्मा, संप्रसादः, पुरुषः, प्रत्यगात्मा, कर्ता, भोक्ता, क्षेत्रज्ञ इति च श्रुतिस्मृतिप्रवादेषु गीयते । अन्यत्र च जीवा अनादिसिद्धा-विद्यावच्छिन्ना अनन्ता इति पञ्चपाद्यामेव जीवनानात्वं प्रदर्शितम् । अहंकारः इदमनिंदरूपवस्तुगर्भः । अन्तःकरणचिद्रूपद्वयसंवलितः । अस्यैवास्मत्प्रत्यय-विषयत्वम् । शुद्धचितस्तूपचारेण तत् । एतेर्ग्रन्थभागैरविद्योपाध्यंगीकारेऽपि जीवानामनन्तत्वमवस्थात्रयवत्त्वं चावगम्यते । ईश्वरस्वरूपं तु, द्वितीयसूत्रोक्तं जगज्जन्मादिकारणत्वं यल्लक्षणं तेनोपलक्षितं मूलकारणं ब्रह्म । तेन च स्वरूपं सच्चिदानन्दात्मकं प्रतिपाद्यते । अत्र च वाक्यम्, 'यदवष्टम्भो विश्वो विवर्तते प्रपञ्चः, तदेव मूलकारणं ब्रह्मेति सूत्रार्थ' इति ।

संसारमूलभावाविद्याविषयोपक्षेपः

श्रुतिस्मृतितदर्थापत्तिप्रमाणैः अध्यासकारणीभूता भावरूपा अविद्या एतैः स्वीकृता । येयं श्रुतिस्मृतीतिहासपुराणेषु नामरूपमव्याकृतमविद्या, माया, प्रकृतिः, अग्रहणम्, अव्यक्तम्, तमः, कारणम्, लयः, शक्तिः, महासुप्तिः, निद्रा, अक्षरम्, आकाशमिति च तत्र तत्र बहुधा गीयते । चैतन्यस्य स्वत एवावस्थितलक्षणब्रह्मस्वभावतावभासं प्रतिबद्ध्य जीवत्वापादिका विद्या, कर्म, पूर्वप्रज्ञा संस्कारः चित्तभित्तिः सुषुप्ते प्रकाशाच्छादनविक्षेपसंस्कारमात्र-रूपस्थितिरनादिरविद्या । एतादृशाविद्योदाहरणे टीकाकृतां मूलं तु आनुमानिकाधिकरणभाष्यम् 'सूक्ष्मं तु तदर्हत्वादि'[1]ति सूत्रस्थम् । अन्यत्र च प्रमाणोदाहरणेन तदावश्यकत्वप्रदर्शनं कृतम् । 'विद्यत एवात्रापि अग्रहणाविद्यात्मको दोषः प्रकाशस्याच्छादकः । कथं गम्यते? श्रुतेस्तदर्थापत्तेश्च । श्रुतिस्तावत् - "अनृतेन हि प्रत्यूढाः"[2] "अनीशया शोचति मुह्यमानः"[3] इत्येवमाद्या ।

---

1. ब्र.सू. 1-4-2
2. छां. 8-3-2
3. मुं. 3-1-2

तदर्थापत्तिरपि विद्यैव सर्वत्र श्रुतिषु ब्रह्मविषया मोक्षाय निवेद्यते । तेन अर्थादिदमवगम्यते यत् जीवस्य ब्रह्मस्वरूपतानवगमोऽविद्यात्मको बन्धो निसर्गत एवास्तीति । ननु न जीवो ब्रह्मणोऽन्य इत्युक्तम् । बाढम् । अत एवार्थाज्जीवे ब्रह्मस्वरूपप्रकाशाच्छादिकाऽविद्या परिकल्प्यते । अन्यथा परमार्थतस्तत्स्वरूपत्वे तदवबोधोऽपि यदि नित्यसिद्धः स्यात् तदा तादात्म्योपदेशो व्यर्थः स्यात् । अतः ब्रह्मणोऽनन्यस्यापि जीवस्य अविद्यया अस्तित्वम् । एतन्मतेऽपि अनन्तजीवः अनादिसिद्धाविद्यावच्छिन्नानन्तजीवनिर्भासास्पदमेकरसं ब्रह्मेति श्रुतिस्मृतिन्यायकोविदैरभ्युपगन्तव्यम् ।

प्रकृतिपुरुषविभागहेतुरविद्या

"प्रकृतिं' पुरुषं चैव विद्ध्यनादी उभावपि"[1] इति स्मृतिः क्षेत्रक्षेत्रज्ञत्वनिमित्तामनादिसिद्धामविद्यां 'प्रकृति' शब्देनाह । "मायां तु प्रकृतिं विद्यादिति"[2] श्रुतेः । अतो मायावच्छिन्नरूपत्वादनन्यदपि ब्रह्मरूपमात्मनो न वेत्ति । अत्र गौडपादकारिकोदाहरणम्-

अनादिमायया सुप्तो यदा जीवः प्रबुद्ध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥[3] इति ।

अन्यत्र च 'मिथ्याज्ञाननिमित्तः' इत्यस्य विवरणे अविद्यायाः भावरूपत्वप्रदर्शनम् । यथा मिथ्या च तत् अज्ञानं च मिथ्याज्ञानम् । मिथ्येति अनिर्वचनीयतोच्यते । अज्ञानमिति च जडात्मिका अविद्याशक्तिः ज्ञानपर्युदासेनोच्यते । तन्निमित्तः तदुपादान इत्यर्थः ।

अवश्यमेषा अविद्याशक्तिः बाह्याध्यात्मिके वस्तुषु तत्स्वरूपसत्तामात्रानुबन्धिनी अभ्युपगन्तव्या । अन्यथा मिथ्यार्थावभासानुपपत्तेः । सा च न जडेषु वस्तुत तत्स्वरूपावभासं प्रतिबध्नाति । प्रमाणवैकल्यादेव तदग्रहणसिद्धेः । रजतप्रतिभासात् प्रागूर्ध्वं च सत्यामपि तस्यां स्वरूपग्रहणदर्शनात् । अतस्तत्र रूपान्तरावभासहेतुरेव केवलम् । प्रत्यगात्मनि तु चितिस्वभावत्वात् स्वयं प्रकाशमाने स्वरूपानव-

1. भ.गी. 13-19 2. श्वेता 4-10 3. गौ.का. 1-16

तदर्थापत्तिरपि विद्यैव सर्वत्र श्रुतिषु ब्रह्मविषया मोक्षाय निवेद्यते । तेन अर्थादिदमवगम्यते यत् जीवस्य ब्रह्मस्वरूपतानवगमोऽविद्यात्मको बन्धो निसर्गत एवास्तीति । ननु न जीवो ब्रह्मणोऽन्य इत्युक्तम् । बाढम् । अत एवार्थाज्जीवे ब्रह्मस्वरूपप्रकाशाच्छादिकाऽविद्या परिकल्प्यते । अन्यथा परमार्थतस्तत्स्वरूपत्वे तदवबोधोऽपि यदि नित्यसिद्धः स्यात् तदा तादात्म्योपदेशो व्यर्थः स्यात् । अतः ब्रह्मणोऽनन्यस्यापि जीवस्य अविद्यया अस्तित्वम् । एतन्मतेऽपि अनन्तजीवः अनादिसिद्धाविद्यावच्छिन्नानन्तजीवनिर्भासास्पदमेकरसं ब्रह्मेति श्रुतिस्मृतिन्यायकोविदैरभ्युपगन्तव्यम् ।

प्रकृतिपुरुषविभागहेतुरविद्या

"प्रकृतिं' पुरुषं चैव विद्ध्यनादी उभावपि"[1] इति स्मृतिः क्षेत्रक्षेत्रज्ञत्वनिमित्तामनादिसिद्धामविद्यां 'प्रकृति' शब्देनाह । "मायां तु प्रकृतिं विद्यादिति"[2] श्रुतेः । अतो मायावच्छिन्नरूपत्वादनन्यदपि ब्रह्मरूपमात्मनो न वेत्ति । अत्र गौडपादकारिकोदाहरणम्-

अनादिमायया सुप्तो यदा जीवः प्रबुद्ध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ।।[3] इति ।

अन्यत्र च 'मिथ्याज्ञाननिमित्तः' इत्यस्य विवरणे अविद्यायाः भावरूपत्वप्रदर्शनम् । यथा मिथ्या च तत् अज्ञानं च मिथ्याज्ञानम् । मिथ्येति अनिर्वचनीयतोच्यते । अज्ञानमिति च जडात्मिका अविद्याशक्तिः ज्ञानपर्युदासेनोच्यते । तन्निमित्तः तदुपादान इत्यर्थः ।

अवश्यमेषा अविद्याशक्तिः बाह्याध्यात्मिके वस्तुषु तत्स्वरूपसत्तामात्रानुबन्धिनी अभ्युपगन्तव्या । अन्यथा मिथ्यार्थावभासानुपपत्तेः । सा च न जडेषु वस्तुत तत्स्वरूपावभासं प्रतिबध्नाति । प्रमाणवैकल्यादेव तदग्रहणसिद्धेः । रजतप्रतिभासात् प्रागूर्ध्वं च सत्यामपि तस्यां स्वरूपग्रहणदर्शनात् । अतस्तत्र रूपान्तरावभासहेतुरेव केवलम् । प्रत्यगात्मनि तु चितिस्वभावत्वात् स्वयं प्रकाशमाने स्वरूपानव-

1. भ.गी. 13-19 2. श्वेता 4-10 3. गौ.का. 1-16

भासस्यानन्यनिमित्तत्वात् तद्गतनिसर्गसिद्धाविद्याशक्तिप्रतिबन्धादेव तस्यानवभासः। अतः सा प्रत्यक्चिति ब्रह्मस्वरूपाव भासं प्रतिबध्नाति[1] अहंकाराद्यतद्रूप-प्रतिभासनिमित्तं च भवति। सुषुप्त्यादौ च अहंकारादिविक्षेपसंस्कारमात्रशेषं स्थित्वा पुनरुद्भवति, इति ग्रन्थेन भावाविद्यास्वरूपतदाश्रयतद्विषयतदनादित्वतदुपादान-निमित्तत्वतदीयावरणविक्षेपशक्तिप्रदर्शनादिकं सर्वमपि भाष्येण वार्तिकेण च प्रायेण तुल्यतामश्नुते।

भाष्योक्ताध्यासलक्षणे विषयाध्यासज्ञानाध्यासद्वयमुक्तम्। यद्यपि मूले ज्ञानाध्यासमात्रमुक्तं तथापि बृहदारण्यकादौ संसारमात्रस्य विषयस्यापि अध्यासपदेन भाष्ये व्यवहरणात् अत्राप्यौचित्येन द्वयं वर्जितम्।

अध्यासलक्षणविवेचनम्

'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इति प्रश्नवाक्यस्थिताध्यासमुद्दिश्य लक्षणमभिधीयत इत्यादिना। तत्संक्षेपस्तु अत्र परत्रेत्युक्त्यैव परस्यावभासमानत्वं सिध्यति। तस्य विशेषणं स्मृतिरूपत्वमिति। स्मर्यत इति स्मृतिः, स्मर्यमाण इत्यर्थ। तस्य रूपमिव रूपं यस्य स इति। तेन स्मर्यमाणसदृश इत्यर्थो लभ्यते। न तु स्मर्यमाणरूपवत्वम्। अध्यासविषयस्य पुरोऽवभासनात्। तत्रोपपत्तिः पूर्वदृष्टावभास इति। पूर्वमदृष्टरजतस्य कस्यचन शुक्तिसंप्रयोगे रजतं नावभासत इति। तथा च परत्र परावभास इत्येव अध्याससामान्यलक्षणाम्। तदुपपादकं स्मृतिरूपत्वम्। तत्साधकं पूर्वदृष्टत्वमिति। तथा च अर्थाध्यासस्य स्मर्यमाणसदृशत्वं संस्कारजन्यज्ञानविषयत्वम्। स्मृत्यारोपयोः संस्कारजन्यत्वात् तादृशसादृश्यं निर्वाह्यम्। अर्थाध्यासपक्षे अवभास्यत इत्यवभासः। परश्चासाववभासश्चेति व्युत्पत्त्या निर्वाह्यम्। ज्ञानपक्षे अवभासनम् अवभासः। परस्यावभासः परावभास इति व्युत्पत्त्या निर्वाहः। उभयथापि लक्षणद्वयं संगच्छते। इत्थमेतल्लक्षणं निष्कृष्टं लिखितं न्यायनिर्णयादौ एतद्ग्रन्थानुसारेण। अध्यासस्य स्मृतित्वं नास्ति। अन्यसंप्रयोगेऽन्यविषयकज्ञानं न स्मृतिः, किं तु अध्यास एव। स्मृतेः पूर्वप्रमाणसंस्कारजन्यतया तद्विषयावभासित्वमात्रम्। अध्यासश्च

1. अत्र नैष्कर्म्यसिद्धिग्रन्थसाम्यं दृश्यते।

पुरोऽवस्थितविषयक एवेति वैषम्यम् । अध्याससामग्रीकारणदोषः कार्यविशेषे तस्य शक्तिं निरुन्धन् एव संस्कारविशेषमप्युद्बोधयति । कारणदोषशक्तिश्च कार्यानुमेया । अतः संरुकारदृष्टकारणसंवलिता एका सामग्री । सा चैकमेव ज्ञानमेकफलं जनयति । तस्य च दोषोत्थापितसंस्कारविशेषसहितसामग्री समुत्पन्नत्वात् शुक्तिगतमिथ्यारजतं तदुचितमेवालम्बनम् । अत एव मिथ्यालम्बनं ज्ञानं मिथ्याज्ञानमित्युच्यते । न स्वतो ज्ञानस्य मिथ्यात्वम् । अत्र अध्यासोदाहरणीभूतरजतादेः मिथ्यात्वमपि आगन्तुकदोषनिमित्तत्वात् तदनन्तरं बाधदर्शनाच्च कथ्यते, न पुनः परमार्थाभिमतसत्यरजतादन्यत्वमाश्रित्य । तत्रासंनिकृष्टत्वाद्रजतस्य नेदन्तावभासः तद्गतः । किं तु संप्रयुक्तगत एव । अपरोक्षावभासस्तु दोषबलात् इन्द्रियजज्ञानान्तरभावाच्चेति द्रष्टव्यम्[1] ।

शुक्तिरजतादेर्मायामयत्वसमर्थनम् - उक्तसामग्रीवशात् प्रतिभासमानं रजतं मायामयम् । यदि पारमार्थिकं स्यात् सर्वैरेव गृह्येत । तथा स्वज्ञानोत्पत्तौ कारणदोषं नैवापेक्षेत । मायामात्रं चेत् मन्त्राद्युपहतचक्षुष इव दोषोपहत ज्ञानकारणस्यैव पुरुषस्य दृश्यत इति युक्तम् । किं च नेदं रजतमिति बाधोऽपि मायामयत्वमेव सूचयति । तेन हि निरूपाख्यतापादनपूर्वकं मिथ्यात्वं ज्ञाप्यते 'नेदं रजतं, किं तु मिथ्यैवाभासिष्टेति' । एतत्सर्वं शुक्तिरजतवदितरबाह्याध्यासस्थलेऽभ्यूह्यम् । निद्रादिदोषोपप्लुतं मनोऽदृष्टादिसमुद्बोधितसंस्कारविशेषसहकार्यानुगुण्येन मिथ्यार्थविषयं ज्ञानमुत्पादयति । तस्य च अपरोक्षचैतन्यस्था अविद्याशक्तिः आलम्बनतया विवर्तते । तज्ज्ञानं च न स्मृतिः अपरोक्षार्थावभासनात् । पूर्वदृष्टावभासित्वात् स्मृतिसदृशत्वं संस्कार जन्यत्वेन । परत्र परावभासश्च स्वप्नेऽप्युपपद्यते । सर्वस्यापि प्रपञ्चजातस्य चैतन्यैकाश्रयत्वात् तस्य च निरंशत्वेऽपि प्रपञ्चभेदेनैव कल्पितावच्छेदस्यावच्छिन्नत्वं बहिष्ट्वम्, आन्तरत्वं च अविद्यमानमपि प्रकाशते । तथा च तदेव चैतन्यं स्वाप्नप्रपञ्चस्याप्यधिष्ठानं भवेदिति परत्र परावभासः । अथवा मनोमात्रगोचरौ दिगाकाशौ सर्वत्राध्यासाधाराविति चोपपद्यते ।

1. अज्ञानमेवैकमध्यासे कारणमिति भाष्यवार्तिकविरुद्धमिदम् ।

नामादिषु ब्रह्माध्यासस्य उक्ताध्यासवैलक्षण्यम् दृश्यते, कारणदोषाभावात् मिथ्यार्थावभासाभावाच्च । किं तु चोदनावशात् इच्छातोऽनुष्ठेयत्वात्, नामादिषु ब्रह्मदृष्टिः मानसी क्रिया, न ज्ञानम् । ज्ञानं चेत् इच्छया जनयितुं निवर्तयितुं वा न शक्यम् । अतः चोदनावशात् फलायैव ब्रह्मदृष्टिः केवला इच्छया अध्यस्यते मातृबुद्धिरिव रागनिवृत्तये परयोषिति । भाष्योदाहृतकतिपयदृष्टान्तानामाशयस्तु यथा स्फटिकमणेरुपाधिनिमित्तो लोहितिमा मिथ्यैव तथा आत्मनोऽहंकर्तृत्वादिकं अन्तःकरणोपाधिनिमित्तं न स्वाभाविकम् । अहंकारेण संभिन्नोभयरूपत्वात् ग्रन्थिरिव भवतीति श्रुत्यादावहंकारो ग्रन्थिरिति गीयते । लोहितः स्फटिक इति प्रत्यक्षानुभवो जपाकुसुमसान्निध्यात् सर्वजनीनः । तत्र भासमानं लोहितरूपं न जपाकुसुमस्थम् । यदि स्फटिक प्रतिस्फालिता नयनरश्मयः कुसुमसमीपं गच्छेयुः तदा विपरीतदेशे तदेव विशिष्टसंनिवेशं ग्राहयेयुः । चाक्षुषप्रत्ययश्च लौहित्यमात्रस्य, न तु तद्विशिष्टकुसुमस्य । रूपिणं विहाय रूपमात्रस्य चाक्षुषं न दृष्टचरम् । नापि रूपमात्रं स्फटिके प्रतिबिम्बितमिति सुवचम् । स्वाश्रयं विहाय रूपमात्रप्रतिबिम्बस्य क्वचिदपि अनुपलब्धचरत्वात् । रूपस्य नीरूपत्वादपि न चाक्षुषत्वं स्यात् । रुपिद्रव्यसंयोगात् तदुपपादने च वायोरपि चाक्षुषत्वप्रसंगः । नापि मणिप्रभेव निराश्रयापि अत्रोपलभ्यत इति सुवचम् । जपाकुसुमस्य प्रभाभावात् । अतो लौहित्यमुपाधिनिमित्तं मिथ्यैवावभासत इति ।

मुखचन्द्रादि प्रतिबिम्बोदाहरणाशयस्तु, इत्थम्, अहंकर्तुः अनिदमंशः चैतन्यरूपः बिम्बादिवत् प्रतिबिम्बं न ब्रह्मणो वस्त्वन्तरम् । किं तु तदेव तत् पृथगवभासविपर्ययरूपतामात्रं मिथ्येति दर्शयितुम्[1] इति ।

प्रतिबिम्बस्य बिम्बैक्येऽयमेव हेतुः । तदेकस्वलक्षणत्वावगमः दर्पणे ममेदं मुखमिति । यथा बहिस्थो देवदत्तो यादृशस्वलक्षणः प्रतिपन्नः तादृश एव वेश्मान्तःप्रविष्टोऽपि भासते । तथा दर्पणतले दृष्टं मुखमपि कण्ठस्थमुखलक्षण-संपन्नमेव भासते । तदेदं बिम्बाद् वस्त्वन्तरत्वे न युज्यते । नापि परिणामः, तद्धेतोरभावादिति । नापि मिथ्यारजतमिव सत्यरजतभिन्नमपि

1. 'आभास एवचे'ति सूत्रभाष्यानुगुणोऽयं पक्षः ।

तदेकरूपावभासीतिवदत्रापि। तत्र नेदं रजतमिति बाधदर्शनम्। नात्र नेदं मुखमिति बाधो दृश्यते। दर्पणापगमे तदपगमः, न स बाधः, दर्पणेऽपि तत्प्रसंगात्। एवं च प्रतिबिम्बोदाहरणं[1] जीवस्य ईश्वराभेदप्रतिपत्त्यर्थम्।

रज्जुसर्पोदाहरणाशयः

रज्जुसर्पभ्रमे सर्पस्य इदानीमसान्निध्येऽपि पूर्वानुभवजनितसंस्कारसत्त्वात् तद्बलेन भ्रमः। तद्वत् अहंकर्तृतातत्संस्कारयोः बीजाङ्कुरयोरिवानादितया कार्यकारणतया वक्ष्यमाणत्वेन तत्संस्काराद्विभ्रम इति। प्रतिबिम्बभ्रमस्थले विभ्राम्यतः पुंसो भ्रमहेतुदर्पणादीनां परमार्थत्वं तत्सान्निध्यमस्ति। न तथेह चित्प्रतिबिम्बने किंचिदपि परमार्थवस्तु चिद्विलक्षणमस्ति। चिद्विलक्षणे सर्वत्र बुद्ध्यादौ विभ्रमविलासादिति शंकावारणार्थमिदमुदाहरणम्। यद्यपि स्फटिकलौहित्यदृष्टान्ते स्फटिके दृश्यमान एव अनिर्वचनीयलौहित्यस्य संभेदयोग्यस्यापि असंभेदावभासः[2] तथापि तदासंगीव स्फटिकप्रतिबिम्बं लौहित्यमुत्प्रेक्षते। रज्वां तु केवलं सर्प इति बुद्धिरेव जायते, न तु तत्संभिन्नत्वमसभिन्नत्वं वा। रज्जुज्ञाने सति सर्वथा सर्पनिवृत्तेः। तथा अत्रापि ब्रह्मस्वरूपज्ञाने सति सर्वथा अहंकर्तृत्वनिवृत्तिरिति भावः।

घटाकाशोदाहरणाशयः - आत्मनोऽसंगत्वज्ञापनाय एतदुदाहरणम्। 'असंगो ह्ययं पुरुष' इति श्रुतिदर्शितासंगत्वस्य अस्पष्टतया तत्स्फुटीकरणार्थमिदम्। शुक्तिका हि रजतवदवभासत इति भाष्यगतोदाहरणाशयस्तु शुक्तिकारजतोदाहरणेन संप्रयुक्तस्येदंपदार्थस्य अनात्मा रजतमिति यथा, तथैव निरंजनस्य चैतन्यस्यास्मदर्थेऽनिदमंशस्यानात्मा तदवभास्यत्वेन युष्मदर्थलक्षणा- पन्नोऽहं-कारोऽध्यस्त इति दर्शितम् इति।

एकश्चन्द्रः सद्वितीयवदित्युदाहरणाशयश्चेत्थम्, जीवेश्वरयोः जीवानां च अनात्मरूपो भेदावभास इति प्रदर्शनार्थमिदम्।

अविद्यानिवृत्तिः कथम्? 'अस्यानर्थहेतोः प्रहाणाय' इति भाष्यविवरणे इत्थं चिन्तिता। अनर्थहेतुरध्यासोऽनादिः। स कथं प्रहीयते ?

---

15. श्रुत्यादौ

16. तादात्म्येनानवभासः।

मनुष्यत्वादिजातिविशेषमात्राध्यासो हि न्यायतोऽहंप्रत्यये ततो विविक्तेऽपि अनादित्वात् पूर्ववदेवाविकलो वर्तते । अतः कथमविद्यानिवृत्तिरिति शंकायां समाधानमुच्यते, हेतोः प्रहाण्या हि हेतुमतः प्रहाणिरात्यन्तिकीति स्थितिः । तत्त्वमस्यादिवाक्यात् ब्रह्मस्वरूपावगाहिज्ञानान्तरोत्पत्तेः स्वरूपचैतन्यप्रच्छादनपूर्वकं अहमिति जीवत्वापादकानादिसिद्धाविद्यामपि निवर्तयदेव तज्ज्ञानमुत्पद्यते । ततः कारणनिवृत्तौ तत्कार्यमहमिति जीवे भोक्तृत्वादिरूपता सपरिकरा निवर्तत इति युक्तम् ।

एवमुक्तदिशा समूलाज्ञाननिवृत्तिरेव भाष्योक्त 'अनर्थहेतोः प्रहाण' पदेन विवक्षित इति प्रतिभाति । तदर्थमात्मैकत्व विद्याप्रतिपत्तिरावश्यकी । अत्रेयमेव प्रतिपत्तिः साक्षादनुभवफलरूपा । जीवस्य ब्रह्मात्मकता हि शास्त्रस्य विषयः । तेन जीवस्यात्मन आनन्दात्मकब्रह्मरूपताप्राप्तिर्विषय इति तावता उक्तं भवति । समूलानर्थनिवृत्तिस्तु शास्त्रविषयात् ब्रह्मात्मरूपाद् बहिर्भूता । अतः पृथङ्निर्देशमर्हति भाष्ये । एवं च साक्षादनुभवात्मकात्मैकत्वविद्याप्रतिपत्तिरेव फलम् । तदुत्पत्तौ नान्तरीयकतया अनर्थहेतुभूताविद्यानिवृत्तिर्भवित्रीति[1] ।

वाक्यज्ञानस्य तर्कापेक्षा-तत्रापि वाक्यात् सम्यग्ज्ञानरूपा विद्या उदितापि यावदसंभावनाविपरीतभावनानिवृत्तिम् अनवाप्तेवाप्रतिष्ठिता भवति । अतः तत्प्रतिष्ठार्थे तर्कसहायोऽत्रापेक्ष्यते ।

तर्कयुक्त्योरवैलक्षण्यम्

प्रमाणानामनुग्राहकस्तर्क इति तर्कविदः । तर्को नाम युक्तिः । स च प्रमाणशक्तिविषयतत्संभवासंभवपरिच्छेदात्मा प्रत्ययः । विषयासंभवशंकायां, तथा अनुभवफलानुत्पत्तौ तत्संभवप्रदर्शनद्वारेण फलप्रति- बन्धनिरासः । तथा चात्र महावाक्यात् त्वं तदसीत्युपदिष्टो जीवः, सत्पदार्थ- ब्रह्मरूपतामसंभावयन् विपरीतं मनुष्यादिरूपं मन्वानश्च समुत्पन्नेऽपि सम्यग्ज्ञाने वाक्यान्नाध्यवस्यति । तर्केण तु विरोधापनयनेन तद्रूपता आत्मनः संभावितैवेति ज्ञानतः पुनः सम्यग्ज्ञानं अनुभवपर्यवसायि फलं निष्प्रतिबन्धं भविष्यति ।

1. अशाब्दोऽयमविद्याविलयः ।

विद्याया अविद्याग्रन्थ्यपनयनप्रकारः

प्रागुक्ताविद्यादोषमपसारयदेव ब्रह्मात्मज्ञानं भोक्त्रादिग्रन्थिप्रवाहमपि स्वोदयसमकालमेवापनयति । न खुल जीवस्य ब्रह्मतावगमः तद्विषयानवगमं अबाधमान उदेति । ब्रह्मज्ञानोत्तरमपि संस्कारादहंकारग्रन्थिसंभवः । ब्रह्मज्ञानादग्रहणापाये तन्निमित्तस्याहंकारग्रन्थेः तत्कालमेवाभावः प्रसज्येत इति शंकायाः समाधानम् - संस्कारादप्यग्रहणानुवृत्तेः संभवात् रज्जुसर्पभ्रमनिवृत्त्यनन्तरमपि भयकम्पानुवृत्तिवत् । इदमपि भयं संस्कारादेवानुवृत्तं सत् कम्पनादिनिमित्तं भवति[1] । कुतः? ब्रह्मज्ञाने सति ग्रन्थेः समुच्छेदस्तादात्विक एव । "भिद्यते हृदयग्रन्थिशिचन्ते सर्वसंशयाः"[2] इति श्रुत्या अविद्याग्रन्थिच्छेदस्य स्पष्टमेवोक्तेः । तथापि भाष्यकारैरेव बाधितमपि मिथ्याज्ञानं पुनः संस्कारवशात् कंचित्कालमनुवर्तत एव इति स्पष्टमुक्तत्वात् यावत् प्रारब्धभोगक्षयं तदुचिताहंकारग्रन्थेरग्रहणस्य वा संस्कारादनुवर्तनं टीकाकारोक्तं सम्यगेव । परं तु ज्ञानोत्तरमनुवर्तमानस्य मिथ्यात्वबुद्धेराभासमात्रत्वम् ।

अखण्डार्थत्वविवेचनम्

'तत्तु समन्वयात्'[3] इत्यत्र सूत्रार्थवर्णनावसरे इत्थमुक्तम्, सम्यगन्वयः समन्वयः । सम्यक्ता च अन्वयस्य इत्थं वर्णिता, पदानां परस्परानवच्छिन्नार्थानामनन्याकांक्षाणामव्यतिरिक्तैकरसप्रातिपदिकार्थमात्रान्वयः सोऽयमित्यादिवाक्यस्थपदानामिव । प्रकृष्टप्रकाशशब्दयोरिव च चन्द्रपदाभिधेयार्थकथनेन[4] इति । अस्यायमाशयः, व्यक्तिविशेषः कश्चित् चन्द्रप्रातिपदिकाभिधेयः केनचित् पृष्टः 'अस्मिन् ज्योतिर्मण्डले कश्चन्द्रो नामेति । तस्य प्रतिवचनं प्रकृष्टप्रकाशश्चन्द्र इति। यथा चन्द्रपदेनोक्तं तथा आभ्यामपि पदाभ्यां यद्युच्येत; तदैवं प्रतिवचनं भवति, इति । इत्थं सोदाहरणं दर्शितं पदानामित्यादिना मात्रान्वय इत्यन्तं यदखण्डार्थत्वम् । तदिदं पदसमूहरूपवाक्यविशेषनिष्ठम् । एतदेव कल्पतरुपरिमलादिषु विवरणादिटीकासु अद्वैतसिद्धिलघुचन्द्रिकादौ च सपरिष्करं विवृतम् । तासां टीकानामिदमेव मूलम् । परं तु भाष्येऽक्षरशः कुत्रापि इत्थं न

---

1. इदं भाष्यानुगुणं न वेति विचारणीयम् ।
2. मुं. 2-2-8
3. ब्र.सू. 1-1-4
4. प्रकृष्टप्रकाशश्चन्द्र इति ।

वर्णितम् । अर्थात् भाष्यतो लभ्यत इति तादृशमहावाक्योदाहरणेन अखण्डवाक्योदाहरणेन च विद्वद्भिराकलनीयम् । वाक्यार्थनिष्ठमखण्डत्वं तु - 'असंसृष्टत्वम्' इति रत्नप्रभायां कल्पतरुपथेन वर्णितम् ।

पञ्चपादिकाकृतविवर्तवादः

शास्त्रयोनित्वाधिकरणे टीकायाम् "नन्वेवं सति कथं सर्वज्ञता? तस्यैव ज्ञानशक्तिविवर्तात्मकत्वात्, नामप्रपञ्चस्य रूपप्रपञ्चस्यापि तदाश्रित्य विवर्तनात् तज्जन्मता, नासतः प्रादुर्भावात्" इत्युक्तम् ।

अन्यत्र च "अतो यदवष्टम्भो विश्वो विवर्तते प्रपञ्चः, तदेव मूलकारणं ब्रह्मेति" सूत्रार्थः । "तस्य च तदवच्छिन्नापरोक्षचैतन्यस्था अविद्या-शक्तिरालम्बनतया विवर्तत" इति चोक्तम् । अस्य विवर्तवादस्य मूलम् "आत्मनि चैवं विचित्राश्च हि"[1] इति सूत्रभाष्यमेव । सूत्रभाष्ययोः यद्यपि 'परिणाम' शब्द एव प्रयुज्यते, तथापि स्वरूपप्रच्युतिं विनैव विजातीयरूपान्तरपरिणाम एव अयथार्थभूतो विवर्त इति उभयसंमत इति वक्तुं शक्यते ।

शास्त्राप्रामाण्यशंका, तन्निरासश्च

1. परिनिष्ठिते वस्तुनि प्रत्यक्षादीनामपि प्रवृत्तिसंभावात् तैरसंवादे ब्रह्मणि प्रत्यक्षादिविषयत्वसंवादाभावे शास्त्रस्य प्रामाण्यं न संभवेदिति ।
2. स्पर्शनेन्द्रियविषयचित्रगतनिम्नोन्नतत्वज्ञानं चाक्षुषं न प्रमाणम् । स्पर्शनेन्द्रियेण संवादाभावात् । तथेहापि शास्त्रस्यापौरुषेयत्वेन स्वार्थपरिच्छेदेऽनपेक्षत्वेऽपि न प्रामाण्यमेवेति ।
3. किं च पुरुषार्थशून्यत्वादपि न प्रामाण्यम् । सिद्धवस्तुनि क्रियाऽविषये हानोपादानासंभवेन सुखदुःखपरिहाररूपपुरुषार्थासंभवादिति ।
4. प्रत्यक्षाद्यविषये न शब्दमात्रस्य प्रामाण्यम् । शास्त्रस्य तु अनवगतार्थबोधकत्वं स्वभावः । प्रमाणान्तरगृहीतार्थप्रकाशनसामर्थ्यमेव शब्दसामान्यस्य दृष्टम् । नानवगतार्थप्रकाशने । तस्मादनर्थका वेदान्ताः ।

---

1. ब्र.सू.2-1-28

अत एव वेदोषरा वेदान्ता इति केषांचनोद्गार इति न तेषां ब्रह्मणि प्रामाण्यमिति । तत्परिहारसंक्षेपस्तु- न हि संवादलक्षणं प्रामाण्यम् । अपि तु बोधलक्षणमिति प्रमाणविदां स्थितिः । अतो विधिवाक्यानां स्वार्थमात्र इव स्वरूपपरवाक्यानामपि प्रामाण्यम् । अनवगतार्थपरिच्छेदकत्व--सामान्यात् । किं च संवादाभाव एव नाप्रामाण्ये हेतुः । अपि तु दुष्टकरणत्वम् । चित्रचाक्षुषज्ञाने श्यामादिरेखासन्निवेशविशेषदोषसत्वात् स्पर्शनसंवादाभावः । तेन तत्राप्रामाण्यमस्तु । प्रकृते शब्दस्यापौरुषेयत्वा-देवादुष्टत्वमिति नाप्रामाण्यशंकावसरः । प्रमेयबोधहेतुत्वं तु शब्दस्यैवात्र । तदेकपरत्वेन शब्दस्य तद्बोधननैयत्यात् ।

अपि च प्रमाणान्तरगृहीतार्थप्रकाशने एव सामर्थ्यमिति तु न नियतम् । तदपि प्रथमव्युत्पित्सुबालदृष्ट्या नास्त्येव । अपि तु व्युत्पन्नदृष्ट्या परबोधनकाले शब्दप्रयोगे कर्तव्ये । अतो ज्ञानजनने निरपेक्ष एवापौरुषेये शब्दे चक्षुषीव नाप्रामाण्यशंका युक्ता । चक्षुरादिवद्यथावागतसामर्थ्यः शब्दो विज्ञानं जनयत्येवेति प्रमाणमेवायं वेदान्तः । विध्यर्थकार्यमिव ऐकात्म्यमप्यनवगतमवगमयतीति कर्मकाण्डवत् सिद्धपरवेदान्तवाक्यमपि प्रमाणमेव । प्रामाण्यस्य प्रतीतिकृतत्वाविशेषात् । स्वरूपनिष्ठानामपि पुरुषार्थपर्यवसायित्वात् प्रामाण्यम् । अत्र पुरुषार्थस्य भ्रान्तिमात्रव्यवहितत्वात् तदपनयनेन विस्मृतहस्तगतसुवर्णादिवत् तल्लाभ इति, रज्वादौ सर्पादिः भ्रान्तिगृहीतस्य भ्रान्तिनिरसनमात्रेण भयादिनिवृत्तिवदत्रानर्थ-संसारनिवृत्तिश्च ।

प्रतिपत्तिविधिनिरासः

अयं मण्डनमतेन समानः । 1. तत्र शब्दजन्यज्ञानाम् । 2. शब्दजन्य ज्ञानाभ्यासः । 3. शब्दजन्यज्ञानानुसारिध्यानम् । 4. प्रपंचातीतब्रह्मप्राप्तिरूपमोक्षार्थं ब्रह्मोपासनम् । 5. शब्दजन्मज्ञानादपि अतिरिक्तज्ञानसंपादनम् इत्येतेषु कुत्रापि विधिर्नास्तीति प्रतिपत्तिविधिनिरासस्य समन्वयाधिकरणभाष्यारूढस्य विचारसारांशः । विस्तरस्तु तत्रैव द्रष्टव्यः । अत्र ब्रह्मसिद्धिकारेण विस्तरेण विमृष्टोऽपि पूर्वपक्षः अत्र ग्रन्थे संक्षेपेणैव परामृष्टः स्वाशयं यावन्तं प्रकाशयंस्तत्रैव पर्यवस्यतीति ।

''सिद्धैव ननु ब्रह्मजिज्ञासा - अथातो धर्मजिज्ञासेति'' इत्यारभ्य ''किमपरमवशिष्टं यद्ब्रह्मजिज्ञासारम्भं प्रयुञ्जीत'' इत्यन्तं ब्रह्मजिज्ञासाशास्त्रं धर्मजिज्ञासायामेवान्तर्भूतमिति कतिपयपक्षाः प्रदर्श्यन्ते । तथाहि-

1. कर्मार्थक 'तव्य' प्रत्ययस्थले विधिभानाभावेन जिज्ञासा किमर्था? इत्याक्षिप्य तत्रापि विधिरस्तीति ब्रह्मज्ञानेन अविद्या नश्यतीति च दर्शितः एकः पक्षः ।
2. आम्नायस्य कार्यार्थत्वेऽपि ब्रह्मतत्त्वज्ञानमपि कार्यार्थमेवेति तद्विचारोऽवश्यकर्तव्य इत्यपरः पक्षः ।
3. अनात्मस्वभावानां सर्वेषां विलयनेन सर्वस्यात्मताकरणमित्यन्यः पक्षः ।
4. शब्दज्ञानादन्यदेवानुभवात्मकं ज्ञानं साधनीयमित्यपरः पक्षः ।
5. ज्ञानाभ्यासेनानुभवः संपादनीय इति पक्षान्तरम् ।

सर्वे वेदान्ता आरभ्यन्त इति भाष्योपरि आक्षेपपरिहारौ - ननु सर्वे वेदान्ताः न विद्यार्थमेवारभ्यन्ते । तदेकदेशः क्रममुक्तिफलायैश्वर्यायाभ्युदयार्थं कर्मसमृद्धये चोपासनानि विविधान्युपदिशन्नुपलभ्यत इत्याक्षेपः ।

परिहारस्तु-उपासनाकर्मीभूतं ब्रह्मापगताशेषप्रपञ्चं सत् जीवस्य निजं रूपमिति निरूपयितुं जगज्जन्मादिहेतुत्वेन प्रथमं सर्वात्मकं सर्वज्ञं सर्वशक्तिसमन्वितं च[1] लक्षितं द्वितीयसूत्रे । अस्यां चावस्थायां ब्रह्मणि प्रपंचमनपाकृत्यैव तेन तेन प्रपंचेनोपधीयमानं ब्रह्म तत्तत्फलायोपास्यत्वेन विधीयते, दर्शपूर्णमासार्थाप्प्रणयनमिव गोदोहनोपरक्तं पशुभ्यः । तस्मात् तदर्थोपजीवित्वात् इतरस्येति न भाष्यविरोधः । वेदान्तेषु प्राणाद्यब्रह्मोपासनविचारस्य कोऽवसर? इति । अत्र समाधानम् - तान्यपि कार्यब्रह्मावाप्तिक्रमेण मुक्तिफलान्येव । वक्ष्यति च सूत्रकारः ''कार्यात्यये तदध्यक्षेण सहातः परमभिधानादि''[2]ति विरम्यते विस्तरेण ।

---

1. ब्रह्म
2. ब्र.सू. 4-3-10

पञ्चपादिकाविवरणम्

इष्टसिद्धावेव वाचस्पतिमिश्रस्वीकृताविद्योपादानविचारः ख्यातिबाध-विचारश्चेति द्वयमेव प्राधान्येन विमुक्तात्मश्रीचरणैः कृतं विस्तरेण । तत्र तदुद्देशेन प्रवृत्तैस्तैः अद्वैतसिद्धान्तावशिष्टानामितरविषयाणां सुदीर्घपरिशीलने नावकाशो लब्धः । अत एते विवरणाचार्या अविद्योपादानविचारमपरांश्च सिद्धान्तसंमतान् कर्तुं तथा भास्कराचार्यप्रक्रियादोषान् वाचस्पत्यादिभिर्दर्शितेभ्योऽप्यधिकान् प्रदर्शयितुं तद्वारा शांकरदर्शनं सुमेरुशृंगामिवोत्तुङ्गयितुं च समुद्युक्ताः पञ्चपादिकाविवरणव्याजेन टीकामिमामारचयामासुरितीदं ग्रन्थपरामर्शिनां स्फुटम् । टीकामिषेण प्रवृत्तमपि विवरणमपरप्रस्थानमेव संवृत्तं वाचस्पतिप्रक्रियादिवैलक्षण्यतः, तदिदमग्रे स्फुटीकरिष्यते । पञ्चपादिकाया नववर्णकतया प्रवृत्ततया इदमपि मूलानुगुण्यतया तथैव प्रववृते । चतुःसूत्रीमात्रस्योपलब्धाया अपि पञ्चपादिकाया विवरणेनाद्वैतसिद्धान्तापेक्षितयावत्प्रमेयविचारः संवृत्तः । क्वचित् क्वचिदंशे भाष्यवैमत्यमपि दृश्यतेऽत्र । तद्यथा -

1) जीवब्रह्मणोः बिम्बप्रतिबिम्बभावः सूत्रभाष्यादौ निराकृतोऽपि पुनः प्रतिष्ठापितो महता प्रयासेन ।

2) एवं जीवस्य ब्रह्मणा सह ऐक्यबोधकमहावाक्येषु बाधायां सामानाधिकरण्यं भाष्यकारैरुक्तमपि तत्तिरस्कृत्य ऐक्ये[1] सामानाधिकरण्यव्यवस्थापनम् ।

3) आत्मानात्माविवेकमात्रेणाध्यासे भाष्यकारैः समर्थितेऽपि कारणत्रितयजन्यत्वसमर्थनम् ।

4) सुषुप्तौ वृत्तिमात्रोपरते भाष्यसंमतत्वेऽपि सौषुप्ताविद्यावृत्तिप्रदर्शनम् इत्यादिविषये क्वचिदेव वैमत्यम् । तावता न परमसिद्धान्तस्य हानिः । प्रक्रियान्तरमिदमिति समाधेयम् ।

1. अभेदे सामानाधिकरण्यमित्यर्थः ।

अज्ञानोपादानवादादौ इष्टसिद्धिकारादृतसरण्यनुसरणम्, पञ्चपादिकोपक्षिप्तकतिपयस्फुटविषयाणां विस्तरेण विचारकरणम्, वाचस्पत्युक्तावच्छेदवादे श्रुतिविरोधप्रदर्शनम्, मूलकारणाविद्यामायैक्यसमर्थनम्, शाब्दापरोक्षवादसमर्थनम्, प्रतिकर्मव्यवस्थापनम्, मतभेदेनोपादानव्यवस्थाकरणम्, इत्यादिरत्र विशेषः । मन्दमध्यमानां भावग्रहणे ग्रन्थोऽयं दुर्गमः । पञ्चपादीविवरणवाक्यानां व्याख्येयव्याख्यानभावावगमनप्रयासोऽस्ति । अत एव श्रीविद्यारण्यमनुयः विवरणप्रमेयसंग्रहाह्वयं ग्रन्थं रचयामासुः । तत्र च-

भाष्यटीका विवरणं तन्निबन्धसङ्ग्रहः ।
व्याख्यानव्याख्येयभावक्लेशहानाय रच्यते ॥[1]

इति स्वोद्देशः उक्तक्लेशहानमेवाध्येतृणां भवेदिति प्रकटीकृतः ।

अन्ते च
संगृहीतं विवरणं सहानेकैर्निबन्धनैः ।
टीकायासं विना लोकाः क्रीडन्त्वत्र यथासुखम् ॥
महतां हृदयं बोद्धुमशक्तोऽप्यतिभक्तितः ।
अकार्षं ग्रन्थमेतेन प्रकाशात्मा प्रसीदतु ॥

इति वदन्तो विद्यारण्यमनुयो ग्रन्थगौरवं ग्रन्थगाम्भीर्यं तत्कर्तृगौरवं च प्रकाशयामासुः।

एवं विवरणतात्पर्यव्याख्यानरूपो 'विवरणोपन्यास' इत्यपरोऽपि ग्रन्थो जागर्ति, यश्च रामानन्दसरस्वतीकृतः । अपि च विवरणानुसारिण्यो बह्व्यष्टीकाः अन्ये च ग्रन्थाः प्रादुर्भूताः । एतेनैव विवरणग्रन्थगौरवगरिमा प्रकाशित एव किं पुनस्तत्प्रकाशन प्रयासेन ।

सूत्रावतरणम्

जिज्ञासासूत्रस्य ''तद्विजिज्ञासस्व''[2] ''आत्मा वा अरे द्रष्टव्यः श्रोत्रव्य''[3] इति श्रवणविधिमूलकत्वं स्वीकृत्य आत्मदर्शनोद्देशेन तदुपायतया मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणं नाम अङ्गि विधीयत

1. वि.प्र.सं. 2 2. तै.उ. 3-1 3. बृ. 2-4-5

इत्युक्तम्। तत्रापि श्रवणे नियमविधिः, ज्ञानमात्रे भाष्ये विधिनिराकरणम्। श्रवणं नाम वेदान्तवाक्यानि विचार्य उपक्रमादिभिः लिङ्गैः वाक्यतात्पर्यनिर्णयः। वेदान्ततात्पर्यनिर्णयानुकूलन्यायविचारात्मिका मानसी क्रियेति सिद्धान्तलेशसंग्रहोदितं वा। तथा च विरक्तेनाधिकारिणा साधनचतुष्टयसंपन्नेन अमृतत्वसाधनीभूतात्मदर्शनाय वेदान्तवाक्यविचारः कर्तव्य इति आदिमसूत्रेणोदितं भवति। एवमधीतस्वाध्यायः पुमान् वेदान्तादेवावगत्य पश्चादेवं संदिग्धे किं वैराग्यमात्रमधिकारिविशेषणं उतान्यदपि शमदमादि? तद्विशिष्टाधिकारिणि च किं प्रमाणम्? वेदान्तवाक्यविचारोऽपि पूर्वमीमांसया गतार्थोऽगतार्थो वा? कथं वा वेदान्तवाक्यानि विचार्याणि? किं लक्षणमात्मतत्त्वं, तत्र च किं प्रमाणम्? तस्य च प्रमाणान्तरेण विरोधो न वा? तत्त्वज्ञानं किं कर्मभिः समुच्चित्य मोक्षसाधनं उत केवलम्? केवलस्य साधनत्वे किं प्रमाणम्? इत्येवंजातीयकाः संशयाः संभाव्यन्ते। तत्परिच्छेदार्थं न्याया नानाविधा दर्शनीयाः, तानिमान् परमकारुणिको भगवान् बादरायणः सूत्रयितुकामः प्रथमतः श्रोतव्यवाक्ये प्रतिपन्नमधिकारिविषयप्रयोजनाख्यानुबन्धत्रयेण सह विधिं न्यायेन निर्णयंस्तदर्थविचारकर्तव्यतां वक्ष्यमाणसमस्तशास्त्रप्रवृत्त्यङ्गतया उपोद्घातरूपां सूत्रयामास "अथातो ब्रह्मजिज्ञासा"[1] इति। सूत्रस्यानुवादकत्वपरिहाराय कर्तव्यपदाध्याहारोऽवश्यंभावी, तेन चान्वयाय वस्तुतन्त्रयोर्ज्ञानेच्छयोरजहल्लक्षणया संदंशनयेन विचारलाभः, इच्छया विचारः, तेन च ब्रह्मज्ञानं फलमिति संदंशः। ब्रह्मज्ञानजनकत्वान्यथानुपपत्त्या वेदान्तवाक्यविषयत्वं विचारस्य। सूत्रसूचिते विषयप्रयोजने; विषमश्च ब्रह्मात्मैकत्वम् "अयमात्मा ब्रह्मे"[2] ति श्रुतिसिद्धम्। तच्चैकत्वमखण्डैकरसवस्तुबोधकेन ब्रह्मशब्देनैव सूचितम्। "तरति शोकमात्मवित्"[3] "ब्रह्मविदाप्नोति परम्"[4] इति श्रुतिसिद्धे दुःखोच्छेदब्रह्मप्राप्ती प्रयोजनम्।

शास्त्रमारंभणीयं संभावितविषयप्रयोजनवत्वात् कृष्यादिवत्, विमतं शास्त्रं संभावितविषयप्रयोजनवत् अविद्यात्मकबन्धप्रत्यनीकत्वात् जाग्रद्बोधवत्। बन्धस्य ज्ञाननिवर्त्यत्वांगीकारेण आविद्यकत्वमपि सूत्रसूचितं भवति। "तद्गुणसारत्वा"[5]

---

1. ब्र.सू. 1-1-1
2. मां. 2
3. छां 7-1-3
4. तै.उ. 2-1
5. ब्र.सू. 2-3-29

दिति सूत्र एव जीवगताणुत्वादीनामौपाधिकत्वोक्त्या कर्तृत्वादीनामपि मिथ्यात्वमुक्तमेव, तथापि श्रवणे प्रवृत्त्यङ्गतया विषयप्रयोजनसिद्ध्यर्थं बन्धमिथ्यात्वमध्याससाधनमुखेन उपोद्घात एव प्रदर्शितं भाष्यकारैरिति । तत्र उपोद्घातो नाम प्रतिपाद्यमर्थं बुद्धौ संगृह्य प्रागेव तदर्थमर्थान्तरवर्णनम्; प्रतिपाद्यं मुखतः प्रतिज्ञाय पश्चात् तत्सिद्धिहेतुप्रदर्शनं प्रतिपादनम् । यद्यपि विषयप्रयोजनसाधकोऽयमात्मानात्माध्यासः प्रथमं सूत्रेण नोक्तः अथाप्यर्थात् सूत्रित इत्युपपद्यते ।

भाष्योक्तस्य 'अहं ममाध्याससस्वरूपस्य विवेचनम्

व्यवहारतोऽस्मत्प्रत्ययगोचरस्य वस्तुतो वेदान्तसिद्धस्य सर्वोपप्लवरहितस्य प्रज्ञानघनस्यात्मनः अनात्मान्तःकरणादिना अध्यासः विरुद्धत्वात् परस्परं युक्त्याऽसंभावितोऽपि 'अहमिति ममेति' च कार्याध्यासोऽनिर्वचनीयः स्वीक्रियत एव । आत्मानात्मनोरविवेकादनुभवसिद्धोऽयमिति सर्वथा अध्यासापलापस्तु युक्त्या न समीचीनः । अध्याससामग्रामावादिति तु न साधु, शुक्तिरजताध्यासादौ गुणावयवकृतसादृश्यसामग्रचा इवात्र निर्गुणे निष्फलेऽभावात् नाध्यास इति न सुवचम् । गुणावयवसादृश्याभावेऽपि सौगन्ध्यमात्रेण केतकीगन्धसदृशः सर्पगन्ध इत्यत्रेव केनचित् पदार्थत्वधर्मेण सादृश्य संभवात् । यदि चैतन्यैकरसे कस्यापि धर्मस्य वास्तवस्याभावात् सादृश्यं दुरुपपादमित्युच्यते, माभूत् निरुपाधिकभ्रमं प्रति सादृश्यस्य सामग्रीत्वम् । सादृश्यमन्तरेणापि पीतः शङ्ख इति भ्रमदर्शनात्, तत्र यदि रागपित्तोद्रेककाचकादिसामग्र्यन्तरसत्त्वेन भ्रमोपपत्तिः, तर्हि अविद्यैव[1] सामग्री प्रकृतेऽस्तीति तदध्यासोपपत्तिरिति ।

प्रत्यगात्मसत्तामात्रमुपजीव्य स्वरूपचिदानन्दावारकत्वेन 'न जानामि तत्त्व' मित्यनुभवसिद्धायाः अनाद्यविद्यायाः भावरूपायाः अपलापायोगेन तत्रैवाध्यासोऽयमुत्पन्न इति । मिथ्याज्ञाननिमित्त इति भाष्यांशेन सेयमनादिरनिर्वाच्या ज्ञानपर्युदासेनाध्यासोपादानतया चाभिहिता ।[2]

---

1. वस्तुतो मूलाविद्यैव सामग्री इति ।
2. भामती तु न तथा व्याचख्यौ ।

कार्याध्यासस्यानादित्वं तु बीजाङ्कुरवत् प्रवाहरूपेण । भोक्तृत्वाध्यासः कर्तत्वाध्याससापेक्षः । अकर्तुरभोक्तृत्वात्, कर्तृत्वं च रागादिदोषसंसर्गाध्यासापेक्षः, तदभावे कर्तृत्वाभावात् । दोषसंयोगश्च भोक्तृत्वापेक्षः, अननुभुक्ते रागाद्यनुपपत्तेः। अतः प्रवाहत एतेषामनादित्वम् । अनादित्वे सति पूर्वपूर्वाध्यासदर्शितदेहादेः संस्काररूपेणावस्थितस्य उत्तरोत्तराध्यासहेतुत्वात् । सत्यानृतयोरेवारोपः, आरोपे चारोप्यस्य प्रतीतिमात्रमुपयुज्यते न वस्तुसत्ता, सत्येऽनृतस्यारोपः । वस्तुनोरेवाध्यासे गुणगुणिनोरपि तादात्म्याध्यासापत्तिः । शुक्तिरजतयोस्तु सत्यानृतयोरेव तादात्म्याध्यासो दृष्टः । यद्यप्यात्मानात्मनोरन्योन्यतादात्म्याध्यासः तथापि नात्मनः स्वरूपेणाध्यासः, किं तु संसृष्टरूपेण[1] । अनात्मनस्तु स्वरूपेणाप्यस्ति स इति विशेषः । उभयोरप्यनृतत्वे शून्यवादप्रसङ्गादिति ।

तयोरन्योन्यात्मताध्यासश्चात्यन्तैकत्वमापाद्यैव, अयमहमिति एकत्वाध्यासानुभवात् । व्यवहारतस्तु तादात्म्याध्यासोऽपि देहात्मनोरहमित्यभेदव्यवहारस्येव मम देह इति भेदव्यवहारस्यापिभावात् । भेदाभेदसहिष्णु अन्योन्याभावविरोधि तादात्म्यम्, भेदविरोध्येकत्वमिति विविक्ततैव तयोः । तथा चात्मानात्मनोरेकत्वाध्यास एव अर्थाध्यासाविनाभूतत्वात् ज्ञानाध्यासो न पृथक् साधनीय इति तदुभयमपि स्वीकार्यमनुभवानुरोधात्[2] ।

अध्यासस्य अनाद्यनिर्वचनीयभावरूपाविद्या उपादानम्

सत्यामविद्यायामध्यासोदयः, असत्यां तदनुदय इत्यन्वयव्यतिरेकाभ्यां तदुपादानत्वसिद्धेः । भावकार्यमात्रस्योपादानापेक्षा । विमतं सोपादानं भावत्वे सति कार्यत्वाद् घटवत् । न च काचादिदोषाणामुपादानत्वं संभवि, अध्यासतदुपादनयोरेकाश्रयत्वनियमात्, अध्यासो ह्यात्माश्रयः, दोषा इन्द्रियाद्याश्रिता इति न तेषामुपादानत्वम् । एवं सर्वत्र शुक्तिरजताध्यासादौ अर्थाध्यास इव ज्ञानाध्यासेऽपि सैवोपादानम्, नात्मा वा अन्तःकरणं वा, अपरिणामित्वान्नात्मा इन्द्रियसन्निकर्षलिङ्गादिसापेक्षत्वात् नान्तःकरणम् ।

1. अनात्माहंकारतादात्म्यसंसर्गविशिष्यरूपेणेत्यर्थः ।
2. इदमध्यासस्वरूपविवेचनं भामतीविलक्षणम् ।

भ्रान्तिसम्यग्दर्शनबन्धनिवृत्तिपदार्थानामेकाश्रयत्वं नियतम् । अन्तःकरणस्यैव ज्ञानाकारज्ञात्राकारपरिणामे स्वीकृते तेषामन्तःकरणाश्रयत्वप्रसंगः, अनुभवतस्तु आत्मन एव भ्रान्तत्वादिकमिष्यत इति आत्माश्रिताज्ञानोपादानत्व पक्ष एव तत् सर्वं सिद्धयतीति परिशेषात् अज्ञानमेवोपादानं स्वीकार्यम्[1] ।

वस्तुतस्तु भाष्यकारैरध्यासं प्रति उपदानचिन्ता न कृता । 'इतरेतराविवेकेने'ति अविवेकमात्रस्य कारणमुक्तम् । अध्यासभाष्येऽनुक्तोपादान-चिन्तेयम् । 'समाननामरूपत्वाच्चे'ति देवताधिकरणे सकलजगदुपादानब्रह्माश्रित-शक्तिशेषचिन्ता कृतेति, कार्याध्यासं प्रति औचित्यादविद्यारूपा जडशक्तिः प्रत्यगात्माश्रिता सती परिणाम्युपादानं सेत्स्यति । परं तु पंचपाद्या विवरणेन च 'मिथ्याज्ञाननिमित्त' इत्यस्य विजातीयव्याख्यानमिषेणानिर्वचनीयाविद्योपादान-समर्थनं भाष्यार्थपुष्टीकरणाय । वार्तिककारैरव्याकृतवादे अव्याकृतस्य आत्माज्ञानरूपत्वेन व्याख्याकरणेन तदुपादानमध्यासं समर्थितवद्भिः अत्र टीकाकाराणामपि एतादृशव्याख्याकरणे अवकाशो दत्त इवाभाति । अत्र वार्तिकोदाहरणानि वार्तिकविमर्शप्रकरण एव दत्तानि द्रष्टव्यानि ।

अज्ञानस्य भावत्वे प्रमाणोपन्यासः

साक्षिवेद्येऽज्ञाने प्रमाणोपन्यासोऽभाववैलक्षण्यदर्शनाय साक्षिवेद्यस्याज्ञानस्य प्रमाणैरभावव्यावृत्तिः प्रदर्श्यत इति न तस्य प्रमाणवेद्यत्वप्रसङ्ग इति विवरणोक्तेः । पंचपादिकायां पुनः श्रुतिरर्थापत्तिश्च प्रमाणे दत्ते । विवरणे प्रत्यक्षमनुमानं च प्रमाणीकृतम् । तत्र 'अहमज्ञो मामन्यं च न जानामीति' प्रत्यक्षेण जडात्मिका अविद्याशक्तिरात्माश्रिता बाह्याध्यात्मिकेषु व्याप्ता प्रतीयते, न चेदं प्रत्यक्षं ज्ञानाभावविषयकम् । अहं सुखीतिवत् परोक्षानुभवात्मकत्वात् । ज्ञानविशेषाभावो हि अनुपलब्धिप्रमाणगम्यः, 'व्यवहारे भट्टनय' इत्युपगमात् । ज्ञानसामान्याभावस्तु

1. अज्ञानोपादानक अहं ममेत्यादिः सर्वोऽप्यध्यासः, शरीरस्य दृश्यत्वात् अन्तःकरणेन्द्रियाणां चात्मनः पृथक् सत्तोपलब्ध्यभावात् अज्ञानवत् केवलसाक्ष्यपरोक्षानुभवविषयत्वादध्यासिद्धिः । 'न तस्य प्राणा उत्क्रामन्ति अत्रैव समवलीयन्त' इत्यात्मतत्वबोधे सति आत्मन्येवेन्द्रियादीनां लयश्रवणात् स्वरूपतोऽप्यध्याससिद्धिः । एवं देहेन्द्रियादिविशिष्टो भोक्ता अध्यस्त इति तदीयमुपकरणं बाह्यं भोग्यजातं सर्वमप्यध्यस्तम् । स्वप्नेन माहेन्द्रजालेन वा कल्पितस्य राज्ञो राज्योपकरणं यथा अपारमार्थिकं तथेमेऽप्यध्यासा एवेति भावः ।

साक्षिमात्रवेद्यः, अभावप्रत्यक्षवादितार्किकमतेन तु धर्मिप्रतियोगिज्ञानाज्ञानाभ्यां व्याहतेः ज्ञानाभावविषयकं तदिति दुरुपपादम् । व्यवहारेण ज्ञानाभावोऽनुमेय इति पक्षे सैव व्याहतिः । भावरूपत्वे च आत्माश्रयविषयज्ञानानि त्रीण्यपि एकेनैव साक्षिणा भास्यन्ते, नात्र व्याहतिः, स्वाश्रयविषयसाधकः साक्षी तदज्ञानमपि साधयेदेव, निवर्तकं तु वृत्तिज्ञानमेव तत्त्वविषयकम् । सर्वं वस्तु ज्ञाततया अज्ञाततया वा साक्षिभास्यमेव, एवं सोपपत्तिकं प्रत्यक्षं भावरूपाज्ञाने प्रमाणम् । एवं 'विमतं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकम्, अप्रकाशितार्थप्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रकाशवत्' इत्यनुमानमपि तत्र भावत्वे प्रमाणम् । अनिर्वचनीयज्ञानार्थाध्यासान्यथानुपपत्त्या तदुपादानमज्ञानमप्यनिर्वचनीयम् । मूलकारणत्वान्यथानुपपत्त्या अनादित्वम् । सादित्वे चोपादानपरं परापेक्षायां मूलं कारणं न सिद्धयेत् । अज्ञानं चिन्मात्राश्रितम् 'अहमज्ञ' इत्यहंकार विशिष्टवृत्तितया भानम्, 'अयो दहती'तिवत् अज्ञानान्तःकरणयोरेकात्मसंबन्धादेव सामानाधिकरण्येन भानं तत्, अन्तःकरणमन्तरेणापि सुषुप्तेऽज्ञानसंबन्धात् । असङ्गस्य चैतन्यस्याज्ञानाश्रयत्वमपि काल्पनिकम् । तेन वास्तविकासङ्गत्वस्य न हानिः[1] । भ्रान्तिसम्यग्ज्ञानमोक्षाणामपि जडाश्रयत्वप्रसङ्गः, अज्ञानेन सह तेषामेकाश्रयत्वनैय्यत्यात् । अतश्चिन्मात्राश्रितं चिद्विषयकं च तदज्ञानं, जडे आवरणकृत्याभावात् । अन्तःकरणस्यैवाज्ञानाश्रयत्ववादिभास्करपक्षोऽसाधुः । अन्तःकरणस्य तदाश्रयत्वे प्रमाणाभावात्, सादित्वादपि चक्षुरादिवदनाद्यज्ञानाश्रयत्वानुपपत्तिः । आत्माश्रितज्ञानेनान्तःकरणाश्रिताज्ञानस्य भिन्नाश्रयत्वेन निरोधासंभवश्च, आत्मनः सर्वज्ञत्वापत्तिश्च । कादाचित्कज्ञानाज्ञानयोरनुभवतोऽपि आत्माश्रितत्वं दुर्वारमित्यादियुक्तिभिस्तत्पक्षोऽसाधुः । तदेवमनाद्यनिर्वचनीयं भावरूपमात्माश्रितमात्मविषयं चाध्यासोपादानम् । इदं चात्मन्येवावरणकृत्यं करोति, नानात्मनि । अनात्मनि जाड्यस्य स्वाभाविकत्वात्, विक्षेपमात्रं तु जनयति । शुद्धमात्मानं त्वावृत्य तत्राहं ममेदमित्येवं व्यवहारयोग्यानध्यासानपि जनयति । नास्ति न प्रकाशते चेति व्यवहारयोग्यत्वमेवावरणस्वरूपम् । नेदं ज्ञानाभावः, न भ्रान्तिः, भ्रान्तिसंस्कारो

1. विशिष्टस्य अन्तःकरणचैतन्यतत्संबन्धानतिरेकात् चैतन्याश्रयत्वं तदापि दुर्वारम्, अतिरिक्तपक्षेऽपि जडाश्रयत्वं नोपपद्यत इति भावः ।

वा, अपि तु ब्रह्मतत्त्वानवभासहेतुरन्यदेव। सुषुप्त्यादौ ब्रह्मतत्त्वानवभासस्यानन्यथासिद्धत्वात्, तत्काले भ्रान्तिज्ञानतत्संस्कारादेः प्रतिबन्धकस्य, कर्मणो वा साधने प्रमाणाभावात्, संस्कारस्याप्रतिबन्धकत्वाच्च। तत्काले मिथ्याज्ञानस्यापि लुप्तत्वात्। स्वप्रकाशरूपब्रह्मानवभासहेतुरिदमेव वक्तव्यं भवति। असङ्गस्यात्मनोऽज्ञानसंबन्धोऽनादिरज्ञानकल्पितः अज्ञानवदेव, अतोऽसङ्गताभञ्जको न भवति। सुषुप्त इव जागरस्वप्नयोरपि अनाद्यनिर्वचनीयमज्ञानमेव ब्रह्मावरणम्। इदमज्ञानं मायाशब्दवाच्यम् मायाविद्ययोरैक्यात्, उभयोरपि अनिर्वचनीयत्वे सति तत्त्वावभासप्रतिबन्धविपर्ययावभासहेतुत्वं लक्षणमविशिष्टम्। मन्त्रौषधादौ सत्ये न मायाशब्दप्रयोगः, अनिर्वचनीयमिन्द्रजालं दृष्टमेव मायां वदन्ति, तदुपादानत्वेन कल्पिता मायैव रजताध्यासानामप्युपादानं, मास्तु पृथगविद्या। "भूयश्चान्ते विश्वमायानिवृत्तिरिति"[1] श्रुतौ सम्यग्दर्शननिवर्त्याविद्यायां च मायाशब्दप्रयोगात्। अन्यत्र च

तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते।
योगी मायाममेयाय तस्मै विद्यात्मने नमः ॥[2]

इत्यत्राविद्यायां मायाशब्दप्रयोगदर्शनात्। "मायामात्रं तु"[3] इति सूत्रकारैः स्वप्ने मायाशब्दप्रयोगात्। भाष्यकारैश्च अविद्या माया अविद्यात्मिका मायाशक्तिरिति तत्र तत्र निर्देशात्। टीकाकारेण च अविद्या मायाऽक्षरमित्युक्तत्वात्। ब्रह्मसिद्धिकारेण च 'इयमविद्या माया मिथ्याप्रत्यय इत्युक्तत्वात्। उक्तलक्षणैक्यात् वृद्धव्यवहारे चैकत्वावगमात्। विक्षेपप्राधान्येन मायेति, आच्छादनप्राधान्येनाविद्येति व्यवहारभेदः न तत्त्वतस्तयोर्भेदः।

अध्यासस्य लक्षणं प्रमाणं च

द्विविधो ह्यध्यासः ज्ञानविशिष्टोऽर्थोऽर्थविशिष्टं ज्ञानं चेति। 'स्मृतिरूपः परत्र पूर्वदृष्टावभास' इत्यस्य लक्षणद्वये तात्पर्यमभिसंधायेदमुपवर्णितम्, भामतीविलक्षणं च, पृथगर्थाध्यासलक्षणकथनात्। तत्रार्थस्य तावत् स्मर्यमाणसदृशः

---

1. श्वेताश्व 1-10
2. वि.पु. 5-17-14
3. ब्र.सू. 3-2-3

अन्यात्मना अवभास्यमानोऽन्योर्थोऽध्यास इति लक्षणम् । ज्ञानस्य तु स्मृतिसमानोऽन्यस्यान्यात्मनावभासोऽध्यास इति । यथा शुक्तिकायाम् 'इदं रजत'मिति प्रतीयमानं रजतं स्मर्यमाणसदृशं, न स्मर्यमाणमेव, पुरोऽवस्थितत्वेनावभासमानत्वात् । तत् सादृश्यं च पूर्वानुभवसापेक्षज्ञानगम्यत्वम् । न ह्यननुभूतरजतस्य पुंसो रजतभ्रान्तिर्दृश्यते । संस्कारजन्यत्वाद् ज्ञानाध्यासस्यापि स्मृतिसादृश्यम् । अध्यासस्य दोषसंस्कारसंप्रयोगरूपकारणत्रितयजन्यत्वं तटस्थलक्षणम्[1] । जागराध्यासे सर्वत्रेदं दृश्यते, न तु स्वप्ने, संप्रयोगाभावात् । इदं च रजतं मायामयं,[2] नात्राख्यातिरसत्ख्यातिरात्मख्यातिरन्यथाख्यातिर्वा, किं तु सत्यवस्तुनो मिथ्यावस्तुसंभेदोऽवभासमानो माया, मिथ्या अनिर्वचनीयख्यातिरध्यास एवायमिति निष्कर्षः विस्तरेण विमृश्य कृतः । अद्वितीये निष्कलङ्केऽपि चात्मनि अविद्यासंबन्धोऽवास्तवः स्वीक्रियते श्रुत्या श्रुतार्थापत्त्या च । तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञाः उपर्युपरि संचरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजाः अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति । "अनृतेन हि प्रत्यूढा"[3] इति श्रुतिः । श्रुतार्थापत्तिरपि, ब्रह्मज्ञानाद्बन्धनिवृत्तिः क्रियमाणा ब्रह्मणि प्रागनवबोधोऽध्यासः बन्धहेतुर्दोषः अस्तीति कल्पयति । न च प्रमाण गम्यत्वे तात्विकापत्तिरज्ञानस्य । प्रमाणोपन्यासो हि तादृशी काचिदनिर्वचनीयभावरूपाविद्या नास्तिवादिनः पक्षं निराकर्तुमेव । अविद्यास्वरूपं तु साक्षिभास्यमेव ।

बाधस्वरूपनिर्वचनम्

तेन बोधितो बाधश्च, अज्ञानस्थस्वकार्येण वर्तमानेन प्रविलीनेन वा सह ज्ञानेन निवृत्तिः, तथाविधानवबोधनिवृत्तौ बाधप्रसिद्धेः । सामान्यतः सत्याधिष्ठानस्य मिथ्यावस्तुसंभेदावभास इति अध्यासस्वरूपलक्षणम् । भाष्यगतस्मृतिरूपशब्देन स्मृतिसमानत्वार्थकेन कारणत्रितयजन्यत्वं तटस्थलक्षणमित्यध्यासलक्षणं ग्राह्यम् ।

अध्यासलक्षणसमन्वयः

लक्षणसमन्वयः शुक्तिरजताध्यासादाविव आत्मानात्माध्यासस्थलेऽपि । तथाहि, स्वयं प्रकाशमानोऽपि निरंशोऽपि सोऽयमात्मा मिथ्याभिमानतिरोहितो

1. तच्च स्मृतिरूपपदेन स्मृतिसादृश्यकथनेन लब्धम् ।
2. आविद्यकमित्यर्थः ।
3. छां 8-3-2

ब्रह्मतत्त्वाकारेणागृहीत इति सामान्यग्रहणविशेषाग्रहणयोः संभवादधिष्ठानत्वम-विरुद्धम् । तस्याधिष्ठानस्य अहंकारादिमिथ्यावस्तुसंभेदावभासः 'अयमहमिति' स्वरूपलक्षणमस्ति । विषयकरणद्रष्टृत्रयस्थानीये स्वात्मनि अविद्याख्यदोषस्य प्रागुक्तेः आत्मचैतन्यस्यैवाधिष्ठानग्राहकप्रमाणत्वात्, अनादौ च संसारे पूर्वपूर्वा-ध्यासजनितसंस्कारस्य सुलभत्वात् कारणत्रितयजन्यत्वमपि लक्षणं संभवति । यद्यपि अधिष्ठानारोप्यभासकं चैतन्यं स्वरूपतो रजतादिवत् न जायते तथापि विशिष्टाहंकारादिविषयोपरक्ताकारेण जायत इत्यविरुद्धम् । अन्यस्यान्यात्मताव-भासश्च सत्यमिथ्यावस्तुसंभेदावभास इति ग्राह्यम् । अधिष्ठानस्याध्यस्यमानेन सह एकेन्द्रियग्राह्यत्वमन्तरेणाप्यपरोक्षमात्रेण तेनाध्यासः संभवी साक्षिभास्ये मनोमात्रेण वा प्रत्यक्षे चाकाशे मालिन्यादेश्चाक्षुषस्यापरोक्ष्यदर्शनात् ।

क्षपणकैर्भाट्टैश्चाकाशस्य चाक्षुषत्वे स्वीकृतेऽपि नास्माभिः स्वीक्रियते, तथा सति रूपवत स्पर्शवत्वप्रसंगात् । चक्षुरन्वयव्यतिरेकौ हि आकाशानुमापकमूर्त-द्रव्याभावविषयावित्यन्यथासिद्धौ । तार्किकमते तु नित्यानुमेयाकाशे चाक्षुषत्वं दुरुपपादम् । किं च सविकल्पकस्यैवधिष्ठानत्वमिति निममोऽति नास्ति । आपरोक्ष्येण स्फुरणमात्रं हि अधिष्ठानतोपपत्तेः मूलाज्ञानं निर्विकल्पके चैतन्येऽध्यस्यते, सविकल्पकत्वस्याप्रयोजकत्वादिति । तदन्यत्र पूर्वपूर्वाहंकार-संस्कारेण सविकल्पके चैतन्ये उत्तरोत्तराहंकाराध्यासोऽपि संभवत्येव । एवमन्यत्रापि। अहमिति प्रत्ययः इदमनिदात्मकः । अहमित्येकं ज्ञानमात्मानात्मसंभेदावभासकम्। तत्र हि आत्मा निरंशोऽपि स्वतोऽविषयोऽपि ज्ञाने विषयो भवति यथा आकाश-प्रतिबिम्बगर्भितो दर्पणः तथा आत्माध्यस्तमन्तःकरणमात्म- प्रतिबिम्बगर्भितमहं-प्रत्ययरूपेण भासत इति 'अहमुपलभ इति च' । अयो दहतीत्यत्र दग्धृत्वविशिष्टाग्नेरयसश्च द्वैरूप्यमिव उपलब्धृत्वविशिष्टात्मनोऽन्तःकरणस्य च द्वैरूप्यम् । दुःखित्वपरिणामित्वजडत्वविषयेन्द्रियव्यावृत्तत्वरूपैरनुभूयमानांशोऽन्तः करणम् । प्रेमास्पदतया कूटस्थतया विषयेन्द्रियाद्नुवृत्तचैतन्यरूपतया चानुभूयमानां-शोऽयमात्मा, अतोऽहंप्रत्ययः इदमनिदात्मकः[1] । तत्र स्वप्रकाश-संविदाश्रयत्वेनापरोक्षोऽहंकार एवात्मेति गुरुमतं वा, नित्यानुमेय आत्मेति

1. विषयविषयिरूप इत्यर्थः ।

स्वस्वप्रक्रियानुसारेण वदतां सांख्यादीनां मतं वा, द्रव्यांशः प्रमेयः बोधांश प्रमातेति जडाजडरूप आत्मेति भाट्टमतं वा न साधु । सिद्धान्ते तु विचार्यमाणे अहंकारस्यानात्मत्वमेव आत्मनोऽनुभवरूपत्वात् । चित्प्रकाशो ह्यनुभवः, स च स्वातिरिक्तानुभवमनपेक्ष्यैव स्फुरणरूपः, एतल्लक्षणवत्वेनानुभवः चित्प्रकाश एव । अनुभवश्च तादृशो नात्मनो भिन्नः, तयोः वस्तुतोऽभेदात् । आत्मा हि स्वयमेव प्रकाशते, चिद्रूपत्वे सति अव्यवहितत्वात् । तथा च आत्मा अनुभवश्चेति चित्प्रकाशद्वयं वा, अनुभव एव चित्प्रकाशो नात्मेति वा पक्षद्वयं न साधु ।

अनुभवस्वरूपे मतभेदनिरासः

आत्मगुणोऽनुभव इति तार्किकाणां प्राभाकराणां च मतम् । आत्मस्वरूपत्वात् द्रव्यमिति सांख्यानां मतम्[1] । परिणामक्रियाफलत्वात् क्रियाफलयोरैक्यविवक्षया कर्मेति भाट्टमतम् । एतन्मतत्रयमपि न साधु । अनुभवस्य क्रियारूपत्वे गमनक्रियावत् प्रकाशत्वं फलत्वं चायुक्तम् । द्रव्यत्वेऽणुपरिमाणत्वे तस्य खद्योतवदेकदेशमात्रप्रकाशकत्वापत्तिः । महत्परिमाणत्वे तद्रूपात्मनः सर्वत्रावभास-प्रसङ्गः । तदाश्रय आत्मेति पक्षेऽप्ययमेव दोषः । 'मया अवगत'मिति व्यवहारात् प्रदीपप्रकाशयोरिवात्मचैतन्ययोरभेद एव । गुणत्वपक्षे दीपगतभास्वररूपवदाश्रय-जन्मव्यतिरेकेण जन्मासंभवः, अर्थात् नित्यतया आत्मनि अव्यभिचरिततया भासमानः स आत्मैव । अन्याधीनप्रकाशत्वे चात्मनो जडत्वप्रसंगः । नीलपीताद्यनुभवभेदभानं विषयविशेषौपाधिकं, भेदकल्पने मानाभावात् । तदुत्पत्तिविनाशौ च विषयसंबन्धनिष्ठौ विनाशप्रयुक्तौ न स्वत इति । संविदिति कथ्यमानोऽनुभवोऽयमात्मैवेति स्वीकार्यम् । ज्वालानामिव संविदां सादृश्यादेकत्वभानं, भेदो विद्यमानो न भासत इति सुगतमतमपि न साधु । ज्वालासु भेदाभानेऽपि स्वप्रकाशसंविन्निष्ठभेदाभाने कारणाभावात् । एवं चैकैव संवित्, सा चानादिः, प्रागभावशून्यत्वात्, स एवात्मा वस्तुतः । तथा च स्वप्रकाशानुभवस्य नित्यत्वादात्मत्वमविरुद्धम् । आत्मानुभवयोर्भेदस्तु विषयौपाधिकः, आत्मैव विषयौपाधिकोऽनुभव इति, अविवक्षितोपाधिकः शुद्ध आत्मेति भण्यते ।

---

1. इदमार्थिकम् ।

सुषुप्तानुभवतोऽप्यहंकारस्यानात्मत्वम्

सुषुप्तेऽहमित्यवभासाभावात् अहंकारो नात्मा, न च विषयानुभवाभावात् विद्यमानोऽप्यहंकारो न भासत इति वाच्यम् । विषयोपरागस्य आत्मप्रतीतावप्रयोजकत्वात् । अनुभवात्मकस्यात्मनो नित्यत्वान्न तदभावः विषयनैरपेक्ष्येणाहंकारप्रकाशे, सुषुप्तावपि तदुल्लेखः स्यात् यद्युल्लेखः स्यात् पूर्वदिनाहंकारवत् सौषुप्ताहंकारोऽपि स्मर्येत । न च 'सुखमहमस्वाप्स'मिति परामर्शदर्शनमुत्थितस्य स्मरणमस्तीति वाच्यम् । नेदमहंकारस्य स्मरणं, किं तु सुषुप्तौ विलीनोऽहंकारः प्रबोधे पुनरुत्पद्यते । स चोत्पन्नः, परामृश्यमानमात्मानं सविकल्पकत्वेन स्पष्टव्यवहारायोपलक्षयति, एतदेकप्रयोजनत्वादहंवृत्तेः । अत एव न जातुचिदपि नान्याभिरन्तःकरणवृत्तिभिः व्यवह्रियते ।

स्मरणं त्वनुभूतांशे, सुषुप्तावनुभूताश्च भावरूपाज्ञानं, आनन्दः, आत्मा चेति त्रयमेव परामृश्यते 'सुखमहमस्वाप्सं न किंचिदवेदिष'मिति । तत्र च अविद्यैवोक्तत्रयग्राहकवृत्तित्रयाकारेण सुषुप्ते विवर्तते । उक्तवृत्तित्रयावच्छिन्नचिदाभासज्ञानात्मकानुभवनाशे उत्थानकाले तज्जन्यसंस्कारवैभवेन पूर्वोक्ता स्मृतिः । टीकाकृता पुनः परमतमाश्रित्य दुःखाभावानुभवोक्तिः, स्वमते तु स्वरूपसुखानुभवस्तदात्वेऽस्यैवेति 'परमतमाश्रित्योक्तं न स्वमतमिति न दोष' इति विवरणोक्तेः । अत्र दुःखाभावज्ञानाभावौ तु केवलार्थापत्तिवेद्यौ, सुषुप्तानुभूतसुखानुस्मरणान्यथानुपपत्तिः दुःखाभावकल्पिका, परामृष्ट-भावरूपाज्ञानानुपपत्तिः तद्विरोधिज्ञानाभावकल्पिका । तथा च स्वरूपसुखानुभवजन्यस्मरणमस्त्येव । ततश्च जाग्रत्स्वप्नयोरात्मत्वेन प्रतिभासमानोऽप्ययं जडाहंकारः सुषुप्तौ अभावात् न स्वप्रकाशात्मनो निजं स्वरूपमिति श्रुतिस्मृतिविज्ञैरुपेयम् । ''स एवाधस्तादि''[1] त्यादिश्रुतौ आत्मनः सार्वात्म्यप्रतिपादनपुरःसरं तस्य अहंकाराद् भेदेन निर्देशोऽपि तत्र प्रमाणम् । 'अहंकारश्चाहंकर्तव्यं चेति' इन्द्रियप्रवाहमध्येऽहंकारस्य गणनाच्च । गीता च, ''महाभूतान्यहंकार''[2] इति कार्यप्रपञ्चे तं गणयति । अतस्तत्वतोऽहंकारो नात्मा ।

1. छां. 7-25-1
2. भ.गी. 13-5

अहंकारस्योपादाननिमित्तादिवर्णनम्

चिदाश्रिता अनाद्यनिर्वचनीयाऽविद्या उपादानम् । अविद्यायाः परमेश्वराधिष्ठितत्वमेव निमित्तम् । ज्ञानशक्तिक्रियाशक्तिद्वयं स्वरूपम् । कूटस्थचैतन्यरूपानुभवः प्रमाणम् । तत्कार्यं च कर्तृत्वभोक्तृत्वादि । सुषुप्तेरन्तः-करणप्रलयरूपत्वात् तदभावस्तत्र, क्रियाशक्तिरूपप्राणसत्वेऽपि ज्ञानशक्तिरूपांशस्य लयः प्राणानन्यत्वेऽप्यन्तःकरणस्य । दृष्टिसृष्टिपक्षे सुप्तपुरुषदृष्ट्या सर्वलयो मुख्य एव । एवमपि नात्मस्वरूपमहंकारः, चित्कमत्वरूपेदमंशलक्षणवत्वेन अनुभवाच्च । आत्मनस्तदभावादनिदंरूपत्वम् । अहंकारोऽयं वृत्तिज्ञानवेद्यः । पूर्वदिनानुभूताहंकार एव स्मृतिसंभवात् । परं तु शरीरविषयादिवद् वेद्यत्वं न स्पष्टमहंकारस्य । अनभिज्ञत्वादेव च शरीरादावेव चिद्विषयत्वमिदमंशलक्षणं, न त्वहंकारे । वल्मीकपाषाणवृक्षेषु मृण्मयत्वसाम्येऽपि अविवेकिनो वल्मीकमेव मृण्मयं व्यवहरन्ति, तद्वत् । अभिज्ञास्तु चिदंशमनिदंतया जडांशमिदंतया च व्यवहरन्ति । तस्मात् चित्प्रतिबिम्बगर्भितोऽहंकार इदमनिदात्मकत्वेन परीक्षकैर्निरूप्यमाणोऽपि पामरैरेकीकृत्य अहंप्रत्ययरूपेण 'अह'मित्यनुभूयते ।

जीवस्वरूपम्

जीवो हि अहंकारप्रतिबिम्बितचैतन्यरूपः । एकमेव बिम्बभूतं चैतन्यं मायावशात् भिन्नदेशवृत्तिमुखप्रतिबिम्बवत् भासते । बिम्बमेव प्रतिबिम्बं न तयोर्भेदः, प्रतिबिम्बस्यात एव सत्यत्वम् । उपाधौ वृत्तितया भासमानत्वेन प्रतिबिम्बत्वमात्रं कल्पितम् । न हि मायायामसंभावनीयं किमपि, स्वशिरश्छेदादिकमपि स्वप्ने माया दर्शयति खलु । यद्यप्यज्ञानं मायाह्वयं जीवावच्छेदोपाधिः, तथापि सुषुप्तौ अविद्यामात्रावच्छिन्नस्य जीवस्य स्वप्नदशायमीषत् स्पष्टव्यवहारार्थमन्तःकरण-मप्युपाधितया अभिलप्यते । तथा जागरे स्पष्ट-व्यवहृतये स्थूलशरीरमप्युपाधिः । न चैवमपाधिभेदाज्जविभेदप्रसंगः, एकस्मिन् शरीरे पूर्वपूर्वोपाध्यवच्छिन्नस्यैवोत्तरो-त्तरेणान्तरविच्छेदात्, निरपेक्षोपाधिभेदस्थल एव जीवभेदः ।

अयमत्राशयः- निर्विकल्पकचैतन्यैकरसमविद्यासंबन्धात् ईषद्विकल्प-व्यवहारालंबनं भवति सुषुप्ते, तदा तदुपादानकान्तःकरणोपाधितस्तदेव स्थूलतरव्यवहारावलम्बनं भवति स्वप्ने । पुनरन्तःकरणसंसृष्टस्थूलशरीरोपरागात्

स्थूलतमं भवति जागरे । एवमुपाधित्रयावच्छिन्नोऽपि चेतनो जीव एक एव जागरेऽपि । विवरणकारमते बिम्बभूत ईश्वरः, प्रतिबिम्बभूतो जीव इति प्रतिबिम्बवादः । स च बिम्बादभिन्नः सत्यश्चेति प्रतिबिम्बत्वमात्रं कल्पितमविद्ययेति अविद्यैव जीवब्रह्मविभागहेतुः । प्रतिबिम्बत्वं तदापादकभेदविपर्यासादिश्च मिथ्या । आभासवादे वार्तिककारमते प्रतिबिम्बोऽपि मिथ्या, व्यवहारभूमौ शुद्धचैतन्यसत्तादात्म्येनैव सत्यत्वम् । प्रतिबिम्बभावश्च वार्तिककाराणामपि नाभिप्रेतः । भाष्यकारैरिव तैरपि सकारणं निराकरणात् । परं तु प्रतिबिम्बकल्पो जीवः उपाधिगततत्तद्धर्मवत्वेन[1] मुखप्रतिबिम्बवत् प्रतीममानत्वात् तत्सदृश इति सूत्रकारभाष्यकारवार्तिककाराणां तदनुयायिवाचस्पतिमिश्राणां चैककण्ठ्यमत्र विषय इति प्रतीयते । अलमनेन प्रासंगिक विमर्शेन । प्रतिबिम्बत्वधर्मस्य मिथ्यात्वेऽपि धर्मी जीवचेतनो बध्यते मुच्यते चेति न बन्धमोक्षासंभवः नापि तयोर्ब्रह्मणि बिम्बताप्रसंगः। जीवस्य प्रतिबिम्बत्वं कथं स्वरूपस्यामूर्तस्य तदसंभव इत्यादिशंकापरिहारः, अमूर्तस्याप्याकाशस्य स्वाश्रिताभ्रनक्षत्रादिविशिष्टस्य जले प्रतिबिम्बभावोऽनुभूयते यथा तथा अत्रापि । न चायं जलान्तर्वर्तिगगनाभ्रादिविषयः, जानुमात्रेऽपि जले दूरविशालाकाशदर्शनात् इत्युपपत्त्या ''रूपं रूपं प्रतिरूपो बभूव''[2] ''एकधा बहुधा चैव दृश्यते जलचन्द्रवत्''[3] ''अत एव चोपमा सूर्यकादिवत्''[4] इति श्रुतिस्मृतिसूत्रैः प्रमाणैश्च प्रतिबिम्बभाव एव प्रामाणिक इति ।

अवच्छेदवादे दोषोद्भावनम्

यद्यवच्छिन्न एव जीवः तर्हि ब्रह्माण्डवर्तिचैतन्यं सर्वात्मना जीवभावापन्नमिति निरवच्छिन्नं ब्रह्म अण्डाद् बहिरेव वर्तेतेति कल्पनीयं स्यात्, तदा जीवेन सहान्तर्यामिब्रह्मणः सहावस्थानं श्रुतिगतमसमीचीनं स्यात्; अस्मिन् पक्षे श्रुतिविरोधः । घटाकाशवद् यदि जीव उपाध्यवच्छिन्न एव न प्रतिबिम्बः, तदा जीवोपाधिमध्ये ब्रह्मणोऽपि सत्वे चैतन्यं द्विगुणं स्यात् । न चेदं द्विगुणीकृत्य वर्तमानमाकाशस्य घटे दृष्टम् । तदर्थं ब्रह्मणस्तत्रासत्वे सर्वगतत्वसर्वनियन्तृत्वहानिः;

1. वृद्धिह्रासभाक्त्वम् ...... (ब्र.सू. 3-2-20) इत्यत्रोक्तरीत्या ।
2. कठो 5-9
3. ब्र.बिं. 12
4. ब्र.सू. 3-2-18

तथा बोधकश्रुतिबाधापत्तिश्च । शास्त्रे भाष्यकारादिदीयमाघटाकाशदृष्टान्तो नावच्छेदवादसाधकः[1] किं त्वसङ्गत्वसाधकः । प्रतिबिम्बपक्षे तु नायं दोषः । जलमध्ये स्वाभाविकजानुमात्राकाशे सत्येव प्रतिबिम्बितविशालाकाशस्य च द्विगुणीकृत्य वर्तनदर्शनादिति । प्रागुक्तदिशा अमूर्तस्योपाधिसंनिहितस्य प्रतिबिम्बभावासंभवस्य प्रस्थानत्रयेऽपि भाष्यकारैः सूत्रानुयायिभिः दर्शितत्वात् केवलाग्रहेण अमूर्ताकाशप्रतिबिम्बनिदर्शनेन साधनं न शोभते । दृष्टान्तेऽपि नाकाशस्य प्रतिबिम्बनमस्ति, किं तु तद्वर्तिमेघमण्डलस्य, अथवा दूरत्वदोषेण कल्पितनैल्यवदाकाशस्य, न शुद्धस्य अरूपत्वादेव । तस्यापि प्रतिबिम्बनमस्तीति भ्रममात्रमिति अस्माकमाशयः ।

अवच्छेदवादे दर्शितदोषोऽपि न स्यात्, स्वभावत एव शुद्धचैतन्यस्य विकारभूतान्तःकरणादिवृत्तित्ववत् विकारावर्तिसर्वगतस्वरूपस्थितेरपि संभवेन सूत्रकारैरेव "विकारावर्ति च तथाहि स्थितिमाहेति"[2] प्रतिपादितत्वात् जीवरूपेण जीवान्तःस्थितत्वेन च यथाश्रुति तस्य स्वीकृतेः वस्तुतो वर्तनमपि घटादिवदाधेयभावेन न विवक्षितम्; किंतु हृदयदेशावच्छेदेनाभिव्यक्तिमात्रम् "हृदि सर्वस्य तिष्ठितम्"[3] "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति"[4] इति गीतार्थोऽपि तथैव । "अंशो नाने"[5] त्यादिसूत्रतोंऽशोऽवच्छिन्नोपाधिमहिम्ना घटेनेवाकाशः, स च न वास्तवः । "आभास एव च"[6] इति सूत्रात्तस्य प्रतिबिम्बवन्मिथ्यात्वोक्तेः । अतो भाष्यकारमतेऽपि सूत्रानुयायिनि न प्रतिबिम्बत्वं जीवस्य, किं तु प्रतिबिम्बकल्पत्वमेव अवच्छिन्नत्वमेवेति यावत् ।

प्रमात्रादिव्यवस्था

सर्वगतं चैतन्यात्मानमावृत्य स्थिता हि भावाविद्या[7] विविधजगदाकारेण विवर्तते । तत्र हि देहमध्येऽन्तःकरणाख्योऽविद्याविवर्तः पूर्वकृतधर्माधर्मप्रेरितः चक्षुरादिद्वारा घटादिविषयान् व्याप्य तत्तदाकारो भवति । स च तैजसत्वात् दीर्घप्रभाकारेण सूर्यरश्मिवत् परिणमते । एवं परिणतमन्तःकरणं देहघटयोरन्तरे दण्डायमानमवच्छिन्नं तिष्ठति । विवरणोक्तमन्तःकरणस्य तैजसत्वमसाधु,

1. न जीवतासाधक इत्यर्थः ।
2. ब्र.सू. 4-4-19
3. भ.गी. 13-17
4. Ibid 18-61
5. ब्र.सू. 2-3-43
6. Ibid 2-3-50
7. मूलाविद्येति यावत् ।

"अन्नमयं हि सोम्य मन"[1] इति श्रुतिसूत्रभाष्यविरुद्धम् । त्रिवृत्कृतत्वे परं कथंचिदुपपद्येतापि ।

1. तत्र देहावच्छिन्नान्तःकरणभागोऽहंकारः कर्तेत्युच्यते ।
2. देहविषयमध्यवर्तिदण्डायमानस्तद्भागो वृत्तिज्ञानाभिधा क्रियेत्युच्यते । विषयव्यापकस्तद्भागो विषयस्य ज्ञानकर्मत्वसंपादकमभिव्यक्तियोग्य-मित्युच्यते । एवं त्रिभागस्यान्तःकरणस्यातिस्वच्छत्वात् जडत्वेऽपि चैतन्यं तत्राभिव्यज्यते । तदेकमपि स्वाभिव्यञ्जकान्तः- करणाभागभेदा त्रिधा व्यपदिश्यते ।

कर्तृभागावच्छिन्नचिदंशः प्रमाता । क्रियाभागावच्छिन्नश्चिदंशः प्रमाणम् । विषयगतयोग्यत्वभागावच्छिन्नश्चिदंशः प्रमितिरिति । एतत्त्रयेऽप्यनुगतान्तः करणाकारस्य प्रमातृप्रमेयसंबन्धरूपत्वात् मयेदमवगतमिति विशिष्टव्यवहारः । अन्तःकरणेनाभिव्यक्तिश्चात्रावरणाभिमवः, नावरणनाशः, तेनैव मोक्षापत्तेः । नाप्यतिशयः, आत्मनो विकारित्वापत्तेः । चिदभिव्यक्तिविशिष्टः परिणाम्यहंकारः प्रमातेति निष्कर्षः ।

प्रतिकर्मव्यवस्था

चैतन्यस्य सर्वगतत्वे एकत्वेऽपि च प्रतिकर्मव्यवस्थोपपत्तिः । केवलचैतन्यस्याविद्यावृतत्वेन न विषयानुभवहेतुत्वम् । किं तु अन्तःकरणाभिव्यक्तस्य प्रतिपुरुषमन्तःकरणानां व्यवस्थितत्वेन यस्य यदा यदाकारान्तःकरणवृत्तिः जायते तत्तदिन्द्रियेण तस्यैव तदैव तेन तेन रूपेणानुभव इति प्रतिकर्मव्यवस्था । अतः सर्वपुरुषभोसांकर्यस्य न प्रसंगः । अन्तःकरणपरिणामश्च तत्तत्पुरुषपुण्यपापयोः तत्तदिन्द्रियादिसामग्रयाश्च प्रतिविषयं व्यवस्थितत्वेन व्यवस्थित एव ।

यश्च योगाभ्यासवशात् सर्वव्यापिपरिणामसामग्रीं संपादयेत् तस्यैव युगपत् सर्वानुभूतिरपि, नेतरस्य । विषयोपरागार्था । अन्तःकरणवृत्तिः अन्तःकरणोपाधिश्-चैतन्यस्य विषयोपरागार्थः, असङ्गमपि जीवचैतन्यमन्यत्रानुपरज्यमानमपि अन्तःकरण उपरज्यते । तादृशस्वभावत्वात् व्यापकमते गोत्वादिजातिवत्

1. छां 6-5-4

सास्नादिव्यक्तावेव प्रदीपप्रभेव वा सर्वरूपरसादिव्यापिन्यपि रूपमेव प्रकाशयति नान्यदितितीवत् । उपरागाभावे चित्प्रकाशो नैव विषयाभासको भवति, कदाचिद् ब्रह्म सर्वोपादानत्वात् उपाध्युपरागमन्तरेणापि स्वाभिन्नं जगदवभासयेत्; नैवं जीवः, अनुपादानत्वात् । स्वतो अनवभासकस्यापि जीवस्य स्वस्वान्तःकरणवृत्तिवशात् तदवभासकत्वम् । अन्तःकरणप्रतिबिम्बो जीव इति पक्षे परिच्छिन्नत्वात् सुतरां व्यवस्थासिद्धिः । जीवाभिव्यक्तिरपि जीवाकाराहंवृत्तिरूपेण परिणत एवान्तःकरणे, नान्तःकरणमात्रे, सुषुप्तौ जीवाप्रतीतेः । अविद्योपाधिको जीव इति पक्षे स सर्वगत इति आवरणतिरोधायके नान्तःकरणेनैव पूर्वोक्तव्यवस्थासिद्धिः । वृश्चिकस्य गोमयतिरोधायकत्ववत् कार्यभूतस्यान्तःकरणस्यापि स्वोपादानतिरोधायकत्वम् । एवं सर्वथा प्रमात्रादिव्यवहारसिद्धिः । पूर्वपूर्वाहंकारकृतप्रमातृत्वादिसंस्कारेण सविकल्पके चैतन्ये सविकल्पकाहंकाराद्यध्याससिद्धिः ।

प्रत्यभिज्ञाविषयत्वेनात्मनः स्थायित्वसाधनम्

प्रत्यभिज्ञा नाम पूर्वानुभवसंस्कारसहिताद् इदानीन्तनवस्तुप्रमितिकरणाज्जनितमपरोक्षज्ञानम्[1] । यद्यपि नित्यस्वयंप्रकाशे तस्मिन्नात्मनि संस्कारस्य जन्यज्ञानस्य चाभावात् न तत्संभवः, तथापि अन्तःकरणविशिष्टे तत्संभवादुक्तः सोऽहमिति प्रत्यभिज्ञासंभवः । न च विशिष्टस्य प्रत्यभिज्ञाविषयत्वे प्रत्यभिज्ञातृत्वमपि तस्यैवेति कर्मकर्तृत्वविरोधः । एवंवादिनां देहव्यतिरिक्तत्वाद्यनुमानविषयतया स्वीक्रियमाणे तस्य संप्रतिपन्नत्वात् प्रत्यक्षे तदापादनेऽपि न अस्मन्मते दोषः । अन्तःकरणविशिष्टतया आत्मनो ज्ञातृत्वम् । पूर्वापरकालविशिष्टतया च ज्ञेयत्वमित्युपाधिभेदादविरोधः । प्रत्यभिज्ञेयं न भ्रान्तिरूपा व्यवहारविसंवादात्, सति काले स्थायित्वादिविकल्पप्रत्ययाः 'सोऽहं' मित्यानुभाविका व्यवहाराविसंवादिनोऽर्थक्रियासमर्थाश्च दृश्यन्ते, क्षणिकवादे न तदुपपत्तिः । एवं चोक्तरीत्या प्रत्यभिज्ञाविषयत्वेन न स्थायित्वसिद्धिः अपि तु तदाश्रयत्वेनेति प्राभाकराणां मतम् ।

परंतु नैतत्सारम्, पूर्वापरकालविशिष्टात्मनः क्षणमात्रवृत्तिप्रत्यभिज्ञाऽनाश्रयत्वायोगात् । स्मृतिपूर्वानुभवौ हि तत्तत्कालमात्मानं साधयतः अभिज्ञाप्रत्य-

1. पूर्वानुभूतसाक्षात्कृतव्यक्त्यैक्यावगाहिनी धीः प्रत्यभिज्ञा इति वा ।

क्षद्वयवत् एकस्य कालद्वयसंबन्धः केन सिद्ध्यतीति दुरुपपादम्। 'अनुभूतं मये'त्या-श्रयविशिष्टपूर्वसंविदनुस्मृतेरानुभाविकत्वात् स्मर्यमाणतयैवेदानीं पूर्वानुभूतात्मसिद्धिः, न तु पूर्वसंवेदनाश्रयतया तस्याविद्यमानस्येदानीमसाधकत्वात्, इत्येवंरीत्या तन्मतखण्डनं विस्तरेण कृतं तत्रैव दष्टव्यम्।

शरीरक्षेत्रादिसत्त्वेऽपि अहंकारस्यैवात्मोपाधित्वे कारणत्वम्। यद्यपि शारीरः क्षेत्रज्ञ इति इतरानेकोपाधिसंसृष्टतया आत्मनो व्यवहारः श्रुतिसिद्धः तथापि अहंकारतत्संस्कारोपरक्ताज्ञानोपाधिकस्यैवात्मनो अवस्थात्रयेऽपि बाह्यबहुविध-शरीरादिकोपाध्यन्तरनिमित्तस्तादृशव्यपदेश इति अहंकारस्य स्थूलतत्संस्कारात्मना सर्वदा सत्वेन तस्यैवोपाधित्वोक्तिः।

आत्मनः स्वप्रकाशत्वेनापरोक्षत्वं न नित्यानुमेयत्वम्। आत्मा नित्यानुमेय इति सांख्यादयः, तेषां मते 'अहमित्यपरोक्षानुभवविरोध' इति दोषः। नायमपि भ्रमः प्राणिनाम्, तथा सति घटादिकं जानतो नरस्य मयेदं विदितमिति स्वेन संबन्धो न स्यात्। यथा अन्यविदितेऽन्यस्य संबन्धो न प्रतीयते तद्वत्। स्वस्य ज्ञानावसरे स्वस्मिन्नप्रतीयमाने ज्ञानाश्रयत्वं दुरवगमं स्यात्, नेदं फलसंबन्धादनुमातुं शक्यम्। तस्याद्याप्यसिद्धेः। अतस्तदुपपत्तये चात्मा स्वप्रकाशत्वे नापरोक्षः न नित्यानुमेयश्च। नापि संविदाश्रयत्वेन संवित्संबन्धमात्रेण वा उपाधित्वेन वा संविद्विषयत्वेन वा अपरोक्षः, तदन्तरेणाप्यपरोक्षत्वात्, अतिप्रसङ्गात्, इत्यादिदोषेभ्य इतीदं दूषितं विस्तरणाकर एव। अपरोक्षचैतन्येऽध्यासे सर्वेषां तुल्येऽपि कारकव्यञ्जकत्वद्वयं नियमेन तेषामापरोक्ष्ये व्यवस्थापकम्। यथा घटादयः प्रत्यक्षभूताः, तत्र हि घटाद्यभावे तत्परिणामस्यान्तःकरणेऽनुत्पत्तेः तेषां कारकत्वम्। तदुत्पादितेऽन्तःकरणपरिणामे चैतन्यमभिव्यज्यत इति व्यञ्जकत्वमप्यस्ति, वृत्तेश्चक्षुर्द्वारा बहिर्निर्गमनात्। नेदं नानुमेयवन्ह्यादिषु नियामकं नियतमस्ति। अतीतानागतयोः वर्तमानतादृशधर्मद्वयासंभवात्। तथा वर्तमानवन्ह्याद्यनुमेयस्थलेऽपि अनुमेयत्वसाम्यात् कर्मकारकत्वं नास्तीति अपरोक्षत्वपरिहाराय वक्तव्यम्। प्रत्यक्षे पुनः विज्ञानस्याकारसमर्पणाय विषयस्य कर्मकारकत्वमुपेयमेव। प्रत्यक्षविषयस्य वर्तमानत्वनियमात् कारकत्वं नियतम्। तस्मात् कूटस्थचैतन्ये सर्वदा सर्वपदार्थानामध्यस्तत्वे तुल्येऽपि कारकत्व-व्यञ्जकत्वोभयवशादेव प्रत्यक्षविषयेषु अपरोक्षत्वव्यवस्था।

ईश्वरस्वरूपं तल्लक्षणं च

जगज्जन्मादिकारणत्वं मायाविशिष्टब्रह्मणः स्वरूपलक्षणत्वेऽपि न विरुद्धयते, शुद्धब्रह्मणस्तदेव तटस्थलक्षणम् । स्वरूपलक्षणं तु तस्य "सत्यं ज्ञानमनन्तं ब्रह्म"[1] इति श्रुतिप्रसिद्धम् । "तदैक्षत"[2] इति निमित्तत्वं "बहुस्यां प्रजायेय"[3] इत्युपादानत्वं चैकस्यैव सृष्टिवाक्यसिद्धम् । तदेव लक्षणतया सूत्रे निर्दिश्यते । इदं च लक्षणं यत इति सूत्रनिर्दिष्टकारणब्रह्मणः, न शुद्धस्य । तदपि काकाधिकरणत्वमिव गृहस्यैवौपाधिकधर्मरूपं, तादृशमपि लक्षणान्तःपाति कारणत्वनिरूपकस्य जन्मादेर्लक्षणत्वेऽपि न दोषः । तदिदं जगज्जन्मादिकारणत्वं निमित्तोपादानत्वोभयरूपं विवक्षितम् । इदं च विवर्तवादाभिप्रायेणैव ब्रह्मणः श्रुतौ द्विविधकारणत्वमुक्तम् । तच्च तटस्थलक्षणत्वेन लक्ष्याद् ब्रह्मणः पृथग्भूतं, तथापि तस्य मिथ्यात्वान्न लक्ष्याद्वितीयत्वभङ्गः । तेन च प्रधानादिव्यावृत्तिसिद्धिः, सूत्रगतयच्छब्दविवक्षितसर्वज्ञत्वसर्वशक्तित्वयोः प्रधानादिष्वसंभवात् । तद्विवक्षा च कथम्? इदं शब्दार्थकार्यप्रपञ्चस्वरूपपर्यालोचनयेति । सत्यस्यैव लक्षणत्वमिति न नियमः । असाधारणसंबन्धो लक्षणत्वप्रयोजकः, न लक्षणसत्यत्वम् । सत्यानामप्यसंबद्धानां काकादीनां गृहोपलक्षणत्वदर्शनात्, असत्यानामपि रजतादीनां[4] यद्रजतं सा शुक्तिरिति शुक्त्यादिलक्षणत्वदर्शनात् । अस्ति च ब्रह्मप्रपञ्चयोर्वास्तवसंबन्धाभावेऽपि आध्यासिकतादात्म्यसंबन्धः । ईदृशेन कल्पितसंबन्धेन जन्मादिकारणत्वेन जिज्ञास्यं शुद्धं ब्रह्मस्वरूपं निराबाधमुपलक्ष्यते । सृष्टिश्रुतिः अध्यारोपापवादन्यायेन अखण्डैकरसत्वप्रतिपादनाय । तथाहि, मानान्तरानधिगताखण्डैकरसब्रह्मावगत्यर्थं महावाक्यप्रवृत्तिः । सृष्टिश्रुतिस्तु -

अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते ।
नान्यत्र कारणात्कार्यं न चेत्तत्र क्व तद्भवेत् ॥

इति न्यायेन[5] अखण्डैकरसत्वप्रतिपादनायेति न वैयर्थ्यं तस्याः । सृष्टेर्मिथ्यात्वे श्रुतिस्मृतिप्रत्यक्षानुमानार्थापत्तयः प्रमाणानि । तथाहिश्रुतिः- "मायां तु प्रकृतिं

1. तै.उ. 2-1
2. छां 6-2-3
3. Ibid
4. कथंचित् संबद्धानाम् ।
5. संप्रदायविदां वचनानुसारेण

विद्यात्''[1] इति । स्मृतिः - ''मम माया दुरत्यया''[2] इति । प्रत्यक्षम् - घटाद्यभावग्राहिप्रत्यक्षमपि । इदन्तोपाधौ प्रतिपन्नरजतं 'नेदं रजत'मिति यथा बाध्यते तथा 'अस्ति घट' अस्त्यर्थोपाधौ प्रतिपन्नो घटादिः नास्तीति बाध्यत इति प्रत्यक्षम् ।

अनुमानम्- भेदः कल्पितः जडत्वात्, कार्यत्वात् रजतवत् भेदत्वात् चन्द्रभेदवत् इत्यादि । अर्थापत्तिरपि, प्रपञ्चस्य जन्मनाशौ मिथ्यात्व-मन्तरेणानुपपन्नौ ब्रह्मशून्ययोर्जन्मनाशादर्शनात् इति ।[3]

प्रपञ्चस्य त्रैविध्यं द्वैविध्यं वा? ''त्रयं वा इदं नाम रूपं कर्म''[4] ''नामरूपे व्याकरवाणि''[5] इति श्रुतिद्वयं तत्र प्रमाणम् । इतरवादिनां प्रपञ्चविभागेषु विविधेषु सिद्धान्तपक्ष एव समीचीनः, स्रष्टः सृज्यगोचरनामरूपयोः प्रथमं बुद्ध्यारोहात् लोके घंट चिकीर्षौ कुलाले तथा दर्शनात्, मूलकारणमपि नामरूपाभ्यां बुद्ध्यारूढं सृजति स्रष्टृत्वात् कुलालवत् । सर्वज्ञत्वं सर्वशक्तित्वं च तस्यैव । सर्वविषयाकारधारि-मायापरिणामेषु प्रतिबिम्बितचैतन्यं सर्वानुभवः वर्तमानकाले विषयैराध्यासिक-संबन्धसत्वेन सर्वज्ञत्वम् ।[6] अतीतविषयाणां तदवच्छिन्नमायावृत्तिनाशे तदवच्छिन्नानुभवनाशे च तत्संस्कारादतीतविषयकस्मरणरूपमायापरिणामसत्वेन तत्प्रतिबिम्बितानुभवेनातीतविषयज्ञत्वम् । सृष्टेः प्रागपि स्रक्ष्यमाणागामिसर्वविषय-ज्ञानमपि स्वमायापरिणामवशात् भविष्यति; कुलालादिषु स्रक्ष्यमाणघटादिपदार्थ-निर्णयानुभवदर्शनात्, ''यः सर्वज्ञः सर्ववित्''[7] इति श्रुतिरत्र प्रमाणम् । सर्वज्ञपदेन सर्वावभासक्षमं विज्ञाप्तिमात्रमादित्यादिप्रकाशवद- विषयोपाधिकं विज्ञानमेव ब्रह्मणः स्वरूपलक्षणम् । जगतोऽचिन्त्यरचनारूपत्वात् सर्वशक्तित्वमपि ।

उपादानत्वपरीक्षणम्

एकस्य कार्यस्य परस्परनिरपेक्षोपादानद्वयासंभवात् माया ब्रह्म च मिलित्वा एकमेवोपादानम् । तत्रापि त्रैविध्यं संभवति । रज्ज्वाः संयुक्तसूत्रद्वयवत्

1. श्वेता. 4-10
2. भ.गी 7-14
3. सृष्टेः परमार्थसत्यत्वांशेनैव बाध्यत्वं न स्वरूपेण इति तु तत्वम् ।
4. बृ. 1-6-1
5. छां 6-3-2
6. सर्वकर्तृत्वादेव वर्तमानस्वकार्य सर्वविषय-ज्ञतासिद्धिः ।
7. मु. 1-1-9

समप्राधान्येनोभयमपि जगत उपादानम्। तत्र सत्तास्फूर्त्यंशयोर्ब्रह्मणो जगत्युपयोगः। जाड्यविकारांशयोस्तु मायोपयोग इति केचित्। अन्ये पुनः 'देवात्मशक्तिं त्रिगुणैः सुगूढाम्' इत्युक्ता मायाख्या शक्तिरेव साक्षादुपादानम्। शक्तेश्च नियमेन शक्तिमत्पुरुषपराधीनत्वात् शक्तिमद्ब्रह्मणोऽप्युपादानत्वं पर्यवस्यतीति। अपरे तु आरोपिताया मायाया अधिष्ठानब्रह्मस्वरूपमन्तरेण वस्तुतः स्वरूपाभावात् मायायाः साक्षादुपादानत्वेऽपि तदधिष्ठानत्वेन ब्रह्मणोऽप्युपादानत्वमवर्ज्यमिति। अत्र आद्ये पक्षे मायाविशिष्टब्रह्मणो मुख्योपादानत्वं, द्वितीयतृतीययोस्तु मायाया एव। पक्षत्रयेऽपि शुद्धब्रह्मण औपचारिकमेवोपादानत्वम्। तत्र मुख्योपादानस्य जगत्कारणत्वं स्वरूपलक्षणम्। औपचारिकोपादानस्य तु तदेव तटस्थलक्षणम्।

अत्रास्माकमभिप्रायः-''सर्वोपेता च तद्दर्शना''[1] दिति सूत्रेण सर्वशक्तियुक्तायाः सद्देवताया एव सृष्टिकारणत्वोक्त्या सिद्धान्तकरणात् मायाविशिष्टब्रह्मणः कारणत्वमीश्वरत्वं चेति युक्तम्। गीता भाष्येऽपि ''प्रकृतिद्वयवत्वमेव हि ईश्वरस्य ईश्वरत्व''[2] मित्युक्तम्। श्रुत्यादिषु संशये सौत्रन्यायादेव निर्णयकरणात्। श्वेताश्वतरोपनिषदि देवाश्रितात्मशक्तेरापातत उपादानत्वनिर्णयेऽपि विशिष्टनिष्ठत्वमेव तात्पर्यं वक्तव्यम्, अन्यथा ''मायां तु प्रकृतिं विद्या''[3] दिति वाक्यतः स्वतन्त्रमायाया एवोपादानत्वस्य वक्तव्यतापत्तिः। ''प्रकृतिश्चे''ति[4] सूत्रं सर्वथा ब्रह्मैवोभयकारणमिति सिद्धान्तयति न मायायाः पृथक्कारणत्वं क्वचिदपि। अतो विशिष्टनिष्ठं कारणत्वं विशेषणेऽप्यस्तीति भावे न क्वचित् विशेषणे, विशेष्ये च पृथक् तदस्तित्वानुवदनं श्रुतिषु। तावता मायायाः केवलाया वा केवलस्य ब्रह्मणो वा न कारणत्वं पृथगभिमतम्। शक्तिरहितस्य ब्रह्मणोऽकारणात्वात् निराश्रितायाश्च मायायाः प्रधानवदस्मत्सिद्धान्ते कारणत्वानुपगमात्। शास्त्रयोनित्वाधिकरणे द्वितीयवर्णके मतान्तराणि दर्शितानि। तत्र बिम्बस्थानीयं ब्रह्म मायाशक्तिमत् कारणम्। जीवाश्च प्रत्येकमविद्यानुबद्धा इति केचित्। मायाविद्याप्रतिबिम्बितं ब्रह्म जगत्कारणम्। विशुद्धं ब्रह्मामृतत्वावलम्बनम्; जीवाश्चा विद्याबद्धा इत्यन्ये। जीवा एव स्वाविद्यया प्रत्येकं प्रपञ्चाकारेण

---

1. ब्र.सू. 2-1-30
2. गी.भा. 13-19
3. श्वेताश्व 4-10
4. ब्र.सू. 1-4-23

ब्रह्माविर्भावयन्ति, सादृश्याच्च प्रपञ्चैकतावभासोऽनेकैरवगतद्वितीयचन्द्रवत् । स्वरूपापेक्षया च ब्रह्मसर्वजगत्कारणमित्यपरे । ब्रह्मैकमैव स्वाविद्यया जगदाकारेण विवर्तते स्वप्नादिवदिति मतान्तरम् । तस्मात् ब्रह्मैव स्वमाययाऽविद्यया विवर्तत इति ।

प्रपञ्चसृष्टेर्विवर्ततासमर्थनम्

'विश्वो विवर्तते' इति पञ्चपादिकाटीका । तत्र विवरणम्, केचित्तु[1] ब्रह्मैव जगदाकारेण परिणमते मृदिव घटाकारेणेति, तद्व्यावर्तयति विवर्तत इति । विवर्तो नाम एकस्य तत्त्वादप्रच्युतस्य पूर्वविपरीतासत्यानेकरूपावभासः । परिणामो नाम पूर्वरूपपरित्यागेन सत्यरूपान्तरापत्तिः । तत्र सृष्टिश्रुत्या ब्रह्म परिणमत इति तु न सिद्ध्यति । ब्रह्मणः पूर्वरूपसत्यज्ञानानादिपरित्यागे तद्रूपोच्छेदात् कार्यमात्रमेव वस्तु स्यात्, सृष्टिदशायामेवं, प्रलयदशायां सत्यादिरूपेण परिणाम इति स्वीकारेऽनिर्मोक्षप्रसङ्गः । 'अज आत्मा, महान्, ध्रुवः, न जायत' इति श्रुतिविरोधश्च । पूर्वरूपापरित्यागेन परिणामस्तु विवर्त एव पर्यवस्यति । शुक्तिरजतमायाव्याघ्रादिषु ईदृशविवर्तलक्षणदर्शनात् । भास्करोक्तनिरवयव-परिणामवादस्तु सुदीर्घं विचारतो निराकृतः । "निष्कलं निष्क्रियं शान्त"[2] मिति क्रियावयवशून्यत्ववचनेन ब्रह्मणो विकारासंभवः, नियन्तृत्वादिकं तु उक्तश्रुत्यविरोधेन व्याख्येयम् मायया नियन्तृत्वादिति । परमार्थतस्तु अपरिणामि, "इन्द्रो मायाभिः पुरुरूप ईयते"[3] इति प्रवृत्तेः मायानिबन्धनत्वोक्तेः । चेतनस्य निर्व्यापारस्य सुषुप्ते पुरुषार्थत्वावगमात् ब्रह्मणः स्वतः प्रवृत्तिप्रयोजनाभावाच्च विपरीतस्वरूपापरित्यागेन विपरीतकार्यापत्तेश्च विवर्त एवेति । ज्ञेयस्यानात्मनः सर्वस्य चैतन्यविवर्तत्वे सिद्धान्ते विज्ञानवादिमतसांकर्यप्रसङ्ग इति चेन्न, यत्किंचित्साम्येन सिद्धान्तसांकर्ये मन्त्रार्थवादेतिहासपुराणप्रामाण्यानभ्युपगमात् देवतास्वर्गेश्वरमोक्षानभ्युपगमात् क्षणिकप्रमाणसंबन्धस्य क्षणिकस्यैव सत्वाभ्युपगमात् लोकायतबौद्धांशद्वयपरिणतः प्राभाकरो भवेत् । भेदाभेदाभ्युपगमात् मन्त्राद्य-प्रामाण्याच्च लोकायतक्षपणकांशद्वयपरिणतो वार्तिककारः यस्तु कश्चित्

---

1. भास्करादय इत्यर्थः ।
2. श्वेता 6-19
3. बृ.2-5-15

क्षपणकपादावनतशिरोबिम्बः तत्त्वदर्शनतन्निष्ठपरमहंसप्रद्वेषतीव्रवायुविक्षिप्त-विवेकविज्ञानलवः स्वपरपक्षगुणदोषविभागदूरीकृतविज्ञानो भेदाभेदाभ्यां बन्धमोक्षादिसंकरमिव कुर्वन् दुर्जनरमणीयां वाचं जल्पति 'सुगतविज्ञानवादसमानोऽयं वेदान्तवाद' इति सः संप्रदायश्रवणपरिचय शून्यतया दर्शनविवेकमनवबुद्ध्यमानो नापवाद्यः किं तु शोचनीय इति उपेक्षणीयो विद्वद्भिः ।[1]

सिद्धान्ते मतान्तरासांकर्येण विषयतत्त्वस्वीकारः ज्ञेयः । सर्वसाम्यं तु प्रकृते नास्ति । विज्ञानवादे क्षणिकानि विज्ञानानि अनेकानि, विषयाश्च तेभ्योऽभिन्नाः । वेदान्तानां सिद्धान्ते तु नित्यमद्वितीयं विज्ञानं, विषयाश्च तत्राध्यस्ताः पृथगर्थक्रियासमर्थाः, तेषां चाबाधितं[2] स्थायित्वमस्ति । अद्वितीयं हि संवेदनं सर्वत्र प्रत्यभिज्ञानात् 'घटसंवित् पटसंविदि'ति भेदावभासो विषयौपाधिकः न स्वाभाविकः । अद्वितीयत्वादेव संविदोऽपि नित्यत्वम् । न च संविद्विषयौ विज्ञानवाद इव अभिन्नौ, प्रत्यक्त्वपराक्त्वरूपेण, अनुवृत्तव्यावृत्तरूपेण च अत्यन्तवैलक्षण्यात्, विषयाणां पृथक् पृथगर्थक्रियासामर्थ्यमनुभवत एव सिद्धम् । स्थायित्वं तु प्रत्याभिज्ञया, ततश्चैतन्येऽहंकाराद्यध्यासेऽपि नास्ति मतसांकर्यमिति सिद्धम् । एवमुक्तः अविद्यातत्कार्यरूपाध्यासो विद्यानिवर्त्यः, स चात्मनि अनात्माध्यासो लक्षणसंभावनाभ्यामभ्युपेतः प्रमाणैरपि सेद्धुमर्हति ।

अध्यासे प्रमाणनि प्रत्यक्षानुमानार्थापत्त्यागमाः । 'अहं मनुष्य' इत्येवमादिजातिविशिष्टशरीरेन्द्रियादिसंघाते तादात्म्येनाध्यस्यैव व्यवहरतीति प्रत्यक्षमेतत् । यत्र इन्द्रियव्यापारविगमे प्रत्यक्षसामग्र्यभावः तत्रापि साक्षिप्रत्यक्षम् । सामग्र्यभावेऽप्यपरोक्षत्वं दृश्यते यत्र तत्र साक्षिप्रत्यक्षमिति वेदान्तमर्यादा । अत एव शुक्तिरजतस्वप्नगजादिप्रत्यक्षोपपत्तिः । अनुमानमर्थापत्तिश्च ग्रन्थत एव विस्तरेण ज्ञेयौ । 'अहं मनुष्य' इत्यध्यासं विना जागरस्वप्नव्यवहारयोरसंभवः, सुषुप्तेऽध्यासाभावात् व्यवहाराभावसिद्धिरिति ।

तादात्म्याध्यास एव देहात्मनोः प्रमातृत्वादिव्यवहारमूलम् । देहात्मनोः स्वस्वामिभावसंबन्धो वा, स्वेच्छामात्रानुविधायित्वं वा, संयोगः, समवायो वा,

1. भास्करमतखण्डनमिदं द्रष्टव्यम् । 2. व्यवहारेऽबाधितत्वमित्यर्थः ।

प्रमातृत्वादिव्यवहारे न मूलम् । आद्यपक्षे भृत्यादावपि प्रमातृत्वादिप्रसङ्गः । न द्वितीयः, तद्विनापि दुर्गन्धादिप्रमातृत्वदर्शनात्, इच्छाया अप्याध्यासिकत्वेन तत्राप्यध्यासस्यावश्योपेयत्वात् । न तृतीयचतुर्थौ, सुषुप्तेऽपि तत्सत्वाद् व्यवहार-प्रसङ्गः । नापि भोक्तृभोग्यान्वयः । भोक्तृभोग्यान्वयस्वकर्मारभ्यत्वस्वेन्द्रियाधिष्ठान-त्वादिसंबन्धाश्च भोगाध्यासमूलका इति तादात्म्याध्यास एवं मूलं सर्वत्र ।

युक्त्यनुमानयोर्वैलक्षण्यम्

युक्तिर्हि संभावनाबुद्धिमात्रमुत्पादयति, अनुमानं पुनरर्थं निश्चाययति । व्याप्त्यनुपपत्त्याभासउदाहरणमात्रदर्शनं च युक्तिः[5] । अव्यभिचारिणी च व्याप्तिरनुमानम् । अव्यभिचरितव्याप्तिकमर्थनिश्चायकमनुमानमिति यावत् । तत्र कुलालादिदृष्टान्तैः न सर्वज्ञेश्वर कारणत्वं निश्चेतुं शक्यम्, विपरीतोदाहरण-संभवात् । किं तु प्रमाणान्तरे सति तादृशदृष्टान्तैः संभावयितुं शक्यते, अतो युक्तिरेवैषा । तार्किकादिभिस्तु अर्थनिश्चायकमनुमानमिदमिति भ्रान्त्या ईश्वर- साधकानुमानं प्रयुक्तम् । तदपि अर्थानिश्चायकत्वाद् युक्तिरेव विचारेणावगम्यते । प्रकृते च ज्ञानानन्दसर्वज्ञप्रत्यगात्मभूतं ब्रह्म निश्चाययितुमसमर्था अपि युक्तयः शब्दावगते ब्रह्मणि सामान्यद्वारेण संभावनाबुद्धिहेतवः । तथाहि, जगदुपादानेऽद्वितीये शब्दावगते मृदादिदृष्टान्तैरुपादानव्यतिरेकेण कार्यस्यानि-रूपणादद्वितीयत्वं स्फटिकलौहित्यप्रतिबिम्बरज्जुसर्पघटाकाशदृष्टान्तैरात्मनि कर्तृत्वादेरारोपितत्वं, जीवब्रह्मैक्यं ब्रह्मव्यतिरिक्तस्य स्वातन्त्र्याभावः, असङ्गत्वद्वारा विशुद्धाद्वितीयप्रत्यगात्मतत्त्वं इत्येतानि संभाव्यन्ते । सर्वेषु वेदान्तवाक्येषु पाठव्यत्यासेन जगत्कारणमात्रानुवादेन तस्य ब्रह्मत्वं प्रतिपाद्यते । सत्यज्ञानानन्दादिरूपस्य ब्रह्मपदार्थस्याप्रसिद्धावपि बृहत्यर्थस्य ब्रह्मत्वमात्रस्य प्रसिद्धतया तदनुवादेन सत्यादिपदार्थानां परस्परान्वयबलात् विशिष्टं ब्रह्म प्रतिपत्तुं शक्यत इति लक्षणरूपेण ब्रह्मस्वरूपप्रतिपादनपरं सत्यादिवाक्यम् । वाक्ययोजनप्रकारस्तु 'यस्मादाकाशः संभूतः स आत्मा सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रौतपाठक्रममुल्लंध्य । प्रसिद्धमनूद्याप्रसिद्धं प्रतिपाद्यत इति न्यायेन प्रसिद्धस्य कारणत्वस्यानुवाद्यत्वम् । तथा मुण्डकेऽपि ''यस्मादेतद् ब्रह्मनामरूपमन्नं च जायते,

---

1. व्याप्त्याभासः, अनुपपत्त्याभासः, उदाहरमात्रदर्शनं चेति त्रयं युक्तिः ।

यः सर्वज्ञः सर्वविदिति । 'यस्मात् प्राणादि जायते स दिव्यो ह्यमूर्तः पुरुषः'' इति । तथा या भूतयोनिः तदद्रेश्यमग्राह्यमिति । छान्दोग्ये च यस्मात्तेजोऽबन्नानि जायन्ते तत् सत् अद्वितीयमणिमा तत्त्वमसि इति कारणमात्रानुवादेन तद्विशेषः प्रतिपाद्यते ।

भास्करीयमतखण्डनम्

'न निर्गुणं द्रव्यमस्ति' इति भास्कराचार्याः । खण्डनसारस्तु - निर्गुणद्रव्याभावेऽपि निर्गुणब्रह्माङ्गीकारे न बाधकं किंचित्, ब्रह्मणोऽद्रव्यत्वात् । समवायिकारणाद्रव्यत्वमुपादानकारणत्वाद्वा वक्तव्यम् । नाद्यः, आरंभ-वादानुपगमात्, न द्वितीयः, गुणादीनामपि ग्रहणकर्मत्वादिधर्मोपादानत्वाद् द्रव्यत्वापत्तिः । निर्गुणं वस्तु• नास्तीत्यपि न साधु, अन्त्यगुणानां निर्गुणतयांगीकारात् । तस्मात् न निर्गुणं ब्रह्मेतिवादः तत्त्वज्ञानप्रद्वेषमेवेति ।

शास्त्रयोनित्वेन सर्ववित्वसमर्थनम्

शब्दोपादानभावात् ध्वनिगतविषयद्योतनाः शक्तयोऽमूः
ब्रह्मण्येवासुरग्रेः विषयविषयिणी दीपशक्तिः खलूच्चैः ।
द्रष्टुश्च ज्ञानशक्तिः ननु न करणगता किं तु दीपप्रभावत्
संयुक्तद्योतनैवेत्यपरमिह पुनः साध्यते सर्ववित्वम् ॥

इदं मतं भाष्यविलक्षणं भामतीविलक्षणं च, परं तु कल्पतरुणा इदमप्यङ्गीकृतम् । अयमत्राशयः, साधितमपि पूर्वसूत्रेण सर्वज्ञत्वं हेत्वन्तरेण द्रढीक्रियते । जगत्कर्तुरपि वेदापौरुषेयतया तदकर्तृत्वेन वेदेन सह सर्वजगत्कर्तृत्वासिद्ध्या सर्वज्ञत्वस्य पुनरसिद्धिशंकायां वेदोपादानत्वेन तत्साधनम् । विमतं ब्रह्म वेदगतसर्वविषयप्रकाशनशक्त्याश्रयः वेदोपादानत्वात्, दीपगतप्रकाशन-शक्त्याश्रय दीपोपादानभूताग्निवत् । अत्र यद्यपि वेदे करणशक्तिरप्यस्ति तथापि ब्रह्मणश्चेतनत्वाज्ज्ञानशक्तिरेवानुमेयाऽनेन । न खलु चेतनस्य कर्तुः करणशक्तिः संभाव्यते, नाप्युपादानोपादेययोः सर्वशक्त्यनुगत्या भाव्यमिति नियमः, अग्निकार्यभूतप्रभायां प्रकाशशक्त्यनुगमेऽपि दाहशक्तेरननुगमात् । तस्मात् वेदोपादानेऽपि ब्रह्मणि ज्ञानशक्तिरेवं प्रकृतेऽनुगतेति प्रतीयते । वेदोपादानत्वं तु

वेदस्य नामरूपप्रपंचान्तःपातितया नामरूपप्रपञ्चोपादानतया सर्ववेदान्तसिद्धे सूपपन्नम् ।

वेदस्यानिर्वचनीयत्वेऽपि सर्वार्थप्रकाशनसामर्थ्यम् अङ्गीकर्तव्यम् । वेदस्तु ब्रह्मपरतन्त्रः ब्रह्मण्यारोपितत्वात्, रज्ज्वामारोपितो रज्जुपरतन्त्रो यथा सर्पः तद्वदयम् । वेदस्य वस्तुतो मिथ्यात्वमनिर्वचनीयत्वात् । कुतोऽनिर्वचनीयत्वमिति चेत् तदेतत् विस्तरेण समर्थितं विवरणे, किं वर्णमात्रं वेद उत क्रमसहिता वर्णा इति विविधविकल्पपुरःसरमनिर्वचनीयत्वं समर्थितं, विस्तरभियाऽत्र न लिखितम् । अनिर्वचनीयोऽपि वेदस्तुच्छविलक्षणसत्ताभ्युपगमात् देहात्मवदर्थक्रियासमर्थः यतः सर्वार्थप्रकाशनसमर्थः । वस्तुतस्तु प्रपञ्चस्येव तदन्तर्भूतवेदस्य भाष्यरीत्या तत्वान्यत्वाभ्यामेवानिर्वचनीयत्वोक्तिसंभवेन, तथाऽविद्याकृतत्वेन च तथोक्तिसंभवेन ईदृशविकल्पमुखेन महता प्रयासेन तथा साधनमनर्थकमित्यस्माकमाशयः । तथापि न पौरुषेयत्वं वेदस्य । ब्रह्मविवर्ततया अकार्यस्यापि वेदस्य अनादित्वकूटस्थ-नित्यत्वाभ्यां हि मानान्तरादर्थोपलब्धिपूर्वकं पुरुषेच्छाधीन- निष्पाद्यत्वाभावात् न पौरुषेयत्वम् । मानान्तरेणार्थं बुद्ध्वा रचितत्वं पौरुषेयत्वम् । भारतादीनां वेदव्यासादिभिः मानान्तरेणार्थं बुद्ध्वैव विरचितत्वात् । वेदस्य तु न तथा, असर्वज्ञवचनत्वाभावे सति धर्माधर्मब्रह्मविषयेषु प्रमाणत्वात् परपरिकल्पितेश्वरबुद्धिवत् । न चापौरुषेयत्वे तस्य ब्रह्मोपादानत्वविरोधः । "अस्य महतो भूतस्य"[1] इति उपादानप्रकरणपठितश्रुत्या तदुपादानत्वोक्तेः पौरुषेयत्वस्य[2] स्वीकृतेः । पुरुषकृतिविषयत्वस्य प्रमाणान्तरेणार्थोपलब्धिपूर्वकरचनविषयत्वमात्र-रूपस्य निराकृतेः । एवं चाविरुद्धं तदुपादानकत्वम् । "यो ब्रह्माणं विदधाती"[3]ति श्रुत्यनुरोधेन निर्णेयत्वात् प्रागेव सतामेव वेदानां हिरण्यगर्भबुद्धौ प्रथममाविर्भावमात्रेण तदुपपत्तिः । तथा च ब्रह्मोपादानकोऽयं वेदः प्रथमं हिरण्यगर्भबुद्धावाविर्बभूव । एवं सति मूलप्रमाणनैरपेक्ष्येण प्रामाण्यसिद्धिश्च, तस्य ब्रह्मवदनादित्वे स्वीकृतेऽपि पुराणवाक्यवदन्यथा संनिवेशेन प्रणयनं न शङ्कनीयमत्र । वस्तुतो वेदस्य प्रवाहरूपेण ब्रह्मोपादानतया अनादेरपि कार्यमस्ति

1. बृ. 2-4-10
2. पुरुषोपादानकत्वरूपस्य
3. श्वेताश्व 6-18

तत्परतन्त्रत्वादिति । नियतक्रमविशिष्टानामेव वर्णपदवाक्यप्रकरणकाण्डादीनां वेदशब्दवाच्यानां कल्पादौ प्रलये चाविर्भावतिरोभावमात्रेण कूटस्थनित्यत्व - मङ्गीक्रियते । ब्रह्मपारतन्त्र्येणाविभूर्तत्वात्तदुपादानत्वम् । एवं च सर्वार्थप्रकाशन-समर्थसर्ववेदोपादानतयैव सर्वज्ञत्वं साधनीयम् । अयमेव शास्त्रयोनित्वसूत्राशयः । न ब्रह्मणः स्वयंप्रकाशस्य सर्वसंसर्गितामात्रेण तत्सिद्धिः, वायुगगनादिसर्वसंसर्गिणोऽपि सवितृकिरणस्य तत्प्रकाशकत्वादर्शनादिति । वेदस्यानिर्वचनीयत्वेन मिथ्यात्वेऽपि अविद्यानिवृत्तिब्रह्मावगतिलक्षणार्थक्रियाहेतुत्वं न विरुद्धयते, तत्र तस्य समर्थत्वादिति ।

महावाक्यार्थविचारः

'सम्यगन्वयः समन्वयः, अथ केयं सम्यक्ताऽन्वयस्य? पदानां परस्परान-वच्छिन्नार्थानामनन्याकांक्षाणामव्यतिरिक्तैकरसप्रातिपदिकार्थमात्रान्वयः, 'सोऽय' मित्यादिवाक्यस्थपदानामिव प्रकृष्टप्रकाशशब्दयोरिव चन्द्रपदाभिधेयार्थकथनेन' इति पञ्चपादिकामूलम् । अत्र विवरणम् - सम्यगन्वय इति सूत्रभागं व्याचष्टे । पदानामन्वय इति संबन्धः । तत्र क्रियाकारकसंसर्गविषयतया पदानामन्वयं व्यावर्तयति परस्परानवच्छिन्नार्थानामिति, तत्र उद्भिदादिशब्दस्य यजतिसामा-नाधिकरण्ये नोद्भिदयागमात्रवर्तिनोरुद्भिदयागशब्दयोरनवच्छिन्नार्थत्वेऽपि वियोगाकांक्षा विद्यते तथेहापि स्यादिति - नेत्याह - अनन्याकांक्षाणामिति ।

एवं शब्दानां क्रियावाक्येभ्यो वैलक्षण्यमुक्त्वा अर्थवैलक्षण्यं दर्शयति तत्र क्रियाकारकसंसर्गेभ्यो वैलक्षण्यमाह अव्यतिरिक्तेति । ननु नीलोत्पलवत् भेदाभेदविषयतयाप्यभिधेयाव्यतिरेक इति - नेत्याह - एकरस इति । तत्रोद्भिदयागशब्दयोः यागविशेषैकरसार्थवर्तिनोरप्यर्थस्य नियोगकांक्षावद् इहाप्यन्याकांक्षेति - नेत्याह - प्रातिपदिकार्थ इति । तत्रापि लिङ्गसंख्ययो-रवश्याभ्युपगमनीयतेति-नेत्याह-मात्रान्वय इति । एवं विवरणपरामर्शेऽयमर्थो निश्चितो भवति पदेषु परस्परानवच्छिन्नार्थानामिति विशेषणदानेन 'गामानय' 'यजेत स्वर्गकामः' 'सोमेन यजेत' इत्यादिलौकिकवैदिकपदानां व्यावृत्तिः । 'उद्भिदा यजेत' इत्यादिवाक्ये उद्भिदयागमात्रबोधकपदयोरनवच्छिन्नार्थत्वेऽपि नियोगाकांक्षासत्वात् तद्व्यावर्तनाय अनन्याकांक्षाणामिति विशेषणम् ।

क्रियाकारकसंसर्गरूपविभिन्नार्थवारणार्थमर्थेऽव्यतिरिक्तेति विशेषणम् । 'नीलमुत्पलम्' इति वाक्यबोध्ययोः भेदाभेदविषयतया नीलाभिन्नाभिन्नोत्पल-रूपार्थप्रत्ययात् तद्वारणाय एकरस इति केवलाभिन्नार्थकं सर्वथा भेदरहित-स्वरूपबोधकं विशेषणम् । तत्र भेदसमानाधिकरणाभेदबोधनात् तद्व्यावृत्तिः । उद्भिद्यागशब्दयोः यागविशेषैकरसार्थवाचिनोरपि अर्थस्य नियोगाकांक्षावत् अत्रान्याकांक्षाराहित्यसूचनाय प्रातिपदिकार्थ इत्युक्तम् । मात्रपदं च प्रातिपादिकस्य लिङ्गसंख्यारूपार्थयोरपि वारणाय केवलव्यक्ति मात्रविवक्षणायेति गम्यते ।

वेदान्तवाक्यानां ब्रह्मबोधनप्रकारवैलक्षण्यम्

1) सृष्टिवाक्ये तैत्तिरीयादौ जगत्कारणसामान्यानुवादेन ज्ञानानन्दशब्दौ आनन्दविशेषं गमयतः ।

2) एकसत्यानन्तशब्दाः क्रमेण शक्त्या भेदमिथ्याद्वैताभावाभिधानद्वारा ब्रह्मणि लक्षणया वर्तन्ते ।

3) सर्वज्ञः सर्वशक्तिरित्यादिशब्दाः अनिर्वचनीयप्रपञ्चोपाधितया तत्र वर्तन्ते ।

4) 'अयमात्मा' 'तत्त्वमसि' इत्यादिशब्दाश्च मुख्यलक्षणाभ्यां ब्रह्मण्येव वर्तन्ते । अत्र मुख्यलक्षणाभ्याम् इत्यस्य जहदजहल्लक्षणयेत्यर्थः । गङ्गाशब्दस्य तीरे जहल्लक्षणया वृत्तेः, आत्मादिशब्दानां च जहदजहल्लक्षणयेति वैषम्यमित्यर्थ इति तत्त्वदीपने व्याख्यातम् ।

सर्वे जगत्कारणविषयाः शब्दाः मुख्यलक्षणोपाधिभिः एकरसमेव ब्रह्म प्रतिपादयन्ति । अत्रायमाशयः - ज्ञानानन्दशब्दौ व्यक्त्यंशापरित्यागेन मुख्यवृत्त्या वर्तेते, एकादिशब्दास्तु जहल्लक्षणया, 'तत्त्वमसि' इत्यादयो जहदजहल्लक्षणया, सर्वज्ञादयस्तु उपाधित इति । शब्दप्रवृत्तिनिमित्तयोरनिर्वचनीयभेदाभावयोः परमार्थसत्यैकरसे न तत्त्वतोभेदनिमित्तत्वमस्ति । एवमनेकेषां शब्दानां लक्षणादिद्वारा एकरसप्रतिपादनपरत्वम् । द्विविधा वेदान्तेषु वाक्यप्रवृत्तिः । तत्र ब्रह्मात्मनोरेकत्वविषया एका, अपरा तु सत्यज्ञानादिलक्षणब्रह्मविषया । तत्त्वमस्यादौ च ब्रह्मात्मैक्यमभिधीयते 'सोऽयं देवदत्त' इति वाक्य इव । 'सोऽयं देवदत्त' इत्यत्र

पदत्रयस्यापि एकस्मिन् देवदत्ते पर्यवसानम् । प्रत्यभिज्ञया अवगतमेकत्वमेव परस्मै बोधयति इदं वाक्यम् । नात्र तद्देशतत्कालयोरेतद्देशैतत्कालयोः परस्परैक्यं प्रत्यभिज्ञायते, भेदप्रत्ययात् । अत एव विशिष्टयोरप्यैक्यं न, किं तु विशिष्टद्वयोपलक्षितः प्रत्यभिज्ञागोचरः । परोपदेशवाक्येऽस्मिन् विशिष्टवाचकपदाभ्यां स्वार्थैकदेशपरित्यागेनैकदेशलक्षणया देवदत्तस्वरूपैक्यमेव प्रतिपाद्यते तथैव महावाक्येऽपि । त्वंपदेनैकदेशपरित्यागेन द्रष्टृस्वरूपस्य लक्षणाबोधितस्य पारोक्ष्यपरित्यागेन तत्पदाभिधेयब्रह्मस्वरूपैक्यं वाक्यतो बोध्यते । एकस्य द्रव्यस्योपाधिजनितभेदपरामर्शेन लक्षणया एकद्रव्यपर्यवसायि-सामानाधिकरण्यमिति एकरसं ब्रह्म सिद्धमिति विस्तरभिया विरम्यते ।

* * *

भामतीप्रस्थानम्, वाचस्पतिमिश्राश्च

भामत्याः प्रणेतारः वाचस्पतिमिश्राः माधवीयशङ्करविजयत एते प्राचीनकर्मपरिपाकवशात् प्रतिलब्धजन्मानः श्रीसुरेश्वरा एवेति गम्यते । तथाहि,

आलोचयन्नथ तदानुगतिग्रहाणा-
मूचे सुरेश्वरसमाह्व्यमुपह्वरे सः ।
पंचैव वत्सचरणाः प्रथिता इह स्यु
स्तत्रापि सूत्रयुगलद्वयमेव भूम्ना ॥[1]

प्रारब्धकर्मपरिपाकवशात् पुनस्त्वं
वाचस्पतित्वमधिगम्य वसुंधरायाम् ।
भव्यां विधास्यसितमां मम भाष्यटीकाम्
आभूतसंलयमधिक्षिति सा च जीयात् ॥[2]

अत्र हि आचार्याः सुरेश्वरानाहूय 'त्वं प्रारब्धकर्मपरिपाकेण वाचस्पतिरिति भूम्यां पनर्जन्माधिगम्य मदीयभाष्यस्य टीकां विधास्यसि सा चाप्रलयं जीयात् इत्याहुः इति हि वर्णितम् । परमिदं न विश्वासमर्हति विमर्शकानां, कुतः? यदि सुरेश्वरा एवैते स्युः तर्हि किमपि स्वकृतमुदाह्रियेत, तथा नोदाहारि किंचिदपि । परं तु भूम्ना मण्डनमिश्रानेवानुसरन्ति, इतमग्रे स्फुटीभविष्यति । वार्तिकवाचस्पतिसिद्धान्त-वैलक्षण्यं स्फुटीकरिष्यमाणं सुतरां व्यक्तिभेदमभिव्यञ्जयति वाचकानाम् । अपि च ब्रह्मसिद्धिकृतां मण्डनमिश्राणां स्वसाधितसिद्धान्तविषयाः केचनात्रापि ग्रन्थे प्रतिबिम्बिता दृश्यन्त इति मण्डनमिश्रसुरेश्वरैक्यप्रसिद्धचा च वाचस्पतिषु सुरेश्वरात्मत्वं केवलं चरित्रकारेण भ्रान्तमेव । इमे च 'मिश्र' शब्देनाङ्किता इति ग्रन्थान्ते नृगराजनामोदाहरणेन च तत्र तत्र, तथा सर्षपतैलोदाहरणेन च औत्तराः मैथिला इत्यवगम्यते ।

1. मा.शं.वि. 13-72
2. Ibid 13-73

नरेश्वरा यच्चरितानुकारमिच्छन्ति कर्तुं न च पारयन्ति ।
तस्मिन् महीये महनीयकीर्तौ श्रीमन्नृगेऽकारि मया निबन्धः ॥ इति ।

वाचस्पतिकृताः ग्रन्थाः, न्यायकणिका, तत्त्वसमीक्षा, तत्त्वबिन्दुः इति न्यायसांख्ययोगनिबन्धनैः महत्पुण्यं संचितं, तदिदं वेदान्तनिबन्धनैश्च परिपक्वीकृतफलमद्येति त एवान्ते स्वग्रन्थनिर्माणफलमनुवदन्ति यथा-

यन्न्यायकणिकातत्त्वसमीक्षातत्त्वबिन्दुभिः ।
यन्न्यायसांख्ययोगानां वेदान्तानां निबन्धनैः ॥[1]

समचैषं महत्पुण्यं तत्फलं पुष्कलं मया ।
समर्पितमथैतेन प्रीयतां परमेश्वरः ॥[2] इति ।

विधिविवेकस्य न्यायकणिका, ब्रह्मसिद्धितत्त्वसमीक्षा, तत्त्वबिन्दुरिति स्वतन्त्रप्रकरणं, न्यायवार्तिकस्य तात्पर्यटीका न्यायसूची सांख्यकारिकाव्याख्या सांख्यतत्त्वकौमुदी, योगभाष्यटीका तत्त्ववैशारदी इति सप्तग्रन्थेषु रचितेष्वपि सूत्रभाष्योपरि भामतीनामग्रन्थरचनेनैव तावद् ग्रन्थरचनसमासादितपुण्यं महदद्य फलीभूतमिति वदद्भिः भामतीमहत्वं द्विगुणीकृतम् ।

अत्रैका कथा श्रूयते, वाचस्पतिमिश्राः स्वोद्वाहकाले मिलितानां बहूनां पण्डितानां सदसि प्रचलितशास्त्रविषयचर्चां स्वयमाकर्ण्य सकलदर्शनेषु ग्रन्थकरणे भृशं कुतुकिनोऽभवन् । एवं कौतुकेन महता ग्रन्थरचनायामेव प्रवृत्ताः क्रमेण वर्षीयांसः समभवन् । तदा स्वधर्मदारेषु विद्यमानां पतिभक्तिं तत्र स्वदर्शितमनादरं च पश्यन्तः मिश्राः स्वीयग्रन्थस्य प्रौढस्यास्य प्रीत्या तदीयनामैव चक्रुरिति इदमेव भामतीनामकरणे बीजम् ।

मिश्राणां ग्रन्थशैली, तद्वैशिष्ट्यं च

मिश्राणां ग्रन्थशैली नारिकेलपाकवत् नैषधग्रन्थादितुल्या, क्वचित् मधुपाकोपमा, प्रायेण श्रवणाक्षुण्णपदविशेषपरिगुम्भिता । क्वचित्क्वचिदौचित्येन कादम्बर्यादिगद्यशैलीमनुरुन्धे, परं तु शब्ददारिद्र्यशून्या गङ्गाझरीव निरर्गलं गलन्ती पाठकान् स्वीयशब्दझरीप्रवाहे निमज्जयत्युन्मज्जयति च । तद्यथा,

1. भामती अन्ते श्लो 3
2. Ibid 4

"न खल्वनुमानविबुद्धं वन्हिं भावयतः शीतातुरस्य शिशिरभर-मन्थरतरकायकाण्डस्य स्फुरज्ज्वालाजटिलानलसाक्षात्कारः प्रमाणान्तरेण संबाध्यते"[1] इति ।" "आखण्डलादिलोकपालचक्रनालादिवसतिः सिद्धविद्याधर-गन्धर्वाप्सरःपरिवारो ब्रह्मलोकावतीर्णमन्दाकिनीपयः प्रवाहपातधौतकल-धौतमयशिलातलो नन्दनादिप्रमदवनविहारिमणिमयशकुन्तकमनीयनिनदमनोहरः पर्वतराजः सुमेरु"रिति च ।[2] शास्त्रार्थं सुखेन लीलया बोधयितुं काव्यशैलीमपि ग्रन्थेऽनुसरन्ति प्रतिपदम् । भाष्यापेक्षितानां संक्षिप्तानां दर्शनभेदानां तत्र तत्र विस्तरेण यथादर्शनमर्यादं विशदीकरणं पंचपादिकायामिव । यथा अध्यासभाष्ये मतत्रयविशदीकरणं, तत्र तत्र उपयुक्तपूर्वमीमांसोदाहरणविशदीकरणम् । सांख्य-दर्शनविषयाणां भाष्योपयुक्तानां विशदीकरणम् ईक्षत्याद्यधिकरणेषु । एवं तर्कपादे काणादगौतमसौगतार्हतमतविशदीकरणं विस्तरेण । एवमास्तिकनास्तिकषड्-दर्शनीपरिचयोऽयं जिज्ञासूनां भाष्याध्येतृणामनया टीकयैकत्र सुलभ इत्यसंशयम् । ईदृक्परिपूर्णो विस्तृतो गंभीरः प्रौढिमशाली च भाष्यस्य व्याख्याग्रन्थो न दृष्टचरो न द्रक्ष्यते च । एतदीयग्रन्थदर्शने मिश्राणामगाधं पाण्डित्यं पण्डितप्रकाण्डैः श्लाघ्यमानमनवद्यमनुक्तमपि कस्तूरिकामोद इव स्वत एव प्रकाशत इति वदामः ।

मिश्रग्रन्थभागस्यान्यत्र प्रमाणीकरणम् - यथा गङ्गेशोपाध्यायरचिततत्त्व-चिन्तामणौ पक्षताप्रकरणे अत एव "प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः, न हि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातारः" इति वाचस्पतिवचनयोरविरोधः । अयं भामतीग्रन्थत उद्धृतो भागः रत्नप्रभान्यायनिर्णयादावपि एवमद्वैतसिद्धिलघुचन्द्रिकादिग्रन्थेषु समुद्धृतः ।

प्रायेण अर्थतः क्वचित् शब्दतश्च ब्रह्मसिद्धिकारसरणिसमनुसरणम् । यथा - "अभ्यासे हि भूयस्त्वमर्थस्य भवति, यथा अहो दर्शनीया अहो दर्शनीयेति न न्यूनत्वं प्रागेवोपचरितत्वम्"[3] इति । "यथा पयः पयोऽन्तरं जरयति स्वयं च जीर्यति यथा विषं विषांतरं शमयति स्वयं च शाम्यति, यथा वा कतकरजो रजोऽन्तराविले पयसि प्रक्षिप्तं रजोऽन्तराणि भिन्दत् स्वयमपि भिद्यमानमनाविलं पाथः करोति, एवं कर्म अविद्यात्मकमपि अविद्यान्तराण्यपगमयत् स्वयमप्यपगच्छति"[4] इति ।

1. भा. 1-1-1
2. Ibid 1-1-4
3. Ibid P.6
4. Ibid P.32

भामतीकारैर्निर्णीतं वेदापौरुषेयत्वं जैमिनिव्यासमुन्युभयानुगुणम्, शास्त्रयोनित्वाधिकरणे 'येऽपि तावत्, इत्यादिना प्रामाण्यं चेति[1] इतिपर्यन्तेन ग्रन्थेन संगृहीतसारांशः, वर्णनित्यत्वानित्यत्ववादिनामुभयेषामपि पदवाक्यादीनामनित्यत्वं समानं विचारतोऽवधेयम् । अतो न लौकिकवैदिकपदवाक्यादिपौरुषेयत्वे न विवाद उभयेषामपि, किं तु केवलं पुरुषस्वातन्त्र्यास्वातन्त्र्यमात्रे विप्रतिपत्तिः वेदवाक्येषु । यथाहुः 'यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता' इति । सृष्टिप्रलयमनिच्छन्तो जैमिनीया गुरुशिष्यपरम्परयाऽविच्छिन्नयाऽधीतं वेदमनादिमाचक्षते । वैयासिकमतानुयायिनस्तु श्रुत्यादिप्रमाणैः सृष्टिप्रलयमनिच्छन्तो वेदं सर्वज्ञसर्वशक्तिसंपन्नेश्वरविवर्तमिति वर्णयन्तोऽपि वेदेषु परमेश्वरस्यापि न स्वातन्त्र्यमित्याहुः । कुतः, पूर्वपूर्वसर्गानुसारेण तादृशतादृशानुपूर्वीविरचनादिति । एवमानुपूर्वी यथापूर्वमेव प्रतिकल्पं वर्तेत, तथा अर्थतश्च धर्माधर्माः तत्तत् फलानि च न विपर्यस्यतीति, तादृशविपर्यासकरणे परमेश्वरस्य स्वातन्त्र्यं न किंचिदस्तीति पुरुषास्वातन्त्र्यमात्रं चापौरुषेयत्वं जैमिनीया रोचयन्ते, तच्चास्माकमपि वेदान्तिनां समानमन्यत्राभिनिवेशादिति । अपास्तसमस्तदोषस्येश्वरस्य कृतित्वेन वेदानां तत्प्रभवत्वेऽपि प्रामाण्यम्, उक्तलक्षणमेवापौरुषेयत्वमिति ।

'वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा' इति भाष्यविवरणकाले इत्थं वर्णितम्, 'वेदान्तमीमांसा तावत् तर्क एव तदविरोधिनश्च तर्काः येऽन्येऽपि अध्वरमीमांसायां न्याये च वेदप्रत्यक्षादिप्रामाण्यपरिशोधनादिषूक्ताः त उपकरणम् । अस्य कल्पतरुदर्शितविवरणेन विस्तृतार्थोऽयम्, अर्थापत्तिरनुमानं चात्र तर्कोऽभिप्रेतः, तद्रूपा वेदान्तमीमांसा, तदविरोधिनस्तु श्रुतिलिङ्गादयः, तृतीयाध्यायोक्ताः, पंचमाध्यायोक्ताः श्रुत्यर्थादयो वेदप्रामाण्यपरिशोधकाः । वेदस्य प्रत्यक्षादीनां तदर्थानां च लक्षणादिविचारावसरोपयुक्तानुमानानि च । सर्वे चैते प्रमाणानुग्राहकत्वेन तर्का इत्युच्यन्ते ।

भामतीकृतकार्यकारणरूपाविद्याद्वयम्

तत्र 'अनिवार्यच्याविद्याद्वितयसचिवस्य प्रभवतः' इत्यादिमंगलश्लोकतोऽनूदितं द्वयम् । देवताधिकरणे ''समानानामरूपत्वा''[2] दिति सूत्रभाष्यप्रसङ्गेन

1. भा. P. 57-58 2. ब्र.सू. 1-3-30

कारणाविद्या वर्णिता । सा भावरूपैवास्याभिमतेति कल्पतरूक्तरीत्या सत्यमेव । यथा 'यद्यपि महाप्रलयसमये नान्तःकरणादयः समुदाचारवृत्तयः सन्ति तथापि स्वकारणेऽनिर्वाच्यायामविद्यायां लीनाः सूक्ष्मेण शक्तिरूपेण कर्मविक्षेपकाविद्यावासनाभिः सहावतिष्ठन्त एव । तथा च स्मृतिः -

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥[1] इति ।

इयं कारणाविद्या कर्मविक्षेपसंस्कारसहितलयलक्षणेत्युच्यते मिश्रैः ।

आनुमानिकाधिकरणे "सूक्ष्मं तु तदर्हत्वात्"[2] "तदधीनत्वादर्थवत्"[3] इति सूत्रभाष्यस्यटीका 'प्रधानं हि सांख्यानां सेश्वराणामनीश्वराणां वेश्वरात् क्षेत्रज्ञेभ्यो वा वस्तुतो भिन्नं निर्वक्तुं शक्यम् । ब्रह्मणस्तु इयमविद्याशक्तिः मायादिशब्दवाच्या न शक्या तत्त्वेनान्यत्वेन वा निर्वक्तुम् । इदमेवास्या अव्यक्तत्वमनिर्वाच्यत्वं नाम । सोऽयमव्याकृतवादस्य प्रधानवादाद्भेदः, अविद्याशक्तेरीश्वराधीनत्वं तदाश्रयत्वात्' इति । शङ्कान्तरं च परिहृतम्; यथा "यदि ब्रह्मणोऽविद्याशक्त्या संसारः प्रतीयते हन्त मुक्तानामपि पुनरुत्थानप्रसङ्गः । तस्याः प्रधानवत् तादवस्थ्यात् तद्विनाशे वा समस्तसंसारोच्छेदप्रसङ्गः, तन्मूलाविद्याशक्तेः समुच्छेदा"दिति[4] शङ्का । परिहारस्तु, "न वयं प्रधानवदविद्यां सर्वजीवेष्वेकामाचक्ष्महे, येनैवमुपालभेमहि, किं त्वियं प्रतिजीवं भिद्यते । तेन यस्यैव जीवस्य विद्योत्पन्ना तस्यैवाविद्या अपनीयते न जीवान्तरस्य । भिन्नाधिकरणयोर्विद्याविद्ययोरविरोधात् । तत्कुतः समस्तसंसारोच्छेदप्रसङ्गः, प्रधानवादिनां तु दोष एषः । प्रधानस्यैकत्वेन तदुच्छेदे सर्वोच्छेदेऽनुच्छेदे वा न कस्यचिदनिर्मोक्षप्रसङ्गः । प्रधानाभेदेऽपि चाविवेकख्यातिलक्षणाऽविद्यासदसत्वनिबन्धनौ बन्धमोक्षौ, तर्हि कृतं प्रधानेन, अविद्या सदसद्भ्यामेव तदुपपत्तेः"[5] इति ।

अविद्योपाधिभेदाधीनो जीवभेदः, जीवभेदाधीनश्चाविद्योपाधिभेदः इति परस्पराश्रयादुभयासिद्धिरिति शङ्का । परिहारस्तु अनादित्वाद् बीजाङ्कुरवदुभयसिद्धेः

1. भा. 1-3-30
2. ब्र.सू. 1-4-2
3. Ibid 1-4-3
4. भा. 1-4-3
5. Ibid

इति । अविद्याया जगद्बीजत्वेश्वरानर्थक्यशङ्कायाः परिहारस्तु परमेश्वराश्रयेति । "न ह्यचेतनं चेतनानधिष्ठितं कार्याय पर्याप्तमिति स्वकार्यं कर्तुं परमेश्वरं निमित्ततयोपादानतया चाश्रयते । प्रपञ्चविभ्रमस्य हीश्वराधिष्ठानत्वमहिविभ्रमस्येव रज्ज्वधिष्ठानत्वम् । तेनाहिविभ्रमो रज्जूपादानो यथा एवं प्रपञ्चविभ्रमोऽपि ईश्वरोपादानः । तस्माज्जीवाधिकरणाद्यविद्यानिमित्ततया विषयतया चेश्वरमाश्रयत इतीश्वराश्रयेत्युच्यते न त्वाधारतया, विद्यास्वभावे ब्रह्मणि तदनुपपत्ते"[1] इति । इदं पंचपादिकासुरेश्वरवार्तिकविरुद्धं तथा यथाश्रुतपरमेश्वराश्रयत्ववादिभाष्यविरुद्धं च, कारणाविद्याया व्यवहारभूमौ नित्यचैतन्यरूपपरमात्माश्रयत्वोक्तेस्तत्र ।

अविद्याया आवरणविक्षेपकरत्वम् - "यस्यामविद्यायां सत्यां शेरते जीवाः । अत्र जीवानां स्वरूपं वास्तवं ब्रह्म तद्बोधरहिताः" शेरत इति लय उक्तः, संसारिण इति विक्षेप उक्तः । अत्र लयशब्देन स्वरूपप्रबोधराहित्यमावरणम्, स्वरूपविपरीत-कर्तृतादिप्रतिभासो भ्रम एव विक्षेप"[2] इति । एतत्तु पंचपादीसमानम् । क्वचित् अविद्याकल्पितं नामरूपयोरव्याकृतपदवर्णनं न अविद्याभिन्नमायावर्णनस्वग्रन्थेन विरुद्ध्यते । अध्यासकालेऽविद्याशक्तेः कल्पितत्वेन तथा व्यवहारात् । कारणाविद्याया नानात्वे श्रुतिरपि प्रमाणं भामतीमते । "यो योनिं योनिमधितिष्ठत्येक"[3] इति । अस्यार्थस्तु 'अविद्याशक्तिर्योनिः, सा च प्रतिजीवं नानेत्युक्तमतो वीप्सोपपन्ना' इति । इदमप्येकत्वबोधकाजामन्त्र-अव्याकृतश्रुति-अव्यक्तमायादिबोधकश्रुतिविरुद्धम्, सूत्रभाष्यवार्तिकपञ्चपाद्यादिविरुद्धं च । एकत्वे बन्धमोक्षव्यवस्था तु इत्थं, न हि मूलप्रकृतिभूताविद्याशक्तिनाशादेव मोक्षः तदनाशे बन्ध इति भाष्यकारैः प्रपञ्चप्रविलयवादनिराकरणावसरे विद्यया अहंममाध्यास-निवृत्तिमात्रेण प्रपञ्चलयांगीकारात् । वस्तुतः प्रपञ्चमूलशक्तेः बद्धजीवीया-विद्याकल्पितत्वेन वास्तविकमूलशक्तेर्नाशानभ्युपगमात् । अविद्यातत्कार्यनिर्वृत्तिर्नाम न ध्वंसः, अपि तु नासीदस्ति भविष्यतीति मिथ्यात्वमात्रम् । तथा च कार्यकारणयोः कल्पितत्वमात्रेण प्रतिभानमात्रं मिथ्यात्वबुद्धिर्वा । "अविद्या सह कार्येण नासीदस्ति भविष्यति"[4] इति वार्तिकोक्तेश्च ।

---

1. भा. 1-4-3
2. ibid
3. श्वेताश्व 4-11
4. सं.वा. 183

कार्याविद्यावर्णनमध्यासभाष्ये इत्थं दृश्यते । आत्मनोऽनात्मनश्च परस्परतादात्म्याध्यासोऽहमिति प्रथमः ममेति द्वितीयश्च अहंप्रत्ययस्याध्यासस्य स्वरूपनिमित्तफलैः लक्षणविवेचनं च विस्तरेण वर्णनम् । तदीयसारसंग्रहस्तु, अहमिति ममेदमिति च लोकानां व्यवहारः व्यपदेशतदुपादानपरिवर्जनादिः सर्वोऽपि मिथ्याज्ञानमूलकः । स च स्वाभाविकोऽनादिः, तद्भावाभावानुविधायित्वाद् व्यवहारस्य । स चाध्यासो मिथ्याज्ञानम् । अन्योन्यस्मिन् धर्मिणि आत्मशरीरादौ अन्योन्यात्मकताध्यासः 'अहं मनुष्य' इत्यादिरूपः, स च परमार्थतो धर्मिणोरतादात्म्यरूपविवेकाभावनिबन्धनः । एवमन्योन्यस्मिन् धर्मिणि देहादिधर्म जन्मजरामरणादिधर्माध्यासः आत्मनि अध्यस्तदेहाभावे, तथा चैतन्याद्यात्मधर्माध्यासः अध्यस्तात्मभावे देहादौ । अयं परस्परवृत्तिधर्माध्यासः धर्माणामसङ्कीर्णतारूपविवेकाभावनिबन्धनः । एवमात्मानात्मनोः सद्धर्माणां वाऽध्यासः सर्वोऽपि न परमार्थसत्यमुपेत्य, परं तु सत्यानृतमिथुनीकरणरूपः, अनात्मनः तद्धर्माणां चानृतत्वात् संवृतिपरमार्थसतोः पारमार्थिकमिथुनीकरणाभावादिति । एवं चोक्तरीत्या अध्यासस्वरूपं, तन्निमित्तं विवेकाग्रहः, फलं तु अहमित्यादिव्यपदेशहानोपादानादिव्यवहार इति ।

अध्याससामान्यलक्षणनिष्कर्षस्तु 'स्मृतिरूपः परत्र पूर्वदृष्टावभास' इति । अवसन्नोऽवमतो वा भासः अवभासः । स च परत्र सत्ये आरोपविषये पूर्वदृष्टमात्रस्य[1] अनृतस्य आरोपः, यथा शुक्तिकायां रजतस्य । स च स्मृतिरूपः स्मृतिसदृशरूपवान् असन्निहितविषयकत्वेन स्मृतिसदृशत्वम् । तथा च बाधकप्रत्ययान्तरेण बाधितरूपभासत्वमेव अध्यासस्य संक्षेपलक्षणम् । तस्य विस्तरेण तु परत्र सत्ये पूर्वदृष्टस्येव स्मृतिवदसन्निहितविषयकभानरूपत्वम् । एवंलक्षणोऽध्यासोऽनिर्वचनीयः सर्वेषामेव संमतः परीक्षकाणाम् । सर्वेषामध्यासधिष्ठानारोप्यमाणयोः स्वरूपे विप्रतिपत्तावपि अन्यस्यान्यधर्मकल्पनानृतता या सा चानिर्वचनीयतावश्यंभाविनीति अनिर्वचनीयता सर्वतन्त्रसिद्धान्त इति । प्रकृते चिदात्मा श्रुत्यादिप्रमाणगोचरः सत्वेन निर्वाच्यः, सत्ता च अबाधितस्वयंप्रकाशता, सा च चिदात्मस्वरूपमेव, न तु तदतिरिक्तं सत्तासामान्यसमवायो वा

1. न तु वस्तुतो विद्यमानस्य ।

अर्थक्रियाकारित्वं वा। देहेन्द्रियादिप्रपञ्चस्तु अनिर्वाच्यः, अपूर्वोऽपि पूर्वपूर्वमिथ्याप्रत्ययदर्शित इव परत्र चित्यारोप्यत इति। प्रपञ्चबाधस्तु तत्त्वज्ञाने सति। अध्यासस्यानादित्वं तु इत्थम्। व्यवहारस्यानादितया तत्कारणस्याप्यध्यासस्यानादित्वम्। बीजाङ्कुरवदतादित्वान्न परस्पराश्रयत्वदोषः शङ्कनीयः। प्रत्यगात्मत्वं चेत्थम्; स्वयंप्रकाश एकः कूटस्थनित्यो निरंशः प्रत्यगात्माऽशक्यनिर्वचनीयेभ्यो देहेन्द्रियादिभ्यः आत्मानं प्रतीपं निर्वचनीयमञ्चति जानातीति प्रत्यङ् स चात्मेति प्रत्यगात्मा। प्रत्यगात्मनि अनात्माध्यास एवैकः सर्वानर्थबीजमिति पण्डिताः तमेवाविद्यामाहुः। अनादेरपि अतिनिरूढनिबिडवासनानुबद्धाया अप्यविद्यायाः तत्त्वावधारणाभ्यासस्वभावबलात् उच्छेदः संभवी, 'तत्त्वपक्षपातो हि स्वभावो धियाम्'। चिदात्मस्वभावस्य तत्वज्ञानस्यात्यन्तान्तरङ्गस्य वैपरीत्येन अनिर्वाच्याविद्याया न बाधः। पूर्वोक्ताविद्याद्वये या कार्याविद्या स एवाध्यासः सर्वानर्थबीजम्। तन्निवृत्तिश्च विद्यया। सा च विद्या "तद्विवेकेन च वस्तुस्वरूपावधारणम्, निर्विचिकित्सं ज्ञानं विद्यामाहुः पण्डिता"[1] इति भामती। प्रत्यगात्मनि अत्यन्तविविक्ते बुद्ध्यादिभ्यः बुद्ध्यादिभेदाग्रहनिमित्तो बुद्ध्याद्यात्मत्वतद्धर्माध्यासः, तत्र श्रवणमननादिभिः यद्विवेकविज्ञानं तेन विवेकाग्रहे निवृत्ते अध्यासापबाधात्मकं वस्तुस्वरूपावधारणं विद्या चिदात्मरूपं स्वरूपे व्यवतिष्ठत इति। साक्षात्काररूपतत्त्वज्ञानमेवाध्यासनिवर्तकम्। अतो विद्यापदेन तत्वसाक्षात्कार एव स्वीकार्योऽत्र, न तु परोक्षावभासः। दिङ्मोहालातचक्रचलद्वृक्षादिविभ्रमेषु अपरोक्षेषु अपरोक्षावभासिदिगादितत्वज्ञानैरेव निवृत्तिदर्शनात्। न खल्वाप्तवचनादिभिः विनिश्चिततत्त्वानामपि दिङ्मोहादयो निवर्तन्ते। अतः त्वंपदार्थस्य तत्पदार्थेन साक्षात्कार एषितव्यः। त्वंपदार्थस्य दुःखित्वादिसाक्षात्कार निवृत्तिस्तेनैव, नान्यथा।

साक्षात्कारस्य शब्दप्रमाणफलत्वं निरस्तम्। तद्यथा, न चैष साक्षात्कारो मीमांसासहितस्यापि शब्दप्रमाणस्य फलम्; अपि तु प्रत्यक्षस्य। तस्यैव तत्फलत्वनियमात्, अन्यथा कुटजबीजादपि वटांकुरोत्पत्तिप्रसंगः। तस्मात् निर्विचिकित्सवाक्यार्थभावनापरिपाकसहितमन्तःकरणं त्वंपदार्थस्यापरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थतामनुभावयतीति युक्तम्।[2]

---

1. भा. 1-1-1

2. इदं भाष्यवार्तिकविरुद्धम्।

साक्षात्कारस्य चित्तवृत्तिरूपत्वम् । ब्रह्मसाक्षात्कारो ब्रह्मविषयकान्तःकरण-वृत्तिविशेषः, न ब्रह्मस्वभावः, नापि केवलवृत्तिरूपः सः, चैतन्यच्छायापत्तिं विना अन्तःकरणवृत्तेः स्वयमचेतनतया स्वप्रकाशत्वानुपपत्त्या साक्षात्कारत्वायोगात् । अतः स्वप्रकाशचैतन्यच्छायापन्नान्तःकरणवृत्तिः ब्रह्मविषयः सः साक्षात्कारः । यस्तु ब्रह्मस्वरूपः साक्षात्कारः स च परमार्थः, अकार्यत्वात्; वृत्तिरूपाद्वैतसाक्षात्कारः परं न परमार्थः, कार्यत्वात् ।

स्वयंज्योतिष्ट्वं शुद्धस्यैव नोपहितस्य

पूर्वोक्तवृत्तिरूपसाक्षात्कारेण ब्रह्मणो न स्वप्रकाशत्वहानिः, उपहितस्य स्वयं ज्योतिष्टानंगीकारात् । यथाह -''नहि शाब्दज्ञानप्रकाश्यं ब्रह्म स्वयंप्रकाशं भवति । सर्वोपाधिरहितं हि स्वयंज्योतिरिति गीयते, न तूपहितमपि''[1] इति । वृत्तिकाले विनश्यदवस्थस्य स्वपररूपोपाधिविरोधिनः तस्यैव सत्वादिति न सर्वोपाधिविनिर्मोकशंकाया अवसरः । भाष्यकाराश्चाहुः 'नायमेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वात्' इति । साक्षात्कारस्य भावनाजन्यस्यापि प्रकृतस्य नाप्रामाण्यम्, अनुमितवन्हेर्भावनाजन्यसाक्षात्कारस्य प्रतिभात्वेनाप्रामाण्यम्, वन्हेः परोक्षत्वाच्च । न तथात्र, ब्रह्मस्वरूपस्योपाधिकलुषितस्य जीवस्य प्रागप्यपरोक्षतेति । मण्डनसिद्धान्तवत् साक्षात्कारानुभवे जननीये शाब्दज्ञानाभ्यास आवश्यक इति, स च दीर्घकालमादरेण नैरन्तर्येण चानुष्ठेय इति । श्रवणादित्रयं तत्वसाक्षात्कारं प्रति कारणमिति तु अन्वयव्यतिरेकाभ्यामेव सिद्धमिति न तत्र विधिः केवलमनुवादमात्रम् ।[2]

जीवस्वरूपम्

उक्ताविद्याद्वयाश्रयो जीव एव । अन्तः करणाद्यवच्छिन्नः प्रत्यगात्मा इदमनिदंस्वरूपः चेतनः कर्ता भोक्ता कार्यकारणाविद्याद्वयाधारः अहंकारास्पदः संसारी सर्वानर्थभाक् जीवात्मा, न प्रतिबिम्बरूपः[3] नीरूपत्वाच्चैतन्यस्य न

1. भा. 1-1-1
2. इदं तु नियमपरिसंख्यान्यतरविधिवादि- वार्तिकविरुद्धम् ।
3. प्रतिबिंबतानङ्गीकारः भाष्यानुगुणः, विवरणविरुद्धश्च ।

प्रतिबिम्बसंभवः । 'रूपवद्धि द्रव्यमतिस्वच्छतया रूपवतो द्रव्यान्तरस्य तद्विवेकेन गृह्यमाणस्यापि छायां गृह्णीयात् । चिदात्मा त्वरूपो विषयी न विषयच्छायामुद्ग्राहयितुमर्हति । यथाहुः 'शब्दगन्धरसानां तु कीदृशी प्रतिबिम्बता' इति । भाष्यकारैरपि चैतन्यप्रतिबिम्बनस्य सर्वथा निराकृतत्वात् मिश्रोक्तं समीचीनम् । परिमले दीक्षितैरपि प्रतिबिम्बवादनिराकरणेन वाचस्पतिमतेन अवच्छेदवादस्यैव सुदीर्घविचारेण व्यवस्थापनात् ।

'प्रत्यगात्मा स्वयंप्रकाशत्वादविषयोऽनंशश्च, तथाप्यनिर्वचनीयानाद्यविद्यापरिकल्पितबुद्धिमतः सूक्ष्मस्थूलशरीरेन्द्रियावच्छेदेनानवच्छिन्नोऽपि वस्तुतोऽवच्छिन्न इव अभिन्नोऽपि भिन्न इव जीवभावमापन्नोऽवभासते, नभ इव घटमणिकमल्लिकाद्यवच्छेदेन भिन्नमिवानेकविधधर्मकमिवेति''[1] भामती । मिश्रैः पञ्चपादिकोपक्षिप्तो विवर्तवादः तथा मण्डनाचार्यादपि अत्यर्थं स्फुटितः । यथा,

अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो
विवर्ता यस्यैते वियदनिलतेजोबवनयः ।

इति मंगलश्लोक एव विवर्तपदेन वेदान्तपरमसिद्धान्तमिमं सृष्टिविषयमाविश्चक्रुः । ईक्षत्यधिकरणे ''ब्रह्मैव ईक्षितृ, अनाद्यनिर्वाच्याविद्यासचिवं जगदुपादानं, शुक्तिरिव समारोपितरजतस्य, मरीचय इव जलस्य, एकश्चन्द्रमा इव द्वितीय चन्द्रमसः ।

साक्षाच्च ''एकमेवाद्वितीयम्'' ''नेह नानास्ति किंचन'' इत्यादिभिः बहुभिर्वचोभिः ब्रह्मातिरिक्तस्य प्रपञ्चस्य प्रतिषेधात् चेतनोपादानमेव जगत् भुजङ्ग इवारोपितो रज्जूपादान[2]'' इति सिद्धान्तः प्रतिपादितः । एवं तदनन्यत्वाधिकरणे कृत्स्नप्रसक्त्यधिकरणे च पञ्चपादिकायामंकुरितः विवर्तवादः स्पष्टीकृतः विस्तरेण ।

भेदाभेदवादिभास्करमतखण्डनम्

एकत्र भेदाभेदयोर्विरुद्धयोः न समावेश इति शांकरभाष्योपरि भास्कराचार्यैः पुनः भेदाभेदसिद्धान्तस्य समर्थने कृते भामतीकारैः तन्मतखण्डनपुरःसरं भाष्यसिद्धान्तमण्डनं कृतम् । तच्च मण्डनाचार्यवदेव वाचस्पतिमिश्रैरपि

1. भा. 1-1-1 2. Ibid 1-1-5

युक्तिविरोधप्रदर्शनेन खण्डितम् । तथाहि, अभेदे सत्यपि उपाधिकृतो भेदः सत्य एवेति भास्करमतम् । उपाधिवस्तूनामपि अनिर्वचनीयाविद्याकल्पितत्वेन तत्कृतभेदोऽप्यनिर्वचनीय एवेति मण्डनमिश्रवादमेव पुनरुद्धृत्य तन्मतं मिश्रैः निराकृतम् । एवं वाक्यार्थज्ञानमात्रेण द्वैतज्ञानं न निवर्तेतेति श्रवणाद्यभ्यासेन जायमानब्रह्मप्राप्तिः कालान्तरभाविनीति तथा लोकान्तरभाविनीति भास्करपक्षनिराकरणार्थं 'साक्षात्कारो दृष्टफलमेव तदर्थं श्रवणादिसाधनं कार्यमिति, जीवन्मुक्तिः प्रामाणिकीति च समर्थयन्तो वाचस्पतिमिश्राः तन्मतं निराचक्रुः । जीवन्मुक्तौ वा अविद्या कथं स्यादित्याक्षेपस्तु इत्थं परिहृतः, द्विचन्द्रदृष्टान्तबलेनैव भाष्यदर्शितेन पथा कंचित्कालमविद्यासंस्कारोऽनुवर्तते । अविद्यां वाक्यमपनयति, तत्सस्कारं तु वाक्यज्ञानाभ्यासजनितसंस्कारजन्यसाक्षात्कारोऽपनयेत् । अयं च संस्कारः साक्षात्कारोत्तरमपि स्वल्पकालमात्रं वर्तेत इति ।

एकमुक्तौ सर्वमुक्त्यापत्तिदोषं प्रतिजीवमविद्याभेदस्वीकारेण परिहरन्ति । अद्वैतसिद्धान्तोपरि प्रायेण भास्कराचार्यकृताक्षेपाणां बीजाङ्कुरवदनादिः प्रपञ्चः सर्वयुक्तिविचारासहोऽनिर्वाच्य इति महामन्त्रास्त्रप्रयोगेण परिहारस्तत्र तत्र कृतो दृश्यते भामत्याम् । क्वचिद् भास्करमत इव व्यत्यस्तरूपेण सिद्धान्तप्रतिपादनं दृश्यते, तच्च भास्करप्रभावेणेति वक्तव्यम् । यथा सुषुप्तौ जीवबुद्धिसंबन्धः, प्रलये नामरूपप्रञ्चः सूक्ष्मरूपेणास्तीत्यङ्गीकृतमनुरुद्ध्चैव लयलक्षणाविद्येति नामान्तरेण मिश्रैः स्वीकृतम् । कार्यकारणयोः भेदाभेदौ यथा तेनांगीकृतं, तथैव मिश्रैः तत्स्थानेऽनिर्वचनीयतादात्म्यमुररीकृतम् ।

भास्करांगीकृतो ज्ञानाभ्यासः साक्षात्कारहेतुरितीममंशमङ्गीकृत्य स अभ्यासः तज्जन्यसाक्षात्कारः, तत्फलमविद्यानाशः स चानिर्वाच्य इति किंचिद् व्यत्यासेन मिश्रैः सिद्धान्तितम् । भास्करोक्तरीत्या जीवो ब्रह्मणोंऽश इति तदिदमंशत्वमौपाधिकमिति स्वीकृत्य सिद्धान्ते तदिदमविद्यावच्छिन्नत्वेनानिर्वाच्यमिति विपर्ययेण साधितं मिश्रैः ।

मण्डनमिश्रांगीकृतप्रसंख्यानवादं[28] पुनरपि मिश्राः स्थापयन्ति । अयं वादः श्रीशंकरभगवत्पादैः सुरेश्वरैश्च तिरस्कृतोऽपि पुनरेतैः स्वीकृतः समर्थितश्च ।

---

28. भाष्यवार्तिकविरुद्धम्

वाक्यार्थज्ञानमात्रेण[1] ब्रह्मात्मानुभव इति हि भगवत्पादसंमतः । भाष्यगतेन अनुभवशब्देन इतरशब्दानां क्लेशेनार्थान्यथाकरणेन च बलादेव मिश्राः प्रसंख्यानवादो भाष्यकारसंमत इतिवदादर्शयन्ति पाठकानाम् । 'लिङ्गाच्चे'[2] ति सूत्रभाष्यटीकायां मिश्रदर्शितसाहसं पाठकश्लाघार्हं भवति । परिणामिनित्यतानिराकरणपूर्वकं कूटस्थनित्यता स्थापनम् इत्थं दृश्यते । भाष्ये हि ''किंचित् परिणामिनित्यं, यस्मिन् विक्रियमाणेऽपि तदेवेदमिति बुद्धिर्न विहन्यते यथा पृथिव्यादिजगन्नित्यत्ववादिनाम् । यथा च सांख्यानां गुणाः । इदं तु कूटस्थनित्यं व्योमवत् सर्वव्यापि सर्वविक्रियारहित''[3] मित्यादि यदुक्तं तद्विवेचनावसरे एवमाहुः, ''परे हि द्वयीं नित्यतामाहुः कूटस्थनित्यतां परिणामिनित्यतां च । तत्र नित्यमित्युक्ते मा भूदस्य परिणामिनित्यतेत्यत आह - तत्र किंचिदिति । परिणामिनित्यता हि न पारमार्थिकी, तथाहि - तत्सर्वात्मना वा परिणमेदेकदेशेन वा । सर्वात्मना परिणामे कथं न तत्त्वव्याहतिः, एकदेशपरिणामे वा स एकदेशस्ततो भिन्नो वाऽभिन्नो वा''[4] इत्यादिना विकल्प्य कार्यकारणयोरत्यन्तभेदमत्यन्ताभेदं भेदाभेदं च निराकृत्य अभेदोपादानैवानिर्वचनीयभेदकल्पनेति सांप्रतम् । ''मृत्तिकेत्येव सत्यम्''[5] इति श्रुतिः । तस्मात् कूटस्थनित्यतैव पारमार्थिकी न परिणामिनित्यता इति सिद्धान्तितम् ।

भामती पञ्चपादिकयोः मूलभाष्यव्याख्यानवैषम्यपरामर्शः

प्रायेण प्रसिद्धचतुःसूत्रीटीकया पंचपादीतुलनाकरणेनैव व्याख्यानभेदः सुदर्शो भवति । तत्राध्यासभाष्यटीकाकरणे स्पष्टमिदं व्याख्यानवैषम्यमुभयोः । यथा - 'मिथ्याज्ञाननिमित्तः, मिथ्या च तत् अज्ञानं च मिथ्याज्ञानं, मिथ्येति अनिर्वचनीयतोच्यते, अज्ञानमिति ज्ञानपर्युदासे जडात्मिकाऽविद्याशक्तिः, तन्निमितस्तदुपादन' इति । इदं व्याख्यानं क्लिष्टमपि देवताधिकरणोक्त-जगत्कारणीभूताव्यक्ताव्याकृतपदवाच्यशक्तिरूपोपादानकत्वलाभाय कार्यमात्रे तत्संपादनाय । भामत्यां तु 'मिथ्याज्ञानमध्यासः, तन्निमित्त इति तद्भावाभावानुविधानाद्व्यवहारभावाभावयो'रिति यथाश्रुतमेव व्याख्यातम् ।

---

1. सुसंस्कृतमनसः ।
2. ब्र.सू. 4-1-2
3. सू.भा. 1-1-4
4. भा. 1-1-4
5. छां 6-1-1

एवमध्यासलक्षणमर्थाध्यासज्ञानाध्यासोभयलक्षणतया उक्तं पंचपाद्याम्। भामत्यां तु केवलज्ञानाध्यासलक्षणपरतया व्याख्यातम् तथा भाष्योक्तलक्षणं 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इति संक्षेपविस्तराभ्यां लक्षणपरतया 'अवभासः अवसन्नोऽवमतो वा भासोऽवभासः, एतावता मिथ्याज्ञानमित्युक्तं भवति, तस्येदमुपव्याख्यानम् पूर्वदृष्टेत्यादि' इति व्याख्यातम्। पंचपाद्यां तु नैवं दृश्यते। एवमेवाध्यासभाष्ये बहुत्र तयोर्वैषम्यं दृश्यते। तथोत्तरत्र 'नित्यानित्यवस्तुविवेकः' इत्यादौ भामत्यां व्याख्यातं, तद्यथा नित्ययोर्धर्मिणोः तद्धर्माणां च विवेक इति। तथा नित्यत्वं सत्यत्वं तद्यस्यास्ति तन्नित्यं सत्यं, तथा चास्थागोचरः। अनित्यत्वमसत्यत्वं, तद्यस्यास्ति तदनित्यमनृतं तथा चानास्थागोचर' इत्यादिरूपेण बहुत्राक्षरव्याख्याने वैषम्यम्। तत्र कारणं तु भाष्याशयस्य गंभीरस्य निगूढस्याविष्करणेन परकीयशंकानां च परिहरणोद्देशः।

अनिर्वचनीयतावादे वाचस्पत्याशयः

यद्यपि भामत्यां 'न सत् नासत्, न सदसत्' इत्यादिग्रन्थपरामर्शे सदसदुभयविलक्षणमनिर्वचनीयमिदं सर्वं विश्वमिति कोटित्रयातीतेऽनिर्वचनीयत्वरूपे चतुर्थे पक्षे मिश्रैः विश्रान्तिप्रदर्शनात् कुत्रचित् विश्रान्तिपक्षस्थापन एवादरस्तेषामिति प्रतीयते। तथा 'अनिर्वाच्याऽविद्याद्वितयसचिवस्य प्रभवतो' इति मंगलश्लोकपरामर्शे च तथा प्रतीयते। तथा भामत्यामेव क्षणिकविज्ञानवादिभिः कूटस्थस्य कारणत्वासंभवशंकाया परिहारावसरे मिश्रैरेवमुत्तरितम् ''स्थिरो हि भावः क्रमवत् सहकारिसमवधानात् क्रमेण कार्याणि करोति, न चानुपकारिणः सहकारिणः। न चास्य सहकारिभिराधीयमानो ह्युपकारः न भिन्नो नाप्यभिन्नः, किं त्वनिर्वाच्य एव। अनिर्वाच्याच्च कार्यमप्यनिर्वाच्यमेव जायते। न चैतावता स्थिरस्याकारणत्वं, तदुपादानत्वात् कार्यस्य''[1] इति। अपि च ब्रह्मतत्वसमीक्षायां मिश्रैरेवोक्तं प्रमाणमालायां परामृशति आनन्दबोधाचार्यः, यथा 'न सत्, नासत्, नापि सदसत्, न चैव सदसद्विलक्षणम्' इति। तथाऽनूदितग्रन्थभागः - 'न चैतादृशमुभयवैलक्षण्यमपि तात्विकमभ्युपगच्छामः येन प्रसंजयेम विरोधम्। वैलक्षण्यवाचोयुक्तिर्हि प्रतियोगिनिरूपणात् यौक्तिकत्वप्रकटनफला। न

1. भा. 2-2-26

त्वेवंरूपतायाः सामंजस्यसंपादनायेत्यवोचाम । न हि स्वरूपत एवातात्विकस्य तात्विकं किमपि रूपं भवति । अत एवोक्तमाचार्यवाचस्पतिना ब्रह्मतत्त्वसमीक्षायाम् ''सदसदुभयानुभयादिप्रकारैरनिर्वचनीयत्वमेव हि अविद्याया अविद्यात्वमिति । सा चाधिष्ठानविद्याविरोधादविद्येति गीयते, तदेकार्थतया चाज्ञानमिति । प्रमाणं पुनरत्र 'विवादपदमनिर्वाच्यम् बाध्यत्वात्, यदुक्तसाध्यं न भवति तदुक्तसाधनं न भवति यथा आत्मा एतदेवोपजीव्यप्रतीतिबाधान्यथानुपपत्तिः प्रवृत्तिबाधान्यथानुपपत्तिश्चेत्यर्थापत्तिद्वयमपि तद्वादिनं प्रत्यभिधातव्यमिति ।

प्रमाणमालायामेवान्यत्र च ''परस्परविरुद्धानां निषेधेऽपि विधाविव समुच्चयविरोधो गीर्वाणैरप्यवारणीयः । एतेन चतुष्कोटिविनिर्मुक्तो भेद इति परास्तम् । सदसद्विलक्षणत्वाभ्युपगमोऽप्येवं जडस्यानुपपन्न इति चेत् सत्यम्; तात्त्विकत्वे तथैव, अत एव तत्त्वतो युक्त्या निश्चित्य वक्तुमशक्यत्वात् अनिर्वचनीयमेव जडमुच्यते । सदसद्वैलक्षण्यादिवाचोयुक्तिरपि तत्तद्रूपनिरूपणासहिष्णुत्वमात्रप्रकटनाय । न तु तद्विरहसमुच्चयात्मनो रूपान्तरस्य तात्त्विकत्वप्रकटनायेति न किंचनास्माकं दुष्यति इति । अयमेवाविश्रान्तिपक्षः, कुत्रचिदपि पक्षे सदसदादिपक्षेषु तदन्यतमे विश्वस्वरूपे तात्त्विकत्वस्थापने न विश्राम्यति विचारधारा। अविश्रान्तिपक्षे प्रपञ्चस्य स्वरूपं परमार्थत प्रतिषेध एव, सोऽयं प्रपञ्चप्रत्याख्यानरूपोऽपलापलक्षणः । कारणापेक्षया ब्रह्मदृष्ट्या कार्यं नाम व्यतिरेकेण तत्त्वतो नास्तीति व्यतिरेकदृष्टिः । प्रपञ्चरूपकार्यदृष्ट्या तु सद्रूपेणासद्रूपेण च दुर्निरूपत्वरूपानिर्वचनीयपक्षः ।

सत्वेनासत्वेन, सदसत्वेन, तद्भिन्नत्वेन वा केनापि रूपेणानिर्वाच्यत्वमिति तु सर्वथा दुर्निरूपत्वरूपमनिर्वाच्यत्वलक्षणम् । तथैव कारणाभिन्नत्वेन, तद्भिन्नत्वेन भिन्नाभिन्नत्वेन तद्विलक्षणत्वेन वा दुर्निरूपमिति च परिष्कृतलक्षणं वक्तुं शक्यते । एवं वेदान्तप्रपञ्चे भामती विशिष्टं स्थानं भजते । विस्तरभिया नेह तत्सर्वं वितन्यते ।

संक्षेपशारीरकम् सर्वज्ञात्ममुनयश्च

सर्वज्ञात्ममुनिरिति सुप्रथिता इमे श्रीसुरेश्वराचार्यान्तेवासिन इति चरितमस्ति । भगवत्पादा इमान् काञ्चीपीठे स्थापयित्वा तेषां भाष्यप्रवचनं कार्यमिति सुरेश्वराचार्यान् नियम्य परंधामावापुरिति प्राचीनशंकरविजयतोऽधिगम्यते। अथ च केरलीयशंकरविजयतः कांश्चन श्लोकानुद्धृत्य गुरुराजरत्नमालाव्याख्यातारो दर्शयन्ति[1] कर्नाटभाषावेदान्तविचारेतिहासे ।

मधुसूदसरस्वत्यस्तु ' त इमे गान्धारदेशीया' इति स्वविद्यागुरुन् सुरेश्वरान् नमस्कुर्वन्ति चेति लिखन्ति । संक्षेपशारीरिके[2] परं द्विवारं देवेश्वर इति नाम्नैव गुरून् स्मरन्तः अक्षजशासने मनुकुलादित्ये राज्यभरणं कुर्वति स्वयं ग्रन्थमिमं व्यचीचरन्निति ग्रन्थकर्तार एव वदन्ति । एवं देवेश्वरनाम्ना गुरुसंकीर्तनात् स्वग्रन्थरचनाकाले मनुकुलादित्यस्मरणात् साक्षात् सुरेश्वरनामानुल्लेखात् तच्छिष्यताविप्रत्तिरेवैतेषु तत्साधने प्रबलं प्रमाणं नास्तीति । टीकाकाराः पुनरेवमाशेरते, देवेश्वरस्य सुरेश्वराचार्यस्य इति व्याख्याय सुरपदस्थाने देवपदप्रयोगः साक्षाद्गुरुनामाग्रहणाय 'गुरोर्नाम न गृह्णीयात्'[3] इति स्मृतेः इत्युचितं चेत् तथा भवतु, तदपि विमर्शकविपश्चिदधीनम् ।

वयं तु प्रायेण सुरेश्वरसिद्धान्तितान् अज्ञानाध्यासादिविषयानेव तदुक्तसरण्या समर्थयन्तीमे, अतोऽमी सुरेश्वरान्तेवासिन इति ब्रूमः ।

आस्तां कर्तृविचारेण फल्गुना निर्णयकाष्ठामनालीढेन । वयं तदीयग्रन्थमात्रं परामृशामः ।

अस्य ग्रन्थस्य नाम ग्रन्थकृता दर्शितम् 'मुनिवरः संक्षेपशारीरक'[4]मिति । अनेन शारीरकस्य ब्रह्मसूत्रात्मकविचारशास्त्रस्य संक्षेपेण अध्यायचतुष्टयेऽपि

---

1. वै. सुब्रायशर्मणः ।
2. सं.शा. 1-8 तथा 4-62
3. आत्मनाम गुरोर्नाम नामातिकृपणस्य च ।
   श्रेयस्कामो न गृह्णीयात् ज्येष्ठापत्यकलत्रयोः ॥ इति स्मृतिः ।
4. सं.शा. 4-62

सारकथनपरत्वमस्येति अवगम्यते । इदं केवलं निवृत्तिपरं शास्त्रं, पूर्वतन्त्रं तु प्रवृत्तिनिवृत्तिपरम्,[1] अत एव सामान्यतोऽधिकारी तत्र, अत्र तु साधनचतुष्टयसंपन्न एवासाधारणोऽधिकारी । निवृत्तिश्च द्विधा बाह्या आभ्यन्तरविषया च तत्र प्रयत्ननिर्वर्त्याऽऽद्या विधिशास्त्रलभ्या, इतरा तु सदात्मककूटस्थचैतन्यरूपा परमार्था, विधिशास्त्रपरित्यागेनैव लभ्या सा, तत्परमिदं निवृत्तिशास्त्रम् ।

तन्महिमा ग्रन्थशैलीतोऽर्थतश्च

शारीरकन्यायान् सामस्त्येन मुख्ये निर्गुणे ब्रह्मण्येव समन्वेतुं शारीरकं प्रववृत इति इदं ललितललितपदविन्यासमधुमधुरैः अनुप्रासविशोभिश्छन्दोभिरलंकृतया काव्यसरण्यनुसारिण्या वाण्या शास्त्रार्थं बोधयत् नैकविधविद्वज्जनचमत्कृतिमादधत् स्वीयलक्ष्यमावर्जयति, ग्रन्थदर्शिनामनपलपनीयमिदं, सर्वा अपि प्राचीनप्रक्रियाः प्रायेणैकवाक्यताकरणेन एकत्र संयोजयितुं प्रवृत्तमिदं वेदान्तजिज्ञासूनामनर्घ्यामोघविचारमणिभूषणपेटिकेवाभाति । अत्र वयं मुख्यविषयान् तदादृतान् पुरस्कुर्मो विदुषां मुदे ।

तत्रापि सूत्रभाष्यातिगूढसारतमविषयान् कथं ग्रन्थकारोऽयं बहिः प्रकाशयतीति, कथं वा समर्थनीयांशान् भाष्येऽपि न समर्थितान् साधयतीति च प्रदर्शयामः ।

ग्रन्थे विषयविभागः

ब्रह्मसूत्रवदेव समन्वयाविरोधसाधनफलप्रतिपादनप्रवणमध्यायचतुष्टयमत्र ।

1) प्राधान्येन तत्त्वमादिमहावाक्यानामखण्डार्थप्रतिपादनम् । महावाक्यज्ञानेनाधिकारिणो मुक्तिरिति बोधनमेव ब्रह्मसूत्राणां मुख्योद्देशः ।

2) महावाक्यं विना सफलज्ञानस्यानुदयात् "ना वेदविन्मनुते तं बृहन्तम्"[2] "तंत्वौपनिषदं पुरुषं पृच्छामि"[3] इति श्रुतौ वेदोपनिषच्छब्दौ महावाक्यमेव प्राधान्येन बोधयतः । अवशिष्टानि वेदवाक्यानि तदङ्गतया तदर्थकानि भवन्ति इत्येव ग्रन्थकारा वदन्ति[4] । तथा शारीरकेण न्यायनिर्णीतार्थाया

1. विधिनिषेधपरमित्यर्थः ।
2. तै.ब्रा. 3-12-9-7
3. बृ. 3-9-26
4. सं.शा. 3-296 तः 302 पर्यन्तम् ।

अपि पुरुषदोषरूपपुरुषापराधशतेन संक्षुब्धतया संशयितार्थतया वेदगिरोऽपि सुविनिश्चितार्थसंपत्तये स्वीयप्रकरणग्रन्थस्य उद्देशः कण्ठरवेणोक्तः । टीकाकारैश्च अस्याशयो विवृतोऽन्यथापि । श्रीशारीरकशास्त्रस्य तात्पर्यविषयीभूते मुमुक्षुजिज्ञास्ये निर्विशेषे ब्रह्मणि बोधनीये प्रासङ्गिकमुमुक्ष्वजिज्ञास्यसविशेषब्रह्मोपासनावाक्यानामनेकविधानां विचारविक्षिप्ततया दुःखबोधनामाकलय्य, तद्विक्षेपपरित्यागेन मुमुक्षुजिज्ञास्यं निर्विशेषं ब्रह्म शास्त्रतात्पर्यविषयीभूतमनायासेन मुमुक्षुं बोधयितुं संक्षेपशारीरकाख्येन श्लोकग्रन्थेनाविश्चकार करुणया सर्वज्ञात्ममुनिराचार्यः । अत एव प्रासङ्गिकविचारपरित्यागेन संक्षेपविशिष्टं निर्विशेषब्रह्मविचारात्मकं शारीरकशास्त्रमेवैतदिति संक्षेपशारीरकमिति समाख्या अस्य युक्तैवेति टीकाकारैर्विमृश्य ग्रन्थकर्त्राशयो विवृतः ।

तत्वमस्यादिमहावाक्यार्थस्य अखण्डार्थस्य समर्थनेन तत्रैव समन्वयः प्रथमाध्याये विवक्षित इति ज्ञायते ।[1]

तत्र त्वंपदार्थः[2] प्रथमसूत्रे, तत्पदार्थो द्वितीयसूत्रे तयोः समन्वयः प्रत्यगभिन्ने इति मुनिर्वेदव्यास आहेति । एतादृशाखण्डार्थं प्रतिपादयितुं वाक्यस्य सामर्थ्यमस्तीति उपसंहारश्लोके वदति ।[3] उक्ताखण्डार्थत्वोपपादनाय लक्षणात्रैविध्यवर्णनं वेदोदाहरणदानैरन्योदाहरणैश्च, जहदजहल्लक्षणा, तदुपपादनं सर्वलक्षणोपपादनं जहल्लक्षणया अखण्डार्थत्वं च तत्र लिखितश्लोकानुसारेण ग्रन्थस्य मुख्यविषयोऽयमिति प्रतीयते । यथा प्रथमसूत्रे "अथातो ब्रह्मजिज्ञासा"[4] इत्यत्र ब्रह्मविद्याधिकारी त्वंपदार्थो जिज्ञास्य-ब्रह्मभेदेनान्वययोग्यः प्रतिपादितः । तयोर्भेदे सति स्वीयकर्तृत्वाद्यध्यासरूपबन्धनिवृत्तिकामनया मुमुक्षोः ब्रह्मणि जिज्ञासा नोदीयात्, अन्यज्ञानेन अन्यवृत्त्यध्यासनिवृत्त्यनुपपत्तेः, तस्मात्तयोरनन्यत्वमिति । द्वितीयसूत्रे "जन्माद्यस्य यत"[5] इत्यत्र जगत्कारणत्वप्रदर्शनव्याजेन तत्पदार्थोऽपि शुद्धत्वं पदार्थाभेदान्वययोग्यः तटस्थस्वरूपलक्षणाभ्यां प्रतिपादितः, चतुर्थसूत्रे च

1. द्र.सं.शा. 1-561
2. Ibid 1-552
3. Ibid 1-562
4. ब्र.सू. 1-1-1
5. Ibid 1-1-2

"तत्तु समन्वयात्"[1] इत्यत्र तयोरैक्यमैकान्तिकं प्रतिपादितम्, एतदेव शास्त्रस्य प्रमेयं त्वंपदार्थस्तत्पदार्थोऽखण्डवाक्यार्थश्चेति ।

तत्र प्रमाणं तु तृतीयसूत्रेण "शास्त्रयोनित्वात्"[2] इत्यनेन, तत्त्वमादिमहावाक्यरूपं शास्त्रम् । पाठक्रमादर्थक्रमो बलीयानिति तृतीयसूत्रार्थोऽन्ते प्रमाणसूत्रणाय व्याख्यातः । संक्षेपशारीरके आदितश्चत्वारः श्लोकाः चतुःसूत्रीस्थानीया इत्यभिप्रायं टीकाकाराः समुल्लिखन्ति । यथा-

अनृतजडविरोधिरूपमन्त-
त्रयमलबन्धनदुःखताविरुद्धम् ।
अतिनिकटमविक्रियं मुरारेः
परमपदं प्रणयादभिष्टवीमि ॥ १ ॥

स्वाज्ञानकल्पितजगत् मेश्वरत्व-
जीवत्वभेदभेदकलुषीकृतभूमभावा ।
स्वाभाविकस्वमहिमस्थितिरस्तमोहा
प्रत्यक्चितिर्विजयते भुवनैकयोनिः ॥ २ ॥

प्रत्यक्प्रमाणकमसत्यपराक्प्रभेदं
प्रक्षीणकारणविकारविभागमेकम् ।
चैतन्यमात्रपरमार्थनिजस्वभावं
प्रत्यञ्चमच्युतमहं प्रणतोऽस्मि नित्यम् ॥ ३ ॥

औत्पत्तिकी शक्तिरशेषवस्तु
प्रकाशने कार्यवशेन यस्याः ।
विज्ञायते विश्वविवर्तहेतो
नमामि तां वाचमचिन्त्यशक्तिम् ॥ ४ ॥ इति ।

आदितः क्रमेण विष्णोः परमपदस्य ब्रह्मणो जगद्योनेः शुद्धस्य स्मरणं तत्प्रमाणीभूतवाग्देवताप्रणमनं, निर्विघ्नतायै विघ्नेश्वरस्तुतिः, ततो वेदव्यासमुनेः, ततः शंकरदेशिकस्य, ततः स्वगुरोर्देवेश्वरस्य स्तुतिः इति मङ्गलाचरणानि । ततः

14. ब्र.सू. 1-1-4
15. Ibid 1-1-3

स्वीयानौद्धत्यप्रकटनं, गुरुदेवताप्रसादेन स्वसामर्थ्यप्रकाशनं, पण्डितेषु स्वग्रन्थस्य प्रमाणीकरणप्रार्थनमित्यादि दर्शितम् । ततश्चतुर्भिः श्लोकैः[1] स्वग्रन्थकरणोद्देशः प्रकटितः ।

प्रथमाध्यायविषयसंक्षेपः

विषयप्रयोजनसंसिद्धये स्वरूपभूतस्य ब्रह्मण एवाज्ञातत्वं, तस्य चाहंकारादिसंसारबन्धहेतुत्वं च दिदर्शयिषवः प्रथममज्ञातत्वमध्यासं चात्मानात्मनोः साधयन्ति । यद्यपि वस्तुतः प्रत्यक्षमनुमानवेदवचनैः निर्दुःखनित्यसुख-विग्रहोऽयमात्मा 'सुखमहमस्वाप्सम्' इति सौषुप्ते प्राज्ञानुभूतसुखस्य प्रबोधे स्मरणात् सर्वजन्तुसाधारणप्रत्यक्षानुभवात् निर्दुःख सुखात्मा । तथाऽनुमानेनापि 'यदिष्यमाणं पारार्थ्यमृच्छति, निजसत्तया, यदिष्यते तद्वा सुखम्' इति सामान्यरूपेण वैषयिकसुखसादृश्येन स्वतन्त्रसुखावभासः । निरुपाधिकप्रेमास्पदं च कीटादेरपि स्वात्मैव, नह्यनात्मनि तादृशं प्रेम कस्यापि । "तदेतत् प्रेयः पुत्रात् प्रेयो वित्ता"[2] दित्यादिश्रुत्यापि तादृश आत्मा सिद्धयति । एवं च आनन्दविग्रहोऽपास्तसमस्तदुःखः वास्तविकसर्वभेदरहित इति स्पष्टं वेदान्तवचोभिरध्येतृणां प्रथितः ।

अध्यासस्य सकारणं निरूपणम्

एवं स्वरूपे प्रत्यगात्मनि स्वरूपाच्छादकं जीवेश्वरादिसकलभेदभ्रमरूप-विक्षेपजनकमज्ञानमस्ति । तेन प्रत्यक्पराग्द्वयस्य परस्पराध्यासो जायत इति । इदं भाष्योक्ताध्यासवर्णनं 'अन्योन्यस्मिन् अन्योन्यात्मकतामन्योन्यधर्मांश्च अध्यस्य इतरेतराविवेकेन अत्यन्तविविक्तयोः' इत्यादि । उक्ताज्ञानमेकमेव कारणं न सादृश्यादि, व्यभिचारादिति इतरेतराविवेकेनेति भाष्यसूचितमर्थं साधयन्ति । अध्यस्ततां प्रति समर्थमबोधमात्रं निमित्तम्, अत्र मात्रशब्देनापरकारणव्यावर्तनात् । सादृश्यं, विषयकरणदोषः, संस्कारश्चेति त्रयं नाध्यासे कारणं, ब्राह्मणोऽहमिति जात्यध्यासे, जातिगुणक्रियावयवसादृश्यभूम्नो निर्गुणे निष्क्रिये निष्कलेऽद्रव्ये

1. सं.शा. 1-14 तः 17 पर्यन्तम् ।
2. बृ. 1-4-8

चात्मनि विरहात्, प्रागद्वितीये विषयदोषाद्यप्रसक्तेः, अहमिति प्रथमाध्यासे सर्वथाऽभावादिति व्यभिचारः। एवं सुरेश्वरवार्तिकेऽपि दर्शितमिति साम्यम्।[1] यद्यपि न स्पष्टं भाष्ये, तथापि इतरेतराविवेकेनेति अध्यासं प्रति केवलाविवेकस्य कारणत्वोक्तेः अयमाशय उन्नीयते ग्रन्थकृता । भाष्योक्तान्योन्याध्यासश्रवणे प्रतीचोऽप्यध्यासावगमेन मिथ्यात्वापत्त्या शून्यवादप्रसङ्ग इति शङ्का साहजिकीति तन्निराकरणाय अधिष्ठानाधारपदार्थभेदवर्णनं कृतम् । 'संसिद्धासविलासमोहविषये वस्तुन्यधिष्ठानगीः'[2] इत्यादिना ।

टीकाकारोऽपि 'अतद्रूपेऽपि तद्रूपेणारोप्यबुद्धौ स्फुरणाधार'ृइत्याह । तथा च सविलासाज्ञानावृतं वस्तु[3] अधिष्ठानमिति, अध्यसनाधारत्वेन प्रतीयमानः इदमंशः आधारः । तथा च शून्यवादस्य नावकाशः । अध्यासे 'सत्यानृते मिथुनीकृत्ये'ति सत्यानुतमिथुनीकरणोक्त्यापि तस्य नावसरः ।

अध्यासे अन्योन्याध्यासे च प्रमाणम्

भाष्योक्तान्योन्याध्यासे किं प्रमाणमिति शङ्कावारणाय प्रसिद्धरजताध्यासदृष्टान्ते तत्साधनं कृतम् । 'इदं रजत'मित्यत्र इदं पदार्थे रजतस्येव रजते इदंपदार्थस्याप्यारोपो वक्तव्यः, तत्र रजतभ्रमे इदमः स्फुरणमेव हेतुः, रजतवत् यदि इदमनध्यस्तं स्यात् भ्रमे शुक्तिरिव न स्फुरेत् इतीयमेव यक्तिः[4]। एवं ज्ञानाध्यासेऽपि प्रत्यक्षप्रमाणं[5] रजतमिदं 'इदं रजत'मित्येवं रूपम्। सर्वत्र भ्रमे अध्यस्तमेव स्फुरति, नान्यत् कथंचन, यथा रज्जुत्वशुक्तिशकलत्वादि न स्फुरति। एवमेव चेतनाचेतनयोः प्रत्यगहंकारयोः परस्पराध्यास उदितः, नाप्रसिद्धकल्पनं भाष्ये किंचित्, एवमनुभूतियुक्तितदनुमितित्रयबलात् निरूपितम्, अन्यथा तद्विरोधापत्तिः[6] । एवमात्मानात्मनोरन्योन्यतादात्म्याध्यासेऽन्यत्र च अज्ञानमेकमेव कारणमित्युक्तम्।

प्रौढ्या सादृश्यादिसामग्रीवर्णनम्

सदृशे सावयवे पराग्विषये दोषात् लोकेऽध्यासदर्शनं तद्वदेव सादृश्यादिसामग्र्यपेक्षायामपि उपचारेण प्रतीच्यपि संपादयितुं शक्यमिति वदन्ति । अत्र

1. द्र.बृ.वा. 1-4-446
2. सं.शा. 3-239
3. शुक्त्यादिकम् ।
4. अनुमानम् इत्यर्थः ।
5. अनुभव इति ।
6. इदं चन्द्रिकाकारैः प्रमाणितम् ।

भाष्यकृतामपि संमतिरस्ति 'न तावदयमेकान्तेनाविषयः अस्मत्प्रत्ययविषयत्वात्' इति औपचारिकविषयत्वोक्तेः । वस्तुतस्तु अपरोक्षत्वमधिष्ठानस्यावश्यकं, सर्वत्रापरोक्षाध्यासे न प्रत्यक्षविषयत्वादि, कुतः । स्वप्नभ्रमादिषु मनसः, स्वतो वा क्वचित् चक्षुरादितो वा अपरोक्षत्व- संभवादधिष्ठानस्य स्वप्ने हि चैतन्यं स्वतोऽपरोक्षमस्ति, गजादिरूपाकारभ्रमो जायते, तत्र चक्षुर्विषयं मनोनिमित्तं वा विनापि चैतन्ये आत्मनि स्वप्नभ्रमो यथा । किं चाधिष्ठानारोप्ययोरेकेन्द्रियग्राह्यतानियमोऽपि नास्ति । मनोमात्रगम्येऽप्याकाशे सितासितादिभेदेन रूपग्राही भ्रमो रजतादिभ्रमवज्ज्ञायत इति । ज्ञातेऽपि तत्वेऽज्ञानतः तत्स्फुरणाभाव इति दूरस्थे वनस्पतिद्वये एकोऽयं वनस्पतिरिति भ्रमेऽस्फुरणं सामान्यतो व्यक्तिमात्रस्फुरणं, विशेषतो द्वयास्फुरणमितिवत् शुक्तिरजतादावंशभेदेन स्फुरणास्फुरणसंभवेऽपि भेदाननुभववच्च अज्ञानतः तदुभयमप्युपपन्नं चैतन्य इति[1] । इदमज्ञातत्वमप्यनवबोधनिबन्धनं, तत आत्माश्रयदोषोऽपि न विशंक्यः ।

नाभावतास्य घटते वरणात्मकत्वात्
नाभावमावरणमाहुरभावशौण्डाः ।
अज्ञानमावरणमाह च वासुदेवः
तद्भावरूपमिति तेन वयं प्रतीमः ॥[2] इति ।

"अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः"[3] इति गीता । तत्र व्यासवचनमाह-

एकः शत्रुर्नद्वितीयोऽस्ति शत्रुः
अज्ञानतुल्यं पुरुषस्य राजन् ।
येनावृतः कुरुते संप्रमत्तो
घोराणि कर्माणि सुदारुणानि ।[4]

1. द्र.सं.शा. 1-44 तः 49 पर्यन्तम् ।
2. सं.शा. 1-320
3. भ.गी. 5-15
4. सं.शा. 1-321

जाडयं जगत्यनुगतं खलु भावरूपं
मौढ्यं च पुंगतमिति प्रतिभाति तादृक् ।
जाडयं च मौढ्यमिति चानुभवप्रसिद्ध
मज्ञानमाहुरपवर्गपिधानदक्षम् ॥[1]

इति अज्ञानस्य भावत्वम् । साभासस्य अस्याज्ञानस्य द्वारकारणत्वं दृशः उच्यते, यथा

साभासमेतदुपजीव्यचिदद्वितीया
संसारकारणमिति प्रवदन्ति धीराः ।
साभासमेतदिति संसृतिकारणत्वे
द्वारं परं भवति कारणतादृशस्तु ॥[2] इति ।

अज्ञानस्याश्रयो विषयश्च प्रत्यगेवः न पुनरन्तःकरणम्,

आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला ।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः ॥[3] इति ।

अज्ञानमिदमज्ञस्यापि न स्वतः, निर्विकाराद्वयचिद्रूपता, विरोधात्, अज्ञातत्वमप्यज्ञाननिमित्तमेव, संविदः चैतन्यशक्तियोगात् स्वसिद्धौ स्वविषय-घटादिसिद्धौ स्वातन्त्र्येण स्वपरनिर्वाहकत्ववत्, अज्ञानस्यापि चैतन्येऽज्ञानसंबन्ध-कल्पने तत्कार्यकल्पने च स्वातन्त्र्यात् स्वपरनिर्वाहकत्वमिति नानवस्था, न स्वात्माश्रयदोषः[4] । भेदो यथा भेदान्तरमन्तरेण भेदं भेद्यं च भिनत्ति, तथा मोहोऽपि मोहान्तरं विनैव स्वं कार्यं च । अस्य नैकानि नामधेयानि प्रथितानि दृश्यन्ते । यथा तिमिरं, तमिस्रं, तामिस्रमन्धतमसं, जडिमा, तमिस्रा, माया, जगत्प्र कृतिः, अच्युतशक्तिमान्ध्यं, निद्रा, सुषुप्तिः, अनृतं, प्रलयः, गुणैक्यम् । इति

अनिर्वचनीयवस्तुसाधनम्

अज्ञानकल्पितमनिर्वचनीयमस्मि
न्नाबालवृद्धमविवादपदं प्रसिद्धम् ।
स्वप्ने यथा च भगवानपि वक्ष्यतीदं
सन्ध्येऽस्ति सृष्टिरिति पक्षनिरासिसिद्धयै ॥[5] इति ।

---

1. सं.शा. 1-322
2. Ibid 1-323
3. Ibid 1-319
4. द्र.सं.शा. 1-53, 54
5. सं.शा. 1-336

भगवान् सूत्रकारोऽपि "सन्ध्ये सृष्टिराहहि"[1] इति स्वप्नसृष्टिः पारमार्थिकीत्याशंक्य "मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वा"दिति[2] मिथ्यामात्रं न परमार्थगन्धोऽप्यस्ति, अनिर्वचनीयत्वसाधनेन स्वप्नसृष्टिवत् जागरितमप्यज्ञानकल्पितमिति आबालवृद्धप्रसिद्धमिदं, स्वात्माज्ञानं बन्धने कारणं स्वात्मज्ञाने तन्निवृत्तिश्च मुक्तिः इत्याह। भ्रमविषयो रजतादिः न सत्, न चासत्, यतो हि आकाशतत्कुसुमयोः भ्रान्तिः कस्यापि न भवति, नापि सदसदात्मकः, तादृशं वस्तु न कुत्रापि किंचिदपि दृश्यत इति ।[3] भ्रमस्य निरालम्बनत्ववादोऽसमीचीनः, निर्विषयज्ञानाभावात्, भ्रमस्य च ज्ञानरूपस्य आलम्बनं विना नोत्पत्तिरेव जातुचित् । अतो रजतादिभ्रमोत्पादान्यथानुपपत्या सदसद्विलक्षणमेकमालम्बनमवश्यमेषितव्यम् ।[4] मायानिबन्धनस्यापि गुरुशास्त्रादेः सत्यसाधकत्वम् । एवं मिथ्याभूतस्यापि स्वप्नवत् सत्यकार्यजननहेतुत्वं संभवति । स्वप्नगजतुरगादिर्मिथ्याभूतोऽपि शुभाशुभफलसूचको दृष्टः, यथा वा योगिनो जागरे सवितृमण्डलेऽविद्यमानच्छिद्रदर्शनं तस्य सत्यमरणसूचकम् एवं मिथ्याभूतमपि क्वचित् सत्यकार्यकारि भवति । प्रकृते च गुरुशिष्यशास्त्रशासनादि सर्वं मायानिबन्धनमपि अद्वयात्मबुद्धिकारणं भवति । एतत्प्रतिपादनायैव "सूचकश्च हि श्रुतेराचक्षते च तद्विद"[5] इति सूत्रं प्रववृते । अग्रहणमनिर्वाच्यमिदं तथा तन्मूलकं सनिमित्तं तापत्रयमपि समुपशाम्यति, अत्र तादृशबुद्धेः स्वाभिव्यक्तवस्तुबलमेव कारणम् । "आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्"[6] इति श्रुतिरेव मुक्तौ प्रमाणमेषाम् । अद्वितीयं सदात्मतया मीमांसितं सत् यदा ज्ञातं भवति तदेव प्रयोजनम् । तमो निवृत्तिस्तु नान्तरीयकं फलम् ।

शास्त्रस्य निवृत्तिशास्त्रत्वे प्रवृत्तिशास्त्रत्वे च मतभेदः

ज्ञानाधिकारिणः केवलनिवृत्तावेवाधिकारः न प्रवृत्ताविति केचन । तस्याधिकारिणो निवृत्ताविव प्रवृत्तावप्यधिकार इति परे । अत्र द्वितीयपक्षः निपुणाचार्यपरम्परागतरीत्या ग्रन्थकृता अग्रे समर्थितः । उत्सर्गतः शास्त्रमिदं सकलकर्मनिवृत्तिपरम् । कुतः, सन्यासबोधकशास्त्रशतमत्र प्रमाणमिति । अथापि

1. ब्र.सू. - 3-2-1
2. Ibid 3-2-3
3. द्र.सं.शा. 1-339
4. Ibid 1-340
5. ब्र.सू. 3-2-4
6. केनो. 2-4

प्रतिप्रसवनयेन सामान्यतः परित्यक्तस्य विशेषविधायकेन पुनर्विधानवत् ज्ञानाधिकारिणः सर्वकर्मनिवृत्तिः सामान्यतः 'श्रोतव्यो मन्तव्य' इति पुनर्विशेषविधानात् श्रवणादिषु शौचादिषु च प्रवृत्तिः स्मृतिविहितेषु न्याय्येति आत्मसाक्षात्कारपरिपाकफलायेति ।[1] यथा यमस्वरूपा सकलानिवृत्तिः, निवर्तकशास्त्रात् नियमस्वरूपानुप्रवृत्तिः प्रवर्तकात् । एवं निवृत्तिद्वयमस्ति बाह्यमान्तरं चेति । तदेतत् साध्यासाध्यरूपम् । तत्रान्तरं आत्मरूपं परमार्थसत् । बाह्यं शरीरसर्वेन्द्रियसंयमात्मक निवृत्त्यनुष्ठानसापेक्षमिति । निवृत्तिशास्त्रस्य प्रवृत्तिशास्त्रेण विधेयबोधनसाम्येऽपि निवृत्त्यनुष्ठानप्राधान्येन शास्त्रमिदं निवर्तकमित्युच्यते ।

पूर्वतन्त्रात् वैशिष्ट्यम्

पूर्वतन्त्रे षष्ठे लक्षणे विधिनिषेधशास्त्रप्रसिद्ध्यै, स्वर्गकामाधिकरण-कलञ्जभक्षणनिषेधाधिकरणादौ प्रवृत्तिनिवृत्त्यधिकारिचिन्ता कृता, अत्र तु एकमेव निवृत्त्यधिकारमार्गमाश्रित्य शास्त्रमिदं 'अथात' इति सूत्रकृता प्रवर्तितम् । निवृत्तिपरमेव शास्त्रमिदमिति सौत्रसिद्धान्तः यमनियमादिविधानैः वाङ्मनः-कायव्यापारनिवृत्तिरेव हि कथ्यते न पुनः प्रवृत्तिः । यदि प्रवृत्तिपरं तर्हि कर्मणां श्रुतिविहितनिवृत्तिबोधनं बाधितं स्यात् । तस्मात् श्रवणादिशास्त्रं परब्रह्मात्मधी-जननाय अनात्मश्रवणप्रवृत्त्यभावरूपमौदासीनन्यविशेषमेव शास्तीति अर्थादिवात्म-श्रवणादिप्रवृत्तिर्लभ्यते । 'लशुनं न भक्षयेत्' इत्यादिभक्षणगतौदासीन्यबोधादिव रागतः प्रवृत्तिविरतिः । शिष्यप्रश्नोत्तरसरण्या गुरूपदेशः; साधनचतुष्टयसंपन्नस्य शिष्यस्य गुरूपसन्नस्य गुरुं प्रति 'कोऽहं', असौ च कः?[2] सहजमनयोः स्वरूपं किं पृथक् उताभिन्नम्? इति संशयापन्नस्य प्रश्ने गुरूपदेशः, एवं प्रश्नस्योत्तरमिदं गुरूर्वदेदिति । त्वं प्रत्यगव्यवहितम्[3] अद्वितीयं ब्रह्मैवासीति, यदि त्वमत्रापि विरोधं पश्यसि सद्यः परिहराणीति महावाक्यमेव करतलबिल्ववत् अविरोधं बोधयति । वाक्यस्य कार्यपरत्वाभावेऽपि सिद्धार्थबोधकत्वसमर्थनं प्रायेण भाष्यवदेव । निषेधवाक्यस्येवाखण्डार्थबोधकत्वसमर्थनं, तदर्थम् अखण्डवाक्यार्थत्व- प्रतिपादनं निषेधवाक्यानाम् ।[4]

1. द्र.सं.शा. 1-84 तः 89 पर्यन्तम् ।
2. त्वंपदार्थः कः? तत्पदार्थश्च कः इति ।
3. साक्षात्
4. इदं भाष्यानारूढं नूतनम् ।

वाक्याप्रामाण्यशङ्का [1]

1) सद्वयं प्रतिशरीरं भिन्नमहं ममरूपमपरोक्षं च, तत्पदार्थस्तु अद्वयं परोक्षं चेति उभयोर्विरोधात् वाक्यार्थाबोधकत्वे न प्रामाण्यम्। आकाङ्क्षादित्रयस्य शाब्दबोधे कारणत्वात् प्रकृते तत्त्वंपदार्थयोरभेदयोग्यताभावात्तदबोध इति। यथा गौरश्व इति प्रयोगे सोऽयं देवदत्त इति वाक्यवदपि न लाक्षणिकाभेदपर्यवसायि भवतीदं मानान्तराधिगतार्थ एव तत्प्रसरात्, न तथेदं, तस्मादयोग्यत्वादखण्डार्थबोधकत्वमसंभवि, संसर्गबोधनमपि तथा, अतो वेदान्तानामप्रामाण्यम्।

2) स्वयं प्रभे वस्तुनि प्रमाणकृत्याभावादपि अप्रामाण्यम्।

3) सिद्धपरवाक्ये क्रियाभावेन तदनन्वितार्थबोधनसामर्थ्यं वाक्यस्य नास्तीत्यप्रामाण्यम्।

4) लोकेऽगृहीतसंगतिकत्वेन शब्दस्यापूर्वार्थबोधकत्वासंभवादप्यप्रामाण्यम्।

5) वाक्यपदतां विहाय केवलवर्णात्मनापि वेदस्य तद्बोधकत्वासंभव इति चाप्रामाण्यम्।

6) प्रमाणान्तरादवगत्यङ्गीकारे प्रतीचिवाक्यस्थानुवादकत्वापत्त्याऽप्रामाण्यम्।

7) प्रवृत्तिनिवृत्त्युभयहीनवस्तुबोधकत्वेनानर्थकत्वादपि अप्रामाण्यम्।

वेदवादिभिः अज्ञातार्थबोधकत्वं वेदस्याभ्युपगतम्, अज्ञातत्वं चैतन्यरूपे परमात्मनि सुदुर्लभं शीते जले अशीतत्वमिव, अतोऽपि न प्रामाण्यं तादृशम्। स्वयं प्रकाशेऽज्ञानं न तटस्थतयाप्युपाधिर्भवेत्, अतोऽज्ञानोपाध्यसंभवात् न प्रमाणधीसंभवः। एकस्यैव ब्रह्मणः प्रमातृ प्रमाणं प्रमेयमिति विभागेन परिणतौ स्थितौ कूटस्थताया ज्ञानैकरसताया भङ्गापत्तिः, तथा विज्ञानवादप्रवेशापत्तिश्च भेदप्रपञ्चस्य ज्ञानाकारत्वे, विभागस्यासत्यत्वेऽपि तर्हि परमात्मनोऽपि मेयत्वात् कल्पितत्व प्रसङ्गः, स्वप्रकाशत्वे मानविषयत्वानुपपत्तौ वेदान्तप्रमेयत्वमपि न स्यादिति, तदा अप्रमेयावबोधकत्वस्य प्रमाणे विरहात् वाक्यस्य प्रमाणताभङ्गः।[2]

---

1. वेदान्तानामप्रामाण्यशङ्का।
2. द्र.श्लो 1-115 तः 119 पर्यन्तम्।

किंच लोके स्वाज्ञानकल्पितमनिर्वचनीयमिति चाप्रसिद्धं, सकलतन्त्रेषु च सद् असद्वेति द्वयमेव प्रसिद्धं, न तद्विलक्षणम्। सिद्धान्तेऽपि वा अज्ञानमपि सन्न भवति, अभावतया[1] प्रथितमिदं तथा च द्वैतप्रसवहेतुरिति नैव सुवचम्। असतो वन्ध्यासुतादेः सत्कार्यजननस्याप्रसिद्धेः। एवमस्याज्ञानस्याप्रसिद्धौ तद्विङ्गीकारेण चैतन्ये तदज्ञाननिबर्हकत्वेन वेदान्तानां प्रामाण्यं निर्वोढुमशक्यमिति तेषामप्रामाण्यम्।

किं च, वाक्यजनितमतेः परोक्षतया ब्रह्मापरोक्षजनकत्वासंभवात्,[2] तज्जनितबुद्धिः ब्रह्मणि स्वप्रकाशेऽपरोक्षे परोक्षैवेति वा भ्रान्तिरिति वा स्यात्। शब्दस्वाभाव्यात् अपरोक्षेऽपि ब्रह्मणि परोक्षज्ञानजनकत्वमेव। एवमपरोक्षे परोक्षबुद्धिं अन्यदन्यदिति निषेधमुखेन जनयतो वाक्यस्य प्रामाण्यसिद्धिः कथम्? एवमपरोक्षवस्तुबोधनाशक्तानां कथं प्रामाण्यम्? किं च, अज्ञानस्य सत्वे असत्वे वा निवृत्त्ययोग्यत्वात्, सदसद्रूपस्य हेयस्य कस्यापि लोकेऽसिद्धेः, प्रमाणस्याज्ञान-निबर्हकत्वेन न प्रामाण्यम्। किं च प्रमाणस्याकारकत्वाच्च प्रमाणफलं न जन्यमिति सिद्धान्तरीत्यापि न प्रामाण्यनिर्वाहः, एवं चिदात्मनि प्रमाणं निरर्थकमित्यत वेदान्ताप्रामाण्यमिति।

तदप्रामाण्यपरिहारः

यदि वाक्यगम्यं संसर्गरूपं विशिष्टं वा स्यात् तदा पदयोरुभयोरपि वाच्यार्थभेदे विरोध एव स्यात्। कर्मकाण्डनिपुणोक्तं वाक्यार्थलक्षणं नात्रेष्टं, यस्मात् भेदादिवर्जितमेवाखण्डार्थं बादरायणपथानुगा वदन्ति, भेदादिरूपबोधनसमर्थं लौकिकं वैदिकं वा अखण्डार्थविलक्षणं भवत्येव। इदं तु न तथा, सोऽयं पुमानिति वाक्यवदिदं केवलमखण्डव्यक्तिनिष्ठं, संसृष्टार्थबोधकत्वे पदयोर्विरोध एव स्यात्। तद्देशतत्कालादिविशिष्टाभेदबोधने विरोधः। परं तु तदुपलक्षितार्थं लाक्षणिकमेकमेव बोधयतीतिवत् महावाक्यमपि लाक्षणिकवृत्त्या अखण्डचैतन्यमात्रपरमिति, अन्यथा अलाबुनिमज्जनोक्तिवदप्रमाणमेव स्यात्। 'न खल्वलाबु शुष्कमच्छिद्रं केवलं निमज्जति', शब्दस्य लाक्षणिप्रवृत्तेः प्रमाणान्तराधिगतार्थविषयकत्वं निर्वाहकमिति केवलं प्रलापमात्रम्। किंतु सिद्धत्वमात्रम्, अन्यदकारणमकिंचित्करमेव।[3]

1. ज्ञानाभावतयेत्यर्थः।
2. शब्दस्य परोक्षज्ञानजनकत्वमिति मतानुसारेणेदमुच्यते।
3. यथा अग्नेर्धूमजन्मनि पैङ्गल्यं निमित्तम् अग्नित्वमेव जननप्रयोजकं, तद्वत्।

महावाक्यं लक्षणावृत्त्याऽखण्डचैतन्यपरमित्युक्तम् । लक्षणावृत्तिः त्रिविधा, जहती, अजहती, जहदजहती चेति । गङ्गायां घोष इति जहती, शोणो बहिस्थित[1] इति शोणगुणविशिष्टाश्वे अजहती, सोऽयं पुमानिति तृतीया, तद्देशतत्कालादिपरित्यागेन वाच्यैकदेशे पुण्यक्तिमात्रे[2] अविरुद्धांशे जहदजहती । ''तत्वमसि''[3] इत्यत्र जहदजहत्या अविरुद्धचैतन्यमात्रस्वीकारेण अखण्डार्थबोधः । महावाक्यप्रसिद्धतत्त्वंपदार्थयोर्वाच्यार्थप्रसिद्धिप्रदर्शनार्थं ब्रह्मशब्दात्मशब्दयोर्व्युत्पत्तिप्रतिपादनं कृतं, अज्ञानाद्वयमायायुते शबले वाच्ये ब्रह्मशब्दस्य वृत्तिः । एवं बुद्धिशबलिते प्रत्यगात्मनि त्वमहंपदस्य तत्र तत्पदवाच्यशबलब्रह्मगताद्वितीयत्वमात्रमेकदेशं, त्वंपदवाच्यस्थं प्रत्यक्त्वं सर्वान्तरत्वं चैकदेशं भागं स्वीकृत्य लक्षणया अविरुद्धमखण्डार्थबोधनमिति ।

ब्रह्मणि चापरमस्ति तत्संपर्कात्तत्र तदुभयात्मके शबलेऽद्वितीयत्वं अन्यत् । एवं शबले मायावाच्याज्ञानशबले द्वितीये ब्रह्मपदं शक्तम् । तदेव तत्पदवाच्यार्थः स एव जगत्कारणम् । एवं महावाक्यीयत्वंपदार्थस्य वाच्यस्य कथनम् ।

प्रत्यक्त्वं[4] बुद्धौ तावदेकम् । तथा शुद्धे प्रतीचि चान्यत् प्रत्यक्त्वम् । तयोः संपर्कात्तत्कृतं प्रत्यक्त्वमपरं, आत्माब्दस्तद्वाची । स एव त्वमहमादिपदार्थः । तत्त्वंपदार्थयोरुभयोरपि अन्यतरमात्रे लक्षणाविनिगमनकारणाभावाल्लक्षणा, सोऽयं पुमानित्यादिवाक्ये प्रसिद्धैव प्रथमचरमभावोऽपि एकतरलक्षणायां विनिगमको न स्यात् व्यभिचारात् । 'तत्त्वमसी'ति सामवेदे[5] तत्पदं प्रथमपठितं, 'अहं ब्रह्मास्मी'त्यादौ यजुर्वेदे चरमं पठितमिति । लोकेऽपि 'सोऽयं पुमान्', 'अयमसौ' इति च विपरीतप्रयोगदर्शनात् उक्तनियामकं न स्यात् । लक्षणां विना वाच्यार्थयोरभेदज्ञानप्रतीतविरोधपरिहारोऽसंभवी, न खलु सद्वयस्याद्वयेनाभेदो जातुचित् । नापि परोक्षब्रह्मपदार्थेनापरोक्षत्वं पदार्थाभेदसंभवः उपलक्षितयोः लक्षणया स्वरूपैक्यं सुवचम् । छत्री, कुण्डली वासस्वी देवदत्त इत्यादिसिद्धविशेषणद्वयलब्धार्थयोरपि विशिष्टयोर्द्वयोर्मुख्यैकत्वासंभवे सुतरां विरुद्धविशेषणप्रयुक्तयोः विशिष्टयोः जीवेश्वरयोरेकत्वमसंभवीति कैमुतिकन्यायसिद्धम् । केनचिद्रूपेणैकत्वे त्रिविधलक्षणोच्छेदप्रसंगः ।

1. शोणो धावतीत्यत्र वा ।
2. देवदत्तादौ
3. छां 6-8-7
4. आन्तरत्वम् ।
5. छान्दोग्ये इत्यर्थः ।

साभासाज्ञानवाची यदि भवति पुनः ब्रह्मशब्दः तथा अहंशब्दश्चाहंकारवाची तदा जहल्लक्षणैव । नौरेषा रौति, लोहं दहति, रज्जुः सर्प' इत्यादाविव क्रमेण नौस्थपुरुषवन्हिसर्पाणामेव जहल्लक्षणया बोध इतिवत् चिच्छायायुक्ताज्ञानवाचिना ब्रह्मशब्देन, अहंकारवाचिनाऽहं शब्देन च लक्षणया अखण्डस्वरूपबोधनमिति पक्षान्तरम् । अस्मिन्पक्षेऽन्विताभिधानवादानभ्युपगम इति । पक्षद्वयाश्रयणं तु जहदजहल्लक्षणापेक्ष एवेति सिद्धिकाराः । तत्रापि संक्षेपशारीरकवचनं प्रमाणीकृतं संमतये-

अभिहितघटना यदा तदानीं स्मृतिसमबुद्धियुगं पदे विधत्तः ।
परदृशि पुनरन्विताभिधाने पदयुगलात् स्मृतियुग्ममेव पूर्वम् ॥[1]

तत्वदीपिकाकारास्तु अभिहितान्वयवादमेवोररीचक्रुरिति । सर्वथापि सिद्धान्तानुकूल्यादिति ।

निर्गुणे वस्तुतः कस्यापि गुणस्याभावेऽपि प्रत्यक्त्वादिगुणान्वयेन ब्रह्माहंपदयोः गौणीवृत्तिर्वास्तु, परतदितरबोधकयोः मुख्याभेदे विरोधात्, तदन्वयानुपपत्तिनिमित्ता गौणी 'सिंहो माणवकः', 'अग्निर्माणवक' इति लोके सा दृष्टेति । लक्षणाया गौण्या भेदोऽपि गुणसंबन्धनिमित्तकत्वतदभावाभ्यमिति । एवं नित्यशुद्धबुद्धमुक्तस्वभावः सत्यः सूक्ष्मो विभुः अद्वितीयानन्दसागरो यः परमात्मा, सोऽहमस्मि प्रत्यगित्यखण्डवाक्यार्थानुभवे न संशयः ।

केचन सच्चित्सुखाद्वयरूप एवेति । परे पुनः सच्चित्सुखात्मक एवेति । नित्यत्वादिनि ब्रह्मेतराणि न स्वरूपभूतानि, अपरनिवृत्तिरूपत्वात्[2] अभावधर्माणां भावरूपब्रह्मस्वरूपत्वासंभवादिति भावेनेत्थं वदन्ति । महावाक्यस्येव सत्याद्यवान्तरवाक्यानामप्यखण्डार्थत्वम् । तत्त्वंपदार्थविषयोक्तन्याय एव सत्यादिवस्तुषु योजनीयः यथा तत्र शबलावेव वाच्यार्थौ तथा अत्रापि सत्यज्ञानानन्दपदैः शबला एव वाच्यार्थाः । तत्र भागत्यागलक्षणया अखण्डपदार्थबोधः, सत्यादिलक्षणवाक्ये, लक्ष्यमेकं ब्रह्म मुख्यम् । तच्छेषतया

1. सं.शा. 1-384
2. कालपरिच्छेदाभावादिरूपत्वात् ।

लक्षणपराणि सत्यादीनि समुचितानि, यथा 'अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाती' त्यादौ क्रयसाधनत्वेन अरुणादिविशेषणार्थानामन्वयः शेषतया, तथैवात्रापि । परमत्र विशेषः, प्रथमं परस्परनिरपेक्षाणामेव विशेषणानां सत्यादीनां सत्यं ज्ञानं अनन्तं च यत् तद्ब्रह्मेति अन्वयेऽपि पश्चात् परस्परान्वयेन च अभेदेन बोध इष्यते । आरुण्यादीनां साक्षात् क्रयसाधनत्वासंभवेन एकहायनी गोद्रव्यावच्छेदकत्वेनान्वीयमानानामन्योन्यान्वयश्च । तदर्थं सत्यादिपदानां शबलवाचित्वबोधनम् । आकाशादौ काचिद्व्यावहारिकी सत्यता, प्रत्यङ्मात्रे तु पारमार्थिकी, तयोः सत्ययोः परस्परतादात्म्यसंबन्धात् समुदायनिष्ठा सत्यता, तत्र सति शबले सत्यशब्दः वाच्यवृत्त्या गृहीतः । एवं बुद्धिवृत्तौ ज्ञानता, काचित् । प्रत्यग्बोधे ज्ञानतान्या, तयोस्तादात्म्यात् बुद्धिवृत्तिविशिष्टचैतन्यवाची ज्ञानशब्दः । एवं बुद्धिवृत्तौ तावदानन्दत्वमेकं,[1] प्रतीचि चान्यत् पारमार्थिकम् । तयोः संपर्कात् अन्यदस्ति, तथा च विषयसंपर्कजनितान्तःकरणवृत्तिविशिष्टानन्दवाची "विज्ञानमानन्दं ब्रह्मे"[2] त्यादौ आनन्दशब्दः । एवमाकाशादौ नित्यता, शुद्धता सत्यता काचित् । प्रतीचि च नित्यता, शुद्धता, सत्यता काचित् । तत्संपर्कात् शबले नित्यता, शुद्धता, सत्यता काचिदस्ति । तथा च विशिष्टनित्यशुद्धवाचकौ भवतो नित्यशुद्धशब्दौ । तथा सत्यशब्दः गोवत्सादौ मुक्तता काचित् । एवमुक्तरीत्या यो यः सत्यादिशब्दः येन येन प्रवृत्तिनिमित्तेन यद्यदर्थे शबले रूढः, तत्रैव निमित्तभूते परमार्थसत्यतादौ लक्षणावृत्तिः । एवं च पूर्णं ब्रह्म सर्वत्र लक्षितोऽर्थः । एवं लक्ष्ये परमार्थसत्ये ब्रह्मणि ज्ञानत्वं सत्यत्वं चान्योन्यं मिलितं भवति तदा भेदाभावात् 'ज्ञानं सत्याभिन्नं' सत्यं च ज्ञानाभिन्नमिति भाति । तथा आनन्दत्वे तत्र स्वीकृते ज्ञानत्वं चायाति, ज्ञानत्वे स्वीकृते चानन्दत्वं तथा आनन्दत्वे सत्यत्वं, सत्यत्वे चानन्दत्वमित्यन्योन्यमव्यभिचरदेकत्र मिलितमिति । आनन्दं ज्ञानाभिन्नं, ज्ञानमानन्दाभिन्नं, आनन्दं सत्याभिन्नं, सत्यमानन्दाभिन्नमिति लक्षणया सत्यं ज्ञानमानन्दं ब्रह्मेत्यखण्डतया प्रतिभाति, एवं नित्यादिपदार्थेष्वपि लक्ष्यैक्यमनुसन्धेयम्[3] ।

---

1. व्यावहारिकम् ।
2. बृ. 3-9-34
3. अत्रार्थे वेदसिद्धान्तविदः सुरेश्वरादय एव मार्गदर्शिनः ।

कूटस्थबोधप्रत्यक्त्वमनिमित्तं सदात्मनः ।
बोद्धृताहन्तयोर्हेतुः ताभ्यां तेनोपलक्ष्यते ।[1]

इति नैष्कर्म्यसिद्धिवचनात्र प्रमाणम् । प्रतीचोऽनिमित्तबोधरूपत्वे प्रत्यङ्निमित्तं बुद्धेः बोधरूपत्वं, तद्धर्मः एवं प्रतीचोऽनिमित्ते[2] चात्मत्वे तन्निमित्तं बुद्धेरात्मत्वमिति । एवं चात्मा स्वभावतः सर्वान्तरः स्वप्रकाश इति स्वाभाविके एव बोधरूपत्वात्मत्वे इति । मूलमत्रभाष्यम् ''नासाक्षिकाचित्त- वृत्तिर्जानाति- नाभिधीयत''[3] इति । जहदजहल्लक्षणावत् जहल्लक्षणापि संभवेत् वृत्तिविशेषनियमने कारणाभावात् ।

''एष सर्वेश्वर एष भूताधिपति''[4] रित्यादिना वर्ण्यमानमैश्वर्यादिकं तु ''नेति नेति''[5] इत्यादिश्रुतिभिः प्रयत्नात् प्रतिक्षिप्तम् । ''यः पृथिव्यां तिष्ठन्''[6] इत्यादिना नियन्तृत्वरूपमैश्वर्यं ''अतोऽन्यदार्त''[7] मिति प्रतिषिद्धम् । अतोऽनुभवात्भवत् न स्वाभाविकम् । अतो वेदान्तवाक्यानां[8] संसर्गरूप- वाक्यार्थमपहायाखण्डद्वय- लक्षणवाक्यार्थे समन्वयः समनुनेयः ।

अखण्डवाक्यार्थप्रतिपादनक्रमः

तत्त्वमस्यादिमहावाक्यस्थले[9] प्रथमं सामानाधिकरण्येनान्वयो भवति, पदयोः[10] भवति, अनन्तरं तु पदार्थयोस्तदीययोः विशेषणविशेष्यभावेन अहंपदार्थतत्पदार्थयोः अन्तःकरणविशिष्टचेतनमायाविशिष्टचेतनयोः संसर्गान्वयः विशिष्टाभेदरूपान्वयो भवति । ततः पश्चादेव विशिष्टाभेदो बाधित इति विरोधभानम् । एवं विरोधे प्रतिभाते भागत्यागलक्षणायाः मुख्यार्थभेदान्वयबाधनिमित्तेन एकरसाखण्डभानम्[11] । तदुत्तरं लक्ष्यार्थयोरभेदवाक्यार्थभानमिति । तथा च तत्त्वंपदार्थाभ्यां विशेषणविशेष्याभ्यां लक्ष्यलक्षकतया संबन्धोऽस्यात्मन इति ।

1. नै.सि. 3-11
2. स्वाभाविके
3. सू.भा. 1-1-5
4. बृ. 4-4-21
5. Ibid 2-3-6
6. Ibid 3-7-3
7. Ibid 3-4-2
8. ज्ञेयपराणाम् ।
9. सत्याद्यवान्तरवाक्यस्थले च ।
10. पदानां वा, 'सामानाधिकरण्यमत्र पदयोः ज्ञेयस्तदीयार्थयोः' इत्यादिसंक्षेपशारीर- कवचनं (सं.शा. 1-196, 197) द्रष्टव्यम् ।
11. अन्तःकरणोपलक्षितमायोपलक्षित- चेतनभानम् ।

एवमर्थप्रतिपत्तिसाधनपदानि क्रमेण बुद्धि पदवीमारोहणीयानि सर्वत्र । इत्थं मुमुक्षुणा वाक्यार्थबोधे क्रमशोऽनुसन्धेयम् । एवं पदद्वयलक्षणया अखण्डार्थप्रत्ययवत् अवान्तरवाक्यीयसत्यज्ञानादिपदानां बहुलानामपि अखण्डार्थप्रत्यय उन्नेयः । एवं चित्तशुद्धिफलोदयं यावत् चिदचित्स्फुरणं स्फुटभेदज्ञानशून्यं तादात्म्यरहितं अध्यस्तात्यन्तिकभेदेनैव प्रतीयते, यथा 'अहं कर्ता भोक्ता' मायावी ईश्वरश्चेतन इति । अतः शबले शब्दार्थसङ्गतिम् अज्ञाः पूर्वं गृह्णन्ति । दृग्दृश्यविवेकात् पूर्वमेव शबले शक्तिग्रहः समेषां, न तदनन्तरम् । शक्तिग्रहानन्तरं तु इदमहङ्कारादि दृश्यम् । आत्मा दृगेवेति विवेकस्तु तर्कसूक्ष्मेक्षिकया, दृढलोहशलाकया नीरन्ध्रसंश्लिष्टशिलाविभजनवद् भविष्यति । अनेकात्मकशबले शक्तिग्रहः शब्दशक्तिकल्पनं वा अधिकारिणः केवलचिदुपस्थित्यभावनिबन्धनमिति एकत्रैव शक्तिः न तु शबले गौरवादिति प्रश्नस्यापि नावसरः । जहल्लक्षणास्थले लक्ष्यस्य वाच्यसंबन्धित्वेनैव लाक्षणिकपदजन्यज्ञानमिति नियमो नास्ति ।

1. तथा जहदजहल्लक्षणास्थलेऽपि । 2. लक्षणावृत्त्यभावेऽपि अखण्डार्थबुद्धिसंभवः । 3. एकपदलक्षणयापि । 4. पाणिनिसूत्रं प्रथमाविभक्तिविधायकमप्यखण्डार्थसूचकम् । 4. एतदर्थं समन्वयूत्रविवेचनम् ।[1]

'तत्र द्विधा सामानाधिकरण्यं मुख्यं लक्ष्यं चेति । लक्ष्यमत्र ग्राह्यं, संसर्गरहितमखण्डपर्यवसायि । तथा हि, तत्तु समन्वयादित्यत्र अन्वयपदेन मुनिः सामानाधिकरण्यम् आह । तत्र 'सम्' इत्युपसर्गो व्यावर्तकविशेषणम्, किं व्यावर्तयति कस्मात् इति चेत् गौणान्मुख्यं सामानाधिकरण्यम्; 'नीलमुत्पलमि'त्यत्रेव नैल्यविशेषणम् । तत्र गौणं संसर्गरूपार्थपर्यवसायि, मुख्यमखण्डार्थनिष्ठम् । भिन्नप्रवृत्तिनिमित्तप्रयुक्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम् इति उभयसाधारणं निर्वचनम् । नीलं सुगन्धि महदुत्पलं इत्यादि गौणम् । सोऽयं पुमान्, जलशरावप्रतिबिम्बितो विवस्वान् आकाशगो रविरिति मुख्यम् । तत्र पर्यायशब्दानां एकस्मिन्नखण्डे वृत्तित्वं मुख्यम् । संसर्गवस्तुनि न तत् सङ्गच्छते । नानारसे विषये पुनः तद्घटेत नीलमित्यादौ । एकत्र वृत्तिरित्यनेन

1. पंचपादीतुल्यम् ।

भिन्नवस्तुपर्यवसायिपदसामानाधिकरण्यव्यावृत्तिः कृता । तत्र वैय्यधिकरण्यमेव । यथा 'कुडचं गृहस्य, सरसोऽम्बु' इत्यादि । भिन्नप्रवृत्तिनिमित्तकत्व-विशेषणेन पर्यायपदव्यावृत्तिः मुखं वदनमाननमित्यादि । अत्र प्रवृत्तिनिमित्तैक्यमिति पर्यायत्वम् । तत्त्वमसिवाक्ये तु न पर्यायता, प्रवृत्तिनिमित्तभेदात्, वाच्यार्थांशे न वैय्यधिकरण्यं च, विशेषणविशेष्यभावाभावात् । अतः तत्त्वंपदयोः विशिष्टार्थाभेदबोधे विरोधात् एकरसैकभागे लक्षणा । अत्र च प्रकृष्टप्रकाशः चन्द्रः इत्युदाहरणम्, केवलव्यक्तिमात्रपरत्वात्पदयोः । नीलोत्पलादिदृष्टान्तेषु न व्यक्तिपरत्वं, स्ववाच्यार्थसंसर्गमात्रपरत्वात् बाधाभावाच्च न लक्षणा तत्र । अविरोधेऽपि तत्र लक्षणा यद्यङ्गीक्रियते नीलत्वोत्पलत्वजात्युपलक्षिताखण्ड-व्यक्तिबोधो भवेत्, तदा तत्तुल्यतैवात्र ।[1] वस्तुतोऽत्र विरोधाभावान्न लक्षणा, नाप्यखण्डार्थता । प्रकृष्टप्रकाशवाक्ये तु न संसर्गपरत्वम् । प्रकृष्टत्वप्रकाशत्वजातिद्वयाश्रययोर्भेदात् । तद्वैशिष्टचस्य चन्द्रेऽभानात् । अतः चन्द्र-पदाभिधेयमात्रप्रश्नानुसारेण उत्तरे वक्तव्येऽस्मिन् चन्द्रमात्रव्यक्तिरेव बोधनीया । चन्द्रस्य तेजोविशेषत्वात् तद्विशेषमात्रस्य तत्स्वरूपत्वान्न जातिद्वयाश्रय-व्यक्तिद्वयतादात्म्यं तत्स्वरूपमिति न ततः सिध्यति । अतोऽत्र जहल्लक्षणया पदाभ्यामखण्डार्थसिद्धिः तथा तत्त्वमसीत्यत्रापि ।

एकपदलक्षणयापि अखण्डबोधसमर्थनम्

अबोधनाशः[2] चितिश्चेति[3] पदद्वये एकरसात्मनिष्ठे, तत्राद्यं पदं मुख्यं, द्वितीयं तु लक्षणावृत्तिविशिष्टम् । पदान्तरसंबन्धाय तदर्थान्वययोग्यतायै, कुतः, विद्यानिबन्धननिवृत्तिबोधकत्वात् । अविद्यानाशपदं मुख्यार्थं, चितिपदं[4] स्ववाच्येऽन्तःकरणपरिणामरूपवृत्त्यवच्छिन्नचैतन्यरूपे शबले रूढं स्वकीयमेकदेश-मन्तःकरणपरिणामांशं परित्यज्य चैतन्ये पर्यवस्यति । सर्वत्र विधिपदानि[5] भागत्यागभागान्तरसमर्पणाभ्यां सर्वथाऽविषयात्ममतिं जनयन्ति । नैवं मिथ्याभूतार्थनिवृत्तिबोधकपदानि तादृशीं वृत्तिं जनयन्ति ।

---

1. कल्पतरावपि इदमुदाहरणमुक्तरीत्या विवेचितम् ।
2. अविद्यानिवृत्तिः
3. ज्ञानमिति 1
4. ज्ञानपदम् ।
5. भावबोधकपदानि सत्यादीनि ।

लक्षणां विनाऽपि अखण्डार्थत्वम्

'भिन्नो घटः', 'अभिन्नो घटः' इत्याद्युदाहरणेषु परपक्षे भेदस्याभेदस्य च वस्तुस्वरूपत्वे वाच्ये भिन्नघटशब्दार्थयोः अभिन्नघटशब्दार्थयोश्च एकार्थत्वात्, लक्षणां विनैव एकप्रातिपदिकार्थमात्रनिष्ठत्वमित्यखण्डार्थत्वम् । अत्र भेदाभेदयोः स्वरूपातिरेकित्वे स्वीकृते भेदाभेदपरम्परापत्तिः[1] भेदाभेदयोः धर्मिणोः भेदे भेदान्तरम् अभेदेऽभेदान्तरमिति यावत्[2] ।

अत्र पक्षे[3] यद्यपि भिन्नाभिन्नघटादिशब्दानां पर्यायतापत्तिः तथापि परस्परसापेक्षस्वरूपमभाव एव प्रवृत्तिनिमित्तं तदादायैव भिन्नादिशब्दः, घटादिशब्दस्तु निमित्तीकृत्य प्रवर्तत इति न पर्यायता ।

एवमभिन्नो घट इत्यादावपि परस्पराभावस्य पूर्वोक्तस्याभाव एव अभिन्नपदप्रवृत्तिनिमित्तं घटस्वरूपमेव घटपदप्रवृत्तिनिमित्तमिति न पर्यायता । अत्रोदाहरणयोः मुख्यवृत्त्या अखण्डार्थसम्मतिः परेषाम् । धर्मभेदवादिनां संमतोदाहरणं तु -

भेदो भिन्नश्चातिरेकोऽतिरिक्तोऽभेदोऽभिन्नः संविदः स्वप्रकाशाः ।
इत्येतस्मिन् विद्यते नार्थभेदो वेदान्तानामप्यखण्डस्तथार्थः ॥[4] इति ।

विचार्यमाणे वस्तुतोऽर्थभेदो नास्त्येव इत्यखण्डार्थत्वम् । एवं वेदान्तानामखण्डे ब्रह्मणि समन्वयो दर्शितः वाक्यस्याखण्डार्थत्वे वादिमतादपि प्रसिद्धिर्दर्शिता । पुनरपि वैशेषिकमते प्रसिद्धिं प्रदर्शयामास तद्धाढर्यार्थं यथा - 'संबन्धः समवाय' इति वैशेषिकोच्चरिते पदे अखण्डव्यतिरिक्तं न किंचिदपि विषयीभवति, समवायस्य स्वेनैव संबन्धासंभवात्, संबन्धान्तराभ्युपगमेऽनवस्थपातात्, केवलसमवाय एवाखण्डो विषयः, असंबद्धत्वादेव विशिष्टबुद्धिर्न भवति ।[5]

---

1. अनवस्थापत्तिः इत्यर्थः।
2. 'भावान्तरमभावो हि कयाचित्तु व्यपेक्षया' इति वदतां स्वरूपभेदवादिनां मतानुसारेणेदमुक्तम्।
3. स्वरूपभेदवादिपक्षे ।
4. सं.शा. 1-215
5. अवयवावयवि-जातिव्यक्ति-गुणगुणि-क्रिया - क्रियावद्-नित्यद्रव्यविशेषरूपाणां पंचानामेव द्वन्द्वानां समवायाभ्युपगमात् समवायस्य समवायान्तराभ्युपगमे सिद्धान्तहानिः इति भावः ।

प्राभाकरमतेनापि अखण्डार्थसिद्धिः

'शब्दो गकार' इत्यादौ लौकिकवाक्ये पदद्वयसत्त्वेऽपि प्राभाकरमते गकारव्यक्तिमात्रादन्यत् पदद्वयबोध्यं नास्तीत्यखण्डार्थत्वम् । एवं पाणिनिवैशेषिकप्राभाकरोक्तोदाहरणेषु यथाऽखण्डार्थप्रसिद्धिरस्ति, सैषा वेदान्तेषु स्वीकृता, एतत्सूचनार्थमेव समन्वयादित्यत्र 'सम्' इति पदं विशेषणम् । ''सत्यं ज्ञानमनन्तं ब्रह्मे''[1] ति शास्त्रेण सत्यज्ञानादिरूपशब्दैः न ब्रह्म बोध्यते वाच्यवृत्त्या, कुतः, जातिगुणक्रियायदृच्छाशब्द- संबन्धसामान्यार्थरूपप्रवृत्तिनिमित्तानां वस्तुतो ब्रह्मण्यभावात्, परं तु आविद्यकाः शब्दाः प्रयुक्ता अपि शक्त्या गवादिपदवत् ब्रह्म न बोधयितुं क्षमाः । अतः सर्वपदलक्षणयैव बोधयेयुः । मनोऽपि सर्वसाक्षिणि तत्र न प्रवर्तते, सदा पराङ्मुखत्वात् । एवं च वाङ्मनसातीते मुख्यवृत्तिर्दुर्वारा । एवं सति शास्त्रप्रमाणकत्वं कथमिति शङ्का । समाधानं तु, आत्मनि अविद्याकल्पितभेदनिवृत्तिमात्रे शास्त्रं प्रमाणं, यथा घटज्ञानं संविदिति गुरुमते वा प्राकट्यं ज्ञाततेति भट्टमते च ज्ञानफलं स्वप्रकाशमिति तत्र प्रमाणं यथा न विषयीकरोति, अवश्यमज्ञाननिवर्तकत्वमात्रेण प्रमाणमिति अवश्यवक्तव्यतामापतति तद्वदत्रापि । तथा च ब्रह्मणः कर्मत्वं[2A] ज्ञाततां, तद्विषयं ज्ञानं वा प्रमाणं नैव जनयति । स्वप्रकाशत्वात्तेषाम् । लोके कृत्यनिष्पाद्यस्य अकार्यस्यापि कूपखनने प्रकाशितस्य कूपाकाशस्य कुद्दालकादिकारकैः पार्थिवपाषाणादिमूर्तवस्तुमात्रस्य बहिर्निःसरणेनैव तस्य कार्यत्वं गौणं यथा, तद्वदत्राप्रमेयस्यापि मेयत्वम् इति । तत्र पक्षद्वयम्; एवं विधिरूपवेदान्तवाक्याना[3] मखण्डार्थपरत्वमिव निषेधवाक्यानामपि ''नेति नेती''[4] त्यादीनां तत्परत्वम्, अतः समं प्राधान्यमुभयेषां वाक्यानाम् । अथवा विधिवाक्याददद्वितीयं ब्रह्मैवास्मीति शाब्दी प्रतीतिः, सकलद्वैतनिषेधान्यथानुपपत्त्या तादृशीप्रतीतिरार्थी प्रथमः । द्वितीयः कल्पस्तु विधिवाक्यं शबलवाचित्वात् निर्भेदार्थाकारवृत्तिज्ञानजननेऽसमर्थमिति न ततोऽज्ञाननिवृत्तिः । अतो निषेधवाक्यमेव फलवत्प्रधानमिति, संबन्धसामान्यशून्यत्वादपि शक्यसंबन्धादिरूपलक्षणापि न महावाक्येषु, अतो

---

1. तै.उ 2-1
2. विषयत्वम् 1
3. भावबोधकवेदान्तवाक्यानाम् ।
4. बृ. 2-3-6

विधिवाक्यं प्रतिषेधवाक्यशेषमेवेति केचन वदन्ति तन्न युक्तम्; अध्यस्तभेदमात्रविलयव्यापारमात्रपरं निषेधवाक्यं मुमुक्षोः स्वाकारग्रहणक्षम-विद्याजनने न समर्थम्, किं तु विधिवाक्यमेव तत्त्वमस्यादि, मुक्तिफलकबुद्धिजननसमर्थं, साक्षात्स्वरूपबोधनात्, अज्ञातवस्तुनः तादृशबोधं विना तद्विषयभ्रमनिरासादृष्टेः, अस्थूलादिनिषेधवाक्यजनितमतिः स्वस्वरूपाकारं न विषयीकरोति। रज्ज्वज्ञानकृतसर्पभ्रमस्य रज्जुरियमिति रज्जुस्वरूपप्रकाशकज्ञानं विना नायं सर्प इति निषेधेऽपि तदनिवृत्तेः। अतोऽपि प्रत्यगभिन्नब्रह्मविद्याकृतभ्रमस्य तन्मूलदुःखस्य च तत्संवित्तिं विना "नेति नेति"[1]ति केवलधीमात्रे प्रशमनासंभव इति। न विधिसाम्यं निषेधस्य, नापि निषेधवाक्यं प्रधानम्, अपि तु तत्त्वमादिविधिवाक्यमेव। निषेधस्य तत्पदार्थशोधकतया तच्छेषत्वमेव।

अत्र पक्षान्तरम्निषेधवाक्यं विधिवाक्यार्थज्ञानसामर्थ्यसिद्धद्वैतनिषेधानु-वादकतया महावाक्योपकारकमिति केचन, सोऽपि साधुः। अतः 'तत्त्वमसि' इत्यादिविधिवाक्यान्येव सृष्टिस्थितिप्रलयसंयमनप्रवेशबोधकैः पञ्चविधैरर्थवादैरज्ञानं निबर्हन्ति। उत्तरत्र "प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूय[2]" इति सूत्रे "नेति नेति"[3] इति पूर्वं मूर्तामूर्तादिसकलद्वैतनिषेधानन्तरं "अथ सत्यस्य सत्यम् प्राणा वै सत्यं तेषामेष सत्य"[4] मिति विधिवाक्येन पुनस्तत्त्वबोधनस्य श्रुत्यनुसारेणोक्तेः सूत्रकाराणां चेदमेवाभिमतमित्यवगम्यते। तथा च समन्वयसूत्रोक्तदिशा सत्यज्ञानादिवाक्यानि तत्त्वमादीनि च साक्षादज्ञानं निबर्हन्ति तत्त्वबोधनेनेति प्रधानानि तानि[5]। एवं सत्यादिवाक्यैः तत्पदार्थशोधनेऽपि अनन्तमित्यभिहिते अस्थूलादिनिषेधवाक्यजधिया द्वैतप्रत्याख्यानं विना तदानन्त्यानिर्णयात् तद्दृढीकरणाय निषेधवाक्यमावश्यकं तदङ्गम्। एवं जीवशोधकवाक्यैः शोधितजीवस्वरूपस्य शोधिततत्पदार्थेन सह ऐक्यसंपत्तये पदयोरर्थद्वयमपि प्रत्यगद्वयं चाभिन्नं तदिति बोधनीयम्, शोधिततत्त्वंपदार्थयोरैक्यं प्रत्यक्षीकर्तुं पदद्वयलक्ष्ययोर्भेदकाभावेन भेदाभावात् सुशकमिति, सत्यादिवाक्यैरनृतजडादिव्यावर्तनद्वारा निवृत्तसकलप्रपञ्चं परमं विष्णुपदमेवात्मेति वाक्यादेव बोध्यते।

---

1. बृ. 2-3-6
2. ब्र.सू. 3-2-22
3. बृ. 2-3-6
4. Ibid 2-1-20
5. द्र.सं.शा. 1-261, 262, 263

अत्र केचन निषेधवाक्यव्यापारवर्णनमिदं भाष्यवार्तिकविरुद्धमित्यालिखन्ति, तदिदं विमर्शनं युक्तमिव भाति, यत्पूर्वं निषेधवाक्यव्यापारवर्णनं विविधमुदाहृतम्। तदेतत् सूत्रकाराभिमतमित्यापाततः, यतो भाष्यवार्तिकविरुद्धम्। बृहदारण्यक भाष्ये "अथात आदेशो नेति नेति[1] " इत्यादिव्याख्यानावसरे "अथ अनन्तरं सत्यस्वरूपनिर्देशानन्तरं यत्सत्यस्य सत्यं तदेवावशिष्यते यस्मात्, अतस्तस्मात् सत्यस्य सत्यं स्वरूपं निर्देक्ष्यामः। आदेशो निर्देशो ब्रह्मणः, कः पुनरसौ निर्देश इत्युच्यते नेतिनेतीत्येवं निर्देशः। ननु कथमाभ्यां नेतिनेतीतिशब्दाभ्यां सत्यस्य सत्यं निर्दिदिक्षति? उच्यते, सर्वोपाधिविशेषापोहेन यस्मिन् कश्चिद्विशेषोऽस्ति, नाम वा रूपं वा कर्म वा भेदो वा जातिर्वा गुणो वा तद्द्वारेण हि शब्दप्रवृत्तिर्भवति, न चैषां कश्चिद्विशेषो ब्रह्मण्यस्ति, अतो न निर्देष्टुं शक्यते 'इदं तदिति'। गौरसौ स्पन्दते शुक्लो विषाणीति' यथा लोके निर्देश्यते। किं तु ब्रह्मणि अध्यारोपितनामरूपकर्मद्वारेण ब्रह्म निर्दिश्यते 'विज्ञानमानन्दं ब्रह्म' 'विज्ञानघन' 'ब्रह्म', 'आत्मा' इत्येवमादिशब्दैः। यदा पुनः स्वरूपमेव निर्दिदिक्षितं भवति, निरस्तसमस्तोपाधिविशेषं तदा न शक्यते केनचिदपि प्रकारेण निर्देष्टुं तदा अयमेवाभ्युपायो यदुत प्राप्तनिर्देशप्रतिषेधद्वारेण नेतिनेतीति निर्देशः"[2] इति "यदा तु सर्वदिक्कालादिविवदिषा निवर्तिता स्यात् सर्वोपाधिनिराकरणद्वारेण तदा सैन्धवघनवदेकरसं प्रज्ञानघनमनन्तरमबाह्यं 'सत्यस्य सत्यम्' अहं ब्रह्मास्मी'ति सर्वतो निवर्तते, विविदिषात्मन्येवावस्थिता प्रज्ञा भवति"[3] इत्यन्तं भाष्यम् - 'ब्रह्म ज्ञपयिष्यामि' इति प्रक्रमानुसारेण निषेधमुखेनैव साक्षान्निर्विशेषस्वरूपनिरूपणपरं मुख्यमेवेति भाति। तथा विज्ञानमयस्यैव संव्यवहार्यमात्मस्वरूपं ज्ञापयितुमिष्टं स्यात्, तदा प्रध्वस्तसर्वोपाधिविशेषं तत इयं प्रतिज्ञा प्रागुक्ता अर्थवती स्यात् येनायं ज्ञापितो[4] जानाति स्वात्मानमेव अहं ब्रह्मास्मीति', शास्त्रनिष्ठां प्राप्नोति न बिभेति कुतश्चन। अथ पुनरन्यो विज्ञानमयोऽन्यो 'नेति नेती'ति व्यपदिश्यते, तदा अन्यददो ब्रह्म अन्योऽहमस्मीति विपर्ययो गृहीतः स्यात् 'नात्मानमेवावेदहं ब्रह्मास्मीति' इत्थं प्रपूर्वभाष्यावलोकनेन तत्त्वमादिमहावाक्यवदेव निषेधवाक्यमपि साक्षात् त्वंपदार्थस्य निर्विशेषस्वरूपैक्यबोधने तुल्यमेवेति। अतोऽनुवादकत्वं वा

1. बृ. 2-3-6
2. बृ.भा. 2-3-6
3. Ibid
4. मुमुक्षुः।

अङ्गाङ्गिभावो वा विधिनिषेधवाक्यानां ब्रह्मपराणामिति संक्षेपशीरीरकोक्तं विचिन्त्यम्, इदं वार्तिकविरुद्धं च ।[1]

शास्त्रप्रामाण्ये आक्षेपपरिहारौ

प्रथम आक्षेपः- सिद्धं वस्तु ब्रह्म प्रमाणान्तरयोग्यं किम्? तर्हि तादृशार्थबोधकस्य सापेक्षता स्यात् इति । परिहारस्तु-परिनिष्ठितत्वं न प्रमाणान्तरयोग्यतायां प्रयोजकम्, किं तु रूपरसादिमत्वम्; तत्तु न ब्रह्मणि, अतः प्रमाणान्तरनिरक्षेपमेव वेदान्तवाक्यमत्र प्रमाणीभवति । तथा लोकप्रसिद्धपदविषयतानिमित्तमन्यप्रमाणविषयत्वम्, ब्रह्मणि तदपि नास्ति, अतः कथं मानान्तरविषयत्वम् । लोकप्रयुक्तपदगोचरत्वं कार्येऽस्ति, तेन कार्यपरवाक्यं सर्वं तथा भवेत्, न तु वेदान्तवाक्यं लिङादिवल्लौकिकपदत्वाभावात् ब्रह्मपदस्य इति ।

द्वितीय आक्षेपः- क्रियापदापेक्षयैव पदानि वाक्यभावेन सम्यगन्वयरूपां संहतिमाप्नुवन्ति लोके, प्रकृते वेदान्तेषु क्रियापदाभावात् कथं पदानां परस्परं समन्वय इति ।[2] समाधानम्- क्रियापदनिमित्ता एकैव पदानां संहतिरिति नियमो नास्ति, पक्वमतिः पदानां क्रियां विनापि तदन्वयं ज्ञातुं समीहते । यथा, 'महीभुजोऽयं पुरुषो मनस्वी', 'वनस्पतेस्तत् फल'मित्यादौ क्रियां विनापि पदानि सान्वयानि दृष्टानि । क्रियापदावश्यकतायामपि विवक्षितार्थानुगुणमेव तद्ग्राह्यम्, न तत्त्वप्रतिघातकरं, तत्स्वीकारेऽपि वैय्यर्थ्यादिति - "अस्ति ब्रह्मेति चेद्वेद,"[3] "अहं ब्रह्मास्मि"[4] "तत्त्वमसि"[5] इत्यादौ अस्त्यादिक्रियापदस्य प्रचुरप्रयोगदर्शनात्, तावतैव पदसङ्घातसिद्धिर्वेदान्तेषु ।

तृतीयः आक्षेपः- तर्हि अस्तिपदवाच्या सत्ता, अनुभूतिः प्रमाणमिति प्रमाणसामान्यलक्षणं गुरुमते । तथा च प्रमाणविषयतायोग्यतैव सा सत्ता, तथा च ब्रह्मणो मानान्तरविषयताप्रसङ्ग इति । समाधानं तु-वस्तुस्वभाव एव सत्त्वम्[6],

1. द्र.बृ.वा. 2-3-187 तः 2-3-198 पर्यन्तम् । एतत्पर्यन्तं भाष्यानुसारं व्याख्याय 2-3-214 तः 234 पर्यन्तमपरं व्याख्यानं कृतं, तत्रैव द्रष्टव्यम् ।
2. क्रियापदनिमित्ता पदसंहतिः वेदान्तेषु न संभवतीत्यर्थः
3. तै.उ. 2-6-1
4. बृ. 1-4-10
5. छां. 6-8-7
6. तदपि वितथमवितथमिति द्विविधं व्यवहारकाले ।

इतरेतरसंकरेण सत्वं द्विरूपं सच्छब्दवाच्यम्[1]। तत्र वितथं वस्तुतोऽसदपि व्यवहारे सत्, अवितथं परमार्थसत् इत्यर्थः । शबले वितथांशं विहाय संवित्स्वरूपं परमार्थस्वरूपं सदेव मुमुक्षणा ग्राह्यम् । तदेव परमार्थं सद्ब्रह्मास्मीति, प्रभाकरोक्तं संविद्विषयत्वं सत्वं वा, तद्योग्यता वा सत्वं, स्वप्रकाशायां संविदि तद्विषयत्वासंभव इति, नाद्यः, नापि द्वितीयः, संविदोऽप्रकाशापत्तेः । स्वातिरिक्तघटादौ स्वविषयत्वं, न स्वस्मिन्नेव, यथा अग्नेः दहनशक्तिः न स्वात्मनि प्रयतते, अपि तु स्वातिरिक्ते दाह्ये काष्ठादौ तथा योग्यतापि न संविदि स्यात् । तदा उक्तसत्वाभावे तस्या अन्यत्वापातः, असत्वेऽनुभवाभावापातः, अतः सिद्धान्ते वस्तुस्वभाव एव सत्वम् ।[2]

चतुर्थ आक्षेपः- ब्रह्मादिविषये शक्तिग्रहः कथम्? प्रमाणान्तराविषयत्वादिति । समाधानम्-शबले शक्तिग्रहोऽस्त्येव, प्रमाणान्तरानधिगतेऽपि वृद्धजनसंव्यवहारमात्रेण, यूपादिवत् । 'यूपं तक्षति' इत्यादिप्रसिद्धार्थतक्षणादिवाचकपदसमभिव्याहारसामर्थ्यात् तादृशसंस्कारविशिष्टो दारुविशेषो यूप इतिवत् । तथा ''यतो वा इमानि भूतानि जायन्ते''[3] इति लोकप्रसिद्धार्थपदानां समीपे ''तद्विजिज्ञासस्व तद् ब्रह्मेति''[4] इति समुच्चरितत्वमात्रेण ब्रह्मपदव्युत्पत्तिग्रहसंभवाच्च । अथवा ब्रह्मणि शक्त्यग्रहणेऽपि ब्रह्मातिरिक्तप्रपञ्चप्रतिषेधमात्रेण ''नेह नानास्ति किंचन''[5] इत्यादिवाक्यजनितेन निष्प्रपञ्चं ब्रह्म सिद्ध्यति ।

पञ्चम आक्षेपः- सिद्धे वस्तुनि कथं वाक्यं प्रमाणम्? समाधानम् - यथा रूपे चक्षुरादि तथा ब्रह्मणि मानान्तरानधिगते वाक्यं प्रमाणमेव, यथा अभ्युदयसाधनप्रकाशकविधिवाक्यम् । वेदप्रमेयत्वे निष्पन्नत्वं वा पुरुषप्रयत्ननिष्पाद्यत्वं वा न प्रयोजकम्, अपि तु अनधिगतत्वम्, ''अनुपलब्धेऽर्थे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्''[6] इति[7] साध्य इव परिनिष्ठते वस्तुस्वरूपेऽपि प्रमाणत्वमविशिष्टवाक्यस्य । तत्प्रामाण्यानङ्गीकारे विधिवाक्यस्याप्यप्रामाण्यप्रसङ्गः ।

---

1. शबलात्मना ।
2. बाधायोग्यस्वभाव इत्यर्थः ।
3. तै.उ 3-1
4. Ibid
5. कठो, 4-11
6. जै.सू. 1-1-5
7. जैमिनिबादरायणयोः संमतम् ।

षष्ठ आक्षेपः- वस्तुस्वरूपान्वाख्याने किं प्रयोजनं, तदभावे कथं प्रामाण्यमिति । समाधानम्-अज्ञाननिवृत्तौ स्वात्मानन्दावाप्तिः फलमस्ति, वाक्यमेवाज्ञाननिवर्तकमिति, ''ब्रह्मवेद ब्रह्मैव भवति''[1] इत्यादिप्रमाणम् ।

सप्तम आक्षेपः- अविद्याकल्पितवाक्यस्य सत्यब्रह्मबोधकत्वं कथम् ? समाधानम् - स्वप्नादीनामविद्यमानानामपि सत्यार्थक्रियाकारित्वदर्शनात् ।[2]

अष्टम आक्षेपः- सगुणवाक्यानि निर्गुणबोधकानि किं भवेयुः ?समाधानम् -निर्गुणमेव अविद्याकल्पितै रूपादिभिः सगुणं भवति, अतः सगुणं सत्यासत्यरूपं सगुणविद्यावाक्यानामुपासनायामवान्तरतात्पर्यं निर्गुणबोधने महातात्पर्यमिति ।[3]

ब्रह्मणो जगत्कारणत्वे मतभेदः

साभासमज्ञानम्[4] उपजीव्यैव वियदादिजगत्कारणं भवति अद्वितीयचैतन्यम्, तस्य जगत्कारणत्वे साभासमज्ञानं द्वारमात्रं, चैतन्यस्यैव कारणत्वम् ।

दृग्व्यतिरिक्तं यज्जगत्कारणत्वेनाभिमन्यते प्रधानपरमाण्वादि तत् जडत्वान्न कारणमिति सूत्रकृतैव निराकृतम्, अजडकारणनिबन्धनं[5] सर्वं जडमिति, जडं नोपादानमिति वेदान्तिविचक्षणाशयः । अपरे पुनः ''आत्मन आकाशस्संभूतः''[6] ''आत्मा वा इदमेक एवाग्र आसीत्''[7] इत्यादौ आत्मशब्देन शबलं[8] निगद्यते, अतो जगत्कारणं शबलमेवेति । तत्रैव मते विशेषान्तरम् - यथा अन्तःकरणप्रतिबिम्बितचैतन्यं सुकृतदुष्कृतकर्मसु कर्ता जीवः, तथा अविद्याप्रतिबिम्बितं चैतन्यं कर्तृ भवति जगत् प्रति, एवं दृष्टान्तविधया शबलं जीवचैतन्यमेव सुकृतदृष्कृतोपादानमिव अविद्याशबलितमेव परमात्मचैतन्यं आकाशादिं प्रति उपादानं भवति ।

---

1. मुं. 3-2-9
2. स्वप्नाध्यायोक्तशुभाशुभसूचकानां बहूनां दर्शनात् ।
3. इदं भाष्यविरुद्धं, सगुणनिर्गुणवाक्यानां पार्थक्येन तात्पर्यवर्णनात् । किंतु ज्ञेयब्रह्मप्रकरणे पठित सगुणवाक्यानामफलानां निर्गुणब्रह्मवाक्यशेषत्वमस्ति इति उभयलिङ्गाधिकरणे सिद्धान्तितम् ।
4. चैतन्यछायायुक्तम् ।
5. चेतनकारणनिबन्धनम् ।
6. तै.उ. 2-1-1
7. ऐत. 1-1-1
8. अविद्याशबलम् ।

शबलात्मना शुद्धचैतन्यमेव लक्षणया तात्पर्येण निगद्यते, न तु आत्मपदेन शबलं तात्पर्येण कथ्यते, अतः शबलवाचि आत्मपदमपि शुद्धात्मनि लक्षणावृत्तिनिमित्तं प्रयुज्यते श्रुतिषु, आत्मादिपदेन शबलं शुद्धलक्षणार्थमेवोपस्थाप्यत इति शबलमेव तद्वाच्यमिति भ्रमो लोकस्य ।

अत्र सिद्धान्तः, अद्वयशासनेऽस्मिन् सकलवाङ्मनसातीता चितिः सकलवाङ्मनोव्यवहारभागिनी[1] भवति शुद्धशबलभेदेनेति अविद्याव्यवहरणमात्रम् इति भावः । चित्रायागस्य पशुफले श्रुतेऽपि तत्र यथाऽपूर्वं द्वारतया अर्थात् कल्प्यते तथैव चैतन्यात्मनो जगत्कारणत्वे श्रुतेऽपि कार्ये जननीये मायादीनां द्वारत्वं परिकल्प्यते, तथा च मायाशबलस्य न कारणत्वम्, अपि तु मायाद्वारेण चैतन्यात्मनो वदति श्रुतिः कारणत्वम् । तदिदं कारणत्वमुपलक्षणमेव, न तु विशेषणमिति, इदमपि केवलचेतनकारणत्वे उपपत्तिः, शबलनिष्ठं चेत्कारणत्वं तदिदं शुद्धस्योपलक्षणं न भवेत्, लक्ष्यावृत्तिधर्मस्य लक्षकत्वादर्शनात् । अतः शुद्धं शबलवृत्तिधर्मेण लक्षयितुं न शक्यते । मामकीनं विचिन्तनमिदं सूत्रसङ्गतं न वेति - "सर्वोपेता च तद्दर्शनात्"[2] इति सूत्रे मायाशक्तिभिः सर्वाभिरुपेतायाः सद्देवतायाः[3] कारणत्वस्य स्पष्टोक्तेः, "मायिनं तु महेश्वर"[4] मिति प्रकृतिभूतमायाविशिष्टस्य ईश्वरत्ववचनात्। भगवत्पादैः शुद्धस्य जगत्कारणत्वासंभवोक्तेश्च शबलनिष्ठमेव कारणत्वम् । कथमिदं शुद्धलक्षणं भवतीति चेत् इत्थम्- शबले विशिष्टे विद्यमानं लक्षणं शुद्धवृत्त्यपि भवति, विशिष्टस्य शुद्धादनतिरेकात्, शुद्ध एव विशिष्टस्य तादात्म्येन कल्पितत्वात्, विशेष्यवृत्तिप्रतियोगिको विशिष्टानु- योगिकोऽभावोऽप्रामाणिक इति तार्किकाणामपि अभिमतत्वात्, विशिष्टवृत्तित्वे विशेष्यवृत्तित्वमपि । विशिष्टशुद्धयोः अत्यन्तभेदस्थल एव अन्यवृत्तिधर्मस्य अन्यलक्षकत्वासंभव इति ।

स्वतन्त्रानुमानेन कारणमित्येव सिद्ध्येत्, स चैकोऽनेको वेति सः सर्वज्ञः सर्वशक्तो वेति च न निवार्येत, श्रुत्यैव परम् एकः सर्वज्ञः सर्वशक्त इति निर्णयो भवति, स चोपादानमिति "यतो वा"[5] इत्यादिश्रुत्या सिद्ध्यतीति, तथा च प्रकृतिः निमित्तं च स इति श्रुत्यैव निर्णयः ।

---

1. निर्गुणसगुणभेदेनेति यावत् ।
2. ब्र.सू. 2-1-30
3. ब्रह्मणः 1
4. श्वेता. 4-10
5. तै.उ. 3-1

जगज्जन्मादिहेतुत्वं लक्षणं उपलक्षणमेव[1]। लक्षणं च त्रिविधं लक्ष्यस्य, स्वलक्षणम्[2] विशेषणम्, यद्वा उपलक्षणमिति । लक्षणस्य सामान्यलक्षणं तु लक्ष्यार्थनिष्ठं सत् लक्ष्यान्तराद्व्यावर्तयत् सत् लक्ष्यमवबोधयतीति तत् लक्षणसामान्यलक्षणम् । स्वलक्षणं नाम स्वरूपलक्षणम्, तत् लक्ष्यस्वरूपमपि अर्थान्तराद्भेदकं भवति, यथा खं छिद्रम्, जलं द्रवमिति उदाहरणे, तथा ज्ञानानन्दादिस्वरूपं लक्षणम् । विशेषणं नाम स्वानुरक्तबुद्धिजनकं लक्ष्ये, तत्र विशेषणतया भाति, यथा केसरादिमानश्वः, अत्र केसरादि अश्वस्य[3] । उपलक्षणलक्षणं तु तटस्थलक्षणं यत्स्वानुरक्तबुद्धिजनकत्वशून्यं स्वरूपलक्षणभिन्नं च सत् व्यावर्तकम् । यथा काकवद्देवदत्तगृहमित्यत्र काकः तद्वत् जगज्जन्मादिहेतुत्वं ब्रह्मणः उपलक्षणमेव, यदि विशेषणं स्यात् तदा ब्रह्मपदार्थस्य लक्ष्यस्य भङ्ग एव स्यात् ।

लक्षणस्य विशेषविचारः

द्वितीयसूत्रे, प्रथमं, पृथिव्यादयः जनिमन्तः[4] विभक्तत्वात् घटादिवदिति जगति कार्यत्वमनुमेयम्, पृथिव्यादिमहाभूतानि जनिमन्ति, पृथिवीत्वादिमत्वात् प्रत्यक्षपृथिव्यादिवत्, महापृथिव्यादीनि चेतनकारणकानि, कार्यत्वात् घटवत्, एवं[5] सामान्यतः कार्यलिङ्गेन चेतनकारणानुमानेऽपि तदेकत्वनानात्वसर्वज्ञत्वादिसंशये तत्परिच्छेदाय यत इति एकत्वज्ञानम्, तथा प्रकृतिपञ्चमीनिर्देशात् प्रकृतित्वं च सिद्ध्यति, विनिर्णयश्च श्रुत्या "यतो वा इमानि भूतानि जायन्ते"[6] इत्याद्यया दृढीभवति । यत इति एकवचनविभक्त्यर्थविशिष्टस्वार्थाभिधायकत्वं न कापि दृष्टमिति चेतनकारणे कथमेकत्वनिर्णय इति तथा प्रत्ययस्य प्रकृत्यर्थान्वितस्वार्थबोधकत्वस्यैव व्युत्पन्नत्वेन प्रकृत्यर्थान्वितस्वार्थबोधन एव सामर्थ्यम्, न तु वचनस्य विभक्त्यर्थान्वितार्थाभिधान[7]इति, एवं विभक्तिरपि नेह वचनार्थे शक्ता इति शङ्कायां परिहारः - पशुना यजेतेत्यादौ संख्याकरणत्वयोरिव यत इति एकवचनप्रतीतैकत्वस्य पञ्चम्युपात्तप्रकृतित्वस्य च लक्ष्ये ब्रह्मणि समन्वयात् तद्बलात् जगत्प्रकृतित्वविशिष्टे

1. तटस्थलक्षणमित्यर्थः 1
2. स्वरूपलक्षणमिति यावत् ।
3. विशेषणम् ।
4. कार्याणि इत्यर्थः
5. यथा इति योजनीयम्
6. तै.उ. 3-1
7. अन्विताभिधानवादोऽत्र निराकृतः ।

तदेकत्वबोधः । वस्तुतस्तु जगत्प्रकृतितया यच्चेतनमवगतमनुमानेन तदेकं तद्ब्रह्मेति विजिज्ञासस्वेति सिद्धं लक्षणं महातात्पर्येण ब्रह्मणो बोधयति, तदपि प्रधानादिभ्यो व्यावर्तयदेव बोधयति, महावाक्यगततच्छब्दलक्ष्यमेव[1] दर्शयति । लक्षणपरे वाक्ये लक्ष्यार्थवाचिपदमेव प्रधानं अन्यद्गुणभूतम्, लक्ष्यबोधकमेकं ब्रह्मपदमेव भूतवस्तु बोधयितुमलम् । न जातु मर्त्यम् आनन्त्यं बोधयति, प्रधानलक्ष्यार्थानुगुण्येन जगज्जन्मादिकारणत्वमुपलक्षणमेव वक्तव्यम् । किं च लक्ष्यस्वरूपकथनार्थमिदमस्य वाचकमिति ज्ञापनाय, पृथिवी गन्धवतीतिवत् न भवत्यत्र । किं तु व्यावृत्तिरेव प्रयोजनं लक्षणस्य, तथा च ब्रह्मेतरप्रधानादिवस्तुजातात् व्यावृत्तये ब्रह्मणो लक्षणकथनम् । लोकेऽपि गवादिलक्ष्यं चक्षुषा उपलभ्य तन्मात्रवृत्तिलक्षणं सास्नादि दृष्ट्वा तेन महिषादितो लक्ष्यं व्यावर्त्य बोधयितुमेव जनः प्रवर्तते । तथा च अत्र ब्रह्मणि वाच्यवाचकभावसङ्गतिसिद्धये जन्मादिकारणत्वं लक्षणमाह, नापीदं स्वरूपबोधनपरम्, किं तु व्यावर्तयितुमेव लक्षणमाह ।

उपादानत्वं जडेष्वेवेति न नियमः, चेतनेऽपि लोके दृश्यते, यथा स्वप्नसृष्टौ आत्मनः "आत्मनि चैवं विचित्राश्च हि"[2] इति सूत्रकारैरेव[3] दर्शितत्वात्, तन्तून् प्रति ऊर्णनाभिरुपादानम्, यथा च केशलोमादीन् प्रति पुरुष उपादानम्[4] ।

तार्किकैः आत्मा गुणी स्ववृत्तिगुणादीन् सुखदुःखादीन् प्रति समवायिकारणमिति स्वीकृतमेव, निमित्तत्वं तु न विप्रतिपन्नम् । किं च लक्षणमिदं परिच्छिन्नवस्तुव्यवच्छेदार्थं, श्रुत्या[5] कालस्वभावपरमाणुजीवप्रधानादीनां स्कन्धक्षणिकविज्ञानशून्यादीनां च वादिदृष्ट्या कारणत्वं पूर्वपक्षतया शङ्कितमिति पूर्वपक्षप्रापितवस्तुपरिच्छेदव्यावर्तनाय लक्षणम् । एवमधिष्ठानाधिष्ठेयभावेन उपादाननिमित्तभावे प्रतीचो भेदे परैः शङ्किते सति पुनः परिच्छिन्नता प्राप्तेति तद्व्यावृत्तये लक्षणम्, ब्रह्मणः कस्माच्चिदपि भेदासिद्धिः प्रत्यग्वस्तुनो ब्रह्मत्वमपरिच्छिन्नत्वं च नित्यसिद्धमिति, दृग्वस्तुनो भेदसिद्धिर्निर्विषयैवेति ।

---

1. तत्त्वमस्यादिगत तच्छब्दलक्ष्यमित्यर्थः ।
2. ब्र.सू. 2-1-28
3. उपादानत्वस्य
4. यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति । यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् संभवतीह विश्वम् ॥ (मुं. 1-1-7) इति श्रुतिः ।
5. श्वेताश्वतरेणेत्यर्थः 1

एवमुक्तं जगत्कारणत्वमभिन्ननिमित्तोपादानत्वं चिह्नमेव[1] न तस्मिन् प्रमाणम्, तत्तु वेदान्तवाक्यमेव, तर्कस्य वेदं प्रति अङ्गत्वात्, एवं कारणवाक्यं सर्वं तत्पदार्थे ब्रह्मणि समन्वितम् । लक्षणं तु तटस्थमेव, तच्च तस्यानन्त्यसाधनाय, जीवीयविचित्रकर्मसहकारेण निमित्तभूतं सत् स्वात्मानमेव विवर्तयति ब्रह्मेति पर्यवसितार्थः । त्वंपदार्थस्य उक्तत्वात् द्वितीये तत्पदार्थेऽद्वितीये प्रतीचिवृत्तिर्वर्णिता, प्रथमे प्रमात्रादिविलक्षणापरोक्षचैतन्यमात्रे वृत्तिः, कथमिति चेत् अनधिकारिणि शुद्धचैतन्ये दृगृतदितरयोः परस्पराध्यासात् शमदमादिसाधनचतुष्टयसंपन्नत्वमिष्यते, तेन चैतन्येऽपि अधिकारितासिद्धिः । 'परमेश्वरस्वरूपमनधिकारितयैव स्थितम्, अथापि घनीभूताविद्यापटलावरणसंबन्धात् श्रवणाद्यधिकारितामवाप्नोति । वस्तुतस्तु अज्ञानतत्कार्यसंबन्धः चैतन्यस्य अधिकारं प्रति द्वारभूतमेव, कुतः? अचेतनस्य बुद्ध्यादेः केवलस्यानधिकारात् कर्तृत्वशक्तिराहित्यात् केवलस्य चेतनस्यापि विरहात् बुद्धिसंबन्धेनाविद्यकेन कर्तृत्वमस्तीति सूत्रकृतैव ''कर्ता शास्त्रार्थवत्वात्''[2] ''यथा च तक्षोभयथा''[3] इत्यादौ वर्णितत्वात् तथैव स्वीकार्यम् ।

वेदान्तानां कार्यपरत्वशङ्कानिरासः

नियोगो भावना वा लिङादेर्नार्थः, अपि तु वैदिकलिङादेः श्रेयोहेतुत्वमर्थः।[4]

श्रेयोहेतुत्ववाची यदि भवति तदा संभवत्येकरूपा
शक्तिस्तस्याभिधाने न तु भवति तदा कारकोऽयं प्रवृत्तेः ।
श्रेयो हेतुश्च वाच्यः श्रुतिवचसि तदा पौरुषेये च तुल्यः
क्लृप्तश्चासौ न कल्प्यः श्रुति वचसि यथा भावना लिङ्निबद्धा[5] ॥

भावना नाम धात्वर्थव्यतिरिक्ता नास्त्येव, अतो लकारार्थः तेनैवोक्त इति न तदर्थः कल्प्य इत्येवमादिसुदीर्घविचारेण नियोगभावनोभयाभावात्, कर्मकाण्डेऽपि श्रेयःसाधनत्वमेव विध्यर्थो वाच्यः, वेदान्ते तद्द्वयमपि नास्तीति वेदान्ताः न

1. तर्कवल्लिङ्गमेव इत्यर्थः।
2. ब्र.सू. 2-3-33
3. Ibid 2-3-40
4. इष्टसाधनत्वमिति यावत् ।
5. सं.शा. 1-398

कार्यपराः, अपि तु सिद्धपराः । निषेधवाक्येष्वेव न नियोगो न तद्विषयो वाऽस्ति फलविषयकरागनिवृत्तिरेव निषेधवाक्यार्थः । सा कार्यं तद्विषयो वा कथं भवेत्? नञः स्वसंबन्धिनिवृत्तिः अभाव एवार्थः लोकसिद्धः । तत्रापि निवृत्तिक्रियाविधिपरत्वे सर्वमेव विधिवाक्यं स्यात्, तर्हि विधिनिषेधविभागासङ्गतिः । कार्यवादिमते सर्वत्र वेदे विधिरेव, निवर्तकं किमपि नास्तीति निषेधेऽपि विधीयमाना क्रिया प्रवृत्तिविशेषरूपेति प्रतिषेधपरत्वं तन्मतेऽसंभवि । प्रतिषेधवाक्यवत् प्रकृते विधिशून्यानि वेदान्तवाक्यान्यपि सन्ति, तानि सिद्धपराणि फलपर्यन्तानि च भवन्ति, तत्त्ववाक्यादिभि[1] रुदितविद्यया अज्ञाननिवृत्तेः फलस्य दर्शनात् । सुविस्तृतविचारेण निषेधवाक्यानां कार्यपरत्वनिरासः कृतः, विस्तरस्तु आकरे ।

ज्ञाने विध्यसंभवनिरूपणम्

कर्तुमकर्तुमन्यथाकर्तुं वाऽशक्यमिदं ज्ञानम्, न ततो विधेयं, ज्ञाने ब्रह्मणि विधिर्निष्फलः, अज्ञाते सर्वथा तत्प्रत्ययो विधातुं योग्यः, ब्रह्मज्ञाने जाते प्रमात्रादिभेदाभावेन विधिकृत्यं किमपि नास्तीति तत्र विध्यसंभवः । 'वाजपेयेन स्वाराज्यकामो यजेत' इत्यादौ वाजपेयगुणविधाने विरुद्धत्रिकद्वयापत्तिर्दोषः[2] । तथा एकेन वाक्येन आत्मज्ञानविधानं प्रत्यगात्मनः प्रमित्सितस्य साधनं चेति विरुद्धत्रिकद्वयापत्तिः । अतः परमात्मवस्तुमात्रविषयाः उपनिषदः ।

सगुणवाक्यमपीह समन्वितं भवति निर्गुणवस्तुनि सर्वशः ।
न खलु निर्गुणवस्तुसमन्वयं न सहते सगुणस्य समन्वयः ॥[3] इति ।

सगुणं सत्यासत्यस्वरूपम्, तत्र सगुणवाक्यानामवान्तरतात्पर्यं, निर्गुणवाक्यतात्पर्यात् महाविषयात् विलक्षणमिति । सगुणवाक्यजन्यज्ञाने इदं रजतमिति भ्रम इव सत्यासत्यस्वरूपं वस्तु विषयी भवति, तथा तद्बोधकप्रमाणं सगुणविषयंसत्यमिथ्यावभासं संसृष्टार्थद्वयं दर्शयति । अयमत्र सूत्रभाष्यविरोधः । ''ये हि परविद्याधिकारे केचित्प्रपञ्चा उच्यन्ते यथा - 'युक्ता ह्यस्य हरयः शतादश,

1. महावाक्यैरित्यर्थः ।
2. उद्देश्यत्वम् अनुवाद्यत्वं, प्रधानत्वं चेत्येकं त्रिकम् । उपादेयत्वं, विधेयत्वं, गुणत्वं चेत्यपरं त्रिकम् । तत्राद्यं साध्यनिष्ठम्, अपरं साधननिष्ठम् । यागस्य युगपत् साध्यत्वं करणत्वमुच्येत तर्हि एकस्मिन् यागे विरुद्धत्रिकद्वयापत्तिः, स च दोषः इति ।
3. सं.शा. 1.463

अयं वै हरयोऽयं वै दश च सहस्राणि' इत्येवमादयः ते भवन्तु प्रविलयार्था इत्यादिना विचार्य अन्ते सर्वेषां च साधारणे प्रविलयार्थत्वे सति 'अरूपवदेव हि तत्प्रधानत्वात्' इति विनिगमनकारणवचनम् अनवकाशं स्यात् फलमप्येषां यथोपदेशं क्वचिद्दुरितक्षयः क्वचिदैश्वर्यप्राप्तिः क्वचित्क्रममुक्तिः इत्यवगम्यत एवेति अतः पार्थगर्थ्यमेव उपासनावाक्यानां ब्रह्मवाक्यानां च न्याय्यं नैकवाक्यत्वम्''[1] इति भाष्यम् । एतद्भाष्यावलोकने सगुणवाक्यानामुपासनाविधिपरत्वेन तत्रैव तात्पर्यम्, निर्गुणवाक्यानां तु पृथगेव निष्प्रपञ्चे ब्रह्मणि तात्पर्यमिति एकवाक्यत्वनिराकृतेश्च संक्षेपशारीरककर्तृभिः अवान्तरमहातात्पर्यद्वयस्वीकारेण सगुणवाक्यस्यापि निर्गुणसमन्वयोक्तिः पूर्वोक्तसूत्रेण, "बुद्ध्यर्थः पादवत्"[2] इति सूत्रेण च विरुद्धत्वात् सूत्रकारमतेनापि विरुद्धैव । सगुणवाक्यानामुपासनाविषये सगुणे समन्वयः, निर्गुणवाक्यानां निर्गुण इत्येव विभजनं न्याय्यम्, विपश्चिद्भिरिदमालोचनीयम् ।

वेदान्तवादिसमये तात्पर्यस्वरूपनिर्वचनमिदम् - तद्बुद्धिमात्रफलत्वमेव तात्पर्यं न पुनः शेषत्वं यथा वेदाध्ययनस्य अक्षरसमुदायप्राप्तिमात्रं प्रति शेषत्वं न तथा अत्र इति ।

द्वितीयाध्यायविषयसंक्षेपः

एवं प्रथमाध्यायेऽखण्डार्थविषये वाक्यजन्यबोधे समन्वयार्थे प्रदर्शितेऽपि प्रमाणान्तरेण भेदग्राहिणा प्रत्यक्षमूलकेन स बाधितार्थः स्यात् । यथा 'मज्जत्यलाबु', 'अप्सु शिलाः प्लवन्ते' इत्यादिवाक्यात् जाता बुद्धिरिव प्रागद्वैतबुद्धिरुदितापि भेदबुद्ध्या बाधितार्थैव स्यात् । प्रत्यक्षगोचरमनर्थभूतं कर्तृत्वदुःखभोक्तृत्वादि सर्वमिदं विदितं, वाक्यात्तु विमुक्तस्वरूपं ज्ञायते, तथा कर्मविधिरपि जीवस्य कर्तृत्वमाह नियोगतः, वेदान्तवाक्यं तु अपास्त-समस्तभेदस्वरूपमाह, प्रत्यक्षविरोधे वाक्यस्य प्रामाण्यं दुःस्थितं स्यात् ।

प्रत्यक्षकर्मविधिवाक्ययोः एकैकस्य विषयापहारसामर्थ्याभावेऽपि समूहस्य स्वविषयप्रकाशनसमर्थत्वेन विषयापबाधो दुष्परिहारः । अथवा

1. सू.भा. 3-2-21 2. ब्र.सू. 3-2-33

कर्मकाण्डसहायेनोपलब्धं सत् एकमेव प्रत्यक्षं ज्येष्ठत्वात् ब्रह्मात्मवस्तुबाधनाय प्रभवेत् इत्याक्षेपः, समाधानं तु, वेदान्तव्यतिरिक्तप्रमाणमात्रस्य बाह्यनिष्ठत्वं वेदान्तानां केवलात्ममात्रनिष्ठत्वम् । तथाहि, वेदान्तवाक्यव्यतिरिक्तं सर्वं प्रमाणं बाह्यार्थ-मात्रनिष्ठं, न प्रत्यगात्मविषयम्, "पराञ्चि खानि"[1] इति श्रुतेः । अनधिगताबाधितार्थबोधकतया तत्त्वविषये वेदान्तवाक्यान्येव मान्यानि, नान्यत् किंचिदस्ति प्रमाणं यद्यस्ति तदा विरोधशंकोन्मेषः । अज्ञातार्थप्रकाशकरणक्षमं यत् तदेव प्रमाणमिति प्रमाणलक्षणम् । इदमज्ञातार्थप्रकाशनप्रत्यगात्मविषयादन्यस्य प्रमाणस्य प्रत्यक्षादेरसंभवि । अज्ञातत्वमात्मन एव सिद्धान्ते, न जडेषु, प्रत्यक्षादि-प्रमाणप्रकाशात् प्राक् अज्ञातत्वागतिः न संभाविता, तत्स्फुरणकारणवर्जितत्वात् । प्रमेयबलादपि जडताऽज्ञता न सिद्ध्यति, तत्त्वार्थसाक्षिणोऽन्यमते विरहात्, घटादिबाह्यं हि जडम् । प्राक्प्रमाणप्रकाशात् प्रमेयस्याज्ञातत्वानवगमे जडवस्तु किं मानेन बुद्धम्? उत स्वभाव एवास्य स्फुरणम् इति कोऽपि ज्ञातुं न शक्नुयात्, पुरा मलिनवस्तुदर्शनाभावे क्षाळितवस्त्रद्रष्टुः 'इदं प्रक्षाळनेन धवळं उत स्वत एवेत्येतत्' इति विवेक्तुं न शक्नुयात् । अतोऽपि अज्ञातार्थावबोधने जडविषये प्रमाणमशक्तमेव, घटाद्यवच्छिन्नं चैतन्यमात्मानं विषयीकृत्य, अप्रबुद्धपुरुषमाश्रित्य वा प्रमाणं व्यवहारमात्रं जनयति व्यवहारभूमौ । अतोऽपि प्रमाणान्तरविरोधशंकाया अनवसर एव । किं च प्रत्यक्षादिकं भौतिकमात्रविषयकं, भौतिकत्वात् रूपप्रकाशकदीपादिवत्। लोके व्यंग्यव्यञ्जकयोः जात्या समानत्वमवगतं, रूपं प्रकाशको दीपश्चेत्युभयं तेजोरूपत्वेन समानम्, एवं बुद्धिरपि भौतिकेति श्रुतिप्रसिद्धेति भौतिकगोचरैवेति । कर्तृत्वादिभावमनिरस्य अहं कर्तेति ज्ञानसाधनतया प्रसिद्धं प्रत्यक्षं, कर्मवाक्यं वा सर्वं तत् जडार्थविषयमेव, वेदान्तवाक्यं तु न तथा, केवलप्रत्यगात्मविषयमेव । एवं च प्रत्यक्षादिविषयेण भिन्नविषयत्वात् वाक्ये न तद्विरोधेन बाध उचितः । अखिलप्रमाणानामज्ञातार्थावबोधने न सामर्थ्यं, किं तु घटाद्यवच्छिन्ना-ज्ञातात्मानमविषयीकृत्य व्यवहारकाले तदज्ञाननिवर्तनेनैव घटादिव्यवहारजननात् । तावता कथं प्रमाणत्वं तेषाम्? अतस्तैः कुतो वा बाधो वेदान्तस्य? आऽऽत्मप्रबोधात् सत्यं, मिथ्या, भ्रान्तिः, प्रमाणं, निवर्त्यं, निवर्तकमिति भेदो जागरे, स्वप्न

1. कठो 2-1-1

इवास्त्येव, यथा स्वप्ने तप्तशिलाधिरोहणं निःश्रेयससाधनमिति, तथा ब्राह्मणतर्पणं न श्रेयःसाधनमिति बुद्धिद्वयं सत्यमिथ्याविषयकं भाति, तथा स्रक् सत्या, सर्पो मृषेति सत्यमिथ्यायुगलं विभक्तमिव दृष्टमपि निद्रोच्छेदे सर्वमिदं मृषैवेति तद्वत्, जागरेऽपि आत्मप्रबोधपर्यन्तं सत्यमिथ्याविभागवद् भासत एव यथायथम् । नास्मन्मते दृश्यमिथ्यात्वेऽपि विज्ञानवादसाम्यम् ।

शाक्यभिक्षुसिद्धान्तवत् साम्यापादनं तत्परिहारश्च

बाह्यं वस्तु यदि मिथ्या, बोध एव परमार्थः न तु बोध्यं तदतिरिक्तमस्ति, तर्हि विज्ञानवादसाम्यं वैदिकसिद्धान्तेऽपि, नित्यविज्ञाने कल्पितस्य सर्वस्य मिथ्यात्वादिति । समाधानमत्र-मातृमानविषयावगतीनां परस्परं भिन्नानामेव वैदिकसिद्धान्ते स्वीकारान्न तत्साम्यम्, तथा विज्ञानवादिनाऽनङ्गीकृते परमात्मनि नित्यविज्ञानेऽज्ञानकल्पितानामेव मात्रादिविभागानां स्थिराणामेव स्वीकृतिः, विज्ञानवादे विज्ञानस्य क्षणिकत्वं, मात्रादेः सर्वस्यापि विज्ञानभेदः, क्षणिकत्वं चेति वैषम्यम् । वेदसिद्धान्ते अज्ञाननिमित्तं सर्वं विभागं करणैर्विनापि निर्विकारस्वरूपचैतन्यं सकलसक्षितया पश्यति । विज्ञानवादे एष साक्षी न प्रसिद्ध इति वैषम्यम् । किं च परतन्त्रया मायया कल्पितं परमपुरुषः स्वप्रकाशचैतन्यप्रभया सकलं कलयन् साक्षितां गच्छति । ग्राह्यग्राहकविभागस्य स्थैर्यं प्रत्यभिज्ञया सिद्ध्यति, सा चाबाधितविषयविषयिणी प्रमारूपैव, तदङ्गीकारेण स्थैर्यं सिद्ध्यति । प्रत्यभिज्ञानुपपत्तौ स्थैर्यवैकल्यात् साम्यमुभयोः स्यात्, न तथाऽत्र सिद्धान्ते । स्वप्नजागरयोः कल्पितत्वेन साम्येऽपि अस्ति वैषम्यं सिद्धान्ते । प्रमातरि सति स्वप्नद्रष्टरि स्वप्नदृष्टं वस्तु जागरे यथा बाध्यते, न तथा जागरितं वस्तु वर्षशतेनापि बाध्यते । परं तु जागरवस्तूनां मातृमानविषयोपलब्धिरूपकार्येण सह अविद्यायाः परविद्योदयमात्रेण निवृत्तिः स्वीकृता । ज्ञानिनो वेदान्तवाक्यजन्यस्वात्मसाक्षात्कारेण देशकालपुरुषतदवस्थाजागरप्रपञ्चैः सह कारणीभूतं तमो युगपन्निरस्यते, न पुनर्ज्ञानात् पूर्वमिति स्वप्नवैषम्यं जागरस्य । किं च स्वप्नदृष्टं वस्तु रज्जुसर्पवत् देशकालपुरुषेषु सत्स्वेव बाध्यते, जागरस्य बाधकं व्यवहारे तादृशं न दृश्यते । अतो यावज्ज्ञानोदयमबाध्यमिदं तावता जागरं सत्यमाहुः । एवं व्यवहारे बाध्याबाध्यभेदेन सत्यानृतविभागः प्रत्यगात्माज्ञानकल्पितोऽपि निवर्तते परमात्मविषयसम्यज्ज्ञानेन ।

नित्यबोधपरपीडितं जगद् विभ्रमं नुदति वाक्यजामतिः ।
वासुदेवनिहतं धनञ्जयो हन्ति कौरवकुलं यथा पुनः[1] ॥

एवं सत्यानृतविभागः ब्रह्मवादिनां समय इवान्यत्र मते न सेत्स्यति । मृषावस्तु यदि सत्यतया पृथग्भवेत् तदपि सत्यमेव स्यादिति । तथा ब्रह्मवाद्यतिरिक्तः कश्चन प्रपञ्चसत्यवादी वेदवाक्यविषयः सत्यं, बुद्धवाक्यविषयो मृषेति वक्तुं प्रभवेत् ।

सिद्धान्ते प्रमाणजातं सर्वं व्यावहारिकं न तात्त्विकम् । तथाहि, बाह्यवस्तुविषयं हि तत् "पराञ्चि खानि"[2] इति श्रुतेः विरोधात्, अबुद्धबोधकत्वाभावाच्च । तथा च तत्त्वनिवेदनशक्तिविरहात् प्रमाणान्तरस्य वेदान्तार्थबाधकत्वमसंभवीत्यर्थः ।

तदनन्यत्वमिति सूत्रस्य मुन्याशयः

"तदनन्यत्वमारम्भणशब्दादिभ्य"[3] इति सूत्रे निर्विकल्पककारणमात्र-प्रत्यक्षज्ञानेन सविकल्पककार्यमात्रज्ञानस्य आभासत्वं[4] मुनिनोक्तम्, अनेन मुन्याशयः सविकल्पकविषये प्रमाणस्य प्रामाण्याङ्गीकरणं न तत्त्वतः, अपि तु व्यवहारभूमौ गुडजिह्विकान्यायेन[5] तदङ्गीकरणमिति[6] । यद्यपि जैमिनिः 'सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षं विद्यमानोपलम्भात्'[7] इति प्रत्यक्षलक्षणं निर्ब्रुवन् निर्विकल्पकसविकल्पकप्रत्यक्षसाधारण्येन तदवोचत् । अथापि तदिदमापातत एव, युक्तिबाधितत्वात्, अन्ते सन्मात्रज्ञान एव निरातंकं प्रसीदति। एवं प्रत्यक्षमात्रस्य सत्संप्रयोगजन्यत्वं स्वयमभिधायापि तत्रापि सत्संप्रयोग-जन्यत्वघटितं प्रत्यक्षलक्षणमसंभवदोषग्रस्तं पश्यन् 'विकल्पजालं सर्वमनात्मवस्तु असदिति' तद्विषयकप्रत्यक्षं विहाय अप्रबुद्धार्थं बोधयद्विज्ञानमेकमेव तत्त्वावगाहीति, तदेव प्रमाणमिति च औत्पत्तिकसूत्रे[8] 'अर्थेऽनुपलब्धे

1. सं.शा. 2-38
2. कठो 2-1-1
3. ब्र.सू. 2-1-14
4. मिथ्यात्वम् ।
5. तिक्तताभिया औषधपानमकुर्वतां बालानां जिह्वायां गुडलेपनात् परं तत्पानमिति न्यायः
6. इदृशविवेचनं साक्षाद्भाष्यानारूढं नूतनं निगूढं च दृश्यते ।
7. जै.सू. 1-1-4
8. जै.सू. 1-1-5

तत्प्रमाण'मिति कथयामास । यद्यपि तद् धर्मविषये तत्त्वार्थावगाहीति चोदनायास्तत्वावेदकत्वं प्रामाण्यमेव तथा निर्वक्ति, तथापि व्यवहारदृष्ट्या प्रकृतधर्मविचारोपयोगात् कथितवान् । बादरायणमतस्य आरम्भणाधिकरणोक्ता-प्रामाण्यस्य परामर्शे सविकल्पकप्रमाणस्य व्यावहारिकमेव प्रामाण्यमुभयोर्मुन्यो-र्निगूढाभिप्राय इत्यवगच्छामः । स्वोक्तलक्षणे बादरायणसंमतिरस्तीति जैमिनिः तन्नामोल्लिखन् प्रकाशयति च । यदि बादरायणस्यापि चोदनायाः धर्ममात्रे तत्त्वावेदकत्वं प्रामाण्यं लक्षणेऽभिप्रेतं स्यात्, तद्विरुद्धतया आरम्भणसूत्रे निर्विकल्पकान्यस्य मिथ्यात्वं ब्रूयात् । अतो व्याससूत्रेण सह जैमिनिसूत्रस्यैक्यं तात्पर्यतो वक्तव्यमुक्तरीत्येति ज्ञेयम् ।

वेदान्तमेयत्वमात्मन्येव नियतं न जडे । 'द्रष्टव्य'[1] इति हि न विधिः, विधिविषयश्च नात्मा, दर्शनं हि पूर्वमज्ञाते, अज्ञातता च परमात्मन्येव, कर्तृव्यापारसाध्यं न तद्दर्शनम्, अतः ''अर्हे कृत्यतृचश्चेति''[2] पाणिनिसूत्रानुसारेण अर्हार्थे द्रष्टव्य इत्यत्र कृत्यप्रत्ययः, आत्मा दर्शनयोग्य इत्यर्थः । अतो वेदान्तमेयत्वं नियतमात्मन्येव । तत्त्वतः समेषामात्मैवाज्ञात इति तत्र प्रमाणकृत्यं संभवि, नान्यत्र जडे । रूप्याभासे शुक्तिकादेः सत्संप्रयोगजनिता वृत्तिः, तत्र सत्यत्वस्वीकारात्, तदपेक्षया परमार्थसत्यत्वस्य निरस्तसर्वभेदे परे वस्तुनि सत्संप्रयोगजनिताबुद्धिरत्रैव पर्यवस्यति । एवमुक्तपरमात्मबुद्धिं विना लोकत्रये जैमिन्युक्तसत्-संप्रयोगजनिताबुद्धिः कुत्रापि नास्ति, समस्तजगतोऽविद्याकृतत्वादिति । चोदनायाः धर्मेऽपि तत्त्वमतिः केवलं व्यवहारे, अज्ञाततापि तथा, परमार्थतत्त्वग्रहणसमये न तत्रापि तत्त्वमतिः प्रतितिष्ठेत् ।

वाचारम्भणवाक्यविचारः

''वाचारंभणं विकारो नामधेयम्''[3] इति श्रुतिः प्रत्यक्षबुद्धिविषयात् तत्त्वमपहर्तुमेव प्रवृत्ता, विकारस्य नाममात्रत्ववचनेन कारणमात्रस्य सत्यात्वावधारणेन सकलप्रमाणप्रमेयप्रमित्यादिमिथ्यात्वप्रतीतेः । सत्यपरिणाम-निवारणेन विवर्तवादमाश्रित्येदं वचनम् । श्रुतिवाक्यतात्पर्यानुसारेण सूत्रकारा अपि

1. बृ. 2-4-5
2. पा.सू. 3-3-169
3. छा. 6-1-4

विवर्तवादमेव सिद्धान्तयन्ति, तत्त्वप्रकाशने आरम्भणादिवचनात् तत्त्वज्ञानेतर-प्रमामात्रस्य शक्तिमपहृत्यैव वदन्ति ।

यद्यपि आरम्भसङ्घातविकार[1]विवर्तवादाः वादिप्रसिद्धाः सन्ति, तत्रारम्भसंघातवादौ सर्वथा परित्यज्य अन्यौ द्वावेव मुनिः सूत्रकृत् संगृह्णाति । तत्रापि विकारवादं पूर्वमुपगच्छति व्यवहारपरिरक्षणाय, कर्मोपासनादि-विध्युपयोगहेतोश्च "भोक्त्रापत्तेरिति"[2] सूत्रे तद्विषयप्रमाणविरोधशंकापनुत्तये । प्राक् परिणामवाद उदिते परमार्थतस्तत्तत्त्वं निराकरिष्णुः अभिमतं विवर्तमेव ततः 'तदनन्यत्वमारम्भणादिवचनेन'[3] स एव मुनिर्वक्तुं शक्नुयात् । तथा च परिणामवादो विवर्तवादं प्रत्युपजीव्यतया स्वीकृतः कुतः? कार्यकारणभावाप्रतीतौ तत्तत्वनिर्धारणासंभवादिति भावः । यथा सप्तभूमिकाप्रासादमारुरुक्षोः प्रथमसोपानभूता अधराभूमिः आरोहणेऽपेक्ष्यते, तदनन्तरमुत्तराभूमिः, एवं शास्त्रेणापि पुरा कारणकार्यभावरूपा प्रथमभूमिकायां परिणामवाद एव बोध्यते, ततस्तु विकारमृषात्वसिद्ध्यर्थं परित्यक्षते कारणतत्त्वजिज्ञासुना । अतो वेदान्तवादे विवर्तवादस्य परिणामवादः प्रथमा भूमिः[4], अस्मिन् व्यवस्थिते स्वयमेव विवर्तवादोऽपि समायाति मुमुक्षुभिरुपेयः इति श्रुतिसूत्रकृतोर्भावः ।

आरम्भवादः कणभक्षपक्षः संघातवादस्तु भदन्तपक्षः ।
सांख्यादिपक्षः परिणामवादः वेदान्तपक्षस्तु विवर्तवादः ॥[5]

इति तदेव प्रतिपाद्यते ।

कपिलसंमतं परिणामवादमङ्गीकृत्यापि सूत्रकारो ब्रवीति, श्रुतिश्च विवर्तप्रतिपादनमुख्योद्देशेन पूर्वभूमावेव स्थित्वा वदति ।

परिणामवादस्वरूपम्

एकस्यैव सावयवस्य सत्यभूतविचित्ररूपान्तरदर्शकत्वम्, स एव परिणामः यथा वसुंधराया एकस्या एव विचित्रसस्यसृष्टिः । विवर्तस्वरूपं तु एकस्यैव

1. परिणाम इत्यर्थे विकारशब्दः ।
2. ब्र.सू. 2-1-13
3. छां. 6-1-4
4. उपाय इत्यर्थः ।
5. सं.शा. 2-63

निर्विकारस्य अनेकमृषास्वरूपान्तरदर्शकत्वं तरङ्गभेदेन एकस्य निर्विकारचन्द्रस्य अनेकमिथ्याचन्द्रान्तरप्रदर्शकत्वमिव । अत्रापातदृष्ट्या "बहुस्यां प्रजायेये"ति[1] श्रुतिः परिणामवादिनी, "विकारो नामधेय"[2] मित्यादिस्तु विवर्तसमर्पिकाप्रमाणम्। एवं मायाश्रुतिस्मृतिवचांसि सर्वाणि विवर्त एव घटन्ते यतो हि कार्यवस्तुत्वमर्दनपराणि तानि । संघातवादस्तु संहन्तुः स्थायिनः कस्यचिदभावादेव तदनुपपत्तिरिति मुनिना निराकृत एव,[3] एवमारम्भवादोऽपि निराकृतः । "समुदाय उभयहेतुकेऽपि तदप्राप्ति"[4] रित्यादिभिः सूत्रैः[5] परिणाममुपगम्यापि मुनिः परमेश्वरं चेतनं विना जडपरिणामो न घटत इति "रचनानुपपत्तेश्च नानुमानम्"[6] इत्यादिना तं पक्षं निराचष्टे ।

तत्रापि संघातादिदृष्ट्या परिणाम एव वेदान्तसिद्धान्तसिद्ध्यै प्रत्यासन्नः संघातादिर्विप्रकृष्टः । परिणामं विना शिष्यं प्रति शुद्धाद्वयोपपादनं न संभवति ।

आरोपादिदृष्टिभेदवर्णनम्

आरोपदृष्टिः, अपवाददृष्टिः[7] मिश्रदृष्टिरिति दृष्टित्रयम्, एतत् सूत्रकारोऽपि संगृह्य मुमुक्षं क्रमेण सम्यग्बोधयितुमिच्छति । आरोपदृष्टिः परिणामदृष्टिः, द्वैतोपशान्तिः अपवाददृष्टिः, द्वयमिश्रदृष्टिः विवर्तदृष्टिः, निकृष्टमध्यमोत्तम-भूमित्वादेवं विभजनम् । तत्र तत्त्वावेदकमानदृष्टिः निकृष्टा, तत्त्वक्षतिः प्रपञ्चसत्यत्वक्षतिकरी विवर्तदृष्टिः, सा मध्यमा, प्रपञ्चतत्त्वप्रच्युतिः विभ्रमक्षतिकरी अन्त्या, सा उत्तमा । तत्र विवर्तदृष्टिरपि द्विधा,[8] जीवैकत्वविषयिणी, जीवनानात्वविषयिणी चेति । आसु दृष्टिषु पूर्वपूर्वप्रविलयेन उत्तरोत्तरं लभ्यमाना

---

1. तै.उ. 2-6
2. छां. 6-1-4
3. द्वितीयाध्याये इति शेषः ।
4. ब्र.सू. 2-2-18
5. द्र.सं.शा. 2-69 तः 75 श्लोकाः ।
6. ब्र.सू. 2-2-1
7. मूर्तामूर्तब्राह्मणे आरोपदृष्टिः अपवाददृष्टिश्च बृहदारण्यकभाष्ये, त्रयोदशाध्याये गीताभाष्ये च 'सर्वतः पाणिपादं तत्' इत्यादौ 'आत्मनि चैवं विचित्राश्च हि' इति सूत्रे भाष्ये च दर्शिता ॥
8. बृहदारण्यकभाष्ये तृतीयाध्याये 'प्राणो हिरण्यगर्भ एको जीवः तद्भेदा एवेतरे' इत्येवं वर्णिता द्रष्टव्या ।

दृष्टिरिति पौर्वापर्ये कारणम् । प्रथममारोपितां परिणामदृष्टिमुपमर्द्य ततो विवर्तमतिं गृह्णाति, तामपि उपमर्द्य शुद्ध-तत्त्वंपदार्थनिश्चयेन परिपूर्णदृष्टिं निष्प्रपञ्चप्रत्यगभिन्नब्रह्मदृष्टिं मुमुक्षुराश्रयतीति लयप्रकारः ।

एवमुक्तदृष्टिभेदं क्रमशो मुमुक्षुरथशब्दसूचिताधिकारी लभते, अन्ते विगलिताखिलधीः स्वे महिम्नि अवतिष्ठते । अत्रोक्तदृष्टिभेदोऽधम-मध्यमोत्तमाधिकारिभेदेन वक्तव्य इति केचन, स्वपक्षस्तु एकपुरुषाश्रयः, स च कालभेदेन एकस्मिन्नेवाधिकारिणि संभवेदिति ।

तत्रान्येषां पक्षः-कृपणधियः परिणामदृष्टिः । क्षपितकल्मषधियः विवर्तदृष्टिः स्थिरमतेः[1] परिणामविवर्तभेदं विना सा दृष्टिरिति । इयं पुरुषभेदवशात् विविधा भवेत् । तत्र क्षपितकल्मषधीरपि मध्यमा, तत्र जगति अनेके मुमुक्षव इति दृष्टिः एकपुरुषस्य, तद्विपरीता तु परस्येति तत्रापि द्वैविध्यम् । एवं केषांचन पक्षोऽपि न सिद्धान्ते दुष्यति, तथापि संभवेदिति । वस्तुतस्तु सूत्रकृता अथशब्देन अधिकारी एकविध एव पुरुष उदितः, न त्रिविध इति । तिसृषु भूमिकासु एकस्यैव क्रमेण तिष्ठतः सोत्तमाभूमिः स्वयमायाति, तदा कार्यकारणभेदधीः शाम्यत्येव । सृष्टितत्प्रतिषेधवाक्यानि श्रुतिस्मृतिवाक्यानि द्वयविशारदब्रह्मविदां वचनानि च तत्र सन्ति प्रमाणानि । एकस्मिन् दृष्टित्रयमपेक्ष्य तानि संगतानि, दशात्रयं विना न संगतानि भवेयुरिति । अत्रोऽत्र परिणामवादस्य अत्रोपकारकारित्वेन स्वसिद्धान्तात् पूर्वमेव प्रत्यक्षादिप्रमितेः तत्त्वावेदकत्वे सामर्थ्यं यथायथमनपबाधं स्वीकृत्यैव अद्वितीयब्रह्मणि समन्वये विरोधं निवारयामास, ततो हि 'तदनन्यत्वमिति' आरम्भणशब्दसामर्थ्यश्रवणेन प्रत्यक्षादिसामर्थ्यं तत्त्वावगमनविषये निराकरोति समन्वयविरोधापनयेन, अन्यथा अद्वितीयाखण्डब्रह्मवाक्यार्थावगाहिनी हि मतिः परिम्लायेत् । तथापि प्रत्यक्षादीनां सांव्यावहारिकं प्रामाण्यं रक्ष्यते । चैतन्यस्य स्वयं स्फुरणेऽनन्यकारणत्वेऽपि यथावत् स्फुरणं जीवं प्रति प्रतिबध्नाति । तदग्रहणमेव अहङ्कारादिविपरीतबुद्धिं जनयति मन आदौ परमार्थवेदनसामर्थ्याभावेऽपि प्रमाणानां व्यवहारनिर्वहणशक्तिं न निवारयतीति व्यावहारिकप्रामाण्याक्षतिः । एवं स्थितावापि

1. कृपणधीः परिणाममुदीक्षते (सं.शा.2-89) इति श्लोके 'स्थितमतेरिति पाठे अद्वितीयपरमपद-दृष्टिरिति स्थितप्रज्ञस्य - जीवन्मुक्तस्येति टीका ।

चैतन्यमात्रबुद्धिजनकस्याखण्डवाक्यस्य तच्छक्तिखण्डने तदग्रहणं[1] न समर्थम् । अतोऽज्ञानं तत्साक्षात्कारं न प्रतिबध्नाति । चिदग्रहणं दोषः प्रत्यक्षादिं प्रत्येव, न वेदान्तेषु, सत्यवस्तुप्रच्छादनेन द्वैतस्फोरकोऽपि भवतीति दोष इत्युच्यते । कुतो वेदान्तेषु दोषो न? इति चेत् वेदान्तानां सर्वेषामपि प्रत्यग्वस्तुविषयकत्वात्, प्रत्यक्षादीनां तु परागृविषयकत्वादिति दोषः[2]। अतः प्रत्यक्पराग्बुद्ध्योः प्रमेयभेदात् विरोधो वस्तुतो नास्तीति ज्ञेयम् । प्रत्यक्षादिप्रमाणानां वेदान्तसमन्वयविरोधाकरणे स्वस्वविषयेषु तत्त्वनिरूपणासामर्थ्यमेव । तथाहिप्रत्यक्षादिभिः घटपटादिज्ञाने जायमानेऽपि न भेदः स्फुरति, अयं पट इत्येव अभिनवपटो भासते, न भेदगन्धोऽपि तत्र । पटेऽपि भेदो यदा कल्प्यते सोऽपि पटप्रतियोगिकश्चेत् स्वात्मा सन् तत एव भिद्येत । अथ घटात् पटो भिन्न इति प्रतीयेतेति यदि इष्यते, तदा भेदोऽपि कल्पित एव स्यात्, तदा इतरसापेक्षं वस्तुसत्यं न भवेदेव । किं च भेदबुद्धिः प्रतियोग्यनुयोगिज्ञानाधीना, तदपि भेदबुद्ध्यधीनमिति अन्वयव्यतिरेकाभ्यां वक्तव्यमिति परस्पराश्रयदोषो दुर्वारः स्यात् । अतोऽपि प्रत्यक्षादौ भेदो न भासत इति । तेन द्वैतनिषेधेन अद्वितीयसमन्वये विरोधो दुर्भणः । तथा जडावगाहिप्रत्यक्षादिप्रमाणानां फलानिरूपणादपि प्रामाण्यं दुर्वचम् । कुतः? संशयादिनिवृत्तिः प्राकट्यं वा फलं वक्तव्यं, तन्न युग्ममपि संगच्छते, कथम्? संशयादेः सतोऽसतो वा सदसदात्मकस्य वा न निवृत्तिरुपपद्यते, सत्वेऽसत्वे वा निवृत्त्ययोगात् आत्मवत् तुच्छवत्, सदसदात्मकत्वमेकस्यासंभवि । प्राकट्यं फलमिति पक्षेऽपि सत्, असत्, सदसद्वा तदिति प्रमाणफलं प्रसूयत इति विकल्पे, सतोऽसतो वा नोत्पत्तिः सिद्धान्ते, नापि सदसतः तद्रूपाप्रसिद्धेरिति, तदपि प्राकट्यं फलं जडरूपं वा स्वप्रकाशं वा, उभयथापि निरूपणार्हं न भवति, जडत्वे नैष्फल्यमनवस्था च । स्वप्रकाशसंविद्रूपत्वे तस्याः सत्त्वेऽसत्वे, सदसत्त्वे वा प्रमाणकार्यत्वं न स्यात् । तदपि फलं शक्यमशक्यं वा उत्पाद्यमिति विकल्पे शक्तेरपि जन्यतापत्तिः, अशक्यस्यानुत्पाद्यत्वात्, अन्यथा मुद्गरादिना गगनस्यापि चूर्णीकरणप्रसङ्ग इति । अतः फलानिरूपणादपि प्रमाणान्तराणां जडविषयाणां तत्त्वं निरूपयितुमसामर्थ्यात् वेदान्तोदिताद्वैतबाधानुपपत्तिरिति ।

---

1. अज्ञानम् ।
2. 'पराञ्चि खानि' इति श्रुतेः ।

वेदान्तानां बाधकत्वम्

किं च विरोधे सत्यतिपूर्वनिव निरपेक्षश्रुतिः पराऽपि बाधते । मृगतृष्णिकोदकभ्रमं पूर्वमपि पाश्चात्यमूषरभूतत्वज्ञानमिव "पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिव"[1] दिति जैमिनिन्यायात् । पूर्वापरयोः सापेक्षत्वे तु वेदोपक्रमनयेन पूर्वं एव बाधकः परं बाध्यम् । वेदान्तनयेऽपि "ब्रह्मपुच्छम्"[2] इत्यत्र ब्रह्मशब्दबलेन पुच्छपदस्य लक्षणयाऽर्थान्तरकरणं दृष्टं, तद्वदत्रापि । नापि उपक्रमणोपसंहरणयोः भूयोऽनुग्रहन्यायेन प्राबल्ये भूयस्त्वं प्रयोजकमिति प्रकृते सुवचम् । उपक्रमणस्याल्पस्यापि मुख्यतात्पर्ये चरमस्यामुख्यतया दौर्बल्यमिति मुख्यत्वं बाधकत्वे प्रयोजकम्, प्रकृते समस्ति तत् । पूर्वस्य प्रत्यक्षादेः अनिर्णीतार्थत्वात् वेदान्तबाधकत्वं न कथंचित् । आम्नायवचःप्रमेयज्योतिर्बलतो हि मानान्तरस्य स्वार्थसाधकत्वात् तद्विरोधितदुपजीव्यार्थकत्वेन आगमवचस एव तद्बाधकत्वम् ।[3] किं च प्रत्यक्षादिविषयावगाहिश्रुतीनां प्रत्यङ्मात्रविषयेण आगमेन बाध एव, यथा संनिहितविषयेण प्रत्यक्षेणानुमितेः । एवं प्रागुक्तदिशा प्रत्यक्षादेः वेदान्तबाधितविषयत्वेन स्वविषयस्य प्रमाणमात्रस्य ब्रह्माज्ञानमूलकस्य ब्रह्मणः स्वाकारग्रहणेन वेदान्तोत्पन्नविद्यया बाधः । सा विद्या हि उत्पत्तिमात्रेण निर्वस्तुकां मायां सह कार्येण क्षपयति, भास्कर इव ध्वान्तम् ।

अत एव मायामयसंसारस्य ज्ञाननिवर्त्यत्वान्मिथ्यात्वम्, माया जगत्काणमिति "मायां तु प्रकृतिं विद्यात्"[4] इति श्रुत्योक्तापि अविद्यारूपैव सा, नान्या, यतो माया, तमः, कारणं, ध्वान्तं, बीजं, अबोध इत्यादिशब्दैः अविद्यैव कीर्त्यते । तस्या एव विलासोऽयं गुरुशिष्यादिभेदान्वितः प्रपञ्चः । वस्तुतः कारणतत्त्वतो न पृथगस्ति, स्वप्न इव ।

बन्धमोक्षव्यवस्था

स्वप्नतुल्यमेव सर्वं जागरकालिकं जगत् स्वाविद्यामात्रेण स्वान्तःकरणस्पन्दमात्रम्, मुक्तामुक्तौ, विद्वदज्ञौ आकाशादिपृथिव्यन्तं सर्वं

1. जै.सू. 6-5-54
2. तै.उ.2-5
3. द्र.सं.शा. 2-124
4. श्वेता 4-10

विश्वमित्यवेक्ष्यं, नान्यथा । स्वप्नदृष्टान्तेनैव अतीतकालेऽनादौ आगामिनि चानन्ते मुक्तादिभेदव्यवस्थादिकं दुर्घटमपि संजाघटीति, अल्पमात्रेऽपि काले सुप्त अतिगतामिव संवत्सरकोटिं पश्यति, तथाऽऽगामिनमपि तथा जागरेऽपि जानीयात् । अनाद्यनन्ते काले शुकादिर्मुक्तः अन्यो बद्ध इति व्यवस्था आब्रह्मसाक्षात्कारपर्यन्तम् ।

बन्धमोक्षव्यवस्थाया ऐकात्म्यपक्षे मतान्तराणि दृश्यन्ते । तत्र प्रथमं मतम्[1] अज्ञानं सकलप्रपञ्चभ्रमकारणम् । ब्रह्मप्रतिबिम्बभूतेषु अनन्तजीवेषु आश्रितं, तदपि बिम्बभूतब्रह्मविषयकं, गोत्वमेकमनेकव्यक्त्याश्रितं यथा, तत्र विद्वांसं पुरुषं जहाति, अज्ञं पुरुषं भजति, गोत्वजातिः नष्टां व्यक्तिं विहाय अनष्टां व्यक्तिं यथा भजते तथेति इदमेकं मतम् ''अजामेका''[2] मितिश्रुत्यनुसारेण केचित्तु अज्ञानानि बहूनि, जीवा असंख्याताः ते ज्ञानाज्ञानसमाश्रयाः । प्रतियुगं तेषां निःश्रेयसं माया चान्या ईश्वराश्रया संसारहेतुः, सर्वबाह्यकार्यसाधारणी इत्याहुः[3] ।

परे तु आकाशे विहगोऽस्ति, नास्ति चेति कथंचित् यथा वक्तुं शक्यं, तद्वत् स्वच्छब्रह्मणि स्वतो निर्मलेऽसङ्गे निर्भेदेऽपि, नित्ये निरवयवेऽपि अविद्या स्यात्, न स्याच्चेति बन्धमोक्षव्यवस्थेति मतम् । केचन शुद्धचैतन्ये जगत्कारणमज्ञानमस्ति, तदपि मनोरूपमुपाधिं सृष्ट्वा अवच्छेदकं द्वारीकृत्य न तु साक्षात्, यद्यपि मनोऽपि सुषप्त्यादौ लीयते अथापि सूक्ष्मवपुषा तत्रापि तिष्ठतीति, तदपि ब्रह्मणो बहिरेव तिष्ठति[4], तथा चान्तःकरणावच्छेदेनाज्ञानं, शुद्धरूपेण तदभाव इति व्यवस्था स्यादिति । अपरे तु अज्ञानमेकं तत्कार्याणि अन्तःकरणानि बहूनि, तानि चाज्ञानवत् ब्रह्मानुसरन्ति, स्वाज्ञानादेव स्थावरजङ्गमरूपं भूत्वा क्वचिच्छरीरे ज्ञानान्मुक्तं भवति, अन्यत्र बद्धं भवति । एकत्रैवाज्ञानमंशभेदेन विनष्टं क्वचित्, अन्यत्र स्थितमित्युपपत्तिसंभवः । एवं पुरुषे परमे व्यवस्था संगच्छते इति । अन्ये तु बाह्याध्यात्मिकसकलवस्तुजननी मायाख्या काचन शक्तिः हरेरस्ति धीवरजालवत् अविद्यावत्पुरुषान् प्रति प्रसरणमवाप्नोति[5] जीवान् संकुचति प्रसरणमुपसंहरति, तदपि

---

1. एकाज्ञानपक्षः ।
2. महाना 8-4
3. वाचस्पतिमतसाम्यं दृश्यतेऽत्र ।
4. न विशेषतयेत्यर्थः ।
5. तान् बध्नातीत्यर्थः ।

भगवदिच्छया, सा सत्या मिथ्या वा भवतु, संकोचविकासौ[1] च स्वाभाविकावेव, न विद्याऽविद्यानिमित्तौ इति । केचन प्रतिपुरुषं संस्कारभ्रमसंततिरस्ति, ब्रह्मविषये प्रवाहरूपेणानादिरविद्या[2] सा च जीवाश्रिता, ज्ञानकर्मसमुच्चयेन तां समुच्छिनत्ति कश्चित् । कश्चित्तु तदभावान्नेति आद्ये मोक्षाय कल्पते, न द्वितीय इति[3] । उक्तपक्षे जीवानां ब्रह्मणश्च भेदः, तेषामन्योन्यं भेदश्च काल्पनिकश्चेत्, कल्पितत्वादेव सर्वव्यवहारोपपत्तेः आनन्त्यमप्रामाणिकम्, जीवैकत्वेऽपि तदुपपत्तेः । पारमार्थिकश्चेत् तत्पक्षे अज्ञातं ब्रह्म कथं सिद्ध्येत्? अस्माकं तु प्रत्यगात्माहमज्ञ इत्यनुभवात् स्वप्रकाशात् सिद्ध्यति । सम्यज्ज्ञानाद्वा भ्रमाद्वा स्वप्रकाशाद्वा तत्सिद्धिः नाद्यात्, घटादिवत् ब्रह्मणोऽपि जाड्यं स्यात् । ब्रह्मणोऽज्ञानस्यापि तस्मादेव सिद्धौ सत्यत्वमेव स्यात् । न द्वितीयात्, ब्रह्मणस्तमोवत् कल्पितत्वापत्तिः, न तृतीयात्, तथाऽननुभवात् ।

अज्ञातत्वपक्ष इव मायावित्वपक्षेऽपि पूर्ववत्त्रेधाविकल्पेऽपि मायेव ब्रह्मकल्पितं स्यात् । प्रमाणं चेत्, मायायाः सत्यता स्यात् । ब्रह्मणो जाड्यं च स्यात् । तृतीयपक्षे मायापि ब्रह्मवत् स्वप्रकाशः स्यात् । स्वप्रकाशब्रह्मणो मायाज्ञानमित्यपि विरोधः स्वानुभूतेः । आत्मा अज्ञ इति स्वप्रकाश इतिवत् नैव मायि ब्रह्म अस्मान् प्रति तथा, उभयोर्भेदाङ्गीकारे जीवब्रह्मद्वयं स्वप्रकाशं वक्तव्यमापतेत् । तथा च जीवातिरिक्तस्याज्ञातत्वमप्रामाणिकम्, जीवभेदोऽपि न प्रामाणिकः । ब्रह्मणा जीवभेदा ज्ञायन्ते न वा? नाद्यः, कुड्यवत्तेषां जाड्यापत्तिः, न द्वितीयः, ब्रह्मणः सर्वज्ञताभङ्गः । यदि जीवाः स्वप्रकाशा एव विभक्ता एव ब्रह्मणो भासन्ते, तदा तद्भेदः स्वप्रकाशो नवेति चिन्तनीयम् । आद्ये भेदस्य सत्यत्वं स्यात्, द्वितीये, अन्यवेद्यो विभागो यदि तेषामज्ञाने सोऽपि न वेद्यः स्यात् । पुनरपि सम्यज्ज्ञानात् भ्रमात् स्वप्रकाशाद्वा इति विकल्पत्रये नाद्यान्त्यौ जीवभेदप्रसिद्धौ ब्रह्मणोऽद्वैतत्वं न सिद्ध्येत् । सकलजीवानां स्वप्रकाशत्वे च अनुभवविरोधः, मिथ्याज्ञानाज्जीवभेदसिद्धौ उत्तरत्र बाधो वक्तव्यः । नापि सप्तसु पक्षेषु प्रागुक्तेषु तृतीयपक्षः साधुः । एकोपाधावेकवस्तुप्रसिद्धौ एकस्मिन्नधिकरणे एकवस्तुप्रसिद्धौ

1. मुक्तिबन्धौ ।
2. भ्रमतत्संस्काररूपैव
3. एवं सप्तपक्षाः अनूदिताः ।

तत्रैव तदभावो न सिद्ध्येत्, क्वापि भावाभावौ नैकत्र दृष्टौ लोके युगपत्, आकाशे पक्षितदभावदृष्टान्तोऽपि न, केनचिदवच्छिन्न एव गगने तदभावश्चान्यत्रेति, अवच्छेदोऽप्यन्वेष्य एव तत्र, अवच्छेदकान्तरेणावच्छिन्नत्वम्। अत्रानवस्था दुर्निवारा चेद् बाढम्, का नो हानिरिति, अवच्छेदकपरम्पराभ्युपगमेऽयं दृष्टान्तः । कर्मणः शरीरं, शरीरात् कर्मेति सर्वैरभ्युपगतोऽस्ति, तेन समाधानं तत्र, प्रमाणाभावादपि न तृतीयपक्षः साधुः । अज्ञानं ब्रह्मणोऽस्ति नास्तीति युक्त्या पूर्वोक्तया ज्ञातुं न शक्यते । मूढोऽस्मीति प्रत्ययात् अस्त्यज्ञानमितिवत् मुक्ते तदभावात् अज्ञानं नास्तीति बुद्धिरपि, इयं च मिथ्याज्ञानात् स्वप्रकाशात्, प्रमाणाद्वेति विकल्पत्रये, नान्त्यात्, नूनं तदा मुक्तो जडः स्यात् । नाद्यात्, तदा मुक्तो रज्जुसर्पवत् स्यात् । न मध्यमात्, स्वानुभूतिविरुद्धा, न हि शास्त्रश्रवणमकृत्वा कश्चिदपि जानाति एष शुको मुक्त इति । नापि चतुर्थः पक्षः, अन्तःकरणोपाधिमादाय तदवच्छिन्न अज्ञानं प्रविष्टं तदा बन्धः, अन्तःकरणं द्वारमात्रं, नावच्छेदकमज्ञानस्य, यथा अग्नेः गृहप्रवेशे उल्मुकं द्वारमात्रं तद्वत्, यद्येवमुपाधिना द्वारेण तमोऽपि ब्रह्म व्याप्नोति यथा उल्मुकद्वारा प्रविष्टोऽग्निः प्रवेशमात्रव्याप्तिं विहाय समस्तं गृहं प्रविशति तद्वत् ।

अत्र समाधानम्, ब्रह्म अविद्यया जीवभावं प्राप्य, तद्रूपेण स्थित्वा चित्तस्पन्दितं[1] सकलजीवराशिमाकाशापृथिव्यन्तं च पश्येत् । स्वीयाविद्याकल्पिताचार्यवेदन्यायादिसहायेन तस्य जीवस्य विद्या जायते । तया ध्वस्तमोहस्य स्वप्रकाशस्वरूपेऽवस्थितिः । अत्र ब्रह्मण एवाविद्याश्रयत्वमुक्तम् । यद्यपि बृहदारण्यकभाष्ये अविद्याविशिष्टः कार्यकरणोपाधिरात्मा जीव उच्यते, नित्यनिरतिशयज्ञानशक्त्युपाधिरात्मान्तर्यामी ईश्वर इति, गीताभाष्ये च 'त्वं न जानीषे प्रतिबद्धज्ञानशक्तित्वात्, अहं तु नित्यशुद्धबुद्धमुक्तस्वभावत्वात् अनावरणज्ञानशक्तिमत्वात्' इत्यादौ जीवेषु अविद्याश्रयत्वमुक्तम्, 'अहमज्ञ' इत्यनुभवश्च, तथापि अज्ञानवद् ब्रह्म जीवो भवति, तेन ब्रह्मण एवाज्ञानं, तदपि न स्पष्टम्, अन्तःकरणोपाधिवशात् तदवच्छिन्नचैतन्यज्योतिःसंबन्धात् पुनः स्पष्टीभवति, यथा अन्तःकरणाभासनिष्ठतया अहमज्ञ इति स्पष्टं स्फुरति, न तथा

1. चित्तविक्षेपरूपमित्यर्थः ।

प्रागन्तःकरणसंबन्धात् केवले चैतन्य इति भावेन जीवानामज्ञत्वोक्तिः, किं तु ब्रह्मैवाज्ञानाश्रयं तद्विषयं च[1] । अज्ञानं हि जडशक्तिमात्ररूपेण जीवाद् बहिः केवलचैतन्ये सिद्ध्यति ज्ञानापोद्यत्वरूपेण, 'अहं न जानामीति जीवाश्रितं प्रकाशते, अतश्च भाष्ये जीवोऽज्ञ इति वचनम् । इदमेव रूपमज्ञानस्य ज्ञानापनोद्यत्वमानुभाविकम्, न जशक्तिरूपम्[2] । सेयं जडशक्तिरेव तद्रूपेणाऽऽकाशादिजननी,[3] पुरुषोत्तमाधीना च भवति, तथेयमेव जीवं स्ववशीकृत्य 'अहमज्ञ' इति स्फुरणात्मना प्रकाशते समेषाम्, परमपुरुषं नित्यमुक्तं प्रति तु चितिशक्तिबाधितरूपा स्फुरति, सा कुतः? तदनावारकत्वात्, शरीराभिमानिनं जीवं प्रति तु चितिशक्तिस्फुरणबाधकरूपा सती स्फुरति ।[4]

मायाया अविद्यात्वमनुमानगम्यम्

ईश्वरीया माया, अविद्यारूपा, दृश्यत्वात् जडत्वात् परतन्त्रत्वात्, चिदाश्रयत्वात्, स्वप्नप्रपञ्चरजतभ्रमादिवत् । प्रथितं[5] जगत् आकाशादि, एकाज्ञानकार्यं बाध्यत्वात्, यदेवं तदेवं, यथा स्वप्नः, बाध्यं चेदं तस्मात्तथाऽज्ञानकार्यमिति युक्त्यन्तरेण मायाऽज्ञानैक्यसाधनम्, 'तमोऽतिरिक्तं जनकं जगत' इति न कुत्रापि वचनमस्ति । उक्ताज्ञानादेव[6] भ्रमः, न पुनः विषयकरणदोषाभ्यां, तत्रापि संविदि, अतः सकलद्वैतमतिर्भ्रान्तिः केवलाज्ञानमूलैव, ब्रह्मण एवाज्ञानाश्रयत्वं, न तावता दुःखमनेन कृतप्रतिभासमात्रेणापि नेश्वरस्यास्ति, तथा सर्वज्ञगुणजातमपि ईश्वरस्यैव, न जीवस्य, संसारिणो हि मोहान्वितस्य तत्र स्फुरतीति अनुभवबलात्, न ब्रह्मण्यज्ञानाश्रयवचनमात्रेण केवले ब्रह्मणि मोहकार्यापादनप्रसङ्गः[7] । अज्ञानं जीवाश्रितमिति मण्डनवचोऽपि प्रस्थानान्तरं, भाष्योक्तमपि पूर्वापरालोचनात् पूर्वोक्ताभिप्रायेण, स्पष्टास्पष्टाशयान्तरानुरोधेन, बिम्बप्रतिबिम्बभावभेदेन च । तदुक्तम्-

---

1. वार्तिके नैष्कर्म्यसिद्धौ चेत्थमेव निर्णीतोऽयं विषयः ।
2. केवलमागमगम्यमिति योज्यम् ।
3. मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् (भ.गी 9-20)
4. नाहं प्रकाशः सर्वस्य योगमाया समावृतः ।
   अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥ (भ.गी. 7-25)
5. मायाकार्यत्वेन प्रथितमित्यर्थः ।
6. मोहादेव ।
7. वार्तिकाचार्यमतसाम्यं दृश्यतेऽत्र ।

जीवन्मुक्तिगतो यदाह भगवान् सत्संप्रदायप्रभुः
जीवाज्ञानवचस्तदीदृगुचितं पूर्वापरालोचनात् ।
अन्यत्रापि तथा बहुश्रुतवचः पूर्वापरालोचनात्
नेतव्यं परिहृत्य मण्डनवचस्तद्धचन्यथा प्रस्थितम् ॥[1]

बिम्बभूत ईश्वरे तमःस्फुरणमस्पष्टम्, प्रतिबिम्बभूते जीवे स्पष्टम् अज्ञानप्रतिबिम्बिते ईश्वर इति मते तदस्पष्टम् देहद्वयावरणवर्जितत्वात् । जीवस्तु देहद्वयावरणविशिष्टोऽज्ञानप्रतिबिम्बश्चेति तत्र स्पष्टम् । एवमीश्वरे सर्वज्ञत्वम् अज्ञानतत्कार्यकरणवर्जितत्वात् तत्सत्त्वात्तु जीवे तमसावृतनित्यदृष्टित्वात् किंचिज्ज्ञत्वम् । अज्ञोऽहमित्यवगतिः अहंकारवर्जितत्वात् ईश्वरे नास्ति, एवं तत्सत्वात् जीवे 'सर्वज्ञोऽहमि'त्यवगतिर्नास्ति । एवं बद्धत्वाभावः बद्धत्वं च ।

श्रीकृष्णरघुनाथाद्यवतारपुरुषाणां कथमीश्वरत्वम्? तेषामहङ्कारयोगात् तद्वर्जितत्वं कथमिति शङ्काया समाधानमिदम् - बिम्बभूतस्य प्रतिबिम्बभूतस्य वा मतभेदेनेश्वरस्वरूपस्य अहङ्कारसंबन्धो मुख्यः सकललोकहितार्थावतारे स्वेच्छानिर्मितलीलाविग्रहमन्तरेण न सुवचः । लीलाविग्रहे ''अहमात्मा गुडाकेश''[2] इति तु लाक्षणिकः प्रयोगः । अहंकारमन्तरेणाज्ञताधीर्नभागिनी । नित्यमुक्ते तां विना न मूढभावसंभावनाप्यस्ति । लीलाविग्रहवतोऽपि स्वातन्त्र्यान्नाज्ञानितावगतिः। जीवानां तु पारतन्त्र्यात् 'अहं न जानामी'ति स्फुरणमस्ति । रघुनाथादेः वासिष्ठरामायणाद्युक्तं पौराणिकमपि स्वाज्ञत्वस्फुरणं संकल्पपूर्वकत्वात् कंचित् कालमेव । ब्रह्मोपदेशादनु तदपि तेनोत्सृष्टम्, उपदेशो निमित्तमात्रम् । देवकार्ये निर्वृत्ते तदपि समुत्सृष्टम् । वस्तुतो रामादिः सर्वज्ञः परमेश्वर एव, अहंकारबन्धहीनत्वात्, अस्य ज्ञानं निरावरणमिष्टं, जीवस्य तु सावरणमेव । किं चैश्वरं ज्ञानं निरावरणं, सर्वप्रमाणफलसकलसंविज्जातं स्वयं बिभ्रत् सर्वज्ञ ईश्वरः, अज्ञानतत्कार्यरूपं जगत् स्वात्मभासैव नित्यं भासयति सदा संनिहितो भवतीति च हेतोः । जीवस्तु नैवमिति एतदीयं ज्ञानं सावरणम् । तथा च प्रागुक्तदिशा भाष्यमन्यथा नेयमिति अस्मदीयमतमेवात्र समीचीनम् ।

1. सं.शा. 2-174
2. भ.गी. 10-20

चैतन्यमेव तमस्वि तदप्रबुद्धं सर्वज्ञमेतदिह विश्वमिमं विभागम् ।
जीवेश्वरौ च जगदित्यपि निर्मिमीत इत्येव वेदशिरसः प्रथितः प्रचारः ॥[1]

अत्रमायाऽविद्ययोस्तत्त्वत एकवस्तुत्वं तथापि द्विधाऽश्रयभेदेन कार्यभेदेन च भेदव्यवहार इति प्रतिपाद्यते । तद्वैलक्षण्यं कार्यभेदेन यथा, मोहविलासदुःखं जीवे, ईश्वरे जगज्जननादिकार्यमिति श्रुतिषु[2] सर्वत्र । किं च अनाद्यज्ञानशक्तेः चैतन्यस्थाया व्यञ्जकं जीवत्वम्, अतो जीवारूढमेवाज्ञानमित्याहुः । अत एव जीवो मूढः कथ्यते । एवं चिन्मात्राश्रयविषयमज्ञानमिति स्वमतम् । जीवस्यैवाज्ञानित्वं न ब्रह्मण ब्रह्मणोऽज्ञानित्वमेव जीवभाव इति पक्षे जीवस्याज्ञानित्वं न युक्तम् । जीवभावप्रयोजकमज्ञानं जीववृत्त्यज्ञानादन्यदेव चेत् तदानवस्थापत्तिः । तर्हि तन्मतानभीष्टमज्ञानं ब्रह्मण्यापतेत् । ब्रह्मणः शुद्धत्वसिद्धये यदि त्यज्यतेऽज्ञानित्वं ब्रह्मणोऽज्ञानाश्रयत्ववादिसिद्धान्तेऽप्यस्ति शुद्धत्वम्[3] शुद्धतावास्तवत्वस्योभयमत-तुल्यत्वात् ।

'एकाधिकरणे[4] अज्ञानतदभावौ गगने पक्षितदभाववत्' इति यदुक्तं तदप्यसारम् - अज्ञानसत्त्वतदभावयोः सत्वे पारमार्थिकेऽभीष्टे शुद्धेऽज्ञानाङ्गीकारेण संसारित्वसाधनं न स्यात् । यथा धूमस्य पर्वतसत्वतदभावाभ्यां तेन वन्हिरूपकारणकल्पनं न स्यात् धूमसत्ताकाल एव तदभावसत्वे वह्निसत्ता न कल्प्यते, तद्वत् । कादाचित्ककार्यमङ्गीकृत्य स्वकारणकल्पने विराधाभाव इति परिहारेऽपि एकत्रोपाधौ तत्तदभावकल्पना क्लिष्टकल्पनैव स्यात् । चैतन्ये स्फुरणास्फुरणाङ्गीकारवत् अज्ञानसत्वतदभावकल्पनमित्यपि न साधु, सिद्धान्ते स्फुरणं स्वात्मकमेव चिद्रूपम्, अस्फुरणं तु अप्रकाशनमविद्या, न भावाभावरूपं तद्युगलम् । जीवं प्रति यथावदभानम्, अबोधवशात् परतः, अन्यदविरोध-साधनमस्मान्नाङ्गीक्रियते, नाज्ञानित्वमेव जीवभावः, जीवत्वे च प्राणधारणशक्तिरेव

1. सं.शा. 2-189
2. 'अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजाऽन्यः । अत्र भाष्यकारमते मायाशक्तिरीश्वराश्रिता प्रकृतिरजा (अनादिः) इति ।
3. अज्ञानस्य परिमितत्वेन शुद्धत्वानपायादिति भावः ।
4. एकस्मिन् उपाधावित्यर्थः ।

'जीवप्राणधारण' इति धातुः तदर्थे प्रसिद्ध एव प्राणोपाधिचैतन्ये जीवशब्द इति सिद्धान्तः अज्ञानजन्यान्तः- करणप्रतिबिम्बभूतश्चेतनो जीवः, वृद्धव्यवहारश्च जीवशब्दस्य तत्रैव प्राणधारणार्थकजीवधातुनिष्पन्नस्य, अन्तःकरणादिपूग-संवलितचिदेव जीव इति भवति । अज्ञानातिरिक्तजडवर्गस्याऽज्ञान-कार्यतयाऽज्ञानात्मकत्वेन अज्ञानेऽज्ञानस्य वृत्तित्वासंभवात्, जीवस्याप्यज्ञानमयत्वेन तत्राज्ञानस्वीकारानुपपत्तेः, पारिशेष्येण ब्रह्मैवाज्ञानाश्रय इति ।

यद्यपि जीवाश्रयत्वेन अज्ञानस्य स्फुरणात् जीवाश्रयमेवाज्ञानं वक्तव्यम्, न चेह संसारेऽद्वयं भासते, आश्रयस्याभाने तदाश्रितत्वेनाज्ञानस्फुरणं न घटते, तथापि 'मामहं न जानामी'ति प्रत्यक्तत्त्वमात्राश्रयविषयकमेवाज्ञानम्, नाद्वयसमाश्रयमिष्टं, नापि तद्विषयं सूक्ष्ममतीनां नित्यानन्दविषयाश्रयमिष्टमुक्तदोषादेव । प्रत्यङ्मात्रविषयाश्रयाज्ञानादेव प्रत्यक्तत्त्वं तिरोहितमिति[1] प्रतिपाद्यते, 'मामहं न वेद्मीति वा वेद्मीति' वा प्रत्यग्विषयकमेव प्रत्यक्षानुभवनम् । अतः संवित् स्फुरति वा, न वेति धाष्टर्यमात्रेण वावदूकानां विसंवादावतारः सोऽप्यज्ञानादेव, तद्वदद्वयत्वं भासमानमपि न भासत इति मूढप्रज्ञा वदन्ति, संविदिव स्वरूपेणाविचारितमेव ब्रह्म स्फुरति संसारदशायां, मुक्तौ तु विवेचितं सम्यज्ज्ञाने तद्यथावदवभासते, अतो न चोद्यावकाशः ।

एकजीववादे बन्धमोक्षव्यवस्था, शास्त्रप्रामाण्यं च

एकजीववादपक्षे मुमुक्षुजीवातिरेकेण जीवान्तराभावे व्यवस्थासाधनं कथम्? शुकादिजीवा मुक्ताः, अन्ये बद्धा इत्यादिव्यवहारोऽनुभवसंमतः । तेन विरुद्ध्यते जीवैकत्वमिति शंकायां समाधानम्, द्वैतानुभवेन विरोधो वा अद्वितीयः परोऽस्मीति ज्ञानविरोधो वा? उत तदन्यः कश्चिदस्ति? सर्वथा द्वैताद्वैतानुभवः कस्यचिदपि नास्ति, अवस्थात्रये जीवतो वा त्रिभुवने जीवतो वा न खलु सूर्यस्य तमसश्चाभेदः कस्यापि समस्ति । प्रकृते च द्वैताद्वैतयोरेकत्र विरोधात्, तदनुभवाभावः स्फुट एवेति न विरोधलवोऽपि । मुमुक्षोः गाढमूढतमःप्रभावेणैव जगत् ईशः जीव इति सकलं कल्पितम्, अदृढमपि दृढवत् प्रतिभाति च, तदपि यावद्बोधभास्करोदयमिति न कोऽपि दोषः । ईश्वरः सर्वज्ञः, अहं कृपणः, जगदद्भुतमिति प्रतिपत्तयोऽपि तमोलुप्तदृश एव । नात्राप्यद्भुतं किंचित्, कुतः? अनादिचानन्तसुखं स्वमवलोकयन्

1. 'पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ'इति तत्त्वं तिरोहितं, तस्मादेव बन्ध इति सूत्रकाराणां चाशयः ।

मुनिः न किंचिद्दुःखं पश्येत्, स्वज्ञानबलेन जगदेवात्तुमिच्छति सः । किं च चित्तमपि स्वाज्ञानकल्पितं तदपि जगदेव कल्पयति । गुरुरपि सर्वज्ञश्चित्तकल्पितः, अतश्चित्तदृश्यं, न सत्यं भुवि किंचिद् रज्जुभुजङ्गवत्, इन्द्रजालसदृशमिदम् । कल्पितस्यापि तत्त्वावबोधकत्वम् । कल्पितस्यापि गुरोः सर्वज्ञतया पूर्णतत्त्व-बोधकत्वमुपपद्यते, नान्यस्य । कल्पितस्यापि सर्पस्य मरणरूपसत्यकार्यजनकत्वं, न तु मलिनस्य[1] नभसः । तावता सर्वत्रासतः सत्यकार्यजनकत्वनियमो वा तदजनकत्वनियमो वा नास्ति । तथा नियमे परादपि अग्निबुद्धिर्धूमादिव स्यात् सत्यतया । अनृतस्य प्रमितिजनकत्वाभावैकान्त्ये वाक्यमात्रस्य बोधजनकत्वाभाव-प्रसङ्गः कुतः? वर्णातिरिक्तं पदं वाक्यं वा नास्ति । वर्णसमुदाय एव तत् स च ध्वनिधर्मेण उदात्तादिस्वरेण घटितात्मा मृषारूपोऽपि अनुष्ठेयेऽर्थे सुदृढमतिं जनयति । एवमसत्यस्य सत्यार्थकार्यकारित्वं निरुक्तोदाहरणेनापि सुज्ञेयम् ।

मन्त्रो हीनः स्वरतो वर्णतो वा"[2] इति स्वरवर्णभ्रेषेण मिथ्याप्रयुक्तो मन्त्रः स्वतात्पर्यार्थप्रतिपादनायासमर्थोऽपि यजमानं हिनस्ति । इन्द्रनिबर्हणसमर्थ-पुत्राभिलाषिणा त्वष्ट्रा प्रयुक्तो व्यत्यस्तस्वरः सन् इन्द्रशत्रुकपुत्रस्य वृत्रस्य स्वानभीष्टस्य जननं विपरीतफलमदादितिवत् । न हि वर्णसमुदायतिरिक्तं वाक्यमस्ति चोदनेति, यदि सत्यमेव गमकं प्रमाणमितीष्टं, तर्हि चोदनाया अप्रमाणत्वात् प्रमाजनकत्वं न स्यात्, तथा कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमिति वदतां कणभुजां मते श्रोत्रेन्द्रियस्योपचरितत्वेऽपि शब्दप्रकाशकत्वं संमतम् । इत्थं च स्वरादिविशिष्टरूपेण मृषाभूतचोदनावद्वा श्रोत्रेन्द्रियवद्वा भ्रान्तमुपचरितं वा तथापि यथा सत्यार्थविदकं, तद्वत्, गुरुः, गुरुवाक्यं वा कल्पितमपि तत्त्वावेदकं भवेदेवेति न कोऽपि दोषः । एवं वाद्यभिलाषानुसारेण असदपि सत्यफलदायि, यदि सिद्धान्ते मायानिर्मितमसदपि सत्यार्थकारि, सत्फलवद् भवेदेव, न भवतीत्युक्तौ आश्चर्यम् । वस्तुतः सर्वत्र सिद्धान्ते तत्त्वस्यैव कारणत्वम्, वस्तुतः प्रपञ्चेऽनर्थकरं तथा जगत्कारणं च तत्त्वतोऽगृहीतं परमेव तत्त्वं, तदेव तत्त्वमवगतं चेत् परिपूर्णतृप्तये, बहिर्मुखतया स्वरूपादर्शने तदेव रूपं दुःखकरं, तदेवरूपमन्तर्मुखतया दृष्टं परितृप्तये भवेत् समेषाम् ।

---

1. तथा प्रतीतस्य ।
2. "मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्" इति पाणिनिशिक्षा ।

मुक्तौ को विशेषः

बद्धस्य ज्ञानमात्रं संपादनीयं मोहमात्रमपनेयं, नान्यः स्वरूपे विशेषः । तदर्थं तत्त्वमसीत्यादिवाक्यं निषेवणीयम्, बोधात् पूर्वमज्ञानं, बोधोत्पत्तौ न तदपि, नान्यो विशेषः । इदमपि व्यवहारभूमौ, न तत्त्वतः[1] । यतः शुद्धे प्रत्यगात्मनि अज्ञानमपि नाभूत्, मुक्तौ वा न तदभिभवः । तदेतद्द्वयमपि सकलं तम एव, तन्मूलकमेव, तद्विना कस्यापि द्वैतस्य न तत्र संभावना । तमः परिहारे तमोनिवृत्तिरित्येकापि नावशिष्यते तत्त्वतः । निरूपणानर्हत्वात्, अतोऽपि सा तम इत्येवमुदीरिता न तु तमोनिवृत्तिस्तमोमयीति स्वाशयेन । यावज्जीवादिवाक्यं[2] सर्वं विधिवाक्यं व्यावहारिकमेव, अतस्तेनापि न विरोधः, सम्यग्बोधेन तमोनिवृत्तौ कर्मविषयविधिप्रवृत्तिः ज्ञानिनो न संभवति । परमपदप्राप्त्या परितृप्तस्य तृष्णारहितस्य तृष्णामूलप्रवृत्त्यसंभवश्च । यथा श्येनादिका अभिचारधर्मविषयः[3] तत्फलीभूतहिंसायाः 'मा हिंस्यात् सर्वा भूतानि' इति निषेधबुद्धावुदितायां बाधोत्तरं स्वभावनाभाव्यहिंसायाः अभावात् प्राक् तत्राभिचारोन्मुखेऽपि पुरुषे पुनर्न प्रवृत्तिमुपजनयति । तद्वदेव परमात्मसाक्षात्कारे सति प्रपञ्चबाधेन विधिभावनायाः करणादिभागत्रयाभावादेव निःस्वरूपाः कर्मकाण्डविधयो ज्ञानिनि न प्रवृत्तिमादधति । प्रवृत्तिरूपार्थभावनारूपभावनाया अभावे विधयो न घटन्ते । एवं नियोग एव विध्यर्थ इति वादेऽपि नियोज्यरूपाधिकारिविरहे नियोगविषयविरहे च न नियोगबुद्धिरुदेति । ज्ञानिनि अज्ञानं विना न घटते तदुभयम्, अतोऽपि विधिकाण्डमखिलमज्ञानिनो व्यवहारभूमौ यावज्ज्ञानोदयं सर्वं प्रमाणम् । अतो न तेन तत्त्ववादिवेदान्तवाक्यानां विरोधः

तृतीयाध्यायसंक्षेपः

तृतीयाध्याये ब्रह्मसूत्रीयतृतीयाध्यायार्थोऽत्र संक्षेपेण विचारितः । मुमुक्षोर्ज्ञानसाधनानि वैराग्यदार्ढ्यं, तत्त्वंपदार्थज्ञानम्, निर्गुणपरवेदान्तवाक्येषु सकलेषु न्यायेन तदर्थप्रतिपादनम्, सम्यग्ज्ञानं प्रति अन्तरङ्गबहिरङ्गसाधनविवेचनम्

---

1. न निरोधो न चोत्पत्तिः न बद्धो न च साधकः । न मुमुक्षुर्नवै मुक्त इत्येषा परमार्थता ॥ इति अत्रार्थे गौडपादसंमतिः ।
2. कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः इत्यादि वाक्यम् ।
3. 'श्येनेनाभिचरन् यजेत' इत्यादिः ।

इत्येवं सर्वं तत्त्वं वाक्यार्थप्रतिपत्तिसाधनं परमहंसस्य मुमुक्षोः यत्नतः साध्यम्, इदं सर्वं अध्यायेऽस्मिन् सूत्रानुसारेणोक्तम् । वैराग्यं हि संसारे दोषदर्शिनो भवति । तदप्यविचलितम्, तथा सति तत्त्वंपदार्थशोधनकार्ये प्रवृत्तिर्भवतीति प्रथमं निरूप्यते । प्रथमतः संसारदोषे वर्णिते ततो जुगुप्सा भवेदिति । जीवस्य जननमरणे संसरणं क्रमेण गच्छतो भवति । शुद्धः परो न संसरति, अपि तु स्वाविद्यया पर एव जीवभावं प्रतिपद्य लिङ्गशरीरयोगेन संसरति । ब्रह्मैव संसरति मुच्यते च, तत्र संसरणे द्वारकारणमज्ञानमूलकं लिङ्गशरीरं, स्वरूपतो मुक्तौ स्वाज्ञाननिवृत्तौ तु स्वस्वरूपप्रबोधमात्रं कारणं, स्वाज्ञानाश्रयः तद्विषयश्च चिदेव । स्वज्ञानमपि अन्तःकरणोपरागजनितशबलतां विना न घटते । कूटस्थे चैतन्येऽज्ञानित्वं च न घटत इति न, विकारस्तु न घटते परिणामित्वात् । अतो ज्ञानाज्ञाने चिति कथंचित् स्वीकार्ये, शुद्धचिदात्मनोऽपि स्वाज्ञानवशात् पुर्यष्टकं भवति । तदपि गगनमालिन्यवदलीकमारोपितमेव । संसरणाभिधानं त्रिविधं दुःखमपि मोहान्वितस्य पुर्यष्टकयुतस्यैव भवति, तदपि न सत्यम् । परमेष जीवः परब्रह्मणोऽधिकरूपभृदपि तत्त्वतो नातिरिक्तः । परस्यांशोऽपि न वस्तुतोऽवयवः, नापि तस्य विकारः, नापि तस्मादत्यन्तं भिन्नः, कुतः? ब्रह्मात्मतावचनविरोधप्रसंगात्, तथा परब्रह्मण एव विश्वे प्रवेशोक्तेः[1] परान्नाधिको जीवः, निजस्वरूपादतिरिक्तं यत्किंचिद्वस्त्वस्ति तदपि अप्रच्युतसंविदेकस्वरूपाधीनसत्ताकमेवेति तदपि कल्पितमेव भवेत् । अतः परमात्मस्वरूप एव जीवः पुर्यष्टकसहितो भवति संसारे ।

कर्मेन्द्रियाणि खलु पञ्च तथापराणि बुद्धीन्द्रियाणि मन आदिचतुष्टयं च ।
प्राणादिपञ्चकमथो वियदादिकं च, कामश्च कर्म च तमः पुनरष्टमी पूः ॥[2]
इति ।

पुर्यष्टके लिङ्गपदव्यवहारो न मुख्यः । परं तु लिङ्गपदेन पुर्यष्टकं क्वचिद्व्यवहृतमपि न मुख्यतया । मुख्यतया लिङ्गं तु सप्तदशकम् । दशेन्द्रियाणि, मनोबुद्धी, प्राणादिपञ्चकम् इति । एतल्लिङ्गशरीरेण संबद्धो जीवो भवति । तस्य "तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चे"[3] ति वचनात् संसरणे चतुर्विधं कर्म,

1. 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति श्रुतेः । 3. बृ. 4-4-2
2. सं.शा. 3-16

चतुर्विधमुपासनं,[1] चतुर्विधः र्वानुभवजन्यसंस्कारः[2] इति त्रयं कारणम् । प्रागुक्तपुर्यष्टकराहित्ये न कस्यचिदपि शुद्धात्मनोऽस्ति संसृतिदुःखम् । तत्साहित्ये च दुःखवियोगो नास्ति क्वचित् । अतः पुर्यष्टकोपाधिमहिम्ना जीवः संसरतीति "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति"[3] इति श्रुतिनिर्णयोऽत्र ।

जीवपदार्थशोधनप्रकारः

वस्तुतो नित्यमुक्तचैतन्यरूपस्य जीवस्य शरीरपुरसंबन्धो नास्त्येव । स च मायारचित एव, उपाधेरपि तत्कल्पितत्वान्न वास्तवत्वम् । यथा गगने मालिन्यनैर्मल्ये कादाचित्के, कदाचिदपि न वास्तवे, भ्रान्त्यैव तथा कल्प्येते व्यवहारे एवं नित्यमुक्ते संसृतिमुक्ती अपि, अयं बद्धः, अयं मुक्त इति रूपेण । तद्धि कल्पनारचितस्यासत्यस्य परमार्थवस्तुसंस्पर्शित्वमस्ति, गगने नैर्मल्यवत् तथैव परमार्थवस्तु ब्रह्म तमो वा तत्कल्पितं वा न स्पृशति, ऊषरभूमिं मरीचिकाच्छन्नां जलवाहिनीव, प्रस्तुते च मुमुक्षोरात्मनः स्वतो गमनं नास्ति, विभुत्वात्, नापि जडस्य पुर्यष्टकस्य केवलस्य, नापि चिज्जडात्मकस्य, गमनसमर्थस्य तादृशस्य वस्तुन एवाभावात् । लिङ्गशरीरावेष्टितस्य चैतन्यवलयस्य परिच्छिन्नचैतन्यस्य वस्तुतो गमनं संसरणं न संभवि । न खलु घटे गच्छति सति नयनकाले घटवेष्टितं गगनं गच्छति । किं तु घट एव गच्छति, गगनं तु अचलमेव, गच्छताऽपि घटेन सह न गच्छति । यत्र यत्र घटो गच्छति, तत्र तत्र घटच्छिद्राणि बहूनि भवेयुः । वस्तुतः घटाकाश एक एवेति न तद्गमनं प्रामाणिकम् । तद्वदत्रापि शरीरमेव गच्छति, चैतन्यं त्वचलं, गच्छता शरीरेण परिवेष्टितं सत् तत्र तत्र भिन्नभिन्नमेव भवेत् । वस्तुतश्चेत् नो विभुः, गमनंत्वप्रामाणिकम् । वस्तुत आत्मनो विभोः कर्तृत्वेनाभिमानास्पदस्य लोकान्तरदेहान्तरगमनाभावात् अकृताभ्यागमकृतविप्रणाशदोषौ फलत पर्यवस्यतः । अपरस्य भोक्तुः लोकान्तरे दिवि समुदयादिति । किंच उपाधिचलनेऽपि तज्जनितस्य उपाधिसंबद्धस्य अपायेऽपाय एव । कुण्डलापसरणे कुण्डलसंबन्धापगमवत्, ततोऽप्यात्मनो गमनमपरं वा न तात्त्विकं स्यात् । शरीरसंबन्धमङ्गीकृत्योक्तमेतत् । वस्तुतोऽसङ्गचैतन्यस्य शरीरसंबन्धो दुरुपपादः तत्त्वतस्तर्कासहः । यथा गगनस्य

1. विद्येत्यर्थः ।
2. पूर्वप्रज्ञेति शब्दाभिधेयः ।
3. छां. 8-12-1

घटसंबन्धो न घटते तथा, अतो लिङ्गशरीरघटितस्यापि गमनादिकं न वस्तुतो घटते । गगनस्य निरंशत्वात् एकदेशसंबन्धो न घटते घटेन । नापि समस्तस्य परिच्छिन्नेन घटेत तद्द्वयासंभवात् । तथा विभोश्चेतनस्य निरंशस्य लिङ्गेनैकदेशसंबन्धो वा समस्तस्य वा असंभवी । यदि सर्वात्मना शरीरेण लिङ्गेन चेतनो व्याप्तः तदा जीव एव भवेत्, तदा ईश्वरो न स्यात् । नापि जीवजातमपरं स्यात्, एवं सति गुरुशिष्यसंबन्धोऽपि न स्यात्, तथा बन्धमोक्षव्यवस्थापि न स्यात्, एवं निर्विषयत्वे शास्त्रवैयर्थ्यापातः । परमार्थदृशः शुद्धचैतन्यस्य शरीरसंबन्धोऽपि नास्ति युक्त्या च विचारासहः आकाशस्येव घटान्वयः । अतोऽज्ञानं विना परलोकमार्गगमनं तदागमनादिसंसरणं गमनवद् व्यापकात्मनो नोपपद्यते । अतः सर्वमाविद्यकमिदं संसरणम् । तदपि लिङ्गशरीरादिधर्ममात्मनि, चिदात्मत्वं च शरीरेऽन्योन्याध्यासेन परिकल्प्य जीवो लोकान्तरं गच्छति, तत आगच्छतीत्यादि-संसरणव्यवहारः । इत्थं स्थिते स्वात्मनि तत्त्वमस्यादिमहावाक्यजनितज्ञानं विनाऽसंसारि शुद्धस्वरूपत्वं दुर्गमं भवति । एतत्सर्वं "सधीः स्वप्नो भूत्वा स समानः सन् उभौ लोकौ अनुसंचरति, ध्यायतीव लेलायतीव"[1] इत्यादिवचन-प्रमाणसिद्धं, न स्वकपोलकल्पितमाचार्यैः । एवं चिदाभासरूपं जीवचैतन्यं लिङ्गशरीरनिमित्तं जलपात्रोपाधिनिमित्तसूर्य- प्रतिबिम्बवत् परिच्छिन्नं गच्छतीत्युपपद्यते । जीव एव पुर्यष्टकपरिवेष्टितः श्रुतिसिद्धतमःपदार्थशक्तिरूपो-पाधियुतचेतनेश्वरेण विभुना तदबोधवशात् भीतेः प्रेरितस्सन् शाकटिकप्रेरितशाकटवत् परतन्त्रतया ऊर्ध्वोच्छ्वासी जीवः शब्दं कुर्वन्नेव लोकान्तरं सुकृतदुष्कृतकर्मवशात् स्वर्गनरकादिलोकान् गत्वा स्वर्गफलं सुखं यातनां वा अनुभूय अभुक्तकर्माशयवशात् यथाकर्मभूय इह आगत्य संभवति । एवं ज्ञानकर्मसमुच्चयवशात् सत्यलोकं गत्वा इमं मन्वन्तरं[2] विहाय कल्पान्तरे मूढमतिः कामुकश्चेत् आगच्छति । अथवा निष्कामः सगुणोपासनया सत्यलोकं गत्वा तत्र क्रमेण लब्धपरमात्मज्ञानो ब्रह्मणा सह मुच्यते । देवयानपितृयाणमार्गसाधनीभूत- ज्ञानकर्मोभयराहित्ये केवलपापवशात् क्षुद्रजन्तुरूपेणात्र जायते । एवं जीवस्य कामुकस्य मूढमतेः संसरणं परमात्माबोधवशात् जायते । विरक्तमतेस्तु श्रवणादिसाधनमपवर्गफलप्राप्तये

1. बृ. 4-3-7
2. कल्पं विहायेत्यर्थः

विहितम् । भगवद्भक्तस्य शमादिसंपन्नस्य ज्ञानेन परपदलाभो भविता । हरिपूजया, यज्ञादिभिश्च प्रागुत्पन्नं यद्वैराग्यं संसारदोषानुदर्शनेन द्रढीभवति[1] । तदास्य मुमुक्षोः श्रवणे प्रवृत्तस्य महावाक्यार्थज्ञाने जननीये प्रथमं पदार्थविवेचनम् आवश्यकम् । तत्रादौ त्वंपदार्थलभ्यार्थज्ञानं संपादनीयमिति इच्छा जायते, जागरानुभूतम् अस्य कर्तृत्वभोक्तृत्वादिकं किं वास्तवम् उत परौपाधिकमिति संशये सति विवेचनं कार्यम् । जागरादिदृष्टकर्तृत्वभोक्तृत्वादिमपोह्यमुखतो व्यावृत्य त्वंपदलक्ष्यार्थज्ञानं विना श्रुतमपि महावाक्यमस्य बधिराणां पुरो गीतं संगीतमिव निष्फलं भवेत् । अतः त्वंपदलक्ष्यार्थज्ञानमावश्यकम् । आत्मनि कृर्तृत्वादिबुद्धिः भ्रम एव । कर्ता भोक्तेत्यहंपदार्थस्यापि चैतन्यस्वरूपभानेनभासकत्वात् आत्मा न कर्ता न भोक्ता कूटस्थचिद्रूपत्वादपि, जागरेऽपि कर्त्रादिकारकगणं पश्यति इति हेतोः स केवलं साक्षी भासकः । यथा गगनमध्यवर्ती भास्वरो भास्करः सकलव्यापारभासकोऽपि जनैः कर्तेति न गृह्यते भुवि स्थितैः । अज्ञानकार्यपंचभूतोत्थकार्यकरणसंघातो हि करोति, फलमश्नुते च । तत्साक्षी चात्मेति न कर्तादिरूपः । संघाते चैतन्यतादात्म्याध्यासेन सोऽपि चेतन इव भासते । यथा क्षीरपूर्णचषके निक्षिप्तो मरकतमणिः क्षीरं स्वच्छायं करोति एवं जडमपि विश्वमेव स्वसान्निध्यमात्रेण चिदेकच्छवि करोति । देवमनुष्यादिबहुविधकार्यकरणसंघातेऽभिमानी सन्नात्मा जलपात्रप्रतिबिम्बितमार्तण्डमण्डलवत् तात्त्विकसंसर्गेण विनैव भिन्नभिन्नतया भाति । एवमध्यात्माधिभूताधिदैवभेदेन सूत्रं विराजमपि समष्टिरूपेण साक्षिभूतःसन् पश्यत्यात्मा । अस्य साक्षित्वे जगन्मूलकारणमज्ञानं चैतन्यच्छायाप्रकाशितमेव । सर्वशरीरेषु एकस्यात्मनः कथं साक्षित्वमिति शंकायां समाधानार्थमनुमान-प्रमाणोपन्यासः सप्तभिः श्लोकैः । यथा स्वदेहः स्वात्मनैवाऽऽत्मवान्, तथाऽन्येषामपि देहाः सर्वे साक्षिभूतेन आत्मनात्मवन्तः, देहत्वादिति अनुमानम् । स्वीयदेहवदेव एकात्मसंबन्धित्वं देहजातीयेषु सर्वेषु च संविदिति व्यक्तिः । यथा मम देहे एका तथा संविद्रूपत्वात् अन्यदेहेष्वपि सा एकैव । एवं सर्वभूतेषु चात्मा संवित्वादेक एव । एवं बुद्धीन्द्रियज्ञानरागद्वेषमोहादयः संविद्रूपसाक्षिणात्मनै-केनात्मवन्तः । यथा मम, सर्वदेहेषु च तथा बुद्धित्वादिसमानजातित्वादिति

1. कमलासनान्तं सर्वं जगद् अम्बुबुद्बुदसमं नश्वरमेव कर्मोपासनाजन्यमपीति तत्र हेयताबुद्धिर्जायते, तथा च वैराग्यं द्रढीभवति ।

अनुमानानि आत्मैक्ये द्रष्टव्यानि । तथा च साक्षिभूतात्मनि कर्तृत्वम् अविवेकनिमित्तम्, न वास्तवम् गगननैल्यवत् । अयमात्मैव स्वयं ज्योतिः । तदभावे शरीरस्य सूर्यादिबाह्यज्योतिभिरुपकृतस्यापि न प्रकाशनसंभवः । तेषामात्मचैतन्यसान्निध्यबलं विना कथं विज्ञानम्? यद्यपि बाह्यज्योतिः सत्ताकाले जागरे पुरुषव्यवहारः कर्मादिः संभवी, तथापि बाह्यान्तर्ज्योतिर्द्वयमध्यवर्ती देहः कर्मादिव्यवहारं करोति । तत्रापि बाह्यमादित्यादिज्योतिः स्वीयकर्मसाध्यमनित्यम् । तदभावेऽपि स्वप्नव्यवहारो नित्यचैतन्यज्योतिषैव भवतीति जागरेऽपि तदिदमवार्यं भवति । ततः साक्षी देहातिरिक्तः आत्मा । किं चात्मचैतन्यं न कर्मसाध्यम् । किं तु नित्यमपीदं श्रोत्रादिजन्यवृत्तिषु बाह्यशब्दादिविषयाकारः प्रतिबिम्बनं कर्तुः कर्मवशाद् भवति, तथा आत्मचैतन्यसन्निधिमात्रेण चैतन्याकारप्रतिबिम्बनं भवति । यथा आकाशान्वितत्वं घटादौ स्वाभाविकं, क्षीरादिवस्तुसंबन्धस्तु कारणान्तरेण, तथा बुद्धिवृत्तीनां चैतन्यसंबन्धः स्वाभाविकः शब्दादिविषयाकारत्वं परं जीवीयकर्मनिमित्तकम् । तथा च विषयस्फुरणस्य नित्यचैतन्यस्यापि तदाकार-वृत्तिजन्ममात्रेण कादाचित्कत्वम् औपाधिकमिति न नित्यत्वभंगः । प्रमाणफलं ज्ञानरूपं यत् प्रमातुः तस्यापि साक्षी निर्विकार आत्मा तिष्ठत्येव, तदभावे ज्ञानस्य वृत्तिरूपस्य भानासंभवः । अतोऽपि अज्ञानपटलावृताक्षस्य बुद्धिनिष्ठमनात्मगतं कर्तृत्वादिरूपं शुद्धचैतन्ये भ्रमादेव भासते, तस्य सर्वस्यापि दृश्यकोटिप्रविष्टस्य दृक्स्वभावत्वं न सुवचम्, यद्यद्दृश्यं तत्तद्दृशो दूरमेवास्पृष्टं यथा द्रष्टुः भूभूमिधरादीति न्यायतो दृग्दृश्योरात्यन्तिकभेदो लोकसिद्ध एव तथाऽत्रापि । यदि कर्तृत्वमस्य स्वाभाविकं तर्हि तदेव जाग्रद्दृष्टमत्रापि स्यात् स्वप्ने, नास्ति च; परं तु स्वप्ने मायाकल्पितं कर्तृत्वं तदुपकरणकारकवस्तूनां जागर इवाभावात् स्वप्ने दृष्टस्यापि कर्तृत्वस्य जागरे बाधात् असत्यत्वमेव । अतः कर्तृत्वादिबाधयोग्यं चेन्न सत्यं स्यात्; अतोऽपि कर्तृत्वशून्य आत्मा, तथा भोक्तृत्वादिशून्यश्च, तुल्यन्यायात् ।

स्वप्नविचारप्रसङ्गेन मायाविचारः

सर्वं जागरं मायाकल्पितम्, मायाकल्पितस्वप्नवत्, इत्यनुमानेन साधयितुं तदादौ मायाशब्दार्थः क इति चिन्तनीयम् । सा च माया लोके ऐन्द्रजालिकादौ

प्रसिद्धा मायावीति तस्मिन् व्यवहृतेः सा माया अविद्यातिरिक्ता न भवति अतो मायाशब्दस्य अविद्यायां शक्तिः, मायाविनो या माया न सा मणिमन्त्रौषधादिः सत्यं वस्तु, इयं हि माया असत्या भवतीति । नापि पुरुषगतशक्तिविशेषो माया, मणिमन्त्रौषधनिमित्तशक्तिविशेषो माया जनानां भ्रमहेतुश्चेति समाधानमपि न साधु, कुतः तत्प्रयुक्तशक्तिश्च सत्या भवेत् । नापि सहजा सा शक्तिः जनिता वा केनचिदिति दुर्निरूपा । पुरुषस्य शुक्रशोणितसंबन्धकाले वा गर्भशायिना न विज्ञाता सा सहजशक्तिः । नापि मातुरुदराज्जननानन्तरं बहिर्वा घटते । नापि गुरूपदेशकाले शिष्ये, मण्यादिकमर्पयति । तद्द्वारा शक्तिविशेषं वा आदधाति । अतोऽपि मण्यादिसंजाता शक्तिमर्यिति मण्यादिरेवेति वा न निर्णेतुं शक्यम् । अतः पुरुषविशेषगता शक्तिः मायेति न साधु । स्वाश्रयादन्यस्य विभ्रमकरी अनध्यस्तान्याकारनिरपेक्षा पुरुषस्य काचन शक्तिर्मायापदवाच्येत्यपि न साधु । सूत्रकृता मृषार्थे प्रयुक्तं ''मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्''[1] इति । मायापदं भाष्यानुसारेण मृषार्थकम् । यदि माया सत्या काचन शक्तिः तदा सूत्रभाष्यविरोधः । मायाऽविद्यैव,

अज्ञानमेव च भविष्यति शक्तिरेषा सर्वप्रपञ्चजननी परमेश्वरस्य ।
माया श्रुतिस्मृतिवचोभिरुदीर्यमाणा शक्तिग्रहो हि परविभ्रमहेतुशक्तौ ॥[2]

इत्यनेन परमेश्वरस्य सर्वप्रपञ्चजननी काचन शक्तिरस्ति, सा अज्ञानमेव, नान्यत् । श्रुत्यादौ मायाशब्दस्य शक्तिग्रहः, अन्यविभ्रमकारणीभूतशक्तावेव वाच्य इत्युक्तम् । मायाशब्दश्च नालौकिकः शब्दः, येन प्रसिद्धार्थपदान्तरसान्निध्यवशात् शक्तिग्रह इति वचनार्हः स्यात् । अपि तु लौकिक एव प्रसिद्धः । तथा च जगति प्रसिद्ध एव मायाशब्दो वेदेऽपि न समानर्थकः । उद्भिदादिशब्दस्य अप्रसिद्धस्य यजतिपदसमभिव्याहारेणार्थान्तरनयनमगत्या, अत्र तु मायाशब्देन अज्ञाननिवेदने न काप्यनुपपत्तिरस्ति । तदप्यज्ञानं जडशक्तिरूपेण सर्वेश्वरस्य सृष्टावुपयुज्यते । न तावता सर्वज्ञत्वविरोधि भवति, यत ईश्वरं नावृणोति[3] । तथा च उद्भिदा यजेतेत्यनुदाहरणं वैषम्यात् ।

1. ब्र.सू. 3-2-3
2. सं.शा.3-44
3. यं प्रत्यावरकं तं प्रत्येवाज्ञानमिति जीवदृष्ट्या व्यवह्रियत इत्यर्थः ।

एकदेशिपक्षनिरासः

किं च द्रष्टृणामेव भ्रमकारणं यत् तदेव मायाविगता माया, न मायाविनोऽपि, तस्य भ्रमाभावात् । अज्ञानरूपमायाविषयतामात्रेण तस्य मायावित्वम् । तथा च अनिर्वचनीयमेव तमो मायाशब्देन मायिनि गीयते - "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमि"[1]ति । अत एव जनाः हस्त्यादिभ्रमेण पश्यन्ति रज्जौ सर्पमिवाविवेकतः। सम्यज्ज्ञाने सति हस्त्यादिरूपो नायमिति त एव जानीयुः । अतो मायिनि विषये तम एव माया, मायाव्येवाज्ञातः । द्रष्टारो वयमज्ञाः इति । यदि अज्ञातवस्तुनि मायाविशब्दप्रयोगः तर्हि लोकविरुद्धः न हि रज्जुखण्डेऽज्ञाते मायाविशब्दः प्रयुज्यते केनापि, उक्तपक्षे तत्रापि तत्प्रयोगापत्तिः । अतः अज्ञातविलक्षणत्वमेव मायिन उचितम् । लौकिका अपि मायावीति मायाप्रदर्शकं पुरुषं निपुणं दृष्ट्वा आदराद् व्यवहरन्ति । तथा चायमेव सिद्धान्तः, प्रतारकेऽन्यभ्रमकारणमन्त्रादिसाधनवति तज्जीवनयात्रानिर्वाहके मायाविशब्दप्रयोगो लोकरूढः । अतो मायाश्रये क्षोभके मायाविशब्दप्रयोग एव साधुः । यद्यपि माया द्रष्टरि न प्रयुज्यते, अज्ञानरूपमायावत्यपि, तदिदं ब्राह्मणपरिव्राजकनयेन परिव्राजकव्यतिरिक्ते ब्राह्मणशब्दप्रयोगवत् साधनीयम् । अतोऽज्ञानमनिर्वचनीयमेकाश्रयविषयकं माया । मायावी ईश्वर इत्यपि आश्रयत्वेनापि व्यवहृतः श्रुत्यादाविति । मायाऽज्ञानयोरेकत्वे तत्त्वावारकत्वं तत्त्वबोधनिवर्त्यत्वं च हेतुः । गीतायाम्- "नाहं प्रकाशः सर्वस्य योगमायासमावृतः"[2] इत्यत्र मायाऽवारिकेत्युक्तम् । "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः"[3] अत्र अज्ञानस्य आवारकत्वमुक्तम् । "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते"[4] अत्र मायाया ब्रह्मज्ञाननिवर्त्यत्वमुक्तम् । "ज्ञानेन तु तदज्ञानं येषां नाशितमात्मन"[5] इत्यज्ञानस्य ज्ञाननिवर्त्यत्वमुक्तम् । अतो लक्षणसाम्यात् मायाविद्ययोरेकत्वं तत्त्वैक्यम् । एवं च सूत्रकारोक्तं[6] मायापदं लोकसिद्धमायैव जागरे स्वप्ने च तत्कारणाज्ञानरूपैवेति मत्वा तथाह । अविद्यामात्रे मायापदशक्तिः, तद्व्याप्तिश्च

1. श्वेता 4-10
2. भ.गी. 7-25
3. ibid 5-15
4. Ibid 7-14
5. Ibid 5-16
6. 'मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्' इत्यत्र ।

वर्तत इति वेदं, लिङ्गं च प्रमाणयन् सूत्रकारो मायामात्रमित्याह नत्वविद्यामात्रमिति ।

अज्ञानमपि भावरूपं न प्रागभावरूपम्

सद्रूपमावरणतानुभवादभीष्टमज्ञानमात्मचिति नैशतमोवदेतत् ।
ज्ञानं दिवाकरवदस्य जडप्रकाशरूपं निवर्तकमिति प्रवदन्ति धीराः ॥[1]

इति । ज्ञानेनाज्ञाननाशस्य भगवतोक्ततया ज्ञानप्रागभावातिरिक्तमेव[2] तत् । कुतः? ज्ञानेन ज्ञानप्रागभावक्षय इति न घटते । ज्ञानस्य स्वप्रागभावनाशरूपतया तदुदयात् तन्नाशे तस्य हेतुत्वानुपपत्तेः । तथा च, स्वप्ने सर्वमपि मायामात्रं तमोमयम् । अतः चैतन्यस्य कर्तृत्वादिकमपि तथेति यथा, जागरेऽपि न स्वाभाविकं, चैतन्यमात्रं तात्त्विकं जीवस्य, अग्नेरुष्णत्वमिव जातुचिदपि अप्रच्युतस्वभावत्वादिति आत्मानं न मुञ्चति । जागरितं कर्तृत्वादि तु स्वप्ने स्वप्नगतं जागरे च आत्मानं मुञ्चत्येव । तदिदं वितथम् । उभयावस्थयोर्व्यवहारसाम्येऽपि स्वप्ने जागरितं नास्ति मिथ्यात्वात् । जागरितं स्वप्नबाधकमिति बाधनबलात् सत्यमिति जनाः वदन्ति । वस्तुतोऽविचलितदृक्चैतन्यरूपं यत्, तद्भिन्नं मर्त्यम् । एवं स्थिते स्वप्नदृष्टवस्तुमिथ्याभूतमपि शुभाशुभयोस्तथ्ययोरेव सूचकम् । तथैव वस्तुतो जागरितेऽवगतवाक्यमपि ब्रह्मैक्यरूपतत्त्वबोधनक्षमं भवेत् ।

सुषुप्तिविचारः

स्वप्नभ्रमस्य तदीयं सर्वमपि जगत्कारणे तमसि लीयते । सुकृतदृष्कृतनिमित्तस्वप्नभ्रमः यावददृष्टं तिष्ठति । सकलकारकवर्गनिष्पन्नसुकृतदुष्कृतकर्मणोः कारकैः सह यावत् फलोदयं सूक्ष्मरूपेणावस्थानांगीकारात् स्वप्नभ्रमोऽपि जागरितवत् कर्मफलमेव । तदुभयमज्ञानमूलकमपि कर्मफलत्वात् कर्मक्षये तदिदं परमात्ममायायां लीनं[3] भवति । इदमपि पुनरुत्थानकार्यानुमानेन अज्ञाने लीनमिति गवेषणीयं न प्रत्यक्षानुभवाद् गम्यते । सुषुप्तिकाले हि अज्ञानमेव

---

1. सं.शा. 3-129
2. ज्ञानोत्पत्तेः प्राक् संविदभावरूपं वा बुद्ध्यभावरूपं वा नाज्ञानम् उपेयते ।
3. सूक्ष्मरूपेण तिष्ठतीत्यर्थः ।

साक्षिणानुभूतमिति वक्तव्यम् । उत्थितस्य 'न किंचिदवेदिषमि'ति अनुभवात् । अन्यथा 'नावेदिषमि'ति निश्चयो न स्यात् । अतः सुषुप्तिकाले अज्ञानमस्ति ।

अज्ञानं तदात्वे नास्तीति, तथाप्यस्तीति उभयथा भाष्यवचनं तु एवं संगमनीयम् । अहंकारस्य सुषुप्ते विरहात् अज्ञानं न स्पष्टानुभूतिगोचरः । जागरे तु स्वकार्यं इदमंशमहंकारांशं चादाय 'मूढोऽस्मि' 'अहं न जाने' इति कार्यरूपेण स्पष्टानुभूतिविषयो भवतीति भाष्यविगानपरिहारः । इत्थमेव 'तमोऽपि तदात्वे नाभूत् । जीवस्तदा निर्बीजः पर एव साक्षात् बभूवेति' वचनमपि भाष्यादौ, तमसः स्पष्टं जागर इवानुभवाभावमात्रेण न पुनः सर्वथाऽभावेन । अज्ञानतत्कार्यमतिहीनत्वात् सुषुप्ते जीवो नित्यमुक्तपरमात्मरूपेण वर्तत इति । तथा कामकर्म तत्फलानि परमात्मनि कुत इत्युक्तिरपि तथैव ।

आत्मनः साक्षित्वप्रमातृत्वविचारः

आत्माऽज्ञानेनोपाधिना प्रतीचः साक्षित्वम् । प्रमातृत्वं तु मतिकञ्चुकेन[1] । इदं सुषुप्तिकाले नास्ति । कुतः, बुद्धिहेतुकत्वात् प्रमातृत्वस्य तत्काले तदभावात् तदभावः । तत्काले हि अज्ञाने बुद्धिर्लीना भवति । तत्र हि सर्वमपि लीनं भवति न च सर्वलयेऽज्ञानस्यापि लयः शंक्यः । मोक्षविलक्षणत्वात् सुषुप्तेऽज्ञानमेष्टव्यम् । यद्यपि अज्ञानानुभवो न स्पष्टो जागर इव, तत्राहंकाराभावः कारणम् । दृगेव केवला तमसः साक्षिणी । तमो हि घटवत् दृश्यमिति, एव मवस्थात्रयस्यापि साक्षिणी । अहंकारोऽवस्थात्रयं च दृश्यमेव तत्साक्षी चिद्घन आत्मा पृथगेव । साहंकारमवस्थात्रयं नान्वेति चात्मनि चेतनवत्, किं तु व्यभिचरति । अवस्थात्रयवत् मूर्च्छोत्क्रान्त्यवस्थयोरपि चैतन्यमव्यभिचारि, तदेव सत्यमात्मनः । व्यभिचारि यत्किंचिदपि मृषैव, मालासर्पदण्डादिवत् । रज्जुस्तु सर्वत्र तत्रानुगता सत्येति यथा । एवं स्वाज्ञानं जीवचित्तमवस्थावदपि स्वाज्ञानसत्ताकल्पितत्वात् सर्वमिदं स्वरूपानुभवबलात् मृषा भविष्यति 'नास्ति नासीन्न भविष्यती'ति मिथ्या बुद्धिगोचरीभवति केवला चितिरवशिष्यते । एवं 'किं ज्योतिरेवायं पुरुष' इत्यादिज्योतिर्ब्राह्मणवाक्यप्रमाणानुसारेण, अवस्थात्रयधर्मशून्या चित् मोक्षोपयोगितया त्वंपदार्थलक्ष्यार्थतया निरूपिता ।

1. बुद्धितादात्म्येनेति यावत् ।

तत्पदार्थलक्ष्यनिरूपणम्

नस्थानतोऽपीति[1] सूत्रानुसारेण तत्पदार्थस्य ब्रह्मणो विशेषरूपं स्थानतो वा स्वतो वा नास्ति । अतो निर्विशेषरूपं केवलसच्चिदानन्दस्वरूपम् उपाधिप्रभवा विशेषाः सदा मृषाभूताः जपाकुसुमनिमित्तं लौहित्यं स्फटिकमणेरिव । परस्यैवाद्वयस्य मायोपाधेरीश्वरत्वम्, कार्योपाधेः[2] प्रतीचो जीवत्वम् । एतद्द्वयमपि विचारे मृषैव, बन्धुजीव[3] कुसुमसंसर्गजनितरक्तिमेवाभ्रकादेः । औपाधिकत्वं यत्र तत्र मिथ्यात्वम् । अस्य व्यभिचारस्थलं भल्लातकरसेन शुक्लवस्त्रे नैल्यमिति चेत् तदपि पक्षकोटिनिक्षिप्ततया, स्फटिकलौहित्यदृष्टान्तेन मिथ्येति साध्यत इति । उक्तं जीवत्वमीश्वरत्वं चौपाधिकमिति श्रुतिप्रमाणसिद्धम् ''यथा ह्ययं ज्योतिरात्मा विवस्वान् अपो भिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपः देवः क्षेत्रेष्वेवमजोऽयमात्मा'' इति । ''एकधा बहुधा चैव दृश्यते जलचन्द्रवत्''[4] इति च।

अन्ये पुनः स्वरूपज्ञानानन्दवत् ईश्वरत्वं परस्य तात्त्विकमिति वदन्ति । तेनेश्वरत्वेन भृत्यानिव लोकपालानपि नियमयति । प्रियमोदप्रमोदाख्येषु नित्यसुखं विषयेन्द्रियसंपर्कजोऽपि प्रतिबिम्बितमुत्पन्नमन्यदिति यथा तद्वत् ईश्वरत्वं मायातदुत्थबुद्धिषु च प्रतिबिम्बितमन्यदिति वदन्ति । एवं च माया-निविष्टस्वरूपनिरपेक्षचेतनः सर्वेश्वरो भवति सर्वेशितव्यापेक्षया । एवं बुद्धिप्रविष्टस्वरूपः[5] परमात्मा स्वीयभृत्यजनमात्रनियामको भवन् हिरण्यगर्भादिपरि-मितेश्वरो भवति । अनन्तरं तु सम्यज्ज्ञानेन निरस्तसर्वप्रपञ्चः, निर्गुणे निर्विशेषस्वीयस्वरूपे स्वप्रकाशे स्वराज्ये तिष्ठन् स्वराडेव भवति ।

अत्र ''ज्ञात्वा देवं सर्वपाशापहानिः । क्षीणैः क्लेशैर्जन्ममृत्यु प्रहाणिः । तस्याभिध्यानात् तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकाम''[6] इति श्रुतिः

---

1. 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि' इति (ब्र.सू. 3-2-11) सूत्रम् ।
2. अन्तःकरणोपाधेरित्यर्थः ।
3. रक्तपुष्पविशेषः ।
4. ब्र.बि. 12
5.. तत्प्रतिबिंबित इत्यर्थः ।
6. श्वेता 1-11

प्रमाणम् । तथा 'स स्वराड्भवति'[1] इति च । तथाचेश्वरत्वं सत्यमेव ज्ञानानन्दादिवत् इति एकदेशिमतम् ।

सत्यज्ञानानन्दस्वरूपमेव श्रुतितात्पर्यविषयीभूतम्, न तु तथेश्वरत्वम् । 'स स्वराड्भवतीति' फल श्रुतिरपि न तत्परा । तत्त्वमादिवचनं हि तत्परम् । फलश्रुतिर्यदि तत्परा, "तदेतत् सामगायन्नास्ते हाव[2] इत्यादि "जक्षन् क्रीडन् रममाणः"[3] "यं कामं कामयते सोऽस्य संकल्पादेव समुत्तिष्ठती"[4]ति फलवाक्यान्यपि तत्पराणि भवेयुः । तथा च मुक्तस्वरूपमिदं सर्वं स्यात् ।

तथा च निर्विशेषश्रुतितात्पर्यानुरोधेन सामगानं जक्षणादि च, अर्थवादगतत्वात् तत्परश्रुतिविरोधात्त्यज्यते । "नेति नेती"[5] ति श्रुतिः ईश्वरत्वमपि वारयति । केवलमनवद्यविग्रहं चैतन्यस्वरूपमवशिनष्टि । ब्रह्मणि मायोपाधिकृतेश्वरत्वनिषेधे नेति नेतीति श्रुतेस्तात्पर्येऽपि स्वाभाविकभगवत्पादोक्तं निरुपाधिकं विश्वैश्वर्यं मुख्यमस्तु, मोक्षेऽपि तत्परवाक्यविरोधाभावादिति । सामगानजक्षणसंकल्पसर्जनाद्यपि निरुपाधि नास्त्येव तत्त्वतः । 'नेति नेति' वचसा निषेधात् । तदपि औपाधिकम् । यथा सोपाधिकनिरुपाधिकद्वैविध्यं सामगानादौ नास्ति, प्रमाणाभावात्, तथा ईश्वरत्वेऽपि द्वैविध्यं नास्ति । ज्ञाने बाह्यविषयं निर्विशेषं नित्यमिति द्वैविध्यसत्वात्, बाह्यज्ञानं विहाय निर्विशेषज्ञानं चैतन्यरूपं स्वापे, मोक्षे चावस्थितं गृह्यते । इदमपि "यद्वैतन्न पश्यति पश्यन् वै तन्न पश्यति"[6] इति श्रुतिसिद्धम् । यथेदं न तथा श्रुतिसिद्धमीश्वरत्वम् ।

एवं "न वा अरे"[7] इत्यादिश्रुतिसिद्धं सुखं पुत्राद्युपाधिकमनुपाधिकं चेति । नैवमीश्वरत्वे द्वैविध्यवाचि प्रमाणमस्ति । अतो मोक्षादर्वाग्भूमि-विद्यमानमीश्वरत्वं मोक्षे नास्ति । अतो न तत्परं वाक्यमस्ति । आनन्दमये प्रियशिरस्त्वादि वर्णितमपि मोक्षात्प्राचीनमेव, क्वचिद् मोक्षे वर्णितमपि स्तुत्यर्थमेव, 'नेति नेति' इति वचःप्राबल्यात् ।

---

1. छां 7-25-2
2. तै.उ. 3-10-5
3. छां. 8-12-3
4. Ibid 8-2-10
5. बृ- 2-3-6
6. Ibid 4-3-23
7. Ibid 2-4-5

किंच ईश्वर इति वचसोऽपि ईश्वरत्वव्यापकस्वातन्त्र्यप्रकाशने तात्पर्यम् । माणवके सिंहशब्दस्य शौर्यप्रकाशन इव, तत्प्रयोगश्च शौर्यं विना नोपपद्यत इति यथा तथा स्वातन्त्र्यं विना सर्वेश्वरवाचिप्रयोगो न स्यात्, इत्यर्थापत्तिसिद्धं स्वातन्त्र्यवर्णनार्थमेव ईश्वरत्ववर्णनं, न तत् तात्पर्येण । "पराभिध्यानात्तु तिरोहित"[1] मित्युक्तिरपि सूत्रकृतोऽभ्युपेत्य वादः । कारणसत्वे चित्स्वरूपवत् ईश्वरत्वमपि वास्तवं स्वीकार्यं, नान्यथा । "कामादीतरत्र तत्र चे"[2]त्यादि सूत्रेण च दहरादिवाक्योक्तसत्यकामादिगुणानामनुकीर्तनमपि परममुक्तेः स्तुतय एव । सत्यकामादिवत् सर्वेश्वरत्वसर्ववशित्वादिगुणा अपि विवक्षिताः स्युः । तदा जीवस्य परमात्मत्वं प्रतिपत्तुं न शक्यमेव स्यात् । अतः परमेश्वरत्वादिगुण अपि स्तुतय एवेति युक्तम् । ईश्वरत्वं प्रतिवेदान्तं श्रुतमपि परमार्थदशायां मुक्ते निर्विशेषे न ग्राह्यम् । एवं कारणत्वं, साक्षित्वं च, श्रुतीनामतत्परत्वात् । ईशितृत्वं, कारणत्वं, साक्षित्वं, प्रमातृत्वादि, कर्तृकर्मक्रियातत्फलं वा, सामान्यं, विशेषश्चेत्येतत् सर्वं परस्परसापेक्षत्वाद्[3] अवास्तवमेव । क्रमेण ईशितव्यकार्यसाक्ष्यप्रमेयादि, कर्मादिविशेषरूपान्यवस्तुसापेक्षत्वात् न वास्तवम् । स्वातन्त्र्येण तदसिद्धेः ।

यथाह-

यत् सापेक्षमिहेक्षितं भवति तन्मायामयं स्वप्नवत् ।
तस्मादीश्वरतादिकल्पितवपुः स्वीकुर्महे न्यायत"[4] इति ।

भेदाभेदविषये विचारः

ईशितृ-ईशितव्य-कार्य-कारणादिभेदश्चौपाधिको न वास्तवः । एकत्र वस्तुनि भेदाभेदयोः विरुद्धतया न सहावस्थानम्, उपाधिभेदकल्पनेऽपि । किमुत निरुपाधिके? स्वभावतो विरुद्धं निमित्तान्तरमात्रेणाऽविरुद्धं भवेत् । रविरात्रिवत् क्वचित् तयोः समावेशो एकतरस्य भ्रममात्रेणैव निर्वाह इति भ्रमं विना तमसो रविणाऽविरोधसाधकः न कश्चिदस्ति । अज्ञानस्य तु सर्वसाधकत्वम् । मूढधीरुन्मत्तादिः स्वमपि खादति, नयनेन खण्डितमीक्षते । अतोऽज्ञानस्य न किंचिदस्ति दुर्घटम् । कारणत्वादिकमपि सर्वं मायामयमनादिमायैकनिबन्धनमिति

1. ब्र.सू. 3-2-5
2. Ibid 3-3-39
3. औपाधिकत्वात् ।
4. सं.शा. 3-193

निर्विशेषमेवात्मतत्त्वम् । असतः सतो वा कार्यस्य सतोऽसतो वोत्पत्तिर्वक्तुं न शक्यते, वेदान्तवादिसमये सत्कार्यवादः कथं साधित इति चेत् - सत एव सतो वस्तुत उत्पत्त्यनङ्गीकारात् प्रश्नानवकाशः । मायामये संव्यवहारमात्रे न किमपि दूषणमस्ति, इदमेव समाधानम् । किंच -

आत्रेयवाक्यमपि संव्यवहारमात्रं
कार्यं समस्तमिति नः कथयांबभूव ।
सत्कार्यवादविषयो न हि दोषराशिः
मायामये भवितुमुत्सहते विरोधात् ॥[1]

काणाददर्शनसमाश्रयदोषराशिः
दूरान्निरस्त इह संव्यवहारमात्रे ।
वेदान्तभूमिकुशलो मुनिरत्रिवंश्यः
तेनाह कार्यमिह संव्यवहारमात्रम् ॥[2]

षष्ठप्रपाठकनिबद्धमुदीरितं यत् तत्सत्यमेव खलु सत्यसमाश्रयत्वात् ।
तत्रैव यत्पुनरुवाच समुद्रफेन दृष्टान्तपूर्वकमदो व्यवहारदृष्ट्या ॥[3]

पूर्वं विकारमुपवर्ण्य शनैः शनैस्तद् दृष्टिं विसृज्य निकटं परिगृह्य तस्मात् ।
सर्वं विकारमथ संव्यवहारमात्रं अद्वैतमेव परिरक्षति वाक्यकारः ॥[4]

अत्र मधुसूदनसरस्वतीटीकाशयेन छान्दोग्यवाक्यकारो ब्रह्मानन्दीति, स च अत्रिवंश्य आत्रेयस्तदीयवाक्यमेव मूले आत्रेयवाक्यमिति व्याख्यानात् प्रकृते ग्राह्यम् । तदीयवाक्यं टीकायामित्थं दर्शितम् - "छान्दोग्यवाक्यकारेण ब्रह्मानन्दिनापि पूर्वपक्षेऽसतः सतश्चोत्पत्तौ दोषमुक्तं वा सांव्यवहारिकमायामयत्वपक्षेण समाधानमुक्तम् - नासत उत्पत्तिरनिष्पाद्यत्वात्, नापि सतः प्रवृत्यानर्थक्यात्, सत्वाविशेषात् अभिव्यक्त्यर्थमिति चेन्न, तस्या अपि सत्वात् प्रवृत्तिनित्यत्वाच्च सदाभिव्यक्तिप्रसङ्गः । न संव्यवहारमात्रत्वादिति । सत्कार्यासत्कार्यपक्षद्वये दोषराशिरुक्तोऽपि मायामये कार्ये सदसद्विलक्षणे न प्रसज्यते । तेनानेकपक्षोदाहरणेऽपि विवर्तवाद एव तस्याभिप्रेत इति कथम् । तेन

1. सं.शा. 3-217
2. Ibid 3-218
3. सं.शा. 3-219
4. Ibid 3-220

हि छान्दोग्यषष्ठप्रपाठकप्रमेयद्वितीयसद्वस्तुसिद्धये "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्"[1] इत्यादिश्रुतिमुपजीव्य विवर्तवादस्य तेनोक्तत्वात् स एव तदभिमतसिद्धान्त इति, तद्दर्शितसमुद्रफेनदृष्टान्तस्तु व्यवहारदृष्ट्येति च गम्यते। एवं क्रमेण पूर्वं विकारवर्णनेन तद्दृष्टिमुदिता विसृज्य सर्वं संव्यवहारमात्रमिति विवर्तवादं पश्चात् परिगृह्य, अन्तेऽपवाददृष्ट्या मुख्याद्वैतं परिरक्षति वाक्यकारो ब्रह्मानन्दीति टीकाशयः। तथा ब्रह्मानन्दिरचितवाक्यानां सूत्ररूपाणां भाष्यकर्ता द्रविडाचार्योऽपि अद्वयब्रह्मणः प्रत्यगभेदो वाक्यकाराभिप्रेत इति कथयति स्म, ततो व्यवसीयते ब्रह्मानन्दिनो विकारवादोऽनभिमत इति। आह च -

अन्तर्गुणा भगवती परदेवतेति प्रत्यग्गुणेति भगवानपि भाष्यकारः।
आह स्म यत्तदिह निर्गुणवस्तुवादे संगच्छते न तु पुनः सगुणप्रवादे ॥[2]
इति।

एवमत्र मूलोक्तवाक्यकार आत्रेयो ब्रह्मानंदीति, तदीयवाक्यभाष्यकारो द्रविडाचार्य इति तयोरभिमतः केवलो विवर्तवाद इति, सोऽपि निर्गुणब्रह्मणि तात्पर्यवर्णने पर्यवस्यतीति टीकातो गम्यते, वस्तुतो मूले आत्रेयः वाक्यकार इत्येव। भाष्यकारः कोऽपि न निर्दिष्टनामधेयोऽत्र प्रतीयते, विपश्चिद्भिर्विनिर्णेयोऽयं विषयः।

अत्यन्तं भिन्नयोः कार्यकारणभावो न घटते। सागरसह्याद्र्योरिव, नात्यन्ताभिन्नयोर्वा। घटाद् घटस्य, पटात् पटस्य वेत्यभावात् कुर्वद्रूपस्याकुर्वद्रूपस्य वा उदासीनस्य वा जनकत्वक्रमेणानवस्था। सर्वस्मात् सर्वोत्पत्तिप्रसङ्गादिदोषापातात्, तथा शक्तिशक्यकल्पनेऽन्योन्याश्रयाच्च। अतोऽपि कारणकार्यभावादिकं सर्वं मायामयं, नास्ति नासीन्न भविष्यतीति, अतश्चैतन्यमेवावशिष्यते। चिच्छक्तिः परमेश्वरस्य विमला चैतन्यमेवोच्यते; सत्यैवास्य जडा परा भगवतः शक्तिस्त्वविद्योच्यते। संसर्गाच्च मिथस्तयोर्भगवतः शक्त्योर्जगज्जायतेऽसच्छक्त्या सविकारया भगवतः चिच्छक्तिरुद्रिच्यते। इदं मतं केषांचित् श्रद्धालूनाम्। विदुषां नाभिमतम्। कर्मोपासनाभूमिकायामेव संमतं भवेत्। निर्गुणतत्त्वपरवाक्ये विमृष्टे[3]

1. छां. 6-1-4
2. सं.शा. 3-221
3. 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि इत्येतत्सूत्रानुसारेण विचारे सतीत्यर्थः।

नेष्यते तत्त्वतः । मूर्तामूर्तब्राह्मणोक्तरीत्या[1] सर्वदृश्यद्वैतरहिता चितिः अखण्डानन्दरूपे नित्यशुद्धे परे ब्रह्मणि विश्राम्यति स्वरूपतः । कुतोऽपि हेतोर्जगतः प्रतिषेधः? जगतो जडत्वात् स्वमहिम्ना, न प्रसिद्धः, नापि चेतनमहिम्ना तत्वतः तस्यासङ्गत्वात्, नापि प्रमाणात्, तस्याकारकत्वात्, चिच्चैत्ययोः कृतत्वेऽपि जडत्वमेव, जडभिन्नादनुत्पत्तेश्च संकरो[2] न संभवी, नापि तयोः संयोगः, नापि समवायसंभवः । अतस्तयोः संसर्गे मूलसंबन्धो नास्ति । चिच्चैत्ययोर्योग्यतामात्रेण कश्चित् संबन्धः चेत् तदा तस्या सदनपायात् सदात्मनः संसारप्रसङ्गः । ततोऽपि हेतोर्वियदादिजगत् चैतन्यविवर्त इत्येव युक्तम् अनाद्यविद्यापटलावृतात्मनस्तदुपलभ्यत्वं परिकल्प्यते ।

निरुपाधिचैतन्यमेव संवित्, न तत् प्रमाणफलम्, कूटस्थत्वात् । तत्र भेदो वा तदभावो वा उत्पत्तिविनाशादयः कल्पिता एव । तत्त्वे प्रमाणाभावादिति, अतोऽपि प्रमाणफलसिद्धिसंबन्धाज्जडस्य सिद्धिर्न घटते । अत एव चिज्जडयोरितरेतराध्यास एव, शुक्तिरजतभ्रमवत् । परस्पराध्यासमात्रेण शून्यवाद प्रसङ्गोऽपि न, संसृष्टचैतन्यस्यैवाध्यासेन तद्रूपेण मिथ्यात्वेऽपि स्वरूपतोऽस्य सत्यत्वात् न शून्यवादप्रसङ्गः । अधिष्ठानाधारयोः स्वरूपभेदात् अज्ञानविषयत्वरूपेण अधिष्ठानस्याज्ञातविशेषांशस्याधिष्ठानत्वम् । अध्यस्तसमानाधिकृततया प्रतिभासमानसामान्यांशस्याधारत्वमिति । एवं स्थिते केषांचन पाण्डित्यगर्वादिवान्योन्याध्यासे शून्यवादप्रसञ्जनम् । अतः परं प्रासंगिकं वेदापौरुषेयत्वविचारकरणम् ।[3]

तत्त्वमोर्वाच्यार्थशरीरप्रदर्शनम्

उपाधिः, औपाधिकमान्तरं चिदाभासनम्, चित्प्रतिबिम्बनम् चिद्बिम्बम् इति चत्वारः पदार्थाः तत्पदार्थे । यथा-

---

1. प्रकृतैतावत्वाधिकरण (ब्र.सू. 3-2-22) रीत्या मूर्तामूर्ततदुदितलिङ्गशरीरतद्वासनानां 'नेति नेति' इति वीप्सया निषेधात् ।
2. भेदाभेदयोस्तादात्म्यम् ।
3. सं.शा. 3-240 तः आरभ्य 274 पर्यन्तम् ।

1. तत्र उपाधिः अज्ञानमनादिसिद्धम् ।
2. तत्र चिदाभासनं ईश्वरत्वम् ।
3. चिदाभासान्विता चिदेव चित्प्रतिबिम्बः ।
4. शुद्धचिदेव बिम्बम् ।

तथैव त्वंपदार्थे चत्वारो मिलिताः अर्थाः । यथा-

1. उपाधिः अन्तः करणम् ।
2. तत्र आभासनम् जीवत्वम् ।
3. आभासान्विता चित् चित्प्रतिबिम्बम् ।
4. तदनन्विता चिदेव बिम्बम् ।

एवमुक्तेषु वाच्यार्थांशेषु उपाधिना सह औपाधिकमंशत्रयमपि मिथ्या, शुद्धबिम्बमेव सत्यम् । अत्र जलपात्रेण सह जलपात्रगतत्वम्, जलपात्रगतः सूर्यः[1] एतत्त्रयं मिथ्या, तस्मात् बहिस्थितोऽन्तरिक्षे भास्वरः सूर्यो न शक्यतेऽपन्होतुं यथा, तथैव अज्ञानान्तःकरणाभ्यामुपाधिभ्यां तत्प्रतिबिम्बाच्च बहिस्थितं शुद्धं ब्रह्म लक्षितं नापन्होतुं शक्यम् । निर्विशेषत्वे ''न स्थानतोऽपि''[2] इति सूत्रमेव साधकम् । उपाधितोऽपि यस्य नास्ति तत्त्वतो विशेषः, तस्य स्वतो विशेषो दूरापेत इति तत्परातत्परयोस्तत्परस्यैव प्राधान्यम्, अन्यस्य गुणत्वं, विधिप्राधान्येऽर्थवादानां गुणीभाववत् । तावतार्थवादा विध्यर्थसंकोचासमर्थाः यथा सगुणश्रुतयो निर्गुणश्रुतिगुणीभूता इति, न तदर्थसंकोचन समर्थाः । अतः प्रधानानुगुण्येनान्येषां विषयान्तरं कल्पनीयम् । अद्वैतपरवाक्यानुसारेण विरोधिवचसां गौणत्वं वा, मायाकल्पितद्वैतपरत्वं वा मुख्यमेव वा कल्प्यताम् । उपासनावाक्यानामपि परमात्मनि सर्वगन्धरसादिमयस्वरूपवर्णने[3] कल्पितभेद एवाश्रीयताम्; न तु वैपरीत्येन, तत्परस्य प्राबल्यात् ।

निर्गुणतत्त्वबोध एव पुरुषार्थलाभहेतुः

''अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्''[4] । ''भोक्ता भोज्यं प्रेरितारं च मत्वा... त्रिविधं बह्म, तत्''[5] । इति प्रतिपादितं ब्रह्मतत्त्वम् ।

---

1. प्रतिबिम्बमित्यर्थः ।
2. ब्र.सू. 3-2-11
3. 'सर्वकामः सर्वगन्धः' इति श्रुत्या
4. कठो 1-3-15
5. श्वेता 1-12-

पदार्थमात्रज्ञानं परोक्षमेव भवेत् । अतो महावाक्यादेव जन्यं ज्ञानमपरोक्षं सदज्ञानोच्छेदकरं भवेदिति । वेदाध्यापनसंपादितमहावाक्यं गुरूपदिष्टमर्थतो मोक्षहेतुः नान्यत् । तत्र ''नावेदविन्त मनुते तं बृहन्तम्''[1], ''तं त्वौपनिषदं पुरुषं पृच्छामी''[2]ति श्रुतिद्वयं प्रमाणम् । अत्र वेदपदमुपनिषत्पदं च महावाक्यपरम् । महावाक्यं विना न कस्यापि अद्वैतबोधो भवेत् । अतः पदार्थमात्रावगमात् परोक्षान्न मुक्तिर्घटते । तर्हि वाक्यमेवास्तु किं पदार्थबोधेनेति तु न शंक्यम् । पदार्थबोधं विना वाक्यार्थबोधासंभवेन केवलं वाक्यं अनुभवपर्यवसायिबुद्धिजननेऽसमर्थमिति । अतस्तत्पदार्थः[3] अद्वितीयं चैतन्यम्, त्वंपदार्थः[4] सर्वान्तरं प्रत्यगेव । अद्वितीयं विना प्रत्यक्त्वं[5] न घटते । प्रत्यक्त्वं विना अद्वितीयत्वं न घटत इति तयोरभेद-सिद्धिः । तर्कतस्तदैक्यसाधनेऽपि स्फुटतरार्थनिर्णयो महावाक्यादेव स्वतः प्रमाणात् । अतः तत्र तर्कस्य अङ्गत्वमेव । अनुभवायापरोक्षाय न तर्कः साधनम् । एवं तत्त्वंपदार्थयोः शुद्धयोर्ज्ञानोत्तरं महावाक्यादेव तदैक्यानुभव इति ।

महावाक्यार्थबोधोपयोगीनि अवान्तरवाक्यानि । सकलवेदान्तेषु परापरबोधकेषु सत्सु विवेचनेन केवलपरमात्मपरवाक्येषु अपुनरुक्तपदानि 'सत्यं ज्ञानमनन्तं' 'आनन्द'मित्यादीनि विधिपराणि[6] तथा अशब्दमस्पर्शमित्यादीनि अपुनरुक्तानि ब्रह्मणि अतद्धर्मनिषेधपराणि आविद्यकनिषेधमुखेन परबोधकानि उपसंहर्तव्यानि, तानि विना परिपूर्णार्थाप्रतीतिः । प्रियमोदप्रमोदादीनि चोपचितापचितानि निर्गुणे न जातुचिदपि संभाव्यन्त इति कोशगुणास्त्याज्याः[7] । निषेधवाक्ये आत्मानवबोधनिमित्तस्यैव सर्वस्य पदार्थस्य प्रतिषेधः न तु यस्य कस्यचन भावस्य बोधनेन प्रतिषेधः ।

अन्तरङ्गबहिरङ्गसाधनानि

यद्विहितं कर्म तत् बहिरङ्गसाधनम् । विविदिषोत्पादनद्वारा ज्ञाने परम्परया कारणत्वात्, ज्ञानोत्पादे बहिर्भूतमिति विविदिषामात्रे साक्षात् कारणम् । अन्तरङ्गं तु

1. शाट्या 4 तै.ब्रा. 3-12-9-7
2. बृ. 3-9-26
3. तत्पदलक्ष्यार्थ इत्यर्थः ।
4. त्वंपदलक्ष्यार्थः ।
5. सर्वान्तरत्वं च ।
6. भावस्वरूपपराणीति यावत् । विधिमुखेन परमात्मबोधकानीत्यर्थः ।
7. 'उपचयापचयौ हि भेदे' 'आनन्दादयः प्रधानस्य' इति सूत्रन्यायमवष्टभ्यैवमुक्तिः

परमात्मनो व्यञ्जकमिति यतिना बहिरङ्गयज्ञादिकर्मकारकं त्याज्यम् । तदनुष्ठाने यतिः पतितो भवेत् । तथा व्यञ्जकान्तरङ्गसाधनपरित्यागे च सद्य एव पतितो भवति । अतोऽवश्यमिदमनुष्ठेयम् । तच्च श्रवणादिकं अज्ञानसंशयविपर्ययरूपज्ञान-प्रतिबन्धकनिवर्तनाय, तत्त्वंपदार्थविषयश्रवणादीनामावृत्तिश्च कर्तव्या ।

श्रवणं नाम जिज्ञासितवस्तुबोधनसामर्थ्यरूपतात्पर्यम् । शब्दशक्तिर्या वर्तते, तस्या युक्तितो निरूपणम् । तथा युक्तिभिर्वस्तुवृत्तविषयनिरूपणं मननम् । चेतसश्चैतन्यमात्रशेषताध्यानं यत् तन्निदिध्यासनम् । वार्तिकमतरीत्या निदिध्यासनपदार्थस्तु श्रवणमननबुद्ध्योरुत्पन्नयोर्यत्फलं तदेव, इदमवान्तरफलम्, अपरोक्षानुभवाहिता 'आत्मा ब्रह्मैवे'ति बुद्धिर्भवति, इदं ज्ञानमेव निदिध्यासनम् । ग्रन्थकारस्तु ध्यानं निदिध्यासनमाह । टीकाकारस्तु "ओमित्येवं ध्यायथ आत्मानम्"[1] इति "तस्याभिध्यानाद्योजनात्"[2] इति च श्रुत्यालम्बनेन तत्साक्षात्कारार्थमेव ध्यानमनुष्ठेयमिति मूलाशयमाह । एवं बहिरङ्गानि कर्माणि पूर्वोपचितदुरितानां विद्याप्रतिबन्धकानां निवर्तकानि, श्रवणादीनि तु अज्ञानादिदृष्टप्रतिबन्धकनिवर्तकानि । एवं साधनेऽनुष्ठिते महावाक्याद-प्रतिबन्धमखण्डवाक्यार्थज्ञानं प्रतिबन्धकाभावे इहैव जन्मनि अनुभवपर्यवसायि मोक्षफलकं जायते । प्रतिबन्धकसत्वे तु जन्मान्तरे भवितेति वामदेवाद्युदाहरणेन[3] ज्ञेयमिदं पशुफलकचित्रायागवत्[4] । बहिरङ्गसाधनमपि ईश्वरचरणार्पितमेव अशेषाघनिबर्हकम् । अन्तरङ्गं तु तथेश्वरार्पणबुद्ध्याऽनुष्ठेयम्, किं तु ज्ञानजनने साक्षात्कारणमिति शमदमादिपरमहंसानुष्ठितं दृश्यते । "यत्करोषि यदश्नासि"[5] इत्यादिगीता अत्र मानम् । न तथाऽन्तरङ्गफलसंन्यासेऽर्पणे वा वचनमस्ति । युक्तिश्चात्र, बन्धनहेतुकर्मणः फलान्तरहेतुतया श्रुतत्वात् तथोक्तिः, न तथा शमदमादिकमात्मज्ञानातिरेकेण फलान्तरसाधनतया श्रुतमिति । परिव्राजकस्य श्रवणादिसाधनं विद्योत्पत्तय एव, तदपि कर्मकाले स्थितकर्तृत्वादिबाधनवत् श्रवणादिकर्तृत्वादिबुद्ध्युपमर्दनरूपेण अहमकर्तेत्यनुचिन्तनरूपेण वर्तितव्यं, तदैव विद्याविपाकं व्रजेत् ।

---

1. मु. 2-2-6
2. श्वेताश्व - 1-10
3. 'अहं मनुरभवं सूर्यश्च' इति श्रुत्युक्तोदाहरणेन ।
4. 'चित्रया यजेत पशुकाम' इति विहितो यागः ।
5. भ.गी 9-27

इतराश्रमिणामपि श्रवणाद्यधिकारः । नैष्ठिकब्रह्मचारिगृहस्थवानप्रस्थैरपि कर्मच्छिद्रकाले निषेवितं श्रवणादिकं जन्मान्तरे विद्याविपाके कारणं भवति, न क्वचिदपि शास्त्रे श्रवणाधिकारो निषिद्ध इति, तेषामपि श्रवणादौ समस्त्येवाधिकारः । शूद्रस्य तु वेदमूलकश्रवणं निषिद्धमिति विज्ञेयम् । परिव्राजकस्तु इहैव विद्यापरिपाकमेष्यतीति प्रायेण सर्वश्रुतिस्मृत्यादिषु ज्ञानसाधनेन विमुक्त इति विशेषः । अतो ज्ञानाङ्गतया संन्यासो विहितः । जन्मान्तरे संन्यासपूर्वकं साधनं निर्वृत्तं सकलमाश्रमान्तरे स्थितस्यापि विद्यालाभो भविता । अत्र प्रमाणम् -

अर्थस्य मूलं निकृतिः क्षमा च,
कामस्य रूपं च वयो वपुश्च ।
धर्मस्य यागादिदयादमश्च,
मोक्षस्य सर्वोपरमः क्रियाभ्यः[1] इति ।

चतुर्थाध्यायसंक्षेपः

ज्ञानफलविचारः- ब्रह्मज्ञानस्य अज्ञाननिवृत्तिरेव फलं; तत्र च नास्त्यस्य सहकारिणोऽपेक्षा, इदमपि ब्रह्मज्ञानं प्रमाणम्, नात्र कोऽपि विवादः, तद्विषयो ब्रह्मात्मा चैकरसः नानेकरसः, उपनिषदां तदेकपरत्वात् तथा सति अद्वितीयात्मप्रमाफलं केवलं द्वैतमूलाज्ञानापनोदनं, न ततोऽधिकमस्ति । ईश्वरार्पितकर्मणो निष्कामत्वात् तदप्यत्र तिरस्कृतमिति न तेनाकाङ्क्ष्यते पुनः । न कर्मणा समं विषमं वा समुच्चयो युक्तः, ज्ञानोदयकाले जगत एवाभावात् कुतः कर्म? अतो ज्ञानफले न कर्मसमुच्चयः, त्यक्तसर्वैषणस्यावाप्तविद्याफलस्य कर्मसंभव एव नास्ति, अतो ज्ञानेनैवाज्ञाननिवृत्तिरूपं फलमपवर्गः ।

अविद्यानिवृत्तिः न सती, नासती, न सदसती, नानिर्वाच्या, अपि तु पञ्चमप्रकारेति, तथा च चेतनान्नभिन्ना, नाभिन्ना, न भिन्नाभिन्ना नाप्यनिर्वचनीयेति मुक्तिकोविदाः प्रख्यापयन्ति । सिद्धान्तस्तु ज्ञानोत्तरमवशिष्टचिदेवाज्ञाननिवृत्तिः, न तदतिरिक्ता

उत्पन्नशक्तिमतिरात्मचितिर्यथैव शक्तेस्तमोहतिरिति प्रतिपन्नमेवम् ।
आत्मापिजातनिजबुद्धिरबोधहानिरुच्येत केवलचिदेकरसो न पूर्वम् ॥[2]

---

1. निकृतिः शाठ्यम्, क्रियाभ्य उपरमः सन्यासः ।
2. सं.शा 4-19

प्रमाणाकाङ्क्षितं सर्वत्र प्रमाजन्मैव नान्यत्, एषा मुक्तिरपि कूटस्थनित्यैव वस्तुतः प्रमाणफलभूतायाः संविदः षड्भावविक्रियाशून्यत्वात् प्रागभावध्वंसाद्यनुभवाभावाच्च स्वरूपभूतासंविदविक्रिया, कूटस्थनित्यैव तथा मुक्तिर्जन्येति न घटते, विद्याफलत्वात्, यज्जन्यं तन्न विद्याफलम् यथाऽऽकाशम्, एवं कूटस्थसंवित्स्वरूपमुक्तौ क्रियाया नैष्फल्यात् कर्मसमुच्चयोऽसंभवी । रज्ज्वादितमोनिवृत्तिवद् विद्याफलत्त्वात्तदनुपयोगः । सायुज्यादीनां परममोक्षत्वं नास्ति । विमतं[1], न मोक्षः कार्यत्वात्, यदेवं तदेवं यथा कुड्यघटादि, तथेदम् । तस्मात्तथा, एतद्विसदृशं कार्यं निःश्रेयसं न दृष्टम् । तथा मोक्षस्य सतो वोत्पत्तिः, असतो वा कस्यचित् स्वरूपस्य, उभयथापि तदुत्पत्त्यनुपपत्तिः, न तादृशी । नापि सतोऽसतो वा कस्यचिन्नाशरूपा, सदसतोर्नाशानुपपत्तेः । आविद्यकस्य जन्म न तात्त्विकं, नापि कल्पितम्, ईदृशं न केनापि स्वीकृतं मुक्तिरिति । तथा च सदसतोर्विनाशासम्भवेऽपि तमोमयविश्वविकल्पलयात्मिका हि मुक्तिः ।

सद्यो मुक्तिः

सम्यज्ज्ञानाग्निः समुदितः सन् परमार्थवस्तुबलात् अखण्डाकारविषयत्वमात्रेण वायुव्यापारेण संदीपितः अविद्यातत्कार्यं निरवशेषं दन्दहीति, संसारसंबन्धि किंचिदपि रूपं नावशिष्यते यदा विदुषः तदा सद्यो मुक्तिः । एवं ज्ञानोदयमात्रेण निरवशेषं द्वैतमात्रविनाशे जीवन्मुक्तिशास्त्रस्य कथं प्रामाण्यमिति शंकायां समाधानम् - जीवन्मुक्त इति केवलं कल्पितं तच्छास्त्रं सार्थकमित्युपपत्तेः, सद्यो मुक्तिः ज्ञानोदयमात्रेण निरवशेषसर्वद्वैतनिवृत्तिरिति ।[2]

अथवा जीवन्मुक्तिशास्त्रं विद्वद्विषयं भवतु, तस्य अविद्यालेशसंभवात् । अविद्यालेशस्य ज्ञानोत्तरमसत्वेऽपि विद्यादिनिवर्तकान्तरं विनापि स्वत एव निवृत्तिः । अथवा विद्यासन्ततिरविद्यालेशं निवर्तयति । जीवन्मुक्तिकालीनव्यवहारस्य प्रापकस्तु अविद्यालेशः अविद्यागन्धः, अविद्याछाया, अविद्यासंस्कार इत्यादि शब्दैर्भण्यमानः वस्तुतो नाविद्यारूपः, नापि तदंशरूपः । कुतः, ज्ञानिनो मुक्तस्य

1. सायुज्यादि ।
2. जीवन्मुक्तिशास्त्रमर्थवाद इति टीका । सूत्रभाष्यानारूढमिदमिति भाति ।

सोऽयं दुर्घटः । अतो भाष्यकारीयसिद्धान्ते लेशगन्धछायादिशब्दार्थः बाधिताविद्यायाः प्रतीतिमात्रं, मिथ्यात्वेन गृहीतत्वात् ।

जीवन्मुक्तिरनुभवसिद्धा जीवन्मुक्तिरित्यस्ति, प्रतीतेः, कथं तत्र द्वैतच्छायेति चेत् प्रतीतेरेव, तादृशद्वैतभानानुसारेणाविद्यालेशोऽपि तदनुकूलः स्वीक्रियते, तत्र विद्वदनुभव एव प्रमाणं शरणीकरणीयम् । एवं ज्ञानोत्पत्तौ मोहान्तरायनिवृत्तावपि ब्रह्मात्मत्वरूपविदेहकैवल्यमविद्यालेशानुवृत्तेः सान्तरायं भवति । अतो जीवन्मुक्तो विद्वान् प्रारब्धभोगपर्यन्तं स्थित्वा तमोलेशानुवृत्तं भोगं समाप्य अन्ते आत्यन्तिकं कैवल्यमाप्नोति ।

ब्रह्मविद्याया मोक्षे न गत्यपक्षा, तथाहि, निर्गुणब्रह्मविद्याया मोक्षे नार्चिरादिगतिरपेक्षिता, ब्रह्मादिजीवानां[1] लोकान्तरस्थानां मुक्तिः श्रूयते, तेषां गतिरेव न सुवचा, तत्र नापेक्ष्यते च । मूर्धन्यया नाड्या प्राणोत्क्रान्तिर्नैषां ब्रह्मविदामस्ति । अतो गत्युत्क्रान्ती सगुणविद्यावतामेव । एवं देवादीनां कर्माधिकाराभावात् केवलविद्यैव मुक्तिहेतुः, तथा च न समुच्चयवादः सम्यक्, कर्मणां विद्याङ्गत्वं तु परंपरया सर्वेषां वर्णाश्रमाणाम् इति शम् ।

✣ ✣ ✣

1. हिरण्यगर्भप्रभृतीनामित्यर्थः ।

संकेताक्षरविवरणम्

1.	जै.सू.	जैमिनिसूत्रम्
2.	बृ.	बृहदारण्यकम्
3.	मु.	मुण्डकोपनिषत्
4.	मु.शां.भा.	मुण्डकोपनिषच्छांकरभाष्यम्
5.	तै.शां.भा.	तैतिरीयोपनिषच्छांकरभाष्यम्
6.	तै.वा.	तैत्तिरीयवार्तिकम्
7.	ब्र.सू.	ब्रह्मसूत्रम्
8.	सू.भा.; ब्र.सू.शां.भा	सूत्रभाष्यम्, ब्रह्मसूत्रशांकरभाष्यम्
9.	ऋ.सं.	ऋग्वेदसंहिता
10.	श्वेता; श्वेताश्व.	श्वेताश्वतरोपनिषत्
11.	म.भा.	महाभारतम्
12.	म.त.मु.म.	मध्वतन्त्रमुखमर्दनम्
13.	वि.पु.	विष्णुपुराणम्
14.	तै.सं.	तैत्तिरीयसंहिता
15.	बृ.भा;, बृ.शां.भा.	बृहदारण्यकशांकरभाष्यम्
16.	ईशा; ईशावा	ईशावास्योपनिषत्
17.	केनो.	केनोपनिषत्
18.	प्रश्नो.	प्रश्नोपनिषत्
19.	मां.	माण्डूक्योपनिषत्
20.	तै; तै.उ.	तैत्तिरीयोपनिषत्
21.	शां. भा	शांकरभाष्यम्
22.	छां. शां.भा.	छान्दोग्यशांकरभाष्यम्
23.	कठ, कठो,	कठोपनिषत्
24.	छा.	छान्दोग्योपनिषत्

25.	महाना.	महानारायणोपनिषत्
26.	गौ.सू.	गौतमसूत्रम्
27.	वै.सू.	वैशोषिकसूत्रम्
28.	नै.सि.	नैष्कर्म्यसिद्धिः
29.	न्या. मं.	न्यायमञ्जरी
30.	वि.प्र.सं.	विवरणप्रमेयसंग्रहः
31.	भ.गी.	भगवद्गीता
32.	मा.र.श्लो.वा.	मानमेयरहस्यश्लोकवार्तिकम् ।
33.	श्लो. वा.	श्लोकवार्तिकम्
34.	गौ. का.	गौडपादकारिका
35.	सां. का.	सांख्यकारिका
36.	तै.भा.	तैत्तिरीयभाष्यम्
37.	वा.भा.	वात्स्यायनभाष्यम्
38.	तै. वा.	तैत्तिरीय वार्तिकम्
39.	का.मी.	काव्यमीमांसा
40.	शा.भा.	शाबरभाष्यम्
41.	बृ.वा.	बहदारण्यकवार्तिकम्
42.	उप.सा.	उपदेशसाहस्री
43.	पं.द.	पंचदशी
44.	मां.भा.	माण्डूक्यभाष्यम्
45.	मां.शं.वि.	माधवीयशंकरविजयम्
46.	सं.वा.	संबन्धवार्तिकम्
47.	सि.ले.सं.	सिद्धान्तलेशसंग्रहः
48.	वा.सा.	वार्तिकसारः
49.	ब्र.सि.	ब्रह्मसिद्धिः
50.	पु.सू.	पुरुषसूक्तम्

51.	कूर्म.	कूर्मपुराणम्
52.	सि.बिं.	सिद्धान्तबिन्दुः
53.	सं.शा.	संक्षेपशारीरकम्
54.	पं.पा.	पंचपादिका
55.	ब्र.बिं.	ब्रह्मबिन्दूपनिषत्
56.	गी.भा	गीताभाष्यम्
57.	भा.	भामती
58.	तै.ब्रा.	तैत्तिरीयब्राह्मणम्
59.	ऐत.	ऐतरेयोपनिषत्
60.	पा.सू.	पाणिनीयसूत्रम्
61.	शाट्या.	शाट्यायनोपनिषत्
62.	वे.क.	वेदान्तकल्पतरुः
63.	द्र.	द्रष्टव्यम्

सहायकग्रन्थसूची

क्रं. संख्या	ग्रन्थनाम	ग्रन्थकर्तृनाम	प्रकाशनस्थानम्	वर्षम्
1)	जैमिनिसूत्रम्	महर्षिजैमिनिः	Tara Printing works, Varanasi	1984
2)	अनुभूतिप्रकाशः	विद्यारण्यः	Nirnaya Sagar press	1926
3)	गौतमसूत्रम् (वात्स्यायन-भाष्यसहितम्)	गौतमः	E.J. Lazarus & Co. Banaras	1896
4)	न्यायमञ्जरी	जयन्तभट्टः	Chowkamba Sanskrit series, Varanasi	1971
5)	सांख्यकारिका	ईशकृष्णः	Sri Rama Press	1987
6)	अद्वैतसिद्धिः	मधुसूदनसरस्वती	Parimala Publications, New Delhi	1982
7)	सिद्धान्तलेशसंग्रहः	अप्पय्यदीक्षितः	Appayya Dekshitendra Granthavali Prakasana Samiti, Secundarabad	1973
8)	नैकर्म्यसिद्धिः (चन्द्रिकासहिता)	सुरेश्वराः	Bandarakar Oriental research institute, Poona	1925
9)	ब्रह्मसिद्धिः (शङ्खपाणिटाकासहिता)	मण्डनमिश्रः	Madras Govt. Oriental Manuscript series	1937
10)	पञ्चपादिका	पद्मपादः	Madras Govt. Oriental Manuscript series	1958
11)	पञ्चपादिकाविवरणम्	प्रकाशात्मा	Madras Govt. Oriental Manuscript Series	1958
12)	संक्षेपशारीरकम्	सर्वज्ञात्मा	Anandasrama Press	1918
13)	सिद्धान्तबिन्दुः	मधुसूदनसरस्वती	Mahesh Research institute, Varanasi	1978
14)	माधवीयशंकरविजयम्	विद्यारण्यः	Sarada Gaurava Granthamala Sringeri	1970
15)	उपदेशसाहस्री	श्रीशंकराचार्याः	Mahesh Research institute, Varanasi	1978

क्रं. संख्या	ग्रन्थनाम	ग्रन्थकर्तृनाम	प्रकाशनस्थानम्	वर्षम्
16)	वार्तिकसारः	विद्यारण्यः	Chowkamba Sanskrit Series	1915
17)	पंचदशी	विद्यारण्यः	Chowkamba Sanskrit Series	1918
18)	श्लोकवार्तिकम्	कुमारिलभट्टः	University of Madras	1971
19)	वैशेषिकसूत्रम्	कणादः	The gujarati Printing Press, Bombay	1969
20)	प्रशस्तपादभाष्यम्	प्रशस्तदेवः	Chowkamba Sanskrit Series, Varanasi	1930
21)	महाभारतम्	व्यासः	Bandarkar Oriental Research institute, Poona	1961
22)	रामायणम्	वाल्मीकिः	Gujarati Printing Press, Bombay	1912
23)	बृहदारण्यकवार्तिकम्	सुरेश्वराचार्याः	Anandasrama Press, Poona	1894
24)	सूत्रभाष्यम् (न्याय निर्णय-भामतीसहितम्)	शंकराचार्याः	Motilal Banarasidas, Delhi	1890
25)	तैत्तिरीयवार्तिकम्	सुरेश्वराचार्याः	Mahesh Research institute, Varanasi	1979
26)	गौडपादकारिका (शांकरभाष्ययुक्ता)	गौडपादाः	Mahesh Research institute, Varanasi	1979
27)	ऋक्संहिता	-	Sri Govinda Deekshita Punya Smarana Samiti Kumbakonam	1979
28)	भगवद्गीता	-	Indological Book House, Delhi	1983
29)	न्यायमालाविस्तरः	माधवाचार्यः	Chowkamba Sanskrit Series	-
30)	श्रीकण्ठभाष्यम्		Oriental Research institute, Mysore	-

क्रं. संख्या	ग्रन्थनाम	ग्रन्थकर्तृनाम	प्रकाशनस्थानम्	वर्षम्
31)	ईशाद्यष्टोत्तरशतोपनिषदः	-	Nirnaya Sagar Press, Bombay	1925
32)	उपनिषद्भाष्यम् Part I	श्री शंकराचार्याः	Mahesh Research institute, Varanasi	1979
33)	विवरणप्रेमयसंग्रहः	विद्यारण्यः	Achyuta Granthmala Karyalaya Varanasi	1939
34)	गौडपादीयागमशास्त्रम् (संस्कृते)	विधुशेखरभट्टाचार्यः	University of Calcutta	1950
35)	दर्शनोदयः	लक्ष्मीपुरं श्रीनिवासाचार्यः	Govt. Branch Press Mysore	1933
36)	कल्पतरुः	अमलानन्दः	Chowkamba Sanskrit Series, Varanasi	1982
37)	काव्यमीमांसा			
38)	मानमेयरहस्य-श्लोकवार्तिकम्	लक्ष्मीपुरं श्रीनिवासाचार्याः	Mysore Rajakeeyashakha Press	1925
39)	मध्वतन्त्रमुखमर्दनम्	अप्पय्यदीक्षितः	Anandasrama press	1861
40)	चरणव्यूहः	शौनकः	Vivek Publications, Aligush	1978
41)	अष्टोत्तरशतोपनिषदः			
42)	विष्णुपुराणम्			

An ideal Philosopher does not seek name or fame. This is absolutely true of K. Krishna Jois whose deep humility often disguises his lofty wisdom. Kodur Krishna Jois was born at Sringeri as the first son of late Sri Kodur Subba Jois and Smt. Sheshamma on 1-8-1912. He had his early traditional education at the famous Sadvidya Sanjeevini Pathasala at Sringeri founded by His Holiness Sri Abhinava Narasimha Bharati, the thirty second pontiff of Sharada Peetham, the famous religious and philosophical centre of Adi Shankara. After completing his early education, Sri Krishna Jois proceeded to Maharaja Sanskrit College, Mysore to study various Śastras such as Pūrva Mīmamsa, Tarka and Alankāra. Then he got an opportunity to further his studies at Bharatīya Geervana Vidyabhivardhini Pathasala Bangalore an institute of Sringeri Mutt for higher studies in the field of philosophy. He specialised in Advaita Vedanta and secured the coveted title **Pandita Pravara** from His Holiness Sri Chandrasekhara Bharati the thirty third pontiff of Sringeri Peetham.

The intellectual world was eagerly awaiting the arrival of erudite scholar. He started his scholarly career at Adhyatma Prakasha Karyalaya, Holenarsipur which was buzzing with the propagation of Vedantic knowledge through translation. After four years this ardent follower of Sri Shankara became an Asthana Vidvan of Sringeri Sharada Peetham and also started to teach Alankāra and Vedanta at Sringeri. Recognising his talent in Vedanta the then peethadhipati of Sringeri His Holiness Sri Chandrasekhara Bharati Swamiji appointed him as Professor to teach Vedanta in the pathasala at Bangalore in the year 1959. From then onwards, he taught and trained many students in Vedanta. The editor of this book is fortunate enough to study vedanta under him. In addition to writing and teaching he had participated in various vākyartha sabhās at **Sringeri, Delhi, Varanasi, Trivandrum** and other places. He is a prolific writer in Sanskrit and Kannada. His works in Sanskrit are **Mūlavidyā Bhāṣyavārtika Sammata, Śarannavarāthra Çampū** and **Śankara Darśana Marmaprakāśa**, and in Kannada **Sambandha Vartika, Dharmaśāstra Karadīpika, Translation of Daśaśloki, Viveka Çūdamaṇi** and **Gītātātparya Nirṇaya** etc. Among these **Sambandha Vārtika** which was published by Sringeri Sharada Peetham, under the patronage of the late Jayachamaraja Wadeyar, the former Maharaja of Mysore, which deserves special mention. He is a true vedāntin who leads a simple life. He received many titles such as **Pandita Pravara, Vedānta Bhūṣaṇa** etc. and also received the **Karnataka State Award** on 7-12-1988 and received the **Certificate of Honour** from the President of India on 25-3-1989 in recognition of his profound knowledge in Śastras. His authority over the **Prasthānatraya Bhāṣya** is unquestionable. Even now at the age of 84 he is nothing but an encyclopaedia of Vedānta and an inspiration to others.